तंत्रसार अनुक्रमणिका

१ पत्र ----
१ गुरुलक्षणं
१ शिष्यलक्षण
२

३ पत्र -----
१ मंत्रग्राह्यविचारः

४ पत्र ------
१ कुलाकुलविचारः
१ रासीचक्रं
१ नक्षत्रचक्रं

५ पत्रे ------
१ [illegible]चक्रं

६ पत्र ------
१ ऋडमचक्रं
१ रणधरचक्रं
२

७ पत्रे ------
१ दीक्षाकालमा
१ चारणियमा

८ पत्रे ------
१ तीर्थिनीयेम
१ नक्षत्रनिर्णय
१ योगनिर्णय
१ कर्णनिर्णय

पत्र ------
१ मालानीतवि
१ करमालाविधी
१ वर्णमाला

पत्रे ----
१ [illegible]भेदाः
१ मालासंस्कार
२

१४ पत्र
१ पुरःचरणस्तुता

१५ पत्रे ------
१ वर्ज्यादिनेम:
१ [illegible]

२२ पत्रे ------
१ मुद्रणपुरश्चरण
संकल्पः ---
१ कूर्मचक्रं ---

२३ पत्रे ------
१ मंत्राणांदशसंस्कारः ---

२४ पत्रे ------
१ कुलावृत्तिदिक्षा
प्रयोगः ---

२५ पत्रे ------
१ पंचायतनचक्रं

३५ पत्रे ------
१ [illegible]दिक्षा
१ [illegible]

३७ पत्रे ----
१ गौरीतिमुद्रा
१ सामान्यपु
पयति

३८ पत्रे ----
१ संध्याश्रये

पत्रे ----
१ स्नानविधि

४ पत्रे ----
१ [illegible]
[illegible]
पयंते ---

४५ पत्रे ---
१ अंतरना[illegible]

पत्रे
१ प्राणायामः
१ पीठन्यासः
पत्रे
तीसामान्यपूजापधति
पत्रे
१ मातृकान्यास
पत्रे
१ भुवनेश्वरीमंत्रः
१ अन्नपूर्णा
पत्रे
१ त्रीपुरामंत्रः
पत्रे
१ नीत्यामंत्रः
पत्रे
१ वज्रप्रस्तारिणि मंत्र
६१ पत्रे
१ दुर्गामंत्रा
६३ पत्रे
१ अथमहीशमर्द
नी
६४ पत्रे
१ जयदुर्गामंत्रा
१ शुलीनिदुर्गामंत्रः
६५ पत्रे
१ वागेश्वरीमंत्रः
१ मंत्रन्यासः
६८ पत्रे
१ अथपारीजातस
रवतिमंत्रः
७२ पत्रे
१ लक्ष्मीमंत्रः
७६ पत्रे
१ गणेशमंत्रः
७७ पत्रे
१ हेरंबमंत्रः
७८ पत्रे
१ हरिद्रागणप
तीमंत्रः

-2-

तंत्रसार

॥श्रीगणेशाय नमः॥ ॥श्रीसांबशिवाय नमः॥ ॥नत्वा रुक्मपदद्वंद्वं अस्मादी
श्वरवंदितं॥ गुरुं च ज्ञानदातारं रुक्मानंदेन धीमता॥१॥ नतग्रंथगता ह्याख्यान्नानोपं
प्रतिपद्य च॥ लोकार्थाय च संक्षेपात् तंत्रसारं प्रतन्यते॥२॥ ॥अथ गुरुलक्षणं॥
शांतो दांतो कुलीनश्च विनीतः शुद्धवेषवान्॥ शुद्धाचारप्रतिष्ठश्च शुचिर्दक्षः सुबुद्धि
मान्॥१॥ आश्रमी ध्याननिष्ठश्च तंत्रमंत्रविशारदः॥ निग्रहानुग्रहे शक्तो गुरुरित्यभि
धीयते॥२॥ ॥अथ शिष्यलक्षणं॥ ॥शांतो विनीतः शुद्धात्मा श्रद्धावान् धारणा
क्षमः॥ समर्थश्च कुलीनश्च प्राज्ञः सच्चरितो कृती॥१॥ एवमादिगुणैर्युक्तः शिष्यो भ
वति नान्यथा॥ गुरुता शिष्यता वापि तयोर्वत्सरवासतः॥२॥ सारसंग्रहे पि॥ ॥सद्गुरु
राश्रितं शिष्यं वर्षमेकं परीक्षयेत्॥ स्वप्ने तु कालनियमः स्वप्ने तु नियमो न हि॥३॥ नार
दवचनात्॥ तत्रैव॥ राज्ञि चामात्यजा दोषाः पत्नीपापं स्वभर्तरि॥ तथा शिष्यार्जितं पापं

४

गुरुः प्राप्नोति निश्चितं॥१॥ देव्यागमे शिववाक्यं॥ गुरुशय्यासनं यानं पादुकोपानपीठ
कं॥ स्नानोदकं तथा छायां लंघयेन्न कदाचन॥१॥ गुरोरग्रे पृथक् पूजां नाद्वैतं च विवर्ज
येत्॥ दीक्षां व्याख्यां प्रभुत्वं च गुरोरग्रे परित्यजेत्॥२॥ ॥इति शिष्यलक्षणं॥ ॥तथा
योगिनीतंत्रे॥ पितृमंत्रं न गृह्णीयात् तथा मातामहस्य च॥ सोदरस्य कनिष्ठस्य वैरिपक्षा
श्रितस्य च॥१॥ तथा गणेशविमर्शिन्यां॥ यतिदीक्षा पितुर्दीक्षा दीक्षा च वनवासिनः॥ वि
रक्ताश्रमिणो दीक्षा न ताः कल्याणदायिका॥२॥ इत्यादिनिषेधवचनादेभ्यो मंत्रं न गृह्णीया
त्॥ इदं च सिद्धविषयं॥ सिद्धमंत्रेतरद्दुष्यतीति वचनात्॥ तथा च सिद्धयामले॥ यदि भा
ग्यवशेनैव सिद्धविद्यां लभेत् प्रिये॥ तथैव तां तु दीक्षेत मंत्रस्य गुरुविचारणं॥१॥ तथा॥
प्रमादाच्च तथाज्ञानात् पितुर्दीक्षां समाचरेत्॥ प्रायश्चित्तं ततः कृत्वा पुनर्दीक्षां समाच
रेत्॥२॥ ॥पितृदिक्षुपक्षलक्षणं॥ ॥मातामहादीनां च प्रायश्चित्तं तु अयुतं सावित्रीजपः
सर्वत्र तथा दर्शनात्॥ तथा च मत्स्यसूक्ते॥ निर्वीर्यं च पितृमंत्रं शैवे शाक्ते न दुष्यतीति॥

५

कौलिकमंत्रदीक्षापरं ॥ योगिनीतंत्रे ॥ शक्तिविद्यामधिकृत्य दीक्षानिषेधात् ॥ यच्चाशक्तेत
रादिविद्यायां मातृस्मरणे तथा प्रतिपादनात् ॥ तथा च निरुक्तकुलतिलकाय स्नेहपुत्राय दद्यात्
महातीर्थे उपरागे सति सर्वत्र न दोषः ॥ तथा विष्णुमंत्रमधिकृत्य साधकेन्द्र तंत्रयामले
वृद्धासि सकलं तत्त्व ॥ ब्रह्मणा कथितं पूर्वं वसिष्ठाय महात्मने ॥ वसिष्ठोपि स्वपौत्राय यत्तदपि
त्रेदत्तवान् स्वयं ॥ प्रसन्नो हृदयः स्वस्थः पितामेकरुणानिधिः ॥ कुरुक्षेत्रे महातीर्थे सूर्यप
र्वणि दत्तवान् ॥ ॥ इत्यादि वैशम्पायनसंहितायां शौनकं प्रति व्यासवचनं ॥ ॥ योगि
नीतंत्रे ॥ निर्वीर्यं च पितुर्मंत्रं तथा मातामहस्य च ॥ स्वप्नलब्धं स्त्रिया दत्तं संस्कारेणैव शु
ध्यति ॥ यत्तु ॥ साध्वी चैव सदाचारा गुरुभक्ता जितेन्द्रिया ॥ सर्वमंत्रार्थतत्त्वज्ञा सुशीला पूज
ने रता ॥ गुरुयोग्या न वेशा हि विधवा परिवर्जिता ॥ स्त्रियो दीक्षाः शुभाः प्रोक्ताः मातुश्चा
ष्टगुणा स्मृता ॥ इदं तु गुरोरुपासितमंत्रपरं ॥ तथा च भैरवतंत्रे ॥ स्त्रीयमंत्रोपदेशे तु
न कुर्यात् गुरुचिंतनं ॥ मातुरिति उपासिते अष्टगुणं अनुपासिते अष्टनष्टफलदमित्यर्थः ॥

६

सिद्धमंत्रविषयं वा इति केचित् ॥ वस्तुतस्तु योगिनीतंत्रे ॥ स्त्रीपदं विधवापरं एवं चास्य
स्यात् ॥ स्वप्नलब्धे च कलशे गुरोः प्राणं निवेदयेत् ॥ वटपत्रे कुंकुमेन लिखित्वा ग्रहणं
शुभं ॥ ततः शुद्धिमवाप्नोति अन्यथा विफलं भवेत् ॥ इदं तु सद्गुरोरभावे तत्संभवे तस्मादे
...नादीयात् ॥ स्वप्ने तु नियमो नास्तीति नारदवचनात् ॥ दीक्षां विनाऽजपस्य दुष्टत्वात् ॥ प्रथ
...ध्यता न वतो दद्यात्कुर्यात्पापस्य दर्शनं तथे ॥ तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तंत्रवे
दिभिः ॥ सर्वाश्रमेषु दीक्षायां आवश्यकत्वं ॥ तथा च दीक्षामूलं सर्वं दीक्षामूलं परं तपः ॥ दी
क्षामाश्रित्य निवसेद्यत्र कुत्राश्रमे वसन् ॥ अदीक्षिता ये प्रकुर्वंति जपपूजादिकाः क्रियाः ॥
न भवंति प्रिये तेषां शिलायामुप्तबीजवत् ॥ देवि दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः ॥
तस्मात्सर्वप्रयत्नेन गुरुणा दीक्षितो भवेत् ॥ अदीक्षितोपि मरणे रौरवं नरकं व्रजेत् ॥ त
स्माद्दीक्षा प्रयत्नेन सदा कुर्याच्च तांत्रिकात् ॥ कस्मैचिद्दत्तमंत्रं वै योग्यतातिनराधमः ॥
मन्वंतरसहस्रेषु निष्कृतिर्नैव जायते ॥ नादीक्षितस्य कार्यं स्यात्तपोभिर्नियमव्रतैः ॥ (

८

नतीर्थगमनेनापि न च शारीरयंत्रणैः ॥ अतः सद्गुरोरहितदीक्षः सर्वकर्माणि साधयेत्
तत्राप्यनुकूलं मंत्रं दीक्षेत् ॥ तथा च ॥ स्वभावदेशिकोष्ठानामनुकूलान्मनून्नयेत् ॥ ॥ त
था वाराहीतंत्रे ॥ तारा चक्रं राशिचक्रं नामचक्रं तथैव च ॥ अथ चैकं कुलाकुलं मंत्रो नाम्नश्चकं
विचारयेत् ॥ इति तु प्रधानतया बोद्धव्यं ॥ तथा च ॥ धनिमंत्रं न गृह्णीयात् अकुलं हितये
य च ॥ इत्यादिदर्शनात् ॥ तत्र चक्रविचारस्यावश्यकत्वात् प्रथमं तन्निरूप्यते ॥ तत्रैव
नृसिंहार्कवराहाणां प्रासादप्रणवस्य च ॥ सपिंडाक्षरमंत्राणां सिद्धादीन्नैव शोधयेत् ॥
...चैकाक्षरे मालामंत्रे च बह्वक्षरे ॥ वैदिकेषु च सर्वेषु सिद्धादीन्नैव शोधयेत् ॥
...मंत्रस्य सिद्धादीन्नैव शोधयेत् ॥ हंसस्याहाक्षरस्यापि तथा पंचाक्षरस्य च ॥
...वाग्भवादिबीजस्य सिद्धादीन्नैव शोधयेत् ॥ एकाक्षरस्य मंत्रस्य मालामंत्रस्य पार्वति
...कूटस्य च मंत्रस्य सिद्धादीन्नैव शोधयेत् ॥ मालामंत्रस्तु वाराहीये ॥ विंशत्यर्णाधिकानं
त्राः मालामंत्राः प्रकीर्तिताः ॥ इत्यादिवचनादिषु विचारो नास्ति ॥ वस्तुतस्त्विदं प्रशंसा

परं ॥ सर्वत्र विचारस्यावश्यकत्वं दुरदृष्टवशात् ॥ कदाचित् वैरिमंत्रस्य स्वप्नादौ प्राप्तत्
त...दीक्षस्य दृष्टत्वादिति तु सांप्रदायिकाः ॥ तत्र कुलाकुलस्य चेदं हि वसानि मंत्रिणां निहि ॥
लिखं यो ॥ वाय्वग्निभूजलाकाशाः पंचाशल्लिपयः क्रमात् ॥ पंचह्रस्वाः पंचदीर्घा बिंदुतास
धिसंधयः ॥ कादयः पंचशः पश्चात् सहांताः समीरिताः ॥ अ आ ए क च ट त प य षा मारुताः
इ ई ऐ ख छ ठ थ फ र क्षा आग्नेयाः ॥ उ ऊ ओ ग ज ड द ब ल सा पार्थिवाः ॥ ऋ ॠ औ घ झ ढ ध भ व सा
वारुणाः ॥ ऌ ॡ अं ङ ञ ण न म स हा नभसाः ॥ साधकस्याद्यरं पूर्वं मित्रस्यापि तदाहरं ॥
यथैकमृतदैवस्यं ज्ञानीयात्स्वकुलं हितं ॥ व्योमस्य वारुणं मित्रं आग्नेयस्यापि मारुतं ॥ मा
रुतं पार्थिवानां च आग्नेयस्यां सर्वे रिपुः ॥ नाभसं सर्वमित्रं स्यात् विरुद्धं नैव शीलयेत् ॥
॥ इति कुलाकुलविचारः ॥ ॥ अथ राशिचक्रं ॥
पार्थिवानां चेति चकारादाग्नेयं च ॥
अ आ इ ई मेषः ॥ उ ऊ ऋ वृषः ॥ ॠ ऌ ॡ मिथुनः ॥ ए ऐ कर्कटः ॥ ओ औ सिंहः ॥ अं अः श ष स ह
ळं कन्या ॥ कवर्गस्तुला ॥ चवर्गो वृश्चिकः ॥ टवर्गो धनुः ॥ तवर्गो मकरः ॥ पवर्गः कुं

नः॥ पवर्गो ज्ञानः॥ स्वराशीनामनुकूलं भजेत्॥ तथा च स्वजातवतराशिकोष्ठानामनुकूलान्
भजेन्मन्त्रानिति वचनात्॥ राशीनां क्रूरता ज्ञेया त्यजेच्छत्रुं मृतिं व्ययं॥ स्वराद्येपंतत्रराद्यपंते
गणनीयं विचक्षणैः॥ यदा तु स्वराशेर्वर्तमानं तदा साधकनाम्नाद्यक्षरस्य बंधिनं राशिं गृ
हीत्वा गणयेत्॥ साध्याद्यक्षरराद्यपंतं गणयेत् साधकाद्यक्षरादिति रामार्चनचंद्रिकायां॥
एकपंचनवबांधवाः स्मृताः द्वौ षट् दश मास्वसेवकाः॥ वह्निरुद्रमुनयश्च पोषका द्वा
दशाष्टचतुरष्टघातकाः॥ चतुरष्टघातकेति विलुविषयं॥ रामार्चनचंद्रिकायां ध्रुतत्वा
[illegible]स्थादौ तु षट्वर्जनीयं॥ षष्ठाष्टमद्वादशा निवर्जनीया नीति वचनात्॥ अथ लग्नो
धनं भ्रातृबंधुपुत्रशत्रुकलत्रकाः॥ मरणं धर्मकामायव्ययाद्वादशराशयः॥ वैष्णवे
[illegible]स्तु रुद्रात्रे बंधुस्थितिपाठः॥ तथा च तंत्रराजे॥ तेन मंत्रा ध्रुवं [illegible] नाम्नाद्याक्षरेण च
[illegible] दि षष्ठं वाष्टमं द्वादशं तु वा॥ रिपुमंत्रादिवर्णस्थानेन तस्याहितं भवेत्॥
इति रा[शि]चक्रं॥ ॥अथ नक्षत्रचक्रं॥ ॥अश्विनी अश्वनी देव॥ २ २ भरणी मनुष्यः

३ कृत्तिका राक्षस॥ ४ रोहिणी मानुष॥ ५ मृगशिरो देव॥ ६ आर्द्रा मानुषः
[illegible] ७ पुनर्वसु देव॥ ८ पुष्य देव॥ ९ आश्लेषा राक्षस॥ १० मघा राक्षस॥ ११ पूर्वा
फाल्गुनी मानुष॥ १२ उत्तराफाल्गुनी मानुष॥ १३ हस्त देव॥ १४ चित्रा राक्षस॥ १५
स्वाती देव॥ १६ विशाखा राक्षस॥ १७ अनुराधा देव॥ १८ ज्येष्ठा राक्षस॥ १९ मूल
राक्षस॥ २० पूर्वाषाढा मानुष॥ २१ उत्तराषाढा मानुष॥ २२ श्रवण देव॥ २३ धनिष्ठा रा
क्षस॥ २४ शततारका राक्षस॥ २५ पूर्वाभाद्रपद मानुष॥ २६ उत्तराभाद्रपदा मानुष॥
२७ रेवती देव॥ तथा च निबंधे॥ पूर्वोत्तरत्रयं चैव तथा रण्यार्द्रा रोहिणी॥ इ
मानि मानुषाण्याहुर्नक्षत्राणि मनीषिणः॥ शततारा मूलाधनिष्ठाश्लेषकृत्तिका
चित्रा मघा विशाखास्तु स्मृता वारा राक्षसदेवताः॥ अश्विनी रेवती पुष्यः स्वाती हस्तः पुन
र्वसुः॥ अनुराधा मृगशिरः श्रवण देवतारकाः॥ तथा च॥ स्वजातौ परमा प्रीतिर्मध्य
मा भिन्नजातिषु॥ रक्षोमानुषयोर्नाशो वैरं दानवदेवयोः॥ जन्मसंपद्विपत्क्षेमप्रत्यरि

साधकोपधं॥ मित्रं परममित्रं च जन्मादीनि पुनः पुनः॥ तस्मात्तृतीयपंचसप्तमानि यत्नतो
यानि नक्षत्राणि॥ तथा च रत्नसागरे नक्षत्राणि युग्मयुग्मगतान्यपि॥ इतराणि नक्षत्राणि इ
त्यादि नक्षत्रादेव नक्षत्रं गणनीयं॥ स्वनक्षत्रतो नैनामाद्यक्षरसंबंधिनक्षत्रादेव नक्षत्रं
गणनीयमिति प्रादक्षिण्येन गणयेत्॥ साधकाद्यक्षरान्नसुधीः॥ ॥इति नक्षत्रचक्रं॥ ॥
अथाकथहचक्रं॥ ॥चतुरस्रे लिखेद्वर्णान् चतुष्कोष्ठसमन्विते॥ चतुष्कोष्ठे षोडशकोष्ठ
इति यावत्॥ तदुक्तं तंत्रराजे॥ प्राक्पश्चाद्दक्षिणोदक्च सूत्रपंचकयोगतः॥ कोष्ठानि
षोडशैवं स्युस्तेषु वर्णान् लिखेत् क्रमात्॥ तत्र षोडशकोष्ठेषु अकारादिवर्णान् प्रादक्षिण्येन लि
खेत्॥ तत्क्रमः॥ इंद्र१ अग्नि३ रुद्र११ नव९ नेत्र२ युग४ इन१२ दिक्षु१० चतुर्दश१४ ऋत्व६
ष्ट८ षोडश१६ भौतिकेषु५॥ पाताल७ पंचदश१५ वह्निहिमांशु१३ कोष्ठे वर्णान् लिखेत्॥
लिपिज्ञवान् क्रमतस्तु धीमान्॥ नामाद्यक्षरमारभ्य यावन्मंत्रादिमाक्षरं॥ चतुर्भिः कोष्ठै
रेकैकमिति कोष्ठचतुष्टयं॥ पुनः कोष्ठगकोष्ठेषु सव्यतो नामाद्यमादितः॥ सव्यतो दक्षिण

तः॥ तथा च विश्वसारे॥ ॥दक्षिणावर्तयोगेन कोष्ठे वर्णान् लिखेत् क्रमात्॥ येनैव लि
खितं कुर्यात्तेनैव गणनं स्मृतं॥ सिद्धसाध्यसुसिद्धारिः क्रमात् ज्ञेया विचक्षणैः॥ सिद्धि
सिद्ध्यति कालेन साध्यस्तु जपहोमतः॥ सुसिद्धो ग्रहमात्रेण रिपुर्मूलं निकृंतति॥ तंत्रराजे॥
सिद्धार्णो बांधवः प्रोक्तः साध्यः सेवक उच्यते॥ सुसिद्धः पोषको ज्ञेयः शत्रुर्घातक उ
च्यते॥ रूपेन बंधुः सिद्धिः स्यात् सेवको ऽधिकसेवया॥ पुष्णाति पोषकः शत्रुर्घातको नाश
येद्ध्रुवं॥ कोष्ठगकोष्ठेषु सिद्धादीनां फलान्याह॥ सिद्धसिद्धो यथोक्तेन द्विगुणात् सिद्धसाध
कः॥ सिद्धसुसिद्धोर्धजपात् सिद्धारिर्हंति बांधवान्॥ साध्यसिद्धो द्विगुणकः साध्यसाध्यो
निरर्थकः॥ तत्र सुसिद्धो द्विगुणजपात् साध्यारिर्हंति गोत्रजान्॥ सुसिद्धसिद्धोर्धजपात्तत्
साध्यो द्विगुणाधिकात्॥ तत्सुसिद्धो ग्रहादेव सुसिद्धविघ्नगोत्रहा॥ अरिसिद्धस्तु तान् हन्ता
न्त्यरिसाध्यस्तु कन्यका॥ तत्सुसिद्धस्तु पत्नीघ्नः तदरिर्हंति साधकं॥ ॥इत्यकथहच
क्रं॥ ॥अथाकडमचक्रं॥ ॥रेखाद्वयं पूर्वपरेण कुर्यात् तन्मध्यतो याम्यकुबेरके दात

महेशारह्नोधिपतिक्रमेणजित्वा तथा वायुकृतारानेन ॥ अकारादिहकारांतान् कोष्ठे वह्नि
नालिखेत्ततः ॥ एकैकक्रमतो लिख्यान्नेत्रादिषु चतुष्कोष्ठकान् ॥ गणयेत्क्रमशो न्देर्नामादिवर्ण
कादीकान् ॥ मेषादितश्च मीनांतं गणयेत्क्रमशः सुधीः ॥ सिद्धः साध्यः सुसिद्धारीन् पुनः सि
द्धादयः पुनः ॥ नवैकपंचमे सिद्धः साध्यः षोडशे युग्मके ॥ सुसिद्धस्तत्केरुद्रे वेदाष्टद्वादशे
रिपुः ॥ एतत्तेकथितं देवि अकडमादिकमुत्तमं ॥ इदं तु गोपालविषयकमेव ॥ नारसिंहे चैलक्ष्या
र्णकोष्ठसिद्धिर्विरुद्धस्य च ॥ राशिशुद्धिस्तु पूर्वे च गोपालकेऽस्मातिदिति वचनात् ॥ ॥
अथ कुलाधनचक्रं ॥ ॥ तद्यथा ॥ कोष्ठान्येकादशान्येव वेदेन रेखितानि च ॥ अकारादिह
कारांतं लिखेत्कोष्ठेषु तत्ववित् ॥ प्रथमं पंचकोष्ठेषु ह्रस्वदीर्घक्रमेण तु ॥ द्वयं द्वयं लिखेत्तं
त्र बिंद्वाद्यरेखकृत्साधकः ॥ शेषेषु षट्केषु कवर्गान्क्रमतस्तु लिखेत्सुधीः ॥ युग्मादि पंच
वि दंद्वयपूर्वकराशीन्सोमात् ॥ त्रिवेदराशिनः खल्वसाधकार्णः ॥ नामाद्यर्हत्वान्दक्ष
वादगजेभुकरीबंशात्योन्यादधिकंशेषं धनं स्यात् ॥ अस्यार्थः ॥ ॥ साध्यवर्ण

स्वरव्यंजनरूपेण पृथक्कृत्वान् ॥ वह्नकाक्षार्घकेर्गुणितान् ॥ तथा साधकनामाद्यक्षरान्
पृथगादौ कैर्गुणयित्वा अष्टसंख्याभिर्हृत्वा उभयोर्मध्ये साध्यसाधकयोः अधिकं ऋणं शो
धनं ह्यात्मा मंत्रं दद्यात् ॥ यदा मंत्रस्य तद्ऋणी भवति तदा मंत्रः शत्रुदायको भवति धनी चे
त् ॥ तथा च ॥ चंद्ररुद्रनेत्ररविपंचदशांतवेदवह्निहूनवेन्निर्गुणितान पृथसाध्यवर्णान् ॥ दि
ग्गिरिश्रुतिगजाग्निमुनीषु वेदषड्वह्निभोः गुणितान पृथसाधकार्णान् ॥ नामादिमादि
वचनं तु विष्णुविषयं ॥ रामार्चनचंद्रिकाध्वतत्वात् इतिके चित् ॥ पूर्वस्यैव विवरणं ॥ तथा
नामार्णकोष्ठं कथयामि हन्यात् एकादिकृतांकगतं क्रमेण ॥ तथा नामाद्यक्षरमारभ्य
यन्मंत्रादिसंजनयेत् ॥ त्रिधाकृत्वा स्वरेर्निन्नं तदस्मत्प्रवितर्कं ॥ ॥ अस्यार्थः ॥ साधक
नामाद्यक्षरतो गणनया यावन्मंत्रादिमाक्षरं ॥ तत्संख्या त्रिधाकृत्वा सप्तभिर्हृत्वा अधि
कं ऋणं शेषं धनं स्यात् ॥ तदस्मदितिमंत्राद्यक्षरमारभ्य यावत्साधकाद्यक्षरं भवेत् ॥
तावत्संख्या सप्तगुणं कृत्वा त्रिभिर्हरेत् ॥ तथा साध्यनामगुणितं साधकेन समन्विते

अष्टभिश्च हरेच्छेषं तदन्यत्र विपरीतकं ॥ अस्यार्थः ॥ साध्यनामानं स्वरव्यंजनत्वेन द्विगु
णीकृत्य साधकेन युतं कृत्वा अष्टभिर्हरेत् ॥ तदन्यदिति साधकनामानं स्वरव्यंजनत्वे द
न द्विगुणीकृत्य साध्येन युतं कृत्वा अष्टभिर्हरेत् ॥ ॥ अथ दीक्षाकालमाह ॥ ॥ मंत्रारंभ
स्तु चैत्रे स्यात्समस्तपुरुषार्थदः ॥ वैशाखे रत्नलाभः स्याज्ज्येष्ठे तु मरणं भवेत् ॥ आषाढे बं
धुनाशः स्यात्पूर्णायुः श्रावणे भवेत् ॥ प्रजानाशो भवेद्भाद्रे आश्विने रत्नसंचयः ॥ कार्त्तिके
रत्नसिद्धिः स्यान्मार्गशीर्षे तथा भवेत् ॥ पौषे तु शत्रुपीडा स्यान्माघेन मेधाविवर्द्धनं ॥ फाल्गु
ने सर्वकामाः स्युर्मलमासं विवर्जयेत् ॥ चैत्रे तु गोपालविषयं गौतमस्य कृत्वात् ॥ मधुमासे
न वै दीक्षा दुःखाय इति वचनात् ॥ आषाढे निषेधोपि श्रीविद्यातिरिक्तविषय एव ॥ तथा
च योगिनीहृदये ॥ ज्येष्ठे मृत्युप्रदा चैव आषाढे धनसंपदः ॥ ॥ अथ वारनियमः ॥ ॥
रविवारे वै वित्तं सोमे शांतिर्भवेत्किल ॥ आयुरंगारके हंति तत्र दीक्षां विवर्जयेत् ॥ बु
धे सौंदर्यमाप्नोति ज्ञानं स्याद्बृहस्पतौ ॥ शुक्रे सौभाग्यमाप्नोति यशो हानिः शनैश्चरे ॥

अथ तिथिनियमः ॥ ॥ प्रतिपत्ति द्वितीयायां तृतीयायां शुचिर्भवेत् ॥ चतुर्थ्यां वित्तनाशः
स्यात्पंचम्यां बुद्धिवर्द्धनं ॥ षष्ठ्यां ज्ञानक्षयं सौख्यं लभते सप्तमीदिने ॥ अष्टम्यां बुद्धिनाशः
स्यात् नवम्यां वपुषः क्षयः ॥ दशम्यां राजसौभाग्यं एकादश्यां शुचिर्भवेत् ॥ द्वादश्यां सर्व
सिद्धिः स्यात्त्रयोदश्यां दरिद्रता ॥ तिर्यग्योनिश्चतुर्दश्यां हानिर्मासावसानके ॥ पक्षांते ध
र्मवृद्धिः स्यादनध्यायां विवर्जयेत् ॥ संध्यागर्जितनिर्घोषभूकंपोल्कानिपातनं ॥ एतान
न्यांश्च दिवसान् श्रुतिस्मृत्युक्तांश्च विवर्जयेत् ॥ द्वादशीमपि कर्त्तव्यं त्रयोदश्यामथापि वा ॥ इति त्र
योदशी विधानं ॥ यद्विष्णुविषयरामार्चनचंद्रिकाधृतत्वात् ॥ त्रयोदशी च दशमी प्रश
स्ता सर्वकामदा ॥ इति सनत्कुमारवचनात् ॥ ॥ अथ नक्षत्रनिर्णयः ॥ ॥ अश्विन्यां
सुखमाप्नोति भरण्यां मरणं ध्रुवं ॥ कृत्तिकायां भवेद्दुःखी रोहिण्यां वाक्पतिर्भवेत् ॥ म
गशीर्षे सुखावाप्तिरार्द्रायां बंधुनाशनं ॥ पुनर्वसौ धनाढ्यः स्यात्पुष्ये शत्रुविनाशनं ॥
आश्लेषायां भवेन्मृत्युर्मघायां दुःखमोचनं ॥ सौंदर्यं पूर्वफाल्गुन्यां प्राप्नोति च धनसंचयं ॥

ज्ञानं चोत्तरफाल्गुन्यां हस्तायां च धनी भवेत्॥ चित्रायां ज्ञानसिद्धिः स्यात्स्वात्यां शत्रुविनाश
नं॥ विशाखायां सुखं चानुराधायां बंधुवर्द्धनं॥ ज्येष्ठायां सुतहानिः स्यात् मूलायां कीर्त्तिवर्द्धनं
शिष्यायां सुतहानिः स्यात् पूर्वाषाढोत्तराषाढे भवेतां कीर्त्तिदायिके॥ श्रवणायां भवेद् दुःखं
धनिष्ठायां दरिद्रता॥ बुद्धिः शतभिषायां स्यात् पूर्वाभाद्रे सुखी भवेत्॥ सौख्यं चोत्तरभाद्रे
च रेवत्यां कीर्त्तिवर्द्धनं॥ ॥अथ योगादिनिर्णयः॥ ॥विश्वसारे॥ अनसिद्धस्यायुष्मा
न् ध्रुवयोगस्ततः परं॥ प्रीतिसौभाग्ययोगश्च वृद्धियोगस्ततः परं॥ हर्षणश्च तथा योगाः
सर्वतंत्रशुभावहाः॥ ॥अथ करणनिर्णयः॥ ॥बवकौलवतैतलं वाणिजं स्याद्गंतर
करणानि शुभान्येव सर्वतंत्रे शुभावति॥ ॥अथ लग्ननिर्णयः॥ वृषे सिंहे च कन्यायां
धनुर्मीनाख्यलग्नके॥ चंद्रतारानुकूले च कुर्याद्दीक्षाप्रवर्त्तनं॥ शुक्लपक्षे शुभा दीक्षा
कृष्णापंचमादिनात्॥ निषिद्धमासे तु तद्दिने षोधमुक्तिर्निंदितं॥ बुद्धौ भाद्रपदे ईशे तथा
कृष्णा चतुर्दशी॥ कार्त्तिके नवमी शुक्ला मार्गशीर्षे तृतीयका॥ पौषे च नवमी शुक्ला मा

घे शुक्ला चतुर्थिका॥ फाल्गुने नवमी शुक्ला चैत्रे कामचतुर्दशी॥ त्रयोदशी तु वैशाखे चा
क्षया चैव ज्येष्ठे दशहरा तिथिः॥ आषाढे पंचमी शुक्ला श्रावणे कृष्णपंचमी॥ एतानि दि
वसर्वाणि लीपकोटिफलं लभेत्॥ अन्यच्च मतं॥ चैत्रे त्रयोदशी शुक्ला वैशाखैकादशी सि
ता॥ ज्येष्ठे चतुर्दशी कृष्णा आषाढे नागपंचमी॥ श्रावणैकादशी भाद्रे रोहिणी संयुताष्ट
मी॥ आश्विने च महापूर्णा महाष्टम्यपि निश्चदा॥ कार्त्तिके नवमी शुक्ला मार्गशीर्षे तथाऽसि
ता॥ षष्ठी चतुर्दशी पौषे माघे चैकादशी सिता॥ फाल्गुने च सिताषष्ठी चेति कालानि एशु
योगिनीतंत्रे॥ अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः॥ रविसंक्रांतिदिवसे युगाद्यायां
स्वरेश्वरि॥ मन्वंतरासु सर्वासु महापूजादिने तथा॥ चतुर्थी पंचमी चैव चतुर्दश्यष्ट
मी तथा॥ तिथयः शुभदाः प्रोक्ताः इत्यादि वचनात् चतुर्दश्यष्टमी तिथ्योः कि विशेषं॥ चतु
र्थी गणेशो विषयं तत्र तत्कृत्यो कृत्यात्॥ निंदितेष्वपि कालेषु दीक्षा ग्रहणे शुभा॥ सूर्य
ग्रहणकालस्य समानो नास्ति भूतले॥ तत्र यद्यत्कृतं सर्वमनंतफलदं भवेत्॥ रवि

संक्रमणे चैव सूर्यस्य ग्रहणे तथा॥ तत्र लग्नादि किंचिन्न विचार्यं कृपंचन॥ रविसंक्र
मणे चैव नान्यदन्वेषितं न चेत्॥ न वार तिथि मासादि शोधनं सूर्यपर्वणि॥ एवं चंद्रग्रह
णेपि तथा॥ अमावास्या सोमवारे भौमवारे चतुर्दशी॥ सप्तमी रविवारे च सूर्यपर्व
ते समा॥ पुष्करे च कुरुक्षेत्रे दीक्षा पीठ चतुष्टये॥ प्रयागे श्रीगिरौ काश्यां कालाकालं न शो
धयेत्॥ विष्णुयामले॥ देवीबोधं समासाद्य यावत्स्यान्नवमी तिथिः॥ कुलाष्टमी बुधैर्दी
क्षा सर्वाभिष्टफलप्रदा॥ तथा॥ बोधने नैवेद्य दीक्षायां कालाकालं न शोधयेत्॥ अशोकाख्या
ष्टमी चैव रामाख्यानवमी तथा॥ लग्ने वाप्यथवा लग्ने यत्र तत्र तिथावपि॥ गुरोराज्ञानुरू
पेण दीक्षा कार्या विशेषतः॥ समयातंत्रे॥ युगाद्यायां जन्मदिने विवाहदिवसे तथा॥ इत्या
दि वचनं॥ शिष्यानामुपगुरुणाकृपया दीयते यदा॥ तदा लग्नादिकं किंचिन्न विचार्यं क
पंचन॥ तथा सर्वे वारा ग्रहाः सर्वे नक्षत्राणि च राशयः॥ यस्मिन्नहनि संतुष्टो गुरुः स
र्वे शुभावहाः॥ योगिनीतंत्रे॥ ग्रहणे च तथा तीर्थे नास्ति कालस्य निर्णयः॥ गयायां च

20

कुरुक्षेत्रे विरते चंद्रपर्वति॥ पद्यले च षडंगे च तथा कन्याश्रमेषु च॥ नर्मदायां तु तीर्थे दीक्षा
नापेक्षिते सुपार्वति॥ वाराहीतंत्रे॥ शुक्लासोयादिवावृद्धेगुर्वादिरूपोन्न बुध्यदि॥ मेषव
क्षिके सिंहेषु तदा दोषो न विद्यते॥ ॥अथ मालानिर्णयः॥ ॥तर्जनी मध्यमानामा
कनिष्ठा चेति ताः क्रमात्॥ तिस्रोंगुल्यस्त्रिपर्वाणि मध्यमा चैकपर्विका॥ पर्वद्वयं मध्यमा
यान्निरूत्वेनोपकल्पयेत्॥ अनामामध्यमारभ्य कनिष्ठादित एव च॥ तर्जनीमूलपर्यंतं
दशपर्वसु संजपेत्॥ तर्जन्यत्रापि च अंगुल्यग्रेषु यत्जप्तं यत्जप्तं मेरुलंघने॥ पर्वसंधिषु
यज्जप्तं तत्सर्वं निष्फलं भवेत्॥ सनत्कुमारसंहितायां॥ तथा॥ अनामामूलमारभ्य क
निष्ठादित एव च॥ तर्जनीमध्यपर्यंतं अष्टपर्वसु संजपेत्॥ एतद्वचनद्वयं तु अष्टोत्तर
शतविषयं॥ शाक्ति विषये पुनः नायं प्रकारः॥ अनामिकात्रयं पूर्वं कनिष्ठादित्रिपर्वि
का॥ मध्यमायास्त्रितयं तर्जनीमूलपर्वणि॥ तर्जन्यग्रे तथा मध्ये यो जपेत्स तु पापकृ
त्॥ इति श्रीक्रमवचनात्॥ हंसपारमेश्वरेद्रुमपि तथैव॥ ॥इति करमाला॥ ॥तंत्रो

21

तरेत्॥ अनामामूलमारभ्य प्रादक्षिण्यक्रमेण तु॥ तर्जनीमूलपर्यंतं जपेन्मध्यस्य पर्वसु॥ म
ध्यमात्रितयं चाथ मध्यमामूलमेव च॥ अनामामध्यमं पर्व मेरुत्वेनोपकल्पयेत्॥ तर्ज
न्यग्रे तथा मध्ये यो जपेत्तन्मानवः॥ चत्वारि तस्य नश्यंति आयुर्विद्यायशोबलं॥ पर्वत्र
यं मध्यमायास्तर्जन्येकं समाहरेत्॥ शक्तिमालासमाख्याता सर्वमंत्रप्रदीपका॥ अनाम
मूलमारभ्य प्रादक्षिण्यक्रमेण च॥ मध्यमामूलपर्यंतं जपेद्दशसु पर्वसु॥ इदमष्टोत्तर
शतविषयं॥ अंगुलिं न वियुंजीत किंचिद्वाकुंचिते तले॥ अंगुलीनां वियोगाच्च छिद्रे च स्र
वते जपः॥ गणनाविधिमुल्लंघ्य यो जपेत्तज्जपं यतः॥ गृह्णंति राक्षसास्तेन गणयेत्सर्व
था बुधः॥ ॥अथ वर्णमाला॥ ॥क्रमोत्क्रमगतैर्मालामातृकार्णैः हनेरुकैः॥ सबि
दुकैः सार्द्धवर्गैरितर्यज्जनकर्मणि॥ आदिक्षु चतुर्दशपर्यस्तावेहीप्रकीर्तिता॥ तद्यथा॥ अका
रादीनां वर्णानां कवर्गादीनां चांतिमवर्णं सानुस्वारं कृत्वा पूर्वमुच्चार्य मंत्रं जपः कार्यः॥ अ
नेन प्रकारेण अष्टोत्तरशतसंख्यजपो भवति॥ अंतर्यजने त्वपलक्षणं॥ सबिंदुवर्णमुच्चा

र्य पश्चान्मंत्रं जपेद्बुधः॥ अकारादिक्षकारांतं बिंदुयुक्तं विना क्ष च॥ वर्णमालासमाख्याता
अनुलोमविलोमिका॥ इति नारदवचनात्॥ ॥अथ मालायां मणिनियमः॥ ॥पु
त्रबीजादिनिर्माला बहिर्यागे सुरक्षता॥ रुद्राक्षशंखपद्माक्षपुत्रजीवकमौक्तिकैः॥
स्फाटिकैर्मणिरत्नैश्च सौवर्णैर्विद्रुमैस्तथा॥ राजतैः कुशमूलैर्वा गृहस्थस्याक्षमालि
का॥ अंगुलिगणनादेकं पर्वणाष्टगुणं भवेत्॥ पुत्रजीवैर्दशगुणं शतं शंखैः सहस्र
कं॥ प्रवालैर्मणिरत्नैश्च दशसाहस्रकं स्मृतं॥ तदेव स्फाटिकैः प्रोक्तं मौक्तिकैर्लक्षमुच्यते
पद्माक्षैर्दशलक्षं स्यात्सौवर्णैः कोटिरुच्यते॥ कुशग्रंथ्या कोटिशतं रुद्राक्षैः स्यादनंत
कं॥ सर्वैर्विरचिता माला नृणां मुक्तिफलप्रदा॥ ॥ब्राह्मणानंदेन तु॥ पद्माक्षैर्विहिता
माला या [illegible] नूणां नाशिनी मता॥ कुशग्रंथिमयी माला सर्वपापप्रणाशिनी॥ पुत्रजीवैर्प
लैः कृता माला कुरुते पुत्रसंपदं॥ निर्मिता रूप्यमणिभिर्जपमालेप्सितप्रदा॥ प्रवालैर्विहिता
माला प्रयच्छेत्सुबहुधनं॥ भैरवीविद्यायां तु या राहीये॥ स्वर्णमणिनिर्माला स्फाटि

शंखनिर्मितां॥प्रवालैरथवा कुर्यात् पुत्रजीवं विवर्जयेत्॥पद्माक्षं चैव रुद्राक्षं नागाक्षं चापि
शोभनं॥त्रिपुरामंत्रजपार्थे तु रक्तचंदनबीजादिभिरितिप्रशस्ता॥गौतमीये॥रुद्राक्षैर
पि पद्माक्षैः पुत्रजीवककैश्चंदनैः॥स्फाटिकैश्च प्रवालैश्च कुशाग्रंथिभिरेव च॥तथा नल
कसंभूतैस्तुलसीकाष्ठनिर्मितैः॥एभिश्च मालिकां कुर्यात् मतिमान् वैष्णवे गणे॥तथा च
तत्तंत्रे॥रक्तचंदनमाला तु भोगदा मोक्षदा भवेत्॥तथा॥वैष्णवे तुलसीमाला गजदंतै
र्गणेश्वरे॥त्रिपुरायाः जपे शस्ता रुद्राक्षै रक्तचंदनैः॥मालानियमस्तु मुंडमालायां॥अन्यो
न्यसमरूपाणि नातिस्थूलकृशाणि वै॥कीटादिभिरदुष्टानि न जीर्णानि नवानि वै॥तथा गौ
तमीये॥पंचाशन्मणिभिर्माला विहिता सर्वकर्मसु॥अकारादिक्षकारांता अक्षमाला प्र
कीर्तिता॥क्षोणीरुन्मुखं तत्र कल्पयेन्मुनिसत्तम॥अनया सर्वमंत्राणां जपः सर्वसमृद्धि
दः॥चामुंडातंत्रे॥नित्यं जपं करे कुर्यान्न तु काम्यमरोधनात्॥काम्यमपि करे कुर्यात् मा
लाभावेपि सुंदरि॥तेन मालायाः प्राधान्यं॥कामनाभेदे तु गौतमीये॥समासेनाक्षसू

त्रस्य विधानमिह कथ्यते॥पंचविंशतिभिर्मोक्षं त्रिंशद्भिर्धनसिद्धये॥सर्वेषां सप्तविंश
त्या पंचदशस्त्वाभिचारके॥पंचाशद्भिः काम्यसिद्धिः स्यात् तथा चतुरुत्तरैः॥अष्टोत्तरशतैः सु
र्वसिद्धिरुक्ता मनीषिभिः॥ ॥अथासनभेदाः॥ ॥काम्यार्थं कंबलं चैव श्रेष्ठं च रक्तकंब
लं॥कृष्णाजिने ज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि॥कुशासने मंत्रसिद्धिर्नात्र कार्या वि
चारणा॥धरण्यां दुःखसंभूतिर्दौर्भाग्यं दारुजासने॥वंशासने दरिद्रः स्यात् पाषाणे व्याधि
पीडनं॥तृणासने यशोहानिः पल्लवे चित्तविभ्रमः॥जपध्यानतपोहानिर्वस्त्रासने करो
ति हि॥अत्र वस्त्रासने केवलवस्त्रमेव निषिद्धं॥वस्त्रासनं रोगहरणमित्यादिवचनेन वि
हितस्य फलजनकत्वाभिधानात्॥चैलाजिनकुशोत्तरमिति भगवद्वचनाच्च॥गौतमी
ये॥तथा व्याघ्रासने मंत्री पराजिनकुशोत्तरमिति॥ ॥अथ मालासंस्कारः॥ ॥तत्र स
नत्कुमारे॥कर्पाससंभवं सूत्रं धर्मकामार्थसिद्धिदं॥तच्च विप्रेंद्रकन्याभिर्निर्मितं चेत् सु
शोभनं॥यद्वा स्वकं तथा रक्तं पट्टसूत्रमथापि वा॥शांतिवश्याभिचारे तु मोक्षैश्वर्यज

येषु च॥ शुक्लं रक्तं तथा पीतं कृष्णं वर्णेषु च क्रमात्॥ सर्वेषामेव वर्णानां रक्तं सर्वेप्सितप्रदं॥
त्रिगुणं त्रिगुणीकृत्य ग्रथयेच्छिल्पशास्त्रतः॥ एकैकमक्षरं कावर्णं सतारं प्रजपन् सुधीः॥
मणिमादाय सूत्रेण ग्रथयेन्मध्यमध्यतः॥ त्रिवृत्तं यत्पवित्रेकेन तथार्द्धेन सुरेश्वरि॥ ब्रह्म
ग्रंथिं विधायैकं मेरुं चूर्णं पिसंयुतं॥ ग्रथयित्वा पुरो माला ततः संस्कारमारभेत्॥ स्वच्छं
दमाहेश्वरे॥ द्वादशपंचवेमवीमाला कर्तव्या सोपवासकैः॥ रात्रौ नामपि कर्तव्या रात्रौ
शुक्लाय यथाविधि॥ अष्टम्यां च नवम्यां च चतुर्दश्यां तथैव च॥ त्रयोदश्यां तथा कुर्याच्छिव
स्यापि सुरेश्वरि॥ गौतमीये॥ मुखे मुखं तु संयोज्य पुच्छे पुच्छं नियोजयेत्॥ गोपुच्छसदृशी
माला यद्वा सर्पाकृतिः शुभा॥ एवं निर्माय मालां वै शोधयेन्मुनिसत्तम॥ अश्वत्थपत्रैर्न
वके पद्माकारं तु कारयेत्॥ तन्मध्ये स्थापयेन्मालां मातृकां मूलमुच्चरन्॥ क्षालयेत्पंचग
व्येन सद्योजातेन सज्जने॥ सद्योजातमंत्रस्तु॥ ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै न
मः॥ भवे भवे नातिभवे भवस्व मां भवोद्भवः॥ चंदनागुरुगंधाद्यैर्वामदेवेन घर्षयेत्

वामदेवमंत्रस्तु॥ ॐ वामदेवाय नमो ज्येष्ठाय नमो रुद्राय नमः कालाय कलविकरणाय नमो
बलविकरणाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः॥
धूपयेत्तामघोरेण॥ ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः॥ सर्वतः सर्वसर्वेभ्यो
नमोस्तेऽस्तु रुद्ररूपेभ्यः॥ लेपयेत्तत्पुरुषेण तु॥ ॐ तत्पुरुषाय विद्महे महादेवाय धीम
हि तन्नो रुद्रः प्रचोदयात्॥ मंत्रयेत्पंचमेनैव प्रत्येकं तु शतं शतं॥ मेरुं च मंत्रयेच्चैव मनु
ना च शतं शतं॥ मंत्रस्तु॥ ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्र
ह्मणोऽधिपतिः ब्रह्म शिवो मेऽस्तु सदाशिवोम्॥ ततश्च प्रत्येकं मंत्रयेन्मंत्री पंचमेन सकृत्सकृत्॥
तथा गौतमीये॥ समुदायमालामधिरूप्य पंचमेनैव सकृच्छेन शतानाभृतेन मंत्रयेदिति
दर्शनात्॥ मालायां वीरातजपः॥ तत्रावाहयन्देवं यथाविनयविस्तरैः॥ मालायाः प्रा
णप्रतिष्ठानंतरं देवतां पूजयेत्॥ तथा सनत्कुमारसंहितायां॥ संस्कृत्यैवं बुधो मालां तत्र
प्राणांस्तत्र स्थापयेत्॥ मूलमंत्रेण तां मालां पूजयेद्द्विजसत्तम॥ वाराहीये॥ ॐ मालेमा

नेमहामालेसर्वतत्वस्वरूपिणि॥ चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धिदाभव॥ मायाबी
जादिकंकृत्वागंधपुष्पैःसमर्चयेत्॥ इतिशक्तिविषयं॥ मंत्रयेन्मूलमंत्रेणक्रमेणोत्क्रम
योगतः॥ तथैवमातृकावर्णैर्मंत्रयेत्तांतुमंत्रवित्॥ योगिनीतंत्रे॥ होमकर्मततःकुर्या
त्देवतानामयसिद्धये॥ अष्टोत्तरशतंकृत्वासम्पाताज्यंविनिक्षिपेत्॥ होमकर्मण्यशक्तश्चे
त्द्विगुणंजपमाचरेत्॥ नान्यमंत्रंजपेन्मंत्रीकम्पयेत्तंविधूनयेत्॥ कम्पनात्सिद्धिहा
निःस्यात्धूननंबहुदुःखदं॥ शाखेनैवयेज्ञोगःकरभ्रष्टाविनाशकृत्॥ छिन्नेसूत्रे
भवेन्मृत्युस्तस्माद्यत्नपरोभवेत्॥ त्वंमालेसर्वदेवानांसर्वसिद्धिप्रदामता॥ तेनसत्येनमे
सिद्धिंदेहिमातर्नमोस्तुते॥ इत्युक्त्वापरिपूज्याथगोपयेत्प्रयत्नतः॥ कामनाभेदेनतु
संग्रहेनियमः॥ गौतमीये॥ तर्जन्यंगुष्ठयोगेनभवेदुच्चाटकारकं॥ अंगुष्ठमध्यमा
योगाद्धुवाद्योच्छादनेमता॥ अनामिकानिष्ठायोगेनवशाकर्षणेनाशनेमता॥ जीर्णेसूत्रेपुनः
सूत्रंग्रथयित्वाशतंजपेत्॥ प्रमादात्पतितेहस्ताच्छतमष्टोत्तरंजपेत्॥ जपेन्निषिद्धसंस्प

र्शेक्षालयित्वायथोचितं॥ छिन्नेप्यष्टोत्तरशतंजपःकरभ्रष्टछिन्नयोस्तुस्वरूपत्वात्॥ ॥
अथपुरश्चरणं॥ ॥ योगिनीहृदये॥ गुरोराज्ञांसमादायप्रशान्तःकरणोनरः॥ ततःपुर
श्चर्यांकुर्यात्मंत्रसर्वस्वंसिद्धकाम्यया॥ जीवहीनोयथादेहीसर्वकर्मसुनक्षमः॥ पुरश्चरणही
नोपितथामंत्रःप्रकीर्त्तितः॥ तस्मादादौस्वयंकुर्याद्गुरुंवाकारयेद्बुधः॥ योगिनीहृदये
गुरोरभावेविप्रंवासर्वप्राणिहितेरतं॥ स्निग्धंशास्त्रविदंमित्रंनानागुणसमन्वितं॥ स्नि
ग्धंवसकुलेपेतांसपुत्रांविनियोजयेत्॥ चैत्रेमासस्यथवाकुर्यात्तस्मिन्हर्षेगुरूद्रासनात्॥
वैशाखेफाल्गुनेपक्षेचमाघेवैमासितत्तिथौ॥ आरम्भेतमाख्यायांवैपुरश्चर्यांतुसिद्धये॥ वै
शंपायनसंहितायां॥ चंद्रतारानुकूलेचशुक्लपक्षेशुभेहनि॥ आरंभेन्मकरादौचसु
प्तेविष्णौजपेनच॥ आदौपुरश्चियांकर्तुंस्थानेनिर्णयउच्यते॥ योगिनीहृदये॥ पुण्यक्षे
त्रेनदीतीरेगुहापर्वतमस्तके॥ तीर्थप्रदेशेसिंधूनांसंगमःपावनंवने॥ उद्यानानि
विविक्तानिबिल्वमूलंतटंगिरेः॥ तुलसीकाननंगोष्ठंवृषशून्यंशिवालयं॥ अश्वत्थामल

श्रीमूलं गोशालाजलमध्यतः॥ देवतायतनं कूलं समुद्रस्य निर्जनं गृहं॥ तथा॥ गृहे शतगुणं
विद्यात् गोष्ठे लक्षगुणं भवेत्॥ कोटि देवालये पुण्यमनंतं शिवसन्निधौ॥ म्लेच्छदुष्टमृगव्या
घ्राद्यंधकारं वा विवर्जितं॥ एकांते पावने निंदारहिते भक्तिसंयुते॥ सुदेशे धार्मिके देशे सु
भिक्षे निरुपद्रवे॥ रम्ये तु भक्तजनस्थाने निवासे तापसः प्रिये॥ गुरूणां संनिधाने च चित्तै
काग्र्यस्थले तथा॥ एषामन्यतमं स्थानमाश्रित्य जपमाचरेत्॥ यत्रस्थाने जपेन्मंत्री तत्र कूर्मं
विचिंतयेत्॥ गौतमीये॥ पर्वते सिंधुतीरे वा पुण्यारण्ये नदीतटे॥ यदि कुर्यात्पुरश्चर्यां तत्र
कूर्मं न चिंतयेत्॥ ग्रामे वा यदि वा स्वीयगृहे तं च विचिंतयेत्॥ ॥अथ पुरश्चरणे भुक्त्या
दिनियमः॥ ॥अगस्त्यसंहितायां॥ दधि क्षीरं घृतं गव्यमैक्षवं गुडवर्जितं॥ तिलाश्चैव
सिता मुद्गाः कंदं केमुकवर्जितं॥ नारिकेरफलं चैव कदली लवली तथा॥ आम्रमामलकं
चैव पनसं च हरीतकी॥ व्रतांतरे प्रशस्तं च हविष्यं मन्यते बुधैः॥ भुंजानो वा हविष्या
न्नं शाकं यावकमेव वा॥ पयोमूलं फलं वापि यत्र यत्रोपलभ्यते॥ यत्तु योगिनीतंत्रे॥ चिंचा

30

चनातिकाशाकं कलायं लकुचं तथा॥ कदंबनारिकेलं च व्रते कूष्मांडकं त्यजेत्॥ एतत्तु
व्रतांतरे बोद्धव्यं॥ ॥अथ वर्ज्यानि॥ ॥वर्जयेन्मधुरं क्षारं लवणं तैलमेव च॥ तांबू
लं कांस्यपात्रं च दिवाभोजनमेव च॥ तथा क्षारं च लवणं मांसं गृंजनकांस्यभोजनं॥ मा
षाढकीमसूरांश्च कोद्रवांश्चणकानपि॥ कौटिल्यं क्षारमत्स्यं च अनिवेदितभोजनं॥ असंक
ल्पितकृत्यं च वर्जयेन्मर्दनादिकं॥ स्नानाद्यं पंचगव्येन केवलामलकेन वा॥ मंत्रजप्त्वा
स्तु पानीयैः स्नानाचमनभोजनं॥ कुर्याद्यथोक्तविधिना त्रिसंध्यं देवतार्चनं॥ अपवित्र
करो नग्नः शिरसि प्रावृतोपि वा॥ प्रलपन्प्रजपेद्यावत्तावन्निष्फलमुच्यते॥ कुलार्णवे
पि॥ यस्यान्नपानपुष्टांगः कुरुते धर्मसंचयं॥ अन्नदातुः फलं सार्द्धं कर्त्तुश्चार्द्धं न संशयः॥
तस्मात्सर्वप्रयत्नेन परान्नं परान्नं वर्जयेत्सुधीः॥ पुरश्चरणकाले तु सर्वकर्मसु शोभन
वि॥ जिह्वा दग्धा परान्नेन करौ दग्धौ प्रतिग्रहात्॥ मनो दग्धं परस्त्रीभिः कथं सिद्धिर्वरा
नने॥ परान्नं तु निषिद्धेतरविषयं॥ निशायां तस्य सत्वोत्पादनात्॥ तथा च वैदिकोचा

39

रथ्युक्तानां शुचीनां श्रीमतानां सततं॥ सत्कुलस्थानजातानां निद्राशीचार्यजन्मनां॥ सकृदुच्च
रितेशादेशप्रणवं समुदीरयेत्॥ प्रोक्तेपारारवेशादेशप्राणयामं समाचरेत्॥ बकप्रलापि
श्रोचमस्मरस्पांगानि तनो जपेत्॥ कृतेष्वेवं तथास्पृष्टपस्थानानां स्पर्शनेपि च॥ एवमादि
ष्वनियमान्पुरश्चरणकं चरेत्॥ विण्मूत्रोत्सर्गशंकादियुक्तः कर्म करोति च॥ जपार्चना
दिकं सर्वमपवित्रकरं प्रिये॥ मलिनांबरकेशादि मुखदौर्गंध्यसंयुतः॥ यो जपेत्तं दह
त्याशु देवता गुप्तिसंस्थिता॥ आलस्यं जृंभणं निद्रां क्षुतं निष्ठीवनं भयं॥ नीचांगस्पर्शनं
कोपं जपकाले विवर्जयेत्॥ एवमुक्तविधानेन विलंबं त्वरितं विना॥ उक्तसंख्यं जपं कु
र्यात्पुरश्चरणसिद्धये॥ देवतागुरुमंत्राणामेकं संभावनं धिया॥ जपेदेकमना प्रा
तःकालं मध्यंदिनावधि॥ यत्संख्यया समारब्धं तत्कर्तव्यमहर्निशं॥ यदि न्यूनाधिकं
कुर्याद्व्रतभ्रष्टो भवेन्नरः॥ कुलार्णवेपि॥ स्नानादिक्रियाकर्माणि न फलंति कदाचन॥
यथाविधि कृतान्येव सत्कर्माणि फलंति हि॥ शय्या ब्रह्मचारित्वं मौनं चाचार्यसेव

नं॥ नित्यपूजा तिलदानं देवतास्तुतिकीर्तनं॥ नैमित्तिकार्चनं चैव विश्वासो गुरुदेवयोः॥
जपनिष्ठा द्वादशैते धर्माः स्युः मंत्रसिद्धिदाः॥ स्त्रीशूद्रपतितव्रात्यनास्तिकोच्छिष्टभाषणं
असत्यभाषणं जिह्वाभाषणं परिवर्जयेत्॥ सत्येनापि न भाषेत जपहोमार्चनादिषु॥
अन्यथानुष्ठितं सर्वं भवेत्सर्वं निरर्थकं॥ योगिनीहृदये॥ शयीत कुशशय्यायां शुचिव
स्त्रधरः सदा॥ प्रत्यहं क्षालयेच्छय्यामेकाकी निर्भयः स्वपेत्॥ असत्यभाषणं वाचं कु
टिलां परिवर्जयेत्॥ सत्येनापि न भाषेत जपहोमार्चनादिषु॥ वर्जयेत्कीर्तनं वाद्यादिश्रव
णं नृत्यमेव च॥ अभ्यंगं गंधलेपं च पुष्पधारणमेव च॥ त्यजेदुष्णोदकस्नानमन्यदेव
प्रपूजनं॥ तत्रैव॥ नैकवासा जपेन्मंत्रं बहुवासाकुलोपि वा॥ पतितानां मंत्रजानां द
र्शने भाषणे स्मृते॥ कृतेधोवायुगमने जृंभणे जनमुत्सृजेत्॥ तथा तस्य च तत्राचम्य प्रा
णायामं षडंगकं॥ कृत्वा सम्यक्जपेच्छेषं यद्वा सूर्यादिदर्शनं॥ आदित्यांशदृष्टिश्रो
णं च॥ तंत्रांतरे॥ मनःसंहरणं शौचं मौनं मंत्रार्थचिंतनं॥ अव्यग्रत्वमनिर्वेदो जप

संपत्तिहेतवः॥ उच्चैर्भीषं च्युदीनग्नमुक्तकेशो गदवृतः॥ अपवित्रकरो नग्नः प्रलपन्
जपेन्न कचित्॥ अनाशातः शयतो वा गच्छन्नुज्झन एव वा॥ वरथ्यायामशिवस्थानेन
जपेत्तिमिरांतरे॥ उपानद्गूढपादो वा यानशय्यागतस्तथा॥ प्रसार्य न जपेत्पादावुत्कटा
सन एव च॥ मार्जारकुक्कुटक्रौंचश्वानं म्लेच्छकपिखरं॥ दृष्ट्वाचम्य जपेत्कमस्पृष्ट्वा स्नानं
विधीयते॥ सर्वत्र जपे चायं नियमः॥ मानसेन तथा॥ अशुचिर्वा शुचिर्वापि गच्छंस्तिष्ठन्
स्वपन्नपि॥ मंत्रैककरणो विद्वान्मनसैवं सदाभ्यसेत्॥ न दोषो मानसे जाप्ये सर्वदेशेपि
सर्वदा॥ जपनिष्ठो द्विजश्रेष्ठोऽखिलयज्ञफलं लभेत्॥ यथामादि विधाज्जपेत्तन्मंत्रे विद्वो
बोधक्रूष्यः॥ जपफलमाह हारीतधर्मे॥ जपनिष्ठो द्विजश्रेष्ठोऽखिलयज्ञफलं लभेत्॥ सर्वे
षामेव यज्ञानां जायते सौ महाफलः॥ जपेत देवता नित्यं स्तूयमाना प्रसीदति॥ प्रसन्ना द
विपुलान्कामान्दद्यान्मुक्तिं च शाश्वतीं॥ यक्षरक्षःपिशाचाश्च ग्रहाः सर्वाश्च भीषणाः॥
जापिनं नोपसर्पंति भयभीताः समंततः॥ यावंतः कर्मयज्ञाः स्युः प्रदिष्टानि तपांसि च॥ स

र्वे ते जपयज्ञस्य कलां नार्हंति षोडशीं॥ माहात्म्यं वाचिकस्यैतज्जपयज्ञस्य कीर्तितं॥ तस्मा
च्छतगुणोपांशुः सहस्रो मानसः स्मृतः॥ तंत्रांतरे॥ मानसः सिद्धिकामानां पुष्टिकामैरुपां
शुकः॥ वाचिको मारणे चैव प्रशस्तो जप ईरितः॥ गौतमीये॥ शक्त्या त्रिसवनं स्नानं मम
पारो वरूथवा॥ त्रिसंध्यं प्रजपेन्मंत्रं पूजने तत्समं त्रवेत्॥ संध्यात्रये पूजोगत्वान्जप
महीतरशातमित्यर्थः॥ एकदा वा जवेत्पूज्ञानजपेत्पूजनं विना॥ जपांते वा जवेत्पूज्ञा पूजां
नेवाजपेन्मनुं॥ प्रातःकालं समारभ्य जपेन्मध्यंदिनावधि॥ मध्यंदिनावधीति न नियं
मपरं॥ किंत्वधिककालव्यवच्छेदपरं॥ अन्यथा तत्समयनियमे कदाचित् त्रिकालाजप्येन
वा प्रतिदिवससमसंख्यायाः अपूर्णत्वे धिकत्वनियमभंगः स्यात्॥ मनसंहृत्य विषयान्
मंत्रार्थगतमानसः॥ न द्रुतं न विलंबं च जपेन्मौक्तिकपंक्तिवत्॥ जपः स्यादहरादत्रिमा
नसोपांशुवाचिकैः॥ धियायदक्षरश्रेणीं वर्णस्वरपदात्मिकां॥ उच्चरेदर्थमुद्दिश्य मान
सः स जपः स्मृतः॥ जिह्वौष्ठौ मानसो किंचिद्देवतागतमानसः॥ किंचिच्छ्रवणयोग्यस्या

दुपांशुस्तु जपः स्मृतः ॥ उच्चैर्जपाच्च विशिष्टः स्यादुपांशुर्दशभिर्गुणैः ॥ जिह्वाजपः शतगु
णः सहस्रो मानसः स्मृतः ॥ तंत्रांतरे ॥ उच्चैर्जपोधमः प्रोक्तः उपांशुर्मध्यमः स्मृतः ॥ उत्त
मो मानसो देवि त्रिविधः कथितो जपः ॥ अतिह्रस्वो व्याधिहेतुरतिदीर्घो वसुक्षयः ॥ अक्षे
राक्षरसंयुक्तं जपेन्मौक्तिकहारवत् ॥ मनसा यः स्मरेत्स्तोत्रं वचसा वा मनुं जपेत् ॥ उभयं
निष्फलं याति भिन्नभांडोदकं यथा ॥ गौतमीये ॥ पशुभावे स्थिता मंत्राः केवलावर्णरूपि
णः ॥ सौषुम्नाध्वन्युच्चरिताः प्रभुत्वं प्राप्नुवंति ते ॥ मंत्राक्षराणि चिच्छक्तौ प्रोतानि परिभाव
येत् ॥ तामेव परमव्योम्नि परमामृतबृंहिते ॥ दर्शयत्यात्मसद्भावं पूजाहोमादिभिर्विनेति
कुलार्णवे ॥ मनोन्यत्र शिवोन्यत्र शक्तिरन्यत्र मारुतः ॥ न सिध्यति वरारोहे कल्पकोटिश
तादपि ॥ जातसूतकमादौ स्यादंते च मृतसूतकं ॥ सूतकद्वयसंयुक्तो यो मंत्रः स न सि
ध्यति ॥ ज्ञुरीसूतकरहितं कृत्वा मंत्रं यावज्जपेद्धिया ॥ सूतकद्वयसंयुक्तः स मंत्रः सर्वसिद्धि
दः ॥ तत्रैव ॥ प्रणवं मंत्रमनोर्दत्वा वाद्यंते परमेश्वरि ॥ सप्तवारं जपेन्मंत्रं सूतकद्वयमु

क्तये ॥ मंत्रार्थं मंत्रचैतन्यं यो निर्मुद्रां न वेत्ति यः ॥ शतकोटिजपेनापि तस्य सिद्धिर्न जाय
ते ॥ मुक्तबीजाश्च ये मंत्रा न दास्यंति फलं प्रिये ॥ मंत्राश्चैतन्यसहिताः सर्वसिद्धिकराः स्मृ
ताः ॥ चैतन्यरहिता मंत्राः प्रोक्ता वर्णास्तु केवलं ॥ फलं नैव प्रयच्छंति लक्षकोटिजपैरपि ॥
मंत्रोच्चारे कृते यादृक् स्वरूपं प्रथमं भवेत् ॥ शते सहस्रे लक्षे वा कोटिजपेन तत्फलं ॥
हृदये ग्रंथिभेदश्च सर्वावयववर्द्धनं ॥ आनंदाश्रुपुलकौ देहावेशः कुलेश्वरि ॥ गद्गदो
क्तिश्च सहसा जायते नात्र संशयः ॥ सकृदुच्चरितेप्येवं मंत्रचैतन्यसंपुटे ॥ दृश्यंते प्र
त्ययास्तत्र पारंपर्यं तदुच्यते ॥ मासमासं जपेन्मंत्रं मातृलिप्या तु संपुटं ॥ क्रमोत्क्रमात्
सहस्रं च तस्य सिद्धिर्भवेद्ध्रुवं ॥ तत्र मातृलिपिः ॥ पंचह्रस्वाः संधिवर्णा व्योमेरग्निजलं
धरा ॥ अंत्यमार्णद्वितीयं च चतुर्थं मध्यसंक्रमात् ॥ पंचवर्गाक्षराणि स्युर्वर्णाः श्वेतेंदुलि
सह ॥ एषा मातृलिपिः प्रोक्ता द्विचत्वारिंशदक्षरैः ॥ गौतमीये ॥ एवं जपं पुरा कृत्वा तेजो
रूपं समर्पयेत् ॥ देवस्य दक्षिणे हस्ते कुशपुष्पाद्यवारिभिः ॥ सफलं तद्भवेन्नाव्येय प्रा

ण्यामंसमाचरेत्॥ जपस्यादौ जपांते च त्रितयं त्रितयं चरेत्॥ शक्तिविषये वा महस्रो॥ तथा
च॥ एवं जपं पुरा कृत्वा गंधाक्षतकुशोदकैः॥ जपं समर्पयेद्देव्या वामहस्ते विचक्षण॥ जपां
ते प्रत्यहं मंत्री होमयेत्तद्दशांशतः॥ तर्पणं चाभिषेकं च तत्तद्दशांशतो मुने॥ प्रत्यहं जोऽन्ये
द्युश्च नन्यूनाधिकप्रशांतये॥ अथ वा सर्वसंपूर्णे होमादिकमथाचरेत्॥ अथ होमाद्यश
क्तौ च सनत्कुमारीये॥ यद्यदंगं न वेद्द्यं तत्तत्संख्याद्विगुणो जपः॥ होमाद्यभावे जपः कार्यो
होमसंख्या चतुर्गुणः॥ विप्राणां क्षत्रियाणां च रससंख्यागुणः स्मृतः॥ वैश्यानां वसुसंख्या
कमेवं स्त्रीणामयं विधिः॥ यं वर्णमाश्रितः शूद्रः स च तस्य विधिं चरेत्॥ अत्राप्यशक्तौ यो
गिनीहृदये॥ होमकर्मण्यशक्तानां विप्राणां द्विगुणो जपः॥ इतरेषां तु वर्णानां त्रिगुणादि स
मन्वितः॥ एतेन स्त्रीशूद्राणां होमाधिकारः॥ तथा च शूद्राणां असमृति च कुराडप्रकर
णेऽधारदायां॥ स्त्रीणां होमाधिकारः॥ तत्र च॥ ॐ स्त्री मधुरोपेते होमः कन्यां प्रयच्छति॥
अनेन विधिना कन्या वरमाप्नोति वांछितं॥ अतः स्त्रीणां होमाधिकारः॥ तच्च ब्राह्मणद्वा

रा॥ तथा च तंत्रे॥ ॐकारोच्चारणाद्धोमात् शालिग्रामशिलार्चनात्॥ ब्राह्मणीगमनाच्चैव
शूद्रश्चांडालतां ब्रजेत्॥ इति सान्निषेधात्॥ तथा स्त्रीणामपि सर्ववैदिककर्मसु शू
द्रतुल्यत्वप्रतिपादनात्॥ स्त्रीशूद्रकरसंस्पर्शो वज्रपातसमो मतः इति वेगवद्वचनात्॥
तथा नारायणकल्पे॥ अष्टाक्षरो महामंत्रः सर्वाक्षर स्त्रीशूद्रयोः॥ प्रणवादिर्द्विजेष्वेव यो
मंत्रो न स्त्रीशूद्रप्रशस्यते॥ इति सर्वत्र स्त्रीणां शूद्रव्यवहारः सर्वेषां वा द्विगुणो जपः॥
यद्यदंगं विहीयेत तत्तत्संख्याद्विगुणो जपः॥ कर्त्तव्यश्चांगसिध्यर्थं तदशक्तौ तु नक्षितः
नचैवांगं विहीयेत तद्विशिष्टमवाप्नुयात्॥ अगस्त्यसंहितायां॥ यदि होमे न शक्तः स्या
त्पूजायां तर्पणेपि वा॥ तावत्संख्याजपेन्नैव ब्राह्मणाराधनेपि वा॥ नवेदंगद्वयेनै
वपुरश्चरणमप्यवे॥ ततश्च॥ गुरवे दक्षिणां दद्यात् भोजनाच्छादनादिभिः॥ गुरुः संतो
षमात्रेण मंत्रासिद्धिर्भवेद्ध्रुवं॥ सम्यक्सिध्यैकमंत्रस्य पंचांगोपासनेन च॥ सर्वे मंत्रा
श्च सिध्यंति तत्प्रसादात् कुलेश्वरि॥ गुरुमूलमिदं सर्वमित्याह संत्रयेदिनः॥ एकस्मान्मो

स्थितो निःसंगत्वा वंदेत चैव गुरुं॥ गुरुरेव परंब्रह्म तस्मादादौ तमर्चयेत्॥ निहान्नं वकुल
स्थायें जपेन्मंत्री नवकुल्लिः सह॥ एवं सिद्धमनुर्मंत्री साधयेत्सकलेप्सितान्॥ अथवान्यप्रका
रेण पुरश्चरणमुच्यते॥ ग्रहणेऽर्कस्य चेंदोर्वा शुचिः पूर्वमुपोषितः॥ नद्यां समुद्रगामिन्यां
नाभिमात्रोदके स्थितः॥ स्पर्शादिमुक्तिपर्यंतं जपेन्मंत्रमनन्यधीः॥ नद्यभावे तु यद्वा पु
ण्योदके स्नात्वा शुचिः पूर्वमुपोषितः॥ ग्रहणादिविमोक्षांतं जपेन्मंत्रं समाहितः॥ उपरा
गान्तो वेवा॥ अथवान्यप्रकारोयं पुरश्चरणके विधिः॥ चंद्रसूर्योपरागे च स्नात्वा प्र
यतमानसः॥ स्पर्शादिमोक्षपर्यंतं जपेन्मंत्रं समाहितः॥ जपाद्दशांशतो होमः स्तथा
होमात्तु तर्पणं॥ एवं कृत्वा तु मंत्रस्य जायते सिद्धिरुत्तमा॥ गोपालमंत्राणां होमतुल्यं त
र्पणं॥ इह गोपालमंत्राणां तर्पणं होमसंख्यामित्युक्तेः॥ सनत्कुमारे॥ द्व स्नात्वा स
संकल्प्यो विमोक्षांतं जपं चरेत्॥ तावद्यज्ञादिकं कुर्यात् ग्रहणांते शुचिः पुमान्॥
इति जपात्मंत्रसिद्धिर्न यत्नेन संशयः॥ आद्यादेवं तु रोधेन यदि जाप्यं त्यजेन्नरः॥

सच्च वेद्देवतास्तोहि पिंद्रस्स तनयत्नधः॥ इति सनत्कुमारीयवचनात्॥ जपस्यावश्यकत्वं तु
स्मृतं आरब्धपुरश्चरणगमनं॥ आरब्धे पुरश्चरणे यदि ग्रहणं भवेत् तदा प्राक्कृतानुरोधे
न न जपस्त्यागः॥ पंक्तियोगिनी हृदये॥ कल्पोक्तविधिना मंत्री कुर्याद्धोमं समाहितः॥ अथ
वा तद्दशांशेन होमादीश्च समाचरेत्॥ तथा अनंतरं दशांशेन कर्माद्धोमादिकं चरेत्॥
तदंते महतीं पूजां कुर्याद्ब्राह्मणतोषणं॥ ततो मंत्रस्य सिध्यर्थं गुरुं संपूज्य तोषयेत्॥ एवं
च मंत्रसिद्धिः स्यात् देवता च प्रसीदति॥ यद्यपि पुरश्चरणपदं पंचांगपरं॥ तथा च ज
प होमतर्पणाभिषेको विप्रभोजनं॥ पंचांगोपासनं लोके पुरश्चरणमिष्यते॥ तथापि ग्रहणा
दौ पुरश्चरणपदं जपमात्रपरं॥ सूर्योदयसमारभ्य यावत्सूर्योदयावधि॥ इत्यादौ द
र्शनात्॥ तत्र होमादेरभावात् किंच ग्रहणपुरश्चरणेऽपि होमादीति वचनादेवज्ञायते
तत्तु पुरश्चरणस्यापि पंचांगत्वात् सर्वत्र तदेव स्यादिति वाच्यं॥ ग्रहस्य पुरस्तादिधा
नमनर्थकं स्यात् किंतु ग्रहणे होमादिनियमाभावात् अत्र होमादि॥ ग्रहणपुरश्चरणे कृ

नेपद्धेप्रयोगेष्वधिकारइतिप्रकटीकृतंतदकरणेपुनःकेवलजपमात्रपुरश्चरणेना
धिकारः॥इतिसर्वसंमतमितिज्ञानं॥पुरश्चरणकालंतुवाराहीये॥चंद्रतारानुकूलेचशुक्ल
पक्षेशुभेहनि॥आरंभेतेनपुरश्चर्यांहिरोसुदिनेनचाचरेत्॥ ॥अथपुरश्चरणप्रयोग.
॥तत्रतावद्भूमेःपरिग्रहंकुर्यात्पुरश्चरणप्राक्तनतृतीयदिवसेक्षौरादिकंविधायवेदि
कायाश्चतुर्दिक्षुक्रोशार्धंक्रोशमेकंवाक्षेत्रंचतुरस्रंआहारादिविहारार्थंपरिकल्प्यत
त्रकूर्मचक्रानुगुणंमंडपंविधायएकमक्षंचकुर्यात्॥तत्परदिनेस्नानादिकंविधाय
शुद्धःसन्दृच्यचतुर्दिक्षुअश्वत्थोदुंबरप्लक्षाणामन्यतमस्यापिवितस्तिमात्रान्दशकीलकान्
अस्त्रायफडितिमंत्रेणअस्त्रेणतस्त्रानानिमंत्रितान्दशदिक्षु॥ॐयेचात्रविघ्नकर्तारोभु
विदिव्यंतरीक्षगाः॥विघ्नभूतास्तुयेचान्येममंत्रस्यसिद्धिषु॥मयैतान्कीलितंक्षेत्रंपरि
त्यज्यविदूरतः॥अपसर्पंतुतेसर्वेनिर्विघ्नासिद्धिरस्तुमे॥इत्यनेननिखनेत्ततःॐसुद
र्शनायास्त्रायफडितिमंत्रेणास्त्रंसंपूज्यपूर्वादिक्रमेणइंद्रादिलोकपालान्॥निर्ऋत्यैर्भुवः

श्वरिंद्रलोकपालइहागच्छेत्यावाह्यपंचोपचारैःपूजयेत्॥तथापुरश्चरणचंद्रिकायां
पूर्वेद्युःक्षेत्रादिकंगत्वाकुर्याद्भूमेःपरिग्रहं॥तथाह्यमुकमंत्रस्यपुरश्चरणसिद्धये॥म
येयंगृह्यतेभूमिर्मंत्रोयंसिध्यतामिति॥नगरादावपिक्रोशंक्रोशयुग्ममथापिवा॥आ
हारादिविहारार्थंतावतीभूमिमाक्रमेत्॥क्षीरद्रुमोद्भवान्दशकीलानस्त्रमंत्राभिमंत्रिता
न्॥निखनेद्दशदिग्भागेतेष्वस्त्रंचप्रपूजयेत्॥लोकपालान्पुनस्तेषुगंधाद्यैःपूजये
त्सुधीरिति॥ततोमध्यस्थानेक्षेत्रपालवास्तुवीरांश्चसंपूज्यसर्वविघ्नविनाशार्थंगणप
तिंचपूजयेत्॥यथा॥ॐअद्येत्यादिअमुकगोत्रःश्रीअमुकदेवशर्माहंअमुकमं
त्रपुरश्चरणकर्मणिसर्वविघ्नविनाशार्थंगणेशपूजामहंकरिष्ये॥इतिसंकल्प्यवेदि
मध्येपंचोपचारैर्गणेशंपूजयेत्॥तदुक्तं॥क्षेत्रपालादिकंतत्रपूजयेद्विधिवत्ततः॥
क्षेत्रेशंवास्तुनामानंविघ्नराजंसमर्चयेत्॥दिक्पतिभ्योबलिंदद्यात्ततःक्षेत्रंसमावि
शेत्॥तत्रमाषभक्तादिनापूजितदेवताभ्योबलिंदद्यात्॥ततःॐयेरौद्रारौद्रकर्मशि

ऽस्थाने निवासिनः ॥ मातरोप्युग्ररूपाश्च गणाधिपतयश्च ये ॥ विघ्नभूताश्च ये चान्ये
दिक्विदिक्षु समाश्रिताः ॥ सर्वे ते प्रीतमनसः प्रतिगृह्णंत्विमं बलिं ॥ इत्यनेनाष्टदिक्षु
भूतेभ्यो बलिं दद्यात् ॥ ततो गायत्रीं जपेत् ॥ तथा च ॥ प्रातःस्नात्वा तु गायत्र्यास्सहस्रं प्र
यतो जपेत् ॥ ज्ञाताज्ञातस्य पापस्य हृत्यर्थं प्रथमं तप ॥ इत्याक्रूराचार्याः ॥ यस्तु प्रातःस्ना
नात्तु गायत्र्या अयुतं प्रयतो जपेत् ॥ इति तत्पुनरस्तंतपापाशंकया संकल्पो यथा ॥
ॐ अद्येत्यादि अमुकगोत्रः श्री अमुकदेवशर्माहं ज्ञाताज्ञातपापक्षयकामो ऽष्टोत्तरस
हस्रसावित्रीजपमहं करिष्ये ॥ तत उपवासं हविष्यं वा कुर्यात् ॥ परदिने उषसि स्ना
नादिकं कृत्वा स्वस्तिवाचनपूर्वकं संकल्पं कुर्यात् ॥ विष्णुः ॥ ॐ अद्येत्यादि अमुकगोत्रः
अमुकदेवशर्माहं अमुकदेवताया अमुकमंत्रसिद्धिप्रतिबंधकारी यद्दुरितं तत्क्षयपू
र्वकं तन्मंत्रसिद्धिकामोद्यारभ्य यावत्कालेन सिध्यति तावत्कालममुकमंत्रस्य इयत्
संख्याजपतद्दशांशहोमतद्दशांशतर्पणतद्दशांशाभिषेकतद्दशांशब्राह्मणभोजन

११

रूपपुरश्चरणमहं करिष्ये ॥ इति संकल्प्य जपं कुर्यात् ॥ ततो होमस्ततस्तर्पणं ॥ कुर्या ए
वे ॥ तर्पणं तु ततः कुर्यात्तीर्थोदिष्टं निश्रिते ॥ जले देवं समावाह्य पाद्याद्यैरुदकात्म
कैः ॥ संपूज्य विधिवद्रूपापरिवारसमन्वितं ॥ एकैकमंजलिं तोये परिवारान्प्रतर्प
येत् ॥ ततो होमदशांशेन तर्पयेत्परदैवतं ॥ तर्पणवाक्यं तु स्नानप्रकरणे वक्ष्यं ॥
अभिषेकवाक्यं तु मूलमुच्चार्य नमोंते अमुकदेवतामहमभिषिंचयामीति कल्पद्रुमे
ऽप्यास्यमूर्ध्नि अभिषेचयेत् ॥ नीलतंत्रे ॥ मूलांते नाम चोच्चार्य सिंचयामि नमः पदान्
ति ॥ तथा च गौतमीये ॥ नमोंतं मंत्रमुच्चार्य तदंते देवताभिधां ॥ द्वितीयांतमहं पश्चाद
भिषिंचाम्यनेन तु ॥ अभिषिंचेत्स्वस्य मूर्ध्नि तोयैः कुंभाख्यमुद्रया ॥ शाक्तविषये नील
तंत्रे मंत्रांते नाम चोच्चार्य अभिषिंचयामि नमः पदमिति ॥ ततो दक्षिणा ॥ ॐ अद्येत्यमुकदे
वताया कृतैतत् अमुकमंत्रपुरश्चरणकर्मणः सांगतार्थं दक्षिणामिदं कांचनं यथा
नामगोत्राय गुरवे तुभ्यमहं संप्रददे ॥ ततो छिद्रावधारणं कुर्यात् ॥ ॥ अथ ग्रहण

१२

पुरश्चरणसंकल्पः॥ ॥तद्यथा॥ ॐ अद्येत्यादि राशिस्थिते निशाकरे दिवाकरे वा अमुकगो-
त्रोऽमुकदेवशर्माहममुकदेवतायाः अमुकमंत्रसिद्धिकामोऽद्यास्मादि विमुक्तिपर्यं-
तं जपरूपं पुरश्चरणमहं करिष्ये इति संकल्प्य जपेत्॥ तद्दिने तत्परदिने वा स्नानादि-
विधाय ॐ अद्येत्यादि अमुकगोत्रोऽमुकदेवशर्मामुकमंत्रस्य कृतैतद्ग्रहणका-
लीनदृश्यत्संख्यजपं तद्दशांशहोमं तद्दशांशतर्पणं तद्दशांशाभिषेकं तद्दशांशब्राह्म-
णभोजनं कर्माण्यहं करिष्ये॥ इति संकल्प्य होमं कुर्यात्॥ दक्षिणादिकं तु पूर्ववत्॥ ॥
अथ कूर्मचक्रं॥ ॥दीपस्थाने समाश्रित्य कृतं कूर्मफलप्रदं॥ चतुरस्रं भुवं कृत्वा कोष्ठ-
कं नवकं लिखेत्॥ पूर्वकोष्ठादि विलिखेद्रसवर्गाननुक्रमात्॥ लक्षे मात्रो मध्यकोष्ठे
स्वरान्युग्मान्क्रमाल्लिखेत्॥ दिक्षु पूर्वादितो यत्र देशस्तु रसं स्थितिः॥ मुखं तत्तत्स-
जानीयात्करावुभयतः स्थितौ॥ कोष्ठे कुक्षी तु ते पादौ द्वे शिष्टं पुच्छमीरितं॥ क्रमेणानेन
विज्ञेयं तन्मध्यस्थमणिकागतं॥ मुखस्थो लभते सिद्धिं करस्थः स्वल्पजीवनं॥ तदासीनः

कुक्षिसंस्थः पादस्थो दुःखमाप्नुयात्॥ पुच्छस्थः पीड्यते मंत्री बंधताडनादिभिः॥ कूर्म-
चक्रमिदं प्रोक्तं मंत्राणां सिद्धिसाधकं॥ कूर्मचक्रमविज्ञाय यः कुर्याज्जपयज्ञकं॥ तस्य
यज्ञफलं नास्ति सर्वानर्थाय कल्पते॥ ॥अथ मंत्राणां दश संस्काराः॥ ॥गौत-
मीये॥ जननं जीवनं पश्चात्ताडनं बोधनं तथा॥ अथाभिषेको विमलीकरणाप्या-
यने पुनः॥ तर्पणं दीपनं गुप्तिर्दशैता मंत्रसंस्क्रिया॥ स्वर्णादिपात्रे संलिख्य मातृ-
कामंत्रमुत्तमं॥ काश्मीरचंदनेनापि त्र्यस्रनाथाप्यसूयते॥ काश्मीरं शाक्तिसंस्कारे चं-
दनं वैष्णवे मतौ॥ शैवे भस्म समाख्यातं मातृकामंत्रलेखने॥ मंत्राणां मातृकामध्यादु-
द्धारो जननं स्मृतं॥ पंक्तिक्रमेण विधिना भूनिलिप्तसात्र निश्चितं॥ प्रणवांतरितान्कृत्वा
मंत्रवर्णान्जपेत्सुधीः॥ प्रत्येकं शतवारं तु जीवनं तदुदाहृतं॥ मंत्रवर्णान्समालिख्य
ताडयेच्चंदनांभसा॥ प्रत्येकं वायुबीजेन पूर्ववत्ताडनं मतं॥ शैवादिमंत्रभेदेन प्रोक्तं
द्रव्यत्रयं क्रमात्॥ विलिख्य मंत्रवर्णांस्तु प्रसूनैः करवीरजैः॥ तन्मंत्रवर्णसंख्यातैर्हन्या

द्वेषेन बोधनं ॥ तत्र तंत्रोक्तेन विधिना अभिषेकः प्रकीर्त्तितः ॥ अश्वत्थपल्लवैः सिंचेन्मंत्रीमं
त्रार्णसंख्यया ॥ संचिंत्य मनसा मंत्रं कुसुम्भाम्बुसमन्वितः ॥ ज्योतिर्मंत्रेण विधिवद् हेमन्तस्तत्र
यंत्रतो ॥ तारं व्योम अग्निमनुयुक् दंडदा ठौ ज्योतिर्मनुर्मतः ॥ मनुरौकारः ॥ दंडी अनुस्वारः
व्योम हकारः ॥ अग्नि रेफः ॥ स्वर्णेन कुशतोयेन पुष्पतोयेन वा तथा ॥ तेन मंत्रेण विधि
वदाप्यायन विधिः स्मृतः ॥ मंत्रेण वारिणा मंत्रे तर्पणं तर्पणं मतं ॥ मधुना शाक्ततंत्रे तु वि
ष्णवे चैं दुग्धजलेन ॥ शैवे घृतेन दुग्धेन तर्पणं सम्मजीरितं ॥ अभिषेकेपि तथा ॥ तारमाया
रमायोगो मनो दीपनमुच्यते ॥ जप्यमानस्य मंत्रस्य गोपनं त्वप्रकाशनं ॥ संस्कारा दश
संप्रोक्ताः सर्वतंत्रेषु गोपिताः ॥ यान्कृत्वा संप्रदायेन मंत्री वांछितमवाप्नुयात् ॥ मलत्रय
मिति ॥ आणवमायिककार्मिणं ॥ मायिकं नाम यो बोध्य पौरुषं कर्मणं मलं ॥ आणवं तद्
यं ज्ञेयं निर्दिष्टं तन्मनन्तरं ॥ तारमायारमायोग इति तारमायारमापुटितमंत्रमहोत्
र्सात जपेदित्यर्थः ॥ तथा च विम्बसारे ॥ तारमायारमापुटितेन जपं दीपनं ॥ रात म

हौत्तरं चैव दीपये साधको त्तमः ॥ ॥ अथ कल्यावनी दीक्षा प्रयोगः ॥ ॥ शिष्यः पूर्व
मुपोषितः कृतनित्यक्रियः स्वस्तिवाचनपूर्वकं संकल्पं कुर्यात् ॥ तद्यथा ॥ ॐ अद्येत्यादि अ
मुकगोत्रो अमुकदेवशर्माहं धर्मार्थकाममोक्षप्राप्तिकामो अमुकदेवताया अमुकमंत्रदीक्षा
महं करिष्ये इति संकल्प्य गुरुं वृणुयात् ॥ तद्यथा ॥ ॐ साधु भवानास्तां ॐ साध्वहमासे ॐ
अर्चयिष्यामो भवंतं ॐ अर्चय ॥ ततो गंधपुष्पवस्त्रालंकारादिभिर्गुरुमभ्यर्च्य दक्षिणां
गृहीत्वा पठेत् ॥ विष्णुः अद्येत्यादि अमुकगोत्रो अमुकदेवशर्मा अमुकदेवताया मत्कर्त्त
कामुकमंत्रदीक्षाकर्मणि अमुकगोत्रं अमुकदेवशर्माणमेभिः पाद्यादिभिरभ्यर्च्य गुरु
त्वेन भवंतमहं वृणे ॥ ॐ वृतोस्मीति प्रतिवचनं ॥ यथाविहितं कर्म कुरु यथाज्ञानतः क
रवाणि इति प्रतिवचनं ॥ ततो गुरुराचम्य द्वारदेशे सामान्यार्घ्यं कुर्यात् ॥ तद्यथा ॥ वामे त्रि
कोणवृत्तभूबिंबं विलिख्य आधारशक्तये नम इति संपूज्य फडिति मंत्रेणार्घ्यपात्रं प्रक्षाल्य
साधारं तत्र निधाय नम इति मंत्रेण संपूर्य अमुकमनुष्यास्यार्घ्यं नराइलातत् ॥ ॐ गं ग

चयमुनेत्यादीनां तीर्थमावाह्य॥ ॐ इति गंधपुष्पाभ्यां संपूज्य धेनुमुद्रां प्रदर्श्य तत्र सहधाराद
धाराजलं स्वाहा इति तज्जलेन द्वारमभ्युक्ष्य द्वारपूजां समाचरेत्॥ तथा च॥ त्रिकोणं वृत्तं भूबिंब
मराड्य रचयेत्ततः॥ आधारशक्तिं संपूज्य तत्राधारं विनिक्षिपेत्॥ अस्त्रेण पात्रं संशोध्य
हन्मंत्रेण प्रपूजयेत्॥ निक्षिपेत्तीर्थमावाह्य गंधादीन् प्रणवेन तु॥ दर्शयेद्धेनुमुद्रां वै साम
न्यार्घ्यमिदं स्मृतं॥ मंत्रयेत्प्रणवेनैव सामान्यार्घ्यमिदं स्मृतमिति गौतमीयवचनात्॥ अ
ष्टधा प्रणवजपः विशेषार्घ्येन तथा दर्शनात्॥ सामान्यादौ तु दशधा तद्धेनैत तथा दर्शनात्॥ तत
फडिति तज्जलेन द्वारमभ्युक्ष्य द्वारपूजां कुर्यात्॥ तद्यथा॥ ऊर्ध्वोदुंबरे ॐ विघ्नाय नमः॥ ॐ म
हालक्ष्म्यै नमः॥ ॐ सरस्वत्यै नमः॥ दक्षिणशाखायां ॐ विघ्नाय नमः॥ वामशाखायां ॐ
क्षेत्रेशाय नमः॥ तयोः पार्श्वे ॐ गंगायै नमः॥ ॐ यमुनायै नमः॥ देहल्यां ॐ अस्त्राय नमः इ
ति पूजयेत् पुष्पवारिभिः॥ मरीचौ चेत् ॐ द्वारदेवताभ्यो नमः॥ इत्येतन्मात्रं त्रिपुरादि
पूजादिषु गणेशं क्षेत्रपालं च बटुकं योगिनीं तथा॥ गंगां च यमुनां चैव लक्ष्मीं वाणीं ततो

यजेत्॥ इति विशेषः वेदितव्यः॥ नंदः सुनंदश्चंडश्च प्रचंडो बलमेव च॥ प्रबलो भद्रनामा
च सुभद्रो विघ्न वेदितव्याः॥ प्रणवादि नमोंतेन नाममंत्रेण पूजयेत्॥ ततो दक्षिणपाद
पुरः वामशाखां स्पृशन् दक्षिणांगं संकोचयेत्॥ मराड्यं ततः प्रविश्य नैरृत्यां वास्तुपुरुषाय
नमः॥ ॐ ब्रह्मणे नमः॥ ततो देवमंत्रेण दिव्यदृष्ट्या अवलोकनाद्दिव्यान् विघ्नानुत्सार्य अ
स्त्राय फडिति जलेनांतरीक्षगान् विघ्नानुत्सार्य वामपार्ष्णिघातत्रयेण भौमान् फडिति स
हजपान् विकिरान् नाशाय॥ ॐ अपसर्पंतु ते भूता ये भूता भुवि संस्थिताः॥ ये भूता विघ्नकर्ता
रस्ते नश्यंतु शिवाज्ञया॥ इत्यभिमंत्रितान् विकिरेत्॥ तथा च निबंधे॥ लाजचंदनसिद्धार्थभस्म
दूर्वादिशाकृताः॥ विकिरा इति संदिष्टाः सर्वविघ्नौघनाशनाः॥ ततः ह्रीं आधारशक्ति
कमलासनाय नमः॥ इत्यासनं संपूज्य॥ आसनमंत्रस्य मेरुपृष्ठ ऋषिः सुतलं छंदः कूर्मो दे
वता आसनपरिग्रहे विनियोगः॥ ॐ पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता॥ त्वं च
धारय मां नित्यं पवित्रं कुरु चासनं॥ इति पठित्वा स्वस्तिकादिक्रमेणोपविशेत्॥ ततो न

आदौ विघ्नं समुत्सार्य पश्चादासनकल्पनं॥ अथवा चासने स्थित्वा विघ्नानुत्सारयेत्सुधीः॥
पंचगव्येन मण्डपं शोधयेत्॥ पंचगव्यप्रमाणं तु गौतमीये॥ पंचगव्येन तद्देहमण्डपं च
विशोधयेत्॥ पलमात्रं दुग्धमात्रं गोमूत्रं तावदिष्यते॥ घृतं च पलमात्रं स्यात् गोमयं तो-
लकद्वयं॥ दधिप्रसृतिमात्रं स्यात् पंचगव्यमिदं स्मृतं॥ अथवा पंचगव्यानां समानं भाग-
मिष्यते॥ मूलमंत्रेण संमंत्र्य तेनैव शोधयेत्॥ तेन सर्वविशुद्धिः स्यात् सर्वपापनिकृंतनं॥
दक्षिणभागे पूजाद्रव्याणि वामे सुवासितापूर्णकुंभं हस्तप्रक्षालनार्थं पात्रं तत्र संस्थापये-
त्॥ सर्वदिक्षु घृतप्रदीपं च ततः पुरोंजलिं कृत्वा वामे॥ ॐ गुरुभ्यो नमः॥ दक्षिणे ॐ गणेशा-
य नमः॥ मध्ये ॐ अमुकदेवतायै नमः॥ तथा च॥ कृतांजलिपुटो भूत्वा वामे गुरुत्रयं यजे-
त्॥ दक्षिणे च गणेशानं मध्ये द्वे देवं विभावयेत्॥ ततः फडिति मंत्रेण गंधपुष्पाभ्यां करौ
संशोध्य ऊर्द्ध्वर्द्ध्व तालत्रयं दत्वा छोटिकाभिर्दशदिग्बंधनं कुर्यात्ततो रमिति जलधारया
अग्निप्राकारत्रयं विचिंतयेत्॥ ततो भूतशुद्धिः॥ ततो मातृकान्यासः॥ ततः प्राणायामः

ततः पीठन्यासः॥ ततः ऋष्यादिन्यासः॥ ततो मंत्रन्यासः॥ ततो मुद्राप्रदर्शनं॥ ततो ध्यानं॥ ततो
मानसपूजा॥ अर्घस्थापनं॥ यथा तत्र स्ववामे त्रिकोणमण्डलं कृत्वा तत्र त्रिपदिकामारोप्य
फडिति संप्रोक्ष्य शंखं प्रक्षाल्य तदुपरि संस्थाप्य नमः इति मंत्रेण गंधपुष्पाक्षतादुग्धादि तत्र
निःक्षिप्य विमलजलेन हं लं हं सं षं शं वं लं रं यं मं भं बं फं पं नं धं दं थं तं णं ढं डं ठं टं ञं झं जं छं चं
ङं घं गं खं कं अः अं औं ओं ऐं एं ॡं ॠं ऋं ऊं उं ईं इं आं अं इत्यनेन मूलेन च पूरयेत्॥ मं व-
ह्निमंडलाय दशकलात्मने नमः॥ त्रिपदिकायां अं सूर्यमण्डलाय द्वादशकलात्मने न-
मः॥ शंखे उं सोममण्डलाय षोडशकलात्मने नमः॥ जले संपूज्य॥ ॐ गंगे च यमुने चै-
व गोदावरी सरस्वती॥ नर्मदे सिंधु कावेरी जलेऽस्मिन् सन्निधिं कुरु॥ अंकुशमुद्रया तीर्थमा-
वाह्य अमुकीरहावकुस्वर हृदयाद्देवतां तत्रावाह्य हूमित्यवगुंठ्य फडिति॥ मालिनीमुद्रां
प्रदर्श्य वौषडिति तज्जलं वीक्ष्य अंगमंत्रैः सकलीकृत्य॥ गंधपुष्पाभ्यां तत्र देवतां संपूज्य
मछमुद्रयाछाद्य तदुपरि मूलमंत्रमष्टधा जपेत्॥ तथा च गौतमीये॥ गंधपुष्पैः समभ्य-

चक्षुष्मास्वं धामयोजयेत्॥ अष्टकृत्वो जपेन्मंत्रं शिखयागालिनीं न्यसेत्॥ तत्र स्वरूपपदं
तद्देवतापरं॥ ततो वसिष्ठधेनुमुद्रां प्रदर्श्य स्त्रिणा संरक्ष्य तस्मात्किंचिज्जलं प्रोक्षणीपात्रे नि
क्षिप्य तेनोदकेनात्मानं पूजोपकरणं मूलेन त्रिरभ्युक्ष्य पीठन्यासक्रमेण शरीरे धर्मादीन्पू
जयेत्॥ तद्यथा॥ दक्षिणस्कंधे ॐ धर्माय नमः॥ वामस्कंधे ॐ ज्ञानाय नमः॥ वामोरौ ॐ वैरा
ग्याय नमः॥ दक्षिणोरौ ॐ ऐश्वर्याय नमः॥ मुखे ॐ अधर्माय नमः॥ वामपार्श्वे ॐ अज्ञानाय नमः॥
नाभौ ॐ वैराग्याय नमः॥ दक्षिणपार्श्वे ॐ अनैश्वर्याय नमः॥ हृदये अनंताय नमः॥ ॐ
पद्माय नमः॥ अं अर्कमंडलाय द्वादशकलात्मने नमः॥ ॐ सोममंडलाय षोडशकला
त्मने नमः॥ ॐ मं वह्निमंडलाय दशकलात्मने नमः॥ सं सत्वाय नमः॥ रं रजसे नमः॥ तं त
मसे नमः॥ ॐ आं आत्मने नमः॥ ॐ अं अंतरात्मने नमः॥ ॐ ह्रीं ज्ञानात्मने नमः॥ ततो हृत्प
द्मस्य पूर्वादिकेसरेषु पीठशक्तीः संपूज्य मध्ये पीठमनुं यजेत्॥ तत्र हृदये मूलदेवतां नै
वेद्यं विना गंधैः संपूजयेत्॥ तथा च निबंधे॥ न्यासक्रमेण देहेषु धर्मादीनपि पूजयेत्॥

पुष्पादि पीठमन्व्यं तं तस्मिंश्च परदेवतां॥ विना नैवेद्यगंधाद्यैरुपचारैः समर्चयेत्॥ तत
उत्तमांगहृदयमूलाधारपादसर्वांगेषु मूलेन पंचपुष्पांजलिं दत्वा यथाशक्ति मंत्रं जप्त्वा गुह्या
दिना जपं समर्पयेत्॥ तथा च निबंधे॥ पंचकृत्वस्ततः कुर्यात्पुष्पांजलिमनन्यधीः॥ न उ
त्तमांगहृदाधारपादसर्वांगकेक्रमात्॥ एवं ततः प्रोक्षणीपात्रस्थेन वारिणा विदध्यात्
तत्प्रोक्षणपात्रोयं विसृज्य पूर्ववत् संपूज्य बहिः पूजामारभेत्॥ तत्र वक्ष्यमाणगारदोक्तः॥ सर्व
तोभद्रमंडलाद्यन्यतममंडलेषु पूजयेत्॥ ॐ मंडलेषु पूजयेत्॥ ॐ मंडलाय नमः॥ इति मंड
लं संपूज्य शालिभिः कर्णिकामध्यमापूर्य तदुपरि तंदुलानास्तीर्य विहरंचार्कृतसंयुक्तं तदु
परि न्यसेत्॥ ततो मंडलेण तां पूजयेत्॥ तद्यथा॥ पीठमध्ये ॐ आधारशक्तये नमः॥ ॐ कूर्मा
य नमः॥ इति पीठमन्वंतं तत्र स्थंडिलोक्तपूजां कुर्यात्॥ मंडले प्रादक्षिण्येन यं धूम्रार्चिषे नमः
इत्यादि वक्ष्यमाण वह्निदशकलाविम्बस्य पूजयेत्॥ ताश्च धूम्रार्चिरूष्मा ज्वलिनी ज्वालि
नी विस्फुलिंगिनी सुश्रीः सुरूपा कपिला हव्यकव्यवहे तथा इति॥ ततो हेमाद्रिरचितं कुंभ

डितिप्रह्लाद्य चंदनागरुकर्पूरैर्भावयित्वा त्रिगुणतंतुना तंतुनासंवेष्ट्य ऊर्ध्वायनमः॥ इतिगंध
पुष्पाभ्यां संपूज्य विहाराहृतं नवरत्नानि च तत्र निक्षिप्य प्रणवमुच्चरन् कुंभं पीठयोरेकं विन्या
स्य पीठे स्थापयेत्॥ कुंभविधानं तु गौतमीये॥ हैमं रौप्यं तथा ताम्रं मार्त्तिकं वा स्वशक्तितः
वित्तशाठ्यं न कुर्वीत कृते निष्फलमाप्नुयात्॥ षट्त्रिंशदंगुलं कुंभं विस्तारोन्नतिशालि
तं॥ षोडशां द्वादशां वापि ततोन्यूनं न कारयेत्॥ ततो कुंभे प्रादक्षिण्येन सूर्यस्य कुंभं तपिन्यै
नमः॥ इतिद्वादशकलाविंबस्य संपूजयेत्॥ ताश्च तपनी तापिनी धूम्रा मरीचि ज्वालि
नी रुचिः॥ सुषुम्ना भोगदा विश्वा बोधिनी धारिणी क्षमा इति॥ ततः ह्रीं रक्तकषायेण पञ्चा
शत्वर्णवेनया॥ तीर्थोदकैर्वा गंधस्रक्चासितजलैर्वा तत्रावाह्य देनमातृकामंत्रं च प्रतिलो
मतो जपन् पूरयेत्कुंभं देवताधिया॥ ततश्चंद्रस्य अमृतादिषोडशकला जले प्रादक्षिण्येन
विंबस्य अमृतायै नमः इत्यादि संपूजयेत्॥ ताश्च॥ अमृता मानदा पूषा तुष्टिः पुष्टी रतिर्धृ
तिः॥ शशिनी चंद्रिका कांतिर्ज्योत्स्ना श्रीः प्रीतिरंगदा॥ पूर्णा पूर्णामृता चैव सोमस्यैताः कला

स्मृताः॥ इतिशंस्वांतरं ह्रीं रक्तकषायादिद्रव्यैरापूर्य गंधाष्टकं विलोड्य तस्मिन् जलेसक
लाः कलाः समावाह्य पूजयेत्॥ गंधाष्टकं तु त्रिविधं यथा॥ शारदायां॥ गंधाष्टकं तु त्रिविधं
शाक्तिविष्णुशिवात्मकं॥ चंदनागरुकर्पूरचोरकुंकुमरोचनाः॥ जटामांसी कपियुता शा
क्तेर्गंधाष्टकं विदुः॥ चंदनं गुरुह्रीवेरकुंकुमा - - चम्पकाः॥ जटामांसीमुर मिति विष्णोः
गंधाष्टकं स्मृतं॥ चंदनागरुकर्पूरतमालजलकुंकुम॥ - - - - गुरुसंयुक्तं शैवं गंधाष्ट
कं स्मृतं॥ अस्यार्थः॥ चंदनागुरुकर्पूरचोरकस्तूर्यादि कुंकुमरोचना॥ जटामांसी गाठा नाम
इति शाक्तिगंधाष्टकं॥ चंदनगुरुवाह्लाक कुंकुमं घृतवारणं मूलजटामांसी देवदारु इति वि
ष्णोगंधाष्टकं॥ चंदनागुरुकर्पूरतमालजलवाह्लाककुंकुमरक्तचंदनकुष्ठमिति शैवंगंधाष्टकं
तत्रादौ वह्नेर्दशकलाः पूजयेत्॥ तद्यथा॥ वह्नेर्धूम्रार्चिरादिदशकला इहागच्छत इहतिष्ठ
त सन्निधीभवत ततो मूलमंत्रं प्रतिलोमेन जपन्॥ मंत्रस्य देवतां मनसा ध्यायन्॥ आसां
प्राणप्रतिष्ठां कुर्यात्॥ तद्यथा॥ आं ह्रीं क्रौं हंसः धूम्रार्चिरादि वह्नेर्दशकलानां प्राणा इह मा

णि॥ एवं अग्नेर्धूम्रार्चिरादिवह्निदशकलानां सर्वेंद्रियाणि॥ अं धूम्रार्चिरादिवह्निदशकलानां
वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा॥ इति प्राणप्रतिष्ठां कृत्वा गंधा
दिभिः पूजयेत्॥ ॐ धूम्रार्चिरादिभ्यः एष गंधो नमः॥ इत्यादि पंचोपचारैः पूजयेत्॥ तद्यथा॥
धूम्रार्चिषे नमः॥ लं ज्वलिन्यै नमः॥ वं ज्वालिन्यै नमः॥ शं विस्फुलिंगिन्यै नमः॥ षं सुश्रियै नमः॥
सं सुरूपायै नमः॥ हं कपिलायै नमः॥ लं हव्यवाहायै नमः॥ क्षं कव्यवाहायै नमः॥ शक्तश्चे
त्प्रत्येकमावाह्य पाद्यादिभिः पूजयेत्॥ सूर्यस्य तपिन्यादि द्वादशकलाः पूर्ववदावाहनादि
कं कृत्वा पूजयित्वा च प्रत्येकं पूजयेत्॥ तद्यथा॥ कं भं तपिन्यै नमः॥ खं बं तापिन्यै नमः॥ गं फं
धूम्रायै नमः॥ घं पं मरीच्यै नमः॥ ङं नं ज्वालिन्यै नमः॥ चं धं रुच्यै नमः॥ छं दं सुषुम्नायै नमः॥
जं थं भोगदायै नमः॥ झं तं विश्वायै नमः॥ ञं णं बोधिन्यै नमः॥ टं ढं धारिण्यै नमः॥ ठं डं क्षमा
यै नमः॥ इति प्रत्येकं पूजयेत्॥ शक्तश्चेत्प्रत्येकमावाह्य पाद्यादिभिः पूजयेत्॥ तथा च निबं
धे॥ कभाद्या वसुदाः सौराः ठडांता द्वादशोदिता इति॥ शक्तश्चेत्प्रत्येकमावाह्य पाद्यादिभिः

पूजयेत्॥ चंद्रस्यामृतादिषोडशकलाः पूर्ववदावाहनादिकं कृत्वा पूजयेत्॥ ततः प्रत्येकेन पू
जयेत्॥ तद्यथा॥ अं अमृतायै नमः॥ आं मानदायै नमः॥ इं पूषायै नमः॥ ईं तुष्ट्यै नमः॥
ॐ तुं रत्यै नमः॥ ऊं --- नमः॥ ऋं धृत्यै नमः॥ ॠं शशिन्यै नमः॥ ऌं चंद्रिकायै नमः॥ ॡं कां
त्यै नमः॥ अशक्तश्चेत्प्रत्येकमावाह्य गंधादिभिः पूजयेत्॥ ततः पंचाशत्कलाः पूजयेत्
यथा तद्वद्दंते रत्नपात्रस्थकादिभिः शादिभिः पुनरुकारजाः कालयादिभिः लिपजास्फबिंदुजाः
षादिभिः पूर्वगलेन नादजाः सृष्ट्यादिकचवर्गदशकलाः पूर्ववत्प्राणप्रतिष्ठादिकं कृत्वा पू
जयेत्॥ प्रत्येकपूजनं तु कं सृष्ट्यै नमः॥ खं ऋद्ध्यै नमः॥ गं स्मृत्यै नमः॥ घं मेधायै नमः॥ ङं
कांत्यै नमः॥ चं लक्ष्म्यै नमः॥ छं द्युत्यै नमः॥ जं स्थिरायै नमः॥ झं स्थित्यै नमः॥ ञं सिद्ध्यै नमः॥ श
क्तश्चेत्प्रत्येकमावाह्य पूजयेत्॥ ततः हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषत्॥ अति
थिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्॥ इति तमावाह्य यं रवे पूजये
त्॥ ततो जरादिटतवर्गदशकलाः पूर्ववत्प्राणप्रतिष्ठादिकं कृत्वा पूजयेत्॥ टं जरायै न

मः॥ ठं पालिन्यै नमः॥ डं शांत्यै नमः॥ ढं ऐश्वर्यै नमः॥ णं रत्यै नमः॥ तं कामिकायै नमः॥ थं वरदा
यै नमः॥ दं ह्लादिन्यै नमः॥ धं प्रीत्यै नमः॥ नं दीर्घायै नमः॥ इत्येताः प्रत्येकमावाह्य पूजये
त्॥ ततः प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः यस्योरुषु त्रिषु विक्रमणेष्वधि
क्षियंति भुवनानि विश्वा इति जप्त्वावाह्य पूजयेत्॥ ततस्तीक्ष्णादिरुद्रदशकलाः पूर्ववत्प्राण
प्रतिष्ठादिकं कृत्वा पाद्यादिभिः पूजयेत्॥ पं तीक्ष्णायै नमः॥ फं रौद्र्यै नमः॥ बं भयायै नमः॥ भं
निद्रायै नमः॥ मं तंद्र्यै नमः॥ यं क्षुधायै नमः॥ रं क्रोधिन्यै नमः॥ लं क्रियायै नमः॥ वं उत्कार्यै
नमः॥ शं मृत्यवे नमः॥ इत्येताः प्रत्येकमावाह्य पूजयेत्॥ ततः त्र्यंबकं यजामहे सुगंधिं पुष्टि
वर्धनं। उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात्॥ इति जप्त्वावाह्य पूजयेत्॥ ततः पी
तादि ईश्वरपंचकलाः प्राणप्रतिष्ठादिकं कृत्वावाह्य पूजयेत्॥ षं पीतायै नमः॥ सं श्वेतायै न
मः॥ हं अरुणायै नमः॥ क्षं असितायै नमः॥ अं अनंतायै नमः॥ इत्येताः प्रत्येकमावाह्य पा
द्यादिभिः पूजयेत्॥ ततः तद्विष्णोः परमं पदं सदा पश्यंति सूरयः॥ दिवीव चक्षुराततमिति

जप्त्वावाह्य पूजयेत्॥ ततो निवृत्त्यादि सदाशिवषोडशकलाः पूर्ववत्प्राणप्रतिष्ठादिकं कृत्वा पा
द्यादिभिः पूजयेत्॥ ततः प्रत्येकेन पूजयेत्॥ तद्यथा॥ अं निवृत्त्यै नमः॥ आं प्रतिष्ठायै नमः॥
इं विद्यायै नमः॥ ईं शांत्यै नमः॥ उं इंधिकायै नमः॥ ऊं दीपिकायै नमः॥ ऋं रेचिकायै नमः॥
ॠं मोचिकायै नमः॥ ऌं परायै नमः॥ ॡं सूक्ष्मायै नमः॥ एं सूक्ष्मामृतायै नमः॥ ऐं ज्ञानामृता
यै नमः॥ ओं आप्यायिन्यै नमः॥ औं व्यापिन्यै नमः॥ अं व्योमरूपायै नमः॥ अः अनंतायै न
मः॥ इत्येताः प्रत्येकमावाह्य पाद्यादिभिः पूजयेत्॥ तद्विप्रासो विपन्यवो जागृवांसः स
मिंधते तद्विष्णोर्यत्परमं पदं॥ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु। आसिंचतु प्रजा
पतिर्धाता गर्भं दधातु ते॥ गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति॥ गर्भं ते अश्विनौ दे
वावाधत्तां पुष्करस्रजौ॥ इति जप्त्वावाह्य पूजयेत्॥ ततः कलशात्मकं ततः शंखस्थं काष्ठके
न्नेनि क्षिपेत्॥ ततोऽश्वत्थवटबकुलपनसचूतपल्लवैर्दूर्वयाश्वेदितैः कलशं रूपं
कंजवक्त्रं पिधाय तस्मिन्कुंभे मूर्तिं संकल्प्य यथोक्तरूपेण देवतां ध्यात्वा तस्या मा

नादि कृत्वा पूजयेत्॥ यथा मूलमुच्चार्य अमुक इहावह इह सन्निधेहि इह सन्निरुध्यस्व
त्यावाहनादिकं कृत्वा जनिसवर्गं देवतांगे अंगन्यासं कृत्वा वा मितिधेनुमुद्रया
मृतीकृत्य परमीकरणमुद्रया परमीकुर्यात्॥ ततः प्राणप्रतिष्ठां कृत्वा षोडशोपचारैः
पूजयेत्॥ अर्घादिपात्रनियमस्तु गौतमीये॥ अर्घस्य त्रीणि पात्राणि पाद्यस्यापि त्रयं
भवेत्॥ तथैवाचमनीयानि पात्राणि च विभागशः॥ तथा करणदौर्बल्यादेकमेव प्र
शस्यते॥ किंतु सामान्यविशेषार्घद्वयस्यावश्यकत्वं न यत्र तत्रेश्वरः॥ एकपात्रं न कर्तव्यं यदि
सा हास्य महेश्वरः॥ मंत्रापराध्नुरव्यां तिआपदस्तु पदे पदे॥ इहलोके दरिद्रस्यात् मृते
च नरकं व्रजेत्॥ ततो मूलमुच्चार्य एतत्पाद्यममुकदेवतायै नमः॥ इति पदांबुजे॥ एत
च्चान्याघ्रदूर्वाअपविष्णुक्रांतादि निरीरितं॥ स्वधामंत्रेण वा दद्यात् वदाचमनीयकमित्य
स्मुधापात्रं कुर्वन्॥ सुधाराः स्यमृतवाचकत्वात्॥ इदमाचमनीयं वामिति वदंति॥
मधुपर्कं ततो दद्यात् जलमंत्रेण देशिक इति वचनात्॥ न चेम धुपर्कमात्रविषयमिदं

सुधामुना ततः कुर्यान्मधुपर्कं मुखांबुजे॥ तेनैव मनुना कुर्याद्द्विराचमनीयकं॥ तथा
वारुणेन च मंत्रेण दद्यादाचमनीयकं॥ इति मैथिलास्तु स्वधा इति पाठं कुर्वंति तत्स्वधेति व
कारस्य त्यागाबोधकत्वात्॥ किंच त्यागार्थकस्वाहाशब्देनार्घदानात् तत्समभिव्याहृताचम
नदानेपि त्यागाप्रबोधकेन स्वधामंत्रेण न तु नित्यनेनेत्याकूतः॥ तथा नमः स्वधा स्वाहा वौ
षडिति यथाक्रमं चाभिधानात्॥ जलमंत्रेणेत्यादिवचनं प्रमाणमस्त्यन्यदिति तांत्रिकाः॥ तेना
चमनीयं स्वधेति तथा स्वधेत्याचमनीयं पंचत्रिवारं मुखपंके॥ स्वधेति मधुपर्कं च पुनरा
चमनीयकमिति॥ सोमशंभुधृतवचनादेके पुनर्जलमंत्रेण देशिकः वारुणेन च वाजेत्य
त्रसत्यर्थं तृतीयां वदंत इदमाचमनीयं वदंतो॥ अर्घ्यं स्वाहा इति गंधपुष्पाक्षतयवकुशा
ग्रतिलसर्षपदूर्वास्तिकमर्घ्यं शिरसि दद्यात्॥ वैष्णवे तु अर्घ्याद्धिकमेतैर्वदद्यादिति वदंति
नवांगार्घ्यं यथा कालिकापुराणे सितसर्षपमुद्गास्त्रिलसत्त्रयान्तरे॥ रक्तचंदनपुष्पैश्च
हृत्वाभिरिचनादित्तिः॥ नवंलिविसारदर्घ्यं प्रज्ञायांतिलसन्निधौ॥ ततो मधुपर्कं स्वधामा

र्द्धं दधिमधुसंमिश्रमेतदुक्तं मनीषिभिः॥ एवं पुनराचमनीयं स्वधात ततः स्नानीयं वेदयामि
ततो वस्त्रयज्ञोपवितानि दद्यात्॥ ततो मंत्रपूरितमात्रकावलोकितत्तन्मासनस्थाने पूजयि
त्वा चंदनागरुकर्पूरकाश्मीरगुर्यात्मिकं गंधं दद्यात्॥ तथा च निबंधे॥ गंधश्चंदनकर्पूरका
लागरुभिरीरितइति॥ ततः पुष्पाणि यो वह्नस्वर्त्रदाने मूलमंत्रोच्चारणं तत्तदावरण
पूजा॥ ततो गुग्गुल्वगुरुशीरचार्करामधुचंदनैर्धृतान्वितं धूपं दद्यात्॥ तथा च चार
दायां॥ गुग्गुलुशीरचार्करामधुचंदनैः धूपयेदाज्यसंमिश्रैर्नीचैर्देवस्य देशिकः॥ विशे
षस्तु तंत्रांतरे॥ सिताज्यमधुसंमिश्रं गुग्गुल्वगुरुचंदनैः॥ दशांग धूपमेतत्तु सर्वदेव
प्रियं सदा॥ रोगरोगहरो दाकेशाः सुरतरुजनुलघुपोगविशेषकः॥ चक्रविवर्जितवारि
दतुराधूपवार्त्तिविहस्तुं ददिनरा॥ गुग्गुलं सरलं देवदारु पत्रं नखं यक्षसंज्ञं वै॥ कुष्ठं वेरमगुरुं
कुष्ठं गुडं सर्जरसं घनं॥ हरीतकी नखीलाक्षां जटा मांसी च शैलजं॥ षोडशांगं विदुर्धूपं
दैवे पित्र्ये च कर्मणि॥ मधुमुस्तं घृतं गंधं गुग्गुल्वगुरुशैलजं॥ सरलं सिंहलसिद्ध चंदनं

गो धूप इष्यते॥ कर्पूरगाक्षिणा वर्त्तिकया दीपं दद्यात्॥ तथा च वर्त्तिकर्पूरगर्भेण सर्पिषा
तिलजेन वा॥ आरोप्य दर्शयेद्दीपानुच्चैः सौरभिराजिनः॥ इति गौतमीये विशेषस्तु॥ तंत्र
तत्र जलं दद्यात्तदुपचारांतरा॥ ततो नैवेद्यानि दद्यात्॥ गंधादिदाने विशेषस्तु तंत्रांतरे
मध्यमानामिकांगुष्ठैर्णपार्वति॥ दद्याच्च विमलं गंधं मूलमंत्रेण साधकः॥ अंगुष्ठ
तर्जनीभ्यां तु चक्रे पुष्पं निवेदयेत्॥ यथा गंधं तथा देवी धूपं दद्याद्विचक्षणः॥ मध्यमा
नामिकाभ्यां तु मध्ये पर्वणि देशिकः॥ अंगुष्ठाग्रेण देवेशि धृत्वा धूपं निवेदयेत्॥ तथा
ततः समर्पयेद्धूपं घंटावाद्यजयध्वनैः॥ तथा जयध्वनि ततो मंत्रमातः स्वाहेत्युदीप्य च॥
जय्यध्वाद यन्घंटासुधूपैर्धूपयेत्ततः॥ शैवागमे॥ धूपकाले नमस्कारेणाश्रोसाम्यस्य मह
दामुना॥ स्वस्तेणा वृक्ति तां घंटां वादयन्गुग्गुलं दहेदिति॥ एवं दीपदाने पि घंटावादनम
पि॥ तथा च गौतमीये॥ उत्थार्य दक्षिणपर्यंतं घंटां वामदिशि स्थितं॥ वादयन्वामहस्तेन न
चार्पयेत्॥ वामले॥ दीपं दक्षिणतो दद्यात्पुरतो वा न वामतः॥ वामतस्तु तथा धूपं अग्रे

वामनेत्रं दक्षिणे॥ नैवेद्यं दक्षिणे भागे पुरतो वा न पृष्ठतः॥ तेन घृतेन युक्तं तु दक्षिणे तैलयुक्तं
वामे एवं स्थिता त्रिस्थिरदक्षिणे रक्षा चेदानेपकं च देवता वामे आमान्नं च दक्षिणे इति सांप्र
दायिकास्तु दर्पिप्रमाणा अन्यं ततोऽष्टोत्तरसहस्रं होरातं वा संज्ञ्यगुर्वादिनानुपंचसमर्पये
त्॥ ततो मंत्रस्य दशसंस्काराः पूर्वोक्तेन ततो गुरुः शिष्यमानीय यथोक्तवेष्टितनेत्रं शिष्यनेत्र
युक्तेणाच्छाद्य शिष्यांजलिपुष्पैः पूरयित्वा गुरुः स्वयमेव मंत्रमुच्चरन् कलशे देवतां प्र
क्षेपयेत्॥ ततो नेत्रबंधं हरिद्रस्त्रेणास्तिरेणासीनं शिष्यं आत्मयागक्रमान्न्यस्तशुद्धिं
विधाय॥ तत्तन्मंत्रोक्तन्यासान् शिष्यस्य देहे कुर्यात्॥ कुंभस्थां देवतां पुनः पंचोपचारैः पू
जयित्वाऽलंकृतं शिष्यं अस्मिन्नुपवेशयेत्॥ ततो मंगलाचारपूर्वकं तत्कुंभं समुद्धृत्य त
न्मुखस्थान् पल्लवान् शिष्यस्य शिरसि निधाय मातृकां मनसा जपन् मूले
न साधितैस्तोयैस्तमभिषिंचेत्॥ शिष्योऽपि शिष्टजलेनाचम्य वाससी परिधाय गुरोः सन्नि
धावुपविशेत्॥ तमेव गुरुणा स्वनो देवतां शिष्यं संक्रांतां तयोरैक्यं संभावयन् गंधादिभिः

पूजयेत्॥ ॐ सहस्रारं हुं फट् इति मंत्रेण शिष्यस्य शिरस्यां बुध्वा संरक्षणं न्यासं कुर्यात्॥ तद्य
था॥ पादतलाज्जानुपर्यंतं ॐ निवृत्त्यै नमः॥ जानुतो नाभिपर्यंतं प्रतिष्ठायै नमः॥ नाभेराकंठं
विद्यायै नमः॥ कंठाल्ललाटांतं शांत्यतीतायै नमः॥ ललाटादाकंठं ॐ शांत्यै नमः॥ कंठान्नाभि
पर्यंतं ॐ विद्यायै नमः॥ नाभेर्जानुपर्यंतं ॐ प्रतिष्ठायै नमः॥ जान्वोः पादपर्यंतं ॐ निवृत्त्यै न
मः॥ ततोऽमुकमंत्रं ददामीति शिष्यहस्ते जलं दद्यात्॥ ततो ददस्वेति शिष्यो ब्रूयात्॥ ततः शि
रसि हस्तं धृत्वाऽष्टोत्तरशतं जपेत्॥ तथा च वसिष्ठः॥ ततः शिरसि स्वस्य हस्तं दत्वा शतं जपे
त्॥ अष्टोत्तरं ततो मंत्रं दद्यादुदकपूर्वकं॥ आवयोस्तुल्यफलदो भवत्वेवमुदीरयेत्॥ ततो
रुष्या॥ दिव्युक्तं गुरुः दक्षिणकर्णे त्रिः श्रावयेत्॥ तथा च गौतमीये॥ मालयाप्तं तस्य देहे गु
रुः शिष्यस्य यत्नतः॥ दक्षकर्णे वदेन्मंत्रं त्रिवारं पूर्णमानसः॥ दक्षेति द्विजातिविषये॥ त
था च निबंधे॥ दक्षकर्णे त्रिशो विद्यामेकोवारेण शूद्रके॥ एवं विविधद्विजातीनां स्त्रीशू
द्राणां च वामतः॥ ततो मंत्रं जप्त्वाऽष्टोत्तरशतं जपेन्मंत्रं शताष्टकं॥ शारदायां॥ गुरोर्लब्धा

पुनर्विद्यांमहरूत्वाजपेत्सुधीः॥गुरुमंत्रदेवतानामैक्यंसंभावयन्धिया॥इतिवचनंतुत
द्भावनायजपविषयं॥ततोगुरोर्लब्धांविद्यांयथाविधिजपेत्॥ततोगुरुश्चरणेदंडवत्पति
तएवतिष्ठति॥इत्युत्थापयेत्॥ततःशिष्यःकृतांजलिर्जलमादायॐअद्यकृतोऽमुकमंत्र
ग्रहणप्रतिष्ठार्थंदक्षिणामिदंसुवर्णमग्निदेवतंअमुकगोत्रायअमुकदेवशर्मणेगुर
वेतुभ्यमहंसंप्रददे॥शरीरमर्थप्राणांश्चसर्वंतस्मैनिवेदयेत्॥ततःप्रभृतिकुर्वीतगुरोः
प्रियमनन्यधीः॥यथोद्दिष्टतमंलोकेगुरवेतन्निवेदयेत्॥स्वतंत्रेदक्षिणानियमोयथा
गुरवेदक्षिणांदद्यात्प्रत्यक्षोयाशिवात्मने॥सर्वस्वंवातदर्धंवातदर्द्धंवातदाज्ञया॥नचे
त्संचारिणीशक्तिःकथमस्यभविष्यति॥अन्यत्रापि॥सर्वस्वंदक्षिणांदद्यात्सुवर्णंवागा
श्चदद्यात्पयस्विनीः॥भूमिंवृत्तिकरींदद्यात्पुत्रपौत्रानुपायिनीं॥तथा॥गुरवेदक्षिणां
दद्यात्सुवर्णंवासमन्वितं॥गुरुसंतुष्टमात्रेणदुष्टमंत्रोपिसिध्यति॥अन्यथानैवसि
द्धिःस्याद्विचारायकल्पते॥इति॥ततोमिष्टान्नपानादिनाब्राह्मणान्संतोष्यस्वयंभुं

त॥दीक्षादिवसेगुरुशिष्ययोरुपवासेदोषमाह॥योगिनीतंत्रे॥मंत्रंदत्वागुरुश्चैवत
वासंसमाचरेत्॥तस्यदेवःसदारुष्टःशापंदत्वाव्रजेत्पुरं॥यद्यत्रहोमःक्रियतेतदात
द्धानंचस्मातः॥ ॥इतिकलावतीदीक्षा॥ ॥अथपंचायतनदीक्षायांतुप्यामले॥
यानीतुयदामध्येऐशान्यामच्युतंयजेत्॥आग्नेय्यांपंचवक्त्रंचनैरृत्यांगणनायकं॥
ायव्यांतपनंचैवपश्चात्कमठदाहनं॥यदातुमध्येगोविंदंऐशान्यांशंकरंयजेत्॥आग्ने
यांगणनाथंचनैरृत्यांतपनंतथा॥वायव्यामंबिकांचैवयोगमोक्षैककर्मिकां॥शंकरं
युयदामध्येऐशान्यामच्युतंयजेत्॥आग्नेय्यांतपनंचैवनैरृत्यांगणनायकं॥वायव्यां
ार्वतींचैवस्वर्गमोक्षप्रदायिनीं॥आदित्यंचयदामध्येऐशान्यांशंकरंयजेत्॥आग्ने
यांगणनाथंचनैरृत्यांकेशवंयजेत्॥वायव्यामंबिकांदेवींस्वर्गसाधनकर्मिकां॥गण
ाथंयदामध्येऐशान्यांकेशवंयजेत्॥आग्नेय्यामीश्वरंचैवनैरृत्यांतपनंतथा॥वाय
पिपार्वतींचैवपूजयेन्मोक्षसाधनं॥तथागणेशशक्तिविमर्दिणीं॥शंभुमध्यगतेह

शीघ्रं हरम्बदैव्यै हरौ रोचं कुरेश्वास्मै नागस्तुतारवौ हरजगणेशाज्ञां बिकास्थापिता:॥ देव्यां विलु
हरे कदंतवरयो लंबोदरेतैश्वरदे नाथ्यरिं कर न्नागतो ऽतिस्वरवदाप्यस्मास्तते हानिदा:॥
रामार्चनचंद्रिकायां गोतमीये च॥ यदंगदेवताया पूजने विशेषकर्म:॥ ततः रामगोपाल
विषयमिति केचित्॥ वस्तुतो वैकल्पिकमिति संप्रदाय:॥ एतेषां पूजनं तु गोतमीये॥ गं
धादिभिरभ्यर्च्य षडंगार्चनमेव च॥ विंदात्कृत्यो जपेन्मंत्रं नमस्कृत्य समापयेत्॥ अंग
देवतापूजाकालस्य पीठपूजानंतरं॥ तथा च सनत्कुमारीये॥ पीठस्यार्चनमंगदेवपू
जनं प्राणप्रतिष्ठानंतरमावाहनमिति॥ यत्तु देवे पुष्पांजलिं दत्वा अंगदेवान् समर्चये
त्॥ तत्र प्रतिष्ठितयंत्रादिपरं यंत्रातिरिक्ताधारे पूजने तु कृत्यांकम्या॥ एकपीठे प्रथक्
पूजां विनायंत्रं करोतियः॥ अंगांगित्वं परित्यज्य देवताशापमाप्नुयात्॥ सर्वेषामंगमं
त्राणां सिद्धादि विचारो नास्ति॥ तथा च सिद्धादिशोधनं नैषां अंगत्वे सति राजवत्॥ रूपा
मादौ तु पंचायतनाचाव:॥ तथा रूपमायां भैरवी ताराछिन्नमस्तास्व भैरवे॥ मंजुघोषे

तथा रोहे पंचांगं तस्मते बुधे:॥ तपविद्यास्तु सर्वास्तु बहुकर्मादिषु साधने॥ नास्ति दीक्षा
परत्वपेक्षा नास्ति चांगादिपूजनं॥ ॥ अथ पंचसंस्कारपरीक्षा॥ ॥ कृत्वैस्सवतोभद्रेन वं
कं तं निधाय च॥ स्तोदकं गंधपुष्पाभ्यां अर्चितं पल्लसंयुतं॥ सर्वौषधिनवरत्नपंच
पल्लवसंयुतं॥ ततो देव्यार्चनं कृत्वा कुंभे दक्षिणतरं घटं॥ पंचपल्लवमिति॥ पनसाम्राश्व
त्थवटबकुलानि॥ तथा च वासिष्ठे॥ पनसाम्रं तथाश्वत्थं वटं बकुलमेव च॥ पंचपल्ल
वमित्युक्तं मुनिभिस्तंत्रवेदिभि:॥ नवरत्नमिति॥ मुक्तामाणिक्यवैडूर्यगोमेदान् वज्रवि
द्रुमै:॥ पद्मरागं मरकतं नीलं चेति यथाक्रमात्॥ इति निबंधे॥ ह्रीं मंत्रं स्वलंकृतं वेष्टयेत्तया
स्थलमुपसंस्थिरोत्॥ मंत्रितैः प्रोक्षणीतोयैः शांतिकं मंत्रजलेन तथा॥ मूलमंत्रेण हस्तानतं
त्रितैर् निषिंचयेत्॥ अष्टशतैरष्टोत्तरशतैः॥ अथ पंचसंपादयेन्मंत्रैः हंसः शिरसि धारय
त्॥ सन्नोस्त्विस्त्वनुतान्दद्यात् ततः शिरोभ्योऽर्घ्ये कुरु॥ यद्वादीक्षांतरं॥ रौरवमभ्यर्च्यसा
द्यांतेन तद्वस्तुनापि चिभ्यास्य वारं मूलेन शिरसि करं निधाय यावदीक्षापेत कर्णे॥ ततो प्यवरा

कः कश्चिद्वेदकुंभमभ्यर्च्यसाहृतं॥ तदंबुना त्रिसिच्याद्दृयारं मूलेन केकरं निधाय होमयेत्॥ कृ
त्वैउपदेशकृत्यविधिः॥ ॥इतिसंदेशपदीक्षा॥ ॥उपदेशांतरमाह॥ चंद्रसूर्यग्रहे तीर्थे
सिद्धक्षेत्रे शिवालये॥ मंत्रमात्रप्रकथनं उपदेशः समुच्यते॥ ॥अथ सर्वतोभद्रमंड
लं॥ ॥चतुरस्रे चतुष्कोष्ठे कर्णसूत्रसमन्विते॥ चतुर्ष्वपि च कोष्ठेषु कोणसूत्रचतुष्टयं॥
नध्येमध्येतथा मत्स्यान्नयेयुः पातयेत्तथा॥ पूर्वापरायते द्वे त्वे मंत्री याम्योत्तरायते॥ पात
येत्तेषु मत्स्येषु समं सूत्रचतुष्टयं॥ पूर्ववत्कोणकोष्ठेषु कर्णसूत्राणि पातयेत्॥ ततः कृते
षु मत्स्येषु दद्यात्सूत्रचतुष्टयं॥ ततः कोष्ठेषु मत्स्यास्युः स्वेषु सूत्राणि पातयेत्॥ यावत्षो
डशयं मंत्री बहूपंचाशत्पदान्यपि॥ तावत्तेनैव विधिना तत्र सूत्राणि पातयेत्॥ बहुत्रिं
शता पदैर्मध्ये लिखेत्पद्मं सलक्षणं॥ बहिः पंक्त्या नवे पीठं पंक्तियुग्मेन वीथिका॥ द्वारशो
भोपशोभास्तत्र दिक्षु प्रकल्पयेत्॥ शास्त्रोक्तविधिना मंत्री ततः पद्मं समालिखेत्॥
पद्मक्षेत्रस्य संत्यज्य षोडशांशं बहिः सुधीः॥ तन्मध्ये विभजेत् वृत्तैस्त्रिभिः समविभागतः॥

आद्यं स्यात्कर्णिकास्थानं केसराणां द्वितीयकं॥ तृतीयं तत्र पत्राणामग्रकांशेन दलाग्रकं॥ बा
ह्यवृत्तांतरालस्य मानेन विधिना सुधीः॥ निधाय केशवाग्रेषु परितोऽष्टनिशाकरात्॥ लि
खित्वा संधिसंस्थानि तत्र सूत्राणि पातयेत्॥ दलाग्राणां च यन्मानं तन्मानात् यत्नमालिखे
त्॥ तदनंतरालं तन्मध्ये सूत्रस्योन्नयतः सुधीः॥ आलिखेद्बाह्यहस्तेन दलाग्राणि समंत
तः॥ दलमूलेषु युगशः केसराणि प्रकल्पयेत्॥ एतत्साधारणं प्रोक्तं पंकजं तंत्रवेदिभिः
पदानि त्रीणि पदार्थं पीठकोष्ठेषु मार्जयेत्॥ अथ शिष्टैः पदैर्विद्वान् पीठगात्राणि कल्प
येत्॥ पदानि वीथिसंस्थानि मार्जयित्वं कल्पयेत्ततः॥ दिक्षु द्वाराणि रचयेत्त्रिचतुः को
ष्ठकैस्ततः॥ पदैस्त्रिभिस्त्रिरष्येकेन शोभास्युर्द्वारपार्श्वतः॥ उपशोभास्तु रेकेन त्रिभिः कोष्ठैर
नंतरं॥ अथ शिष्टैः पदैः षड्भिः कोणानां स्याच्चतुष्टयं॥ रंजयेत् च त्रिवर्णैर्मंडलं तन्मनोह
रं॥ पीतं हरिद्राचूर्णं स्यात् सितं तंदुलसंभवं॥ कुसुंभवर्णमरुणं कृष्णं दग्धपुलाकजं॥
बिल्वादिपत्रजं श्यामं मिश्रकं वर्णपंचकं॥ अंगुलोत्सेधविस्ताराः सीमारेखाः सिताभु

त्रा॥ कर्णिका पीतवर्णेन केसराण्यरुणेन च॥ शुक्लवर्णानि पत्राणि तत्संध्यां श्यामलेन
च॥ रजसा रंजयेद्वापि मंत्री पीतेन कर्णिका॥ केसराः पीतवर्णाः स्युररुणानि दलान्यपि॥
संधयः कृष्णवर्णाः स्युः पीतेनाप्यसितेन वा॥ रंजयेत्पीठगात्राणि पादास्स्युररुणप्रभाः॥ गा
त्राणि तस्य शुक्लानि वीथ्यामपि च तस्य तु॥ आलिखेत्कल्पलतिकां दलपुष्पफलान्विताः॥
वर्णैर्नानाविधैश्चित्रैः सर्वदृष्टिमनोहराः॥ द्वाराण्यपि च तद्वर्णानि शोभा रक्ताः समीरिताः॥
उपशोभाः पीतवर्णाः कोणान्यसितकानि च॥ तिस्रो रेखा बहिः कुर्यात्सितरक्तासिताः क्र
मात्॥ मंडलं सर्वतोभद्रमेतत्साधारणं स्मृतं॥ चतुरस्रां भुवं जित्वा द्विस्सोमद्वादशधा तु
धा॥ पातयेत्तत्र सूत्राणि कोष्ठानां दृश्यते शतं॥ चतुष्कं त्वादिशादां मध्ये तृणवद्धृं त्रिंशो
तां कुर्यात्॥ कोष्ठैः प्रकल्पयेत्पीठं पंक्त्यानेवार्विधिका॥ द्वारशोभे यथापूर्वमुपशोभा न
दृश्यते॥ अवशिष्टैः पदैः कुर्याद्विषष्ठिः कोणानि तंत्रवित्॥ विदध्यात्स्वस्तिकं स्यमेवं या मंड
लं स्मृतं॥ चतुरस्रे चतुःषष्टिपदान्यारचयेत्सुधीः॥ पदैश्चतुर्भिः पद्मं स्यात्तन्मध्येन सरि

तं पुनः॥ वीथ्यां च तत्र कुर्वीत मंडलांतावसानिकां॥ दिग्गतेषु चतुष्केषु पंकजानि समा
लिखेत्॥ विदिग्गतचतुष्काणि निम्नत्वात्षोडशाधश्च॥ मार्जयेत्स्वस्तिकाकारं श्वेतपी
तासितारुणैः॥ रजोभिः पूरयेत्तानि स्वस्तिकानि द्विधारितः॥ प्राक्प्रोक्तेनैव मार्गेण
शेषमन्यत्समापयेत्॥ नवनाभमिदं प्रोक्तं मंडलं सर्वसिद्धिदं॥ पंचाब्जं मंडलं प्रोक्तं ए
तत्स्वस्तिकवर्णितं॥ दीक्षायां देवपूजायां मंडलानां चतुष्टयं॥ सर्वतंत्रानुसारेण प्रोक्तं
सर्वसमृद्धिदं॥ ॥अथ मंत्रिणां हितार्थाय त्रिलोहं तु संख्या निरूप्यते॥ ॥सोमसूर्या
ग्निरूपास्तु यस्माल्लोहत्रयं तथा॥ रौप्यमिंदुः स्मृतो हेम सूर्यस्ताम्रं कृशानुकः॥ लोह
नागाः समुद्दिष्टाः स्वराद्यष्टरसंख्यया॥ आग्नेय्या व्यापकाः सर्वे सोमसूर्याग्निदेवताः॥
स्वराः षोडश विख्याताः स्पर्शास्ते पंचविंशतिः॥ व्यापकाद्दश ते कामधनधर्मप्रदायि
नः॥ सार्धसहस्रसंख्यं स्याद्दशांशं जुहुयात्ततः॥ तस्यां संपातयेन्मंत्री सर्पिषा पूर्वसं
ख्यया॥ अष्टोत्तरसहस्रसंख्यया इत्यर्थः॥ निक्षिप्य कुंभे तां मुद्रामभिषेके कोषसंना

॰आवाह्य पूजयेद्देवीमुपचारैः समाहितः॥ अनिर्विघ्नं विना ताय दद्यात्तां मुद्रिकां गुरुः॥ इ
यं मुद्रा कुष्ठरोगविषज्वरविनाशिनी॥ व्यालचौरमृगादिभ्यो रक्षां कुर्याद्विरोधतः॥ युद्धे
विजयमाप्नोति धारयन्मनुजेश्वरः॥ मंत्रसिद्धिकरी पुंसां चतुर्वर्गफलप्रदा॥ धारयेन्मनु
जो नित्यं देववत्पूज्यो भवेद्भुवि॥ कृष्णः शंभुः अनिर्विघ्नं चेति पूर्वोक्तरीत्या यद्वस्तु कृत्वा विधिना बंधं
नं स्थाप्य कृतगर्भेऽस्मिन् देवतामावाह्य यथोपचारैः संपूज्य साधनमनिर्विघ्नं तस्मै दद्यादिति
र्थः॥ ततो गुरवे दक्षिणां दत्त्वा महोत्सवं कुर्यात्॥ गोपांगनाकेलिविलासमुग्धं संसा
रदावानलजंगदृक्षं॥ ब्रह्मादिवृंदारकवंदितांघ्रिं वंदे मुकुंदं जगदेकनाथं॥ ॥७॥ ॥
इति श्रीमहोपाध्यायश्रीकृष्णानंदवागीशभट्टाचार्यविरचिते तंत्रसारे प्रथमः परिच्छे
दः॥ ॥१॥ ॥अथ सामान्यपूजापद्धतिः॥ ब्राह्मे मुहूर्ते उत्थाय मुक्तस्वापः रात्रिवासः
परित्यज्य सहस्रदलकमलोपस्थितं श्वेतवर्णं द्विनेत्रं वराभयकरं श्वेतमाल्यानुलेपनं
स्वप्रकाशस्वरूपं स्ववामस्थितरक्तशक्त्या स्वप्रकाशस्वरूपया सहितं गुरुं वि

भाव्य मानसोपचारैः संपूज्य ऐं इति मंत्रं यथाशक्ति जप्त्वा गुरुपादुकामंत्रं दशधा सप्तधा
त्रिधा संकेतनाम्ना पूज्य गुह्यादिना समर्प्य नमस्कुर्यात्॥ अखंडमंडलाकारं व्याप्तं येन च
राचरं॥ तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः॥ अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥ ततो मूलादिब्रह्मरंध्रांतं मूलविद्यां विभावयेत्
तस्य नित्यमाह गौतमीये॥ उद्यदादित्यकरद्योतां बालवद्गुरुसंददासनां॥ महोषा त्वनशां सर्पं
समाहितमनास्स्वयं॥ तत्त्वलोपदल्पां शरीरमपि चिंतयेत्॥ तस्य नित्यत्वमाह गौतमी
ये॥ इदानीं यत्पूर्वं कृत्यं च प्रसंगात्कथयामि ते॥ यत्कृत्वाधिकारित्वं यांति मंत्रयंत्रार्चनादि
षु॥ येन विना न सिद्धिः स्यात्तन्नाकं च प्रतिपद्यते॥ यामले च॥ प्रातः कृत्यमकृत्वा तु यो देवी
मर्चितो यजेत्॥ निष्फला तस्य पूजा स्यात्कृत्वो चाहो नायथा क्रिया॥ ततः ॐ समुद्रमेखले दे
वी पर्वतस्तनमंडले॥ विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे॥ इति पृथ्वीं नत्वा बहिर्ग
च्छेत्॥ ततश्चावरणं कृत्वा संध्यामाचरेत्॥ लक्ष्मीकुलार्णवे॥ संध्याया हि विहीनस्तु नदीता

लमाप्नुयात्॥ इति वचनात्तस्मान्नवद्यपकत्वं वैदिकसंध्यानंतरं मंत्रसंध्या कर्त्तव्या॥ तदुक्तं॥
वैदिकीं तांत्रिकीं संध्यां यथानुक्रमयोगतः॥ ॥अथ संध्याप्रयोगः॥ ॥मंत्रराज्ञिविद्य
॥ ॐ आत्मतत्त्वाय स्वाहा॥ ॐ विद्यातत्त्वाय स्वाहा॥ ॐ शिवतत्त्वाय स्वाहा॥ इत्याचामेच्च म
त्रगात्॥ मंत्रं तथा च शारदायां॥ आत्मविद्याशिवैस्तत्त्वैराचमेत्साधकाग्रणीः॥ वह्निजायां पदे
मुद्धेन यथा सा प्रिये मालिनीतंत्रे॥ आचमेदात्मतत्त्वाद्यैः प्रणवाद्यैः स्वाहांतकैः॥ मंत्रैस्त्रि
तथा वक्त्रं नासाक्षिश्रोत्रनाभिहृत्॥ मस्तकांसास्पृशेन्मंत्री कार्यश्रोतानिवेदनं॥ मम
तथा च शारदायां स्व आत्मविद्याशिवैस्तत्त्वैराचमेत्साधकाग्रणीः॥ वह्निजायां पदे दत्वाप्युद्धे
पापघ॥ ततो जले॥ गंगे च यमुने त्यादिना तीर्थमावाह्य मूलेन त्रिवारं भूमौ जलं निक्षिप्य
तथा तज्जलेन मूर्द्धनि मत्रिविंचयेत्॥ इति मार्जनं॥ ततोघमर्षणं॥ यथा षडंगन्यासं
त्वा वामहस्तेन जलमादाय हं यं रं लं वं इति त्रिरभिमंत्र्य मूलमनुच्चरन् गलितोदकबिंदु
स्त्वमनुन्यान्मूर्द्धि सप्तधा स्पृशं कृत्वा शेषजलं दक्षिणहस्ते समादाय तेजोरूपं श्वा

त्वा नासिकाग्रे स्पर्शयित्वा इडयाकृष्णदेहांतः पापं प्रक्षाल्य कृष्णवर्णं तज्जलं पापरूपं ध्या
त्वा पिंगलया विरेच्य पुरः कल्पितवज्रशिलायां फडिति मंत्रेण पापपुरुषस्वरूपं तज्जलं
ताडयेत्॥ ॥इत्यघमर्षणं॥ ॥तथा च गौतमीये॥ आचम्य विधिवन्मंत्री ऋचो देवी
वसंविदोत्॥ जलेसंयोज्य तीर्थानि त्रिवारं मूलमंत्रतः॥ क्षिपेद्भूमौ कुशाग्रेण सप्तधा मूर्द्धि
संप्रोक्षयेत्॥ तंत्रांतरे॥ वामहस्ते जलं गृह्य च बुद्धिमान्॥ इडयाग्रस्य देहांतः क्षालितं पापसं
चयं॥ यं कृष्णवर्णं तद्दुदकं दक्षनाड्या विरेचनं॥ दक्षहस्ते च तन्मंत्री पापरूपं विचिंतयेत्
पुरतो वज्रपाषाणे निक्षिपेदस्त्रमुच्चरन्॥ अन्यच्चापि॥ षडंगन्यासं समाचर्य वामहस्ते
जलं ततः॥ गृहीत्वा दक्षिणेनैव संपुटं कारयेद्बुधः॥ शिवयायुजलं पृथ्वी वह्निबीजैः क्रि
धा पुनः॥ अभिमंत्र्य च मूलेन सप्तधा तत्त्वमुद्रया॥ निक्षिपेत्तज्जलं शीघ्रं मूर्द्धिदक्षे निधा
य च॥ ततो हस्तं प्रक्षाल्याचम्य ह्रीं हंसः ॐ घृणिः सूर्य आदित्य इत्यनेन सूर्यायार्घं दद्यात्
तथा च सम्मोहनतंत्रे॥ शिवबीजं वह्निसंस्थं वामनेत्रविभूषितं॥ बिंदुनादात्मकं देवि

हंसः पदमथोल्लिखेत्॥ अनेनाम्बुना देवि भास्करस्य प्रियेण तु॥ अर्घं दद्यादिति विशेषः
पुरश्चरणचंद्रिकायां॥ ॐ घृणिः सूर्य आदित्य इत्यष्टार्णेनानेन वै सूर्यमंडलस्थायै अमुकदे
वतायै नमः॥ इति तत्तेजोयन्मा त्रिवारं जलं निक्षिप्य तत्तद्देवतागायत्रीं जपेत्॥ तथा च॥ अ
र्घान्ते तरणेर्नाण्यवे॥ ततश्च प्रजपेद्धीमान् गायत्रीं परमाक्षरीमिति॥ गायत्री तु स्नानप्रक
रणे बोद्धव्या॥ नंदिकेश्वरसंहितायां॥ यावन्न दीयते चार्घं भास्कराय निवेदनं॥ तावन्न
पूजयेद्विष्णुं शंकरं वा सुरेश्वरी॥ गौतमीये॥ एवं ते कथिता मंत्रा संध्यामंत्रकृजा नये॥
न कुर्याद्यदि मोहेन नदीशापमवाप्नुयात्॥ विष्णुकेश्वरतंत्रे॥ संध्यात्रयमिदं कुर्यात् ब्रा
ह्मणो विधिपूर्वकं॥ तंत्रोक्तविधिना मंत्री स्मृत्युक्तं वै समाचरेत्॥ संक्षेपसंध्या नवाकुर्या
न्मंत्राह्विशक्तितः॥ सायंप्रातश्च मध्याह्ने देवं ध्यात्वा मनुं जपेत्॥ संध्यायां पतितायां वा गाय
त्रीं दशधा जपेत्॥ ॥इति संध्याविधिः॥ ॥अथ स्नानं॥ तत्र गौतमीये॥ अथ स्नानं
ततः कुर्याद्यथाशास्त्रविधानवित्॥ मलप्रक्षालनस्नानं स्मार्तादौ कं समाचरेत्॥ मंत्र

८०

स्नानं ततः कुर्यात् कर्मणां सिद्धिहेतवे॥ ॥अथ स्नानविधिः॥ तत्र नद्यादौ गत्वा वैदिक
स्नानं कृत्वा तांत्रिकस्नानमाचरेत्॥ तद्यथा॥ अमुकदेवताप्रीतये स्नानमहं करिष्ये इति
संकल्पयेत्॥ तथा च कुलचूडामणौ॥ ताम्रपात्रं दूर्वां च सकुशं सतिलं ततः॥ गृहीत्वामुक
देवस्य प्रीतये स्नानमाचरेत्॥ ततः षडंगन्यासप्राणायामौ कृत्वा गंगे च यमुने चेत्यादि
ना अंकुशमुद्रया सूर्यमंडलात् कुले तीर्थमावाह्य निम्मनेन धेनुमुद्रयामृतीकृत्य कवचे
नावगुंठ्यास्त्रेण संरक्ष्य मूलेनैकादशधाभिमंत्र्य सूर्याभिमुखं द्वादशधा विनिक्षिप्य तस्मि
न्निष्टदेवताचरणादिमूलं मूलमुच्चरन् निमज्जेत निमज्ज्य देवताध्यानमूलमंत्रं यथाशक्ति
जपन् दक्षिणोदकेन त्रिवारं जलेन कलशमुद्रया त्रिवारमात्मानमभिषिंच्य वैदिकसं
ध्यातर्पणं कृत्वा सूर्यार्घ्यं दद्यात्॥ ततस्तांत्रिकाघमर्षणादि यावद्धारांतं कर्म कृत्वा॥ ॐ दे
वांस्तर्पयामि॥ ॐ ऋषींस्तर्पयामि॥ ॐ पितॄंस्तर्पयामि॥ इति संतर्प्य गुरुं परमगुरुं परमे
ष्ठिगुरुं च तर्पयेत्॥ तथा च॥ देवान् ऋषीन् पितॄंश्चैव तत्कल्पोक्तविधानतः॥ गुरुपंक्ति

८१

पुरा तर्पयेदिह देवतां॥ ये स्युर्ये विशेषतः॥ नारदं पर्वतं जिष्णुं निशठं दारुकं॥ विष्वक्सेनं च से
नेयं गुरुं च तर्पयेन्निशा॥ ॐ नारदं तर्पयामि॥ इत्यादिक्रमेण॥ मूलमुच्चार्य अमुकदेवतां त
र्पयामि नमः इति विष्णुविषयं॥ तथा च गौतमीये॥ आदौ मंत्रं समुच्चार्य पश्चात् पूर्वरूपमपि
पि॥ तर्पयामि पदं चोक्त्वा नमोन्तं तर्पयेत्ततः॥ अन्यत्र मूलमुच्चार्य अमुकदेवतां तर्पया
मि॥ तथा च तर्पयामि पदं योऽन्ते मंत्रांते विधुनामसु॥ इति॥ यान्ते बुधे सर्वं तर्पणस्यामनुर्मतः
शक्तिविषये॥ पुनर्मूलमुच्चार्य अमुकदेवीं तर्पयामि स्वाहा हा हीमतर्पणयोः॥ स्वाहेति नं तव
चनात्॥ नीलतंत्रे च॥ मंत्रांते नाम चोच्चार्य तर्पयामि ततः परं॥ स्वाहान्ते तर्पणे त्वेवमित्या
दि पंचविंशसंख्या वा दशधा वा त्रिधापि वा॥ मूलमंत्रं समुच्चार्य पश्चात् कुल्यं तर्पयामित्या
दि पंचविंशतिसंख्या वा दशधा त्रिधापि वा॥ मूलमंत्रं समुच्चार्य पश्चात् कुल्यं तर्पयेत्सुधीरि
ति॥ गौतमीयवचनात्॥ पंचविंशतिवारं दशधा त्रिधा वा सं तर्पयेत्॥ अन्यत्र पश्चात् कुल्य
मित्युपलक्षणं॥ ततश्च तदावरणदेवताः प्रत्येकेन सकृत्सकृत् तर्पयेत्॥ तथा च कुलार्णवे॥ ए

कैकमंजलिं तोयं परिवारान्प्रतर्पयेत्॥ ततो जलादुत्थाय धौतवाससी परिधायाचम्य
ह्रीं हंसः इदमर्घ्यं सूर्याय स्वाहा तारादौ तु॥ ह्रीं हंसः मार्त्तंडभैरवाय प्रकाशशक्तिसहिता
य इदमर्घ्यं सूर्याय स्वाहा॥ श्रीविद्याविषये॥ ॐ ह्रीं श्रीं ह्रां ह्रीं मार्त्तंडभैरवाय प्रकाशशक्ति
सहिताय ग्रहराशिनक्षत्रतिथियोगकरणपरिवारसहिताय सूर्याय इदमर्घ्यं स्वाहा इ
त्यर्घ्यं दत्वा तन्त्रज्ञो गायत्रीं शतधा दशधा वा जपेत्॥ तथा च तन्त्रे॥ [illegible] गाय
त्रीं प्रजपेत्सुधीः॥ महापातकयुक्तोपि प्रजपेद्दशधा यदि॥ सत्यं सत्यं महादेवि मुक्तो भव
ति तत्क्षणात्॥ हकाराकारविन्दुदेन गायत्रीजपानन्तरं तर्पणं वा॥ तथा च सूर्यमंडलवासि
न्यै देवतायै ततः परं॥ अर्घमंजलिमादाय गायत्र्या च त्रिरुत्सृजेत्॥ यथाशक्ति जपेद्देवीं गा
यत्रीं तदनंतरं॥ तर्पणार्घ्यं समाचम्य प्राणानायम्य साधकः॥ गायत्रीं तु त्रैलोक्यमोहनाय
विद्महे स्मराय धीमहि तन्नो विष्णुः प्रचोदयात्॥ दशरथाय विद्महे सीतावल्लभाय धीम
हि तन्नो रामः प्रचोदयात् इति॥ तत्पुरुषाय विद्महे महादेवाय धीमहि॥ तन्नो रुद्रः प्रचोद

याद्॥ गणेशगायत्री॥ दक्षिणामूर्त्तये विद्महे ध्यानस्थाय धीमहि। तन्नो धीशः प्रचोदया
दिति॥ दक्षिणामूर्त्तिगायत्री॥ नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोद
यात्॥ नारायणगायत्री॥ कामदेवाय विद्महे पुष्पबाणाय धीमहि। तन्नोऽनंगः प्रचोद
यात्॥ इत्यनंगगायत्री॥ आदित्याय विद्महे मार्त्तंडाय धीमहि। तन्नः सूर्यः प्रचोदयादिति
सूर्यगायत्री॥ शक्तिगायत्री तु॥ सर्वसंमोहिन्यै विद्महे विश्वजनन्यै धीमहि। तन्नः शक्तिः प्र
चोदयात्॥ इति शक्तिगायत्री॥ त्वरितादेवि विद्महे महानित्यायै धीमहि। तन्नो देवि प्रचो
दयात्॥ बालाभैरवीगायत्री॥ ऐं त्रिपुरादेवि विद्महे क्लीं कामेश्वरि धीमहि। सौः तन्नः क्लि
न्ने प्रचोदयात्॥ त्रिपुरासुंदरीगायत्री॥ महादेव्यै विद्महे दुर्गायै धीमहि। तन्नो देवी प्रचो
दयात्॥ महालक्ष्म्यै विद्महे महाश्रियै धीमहि। तन्नः श्रियः प्रचोदयात्॥ लक्ष्मीगायत्री॥
वैरोचन्यै विद्महे छिन्नमुंडायै धीमहि। तन्नो देवी प्रचोदयात्॥ इति छिन्नमुस्तागायत्री॥
कालिकायै विद्महे श्मशानवासिन्यै धीमहि। तन्नो घोरे प्रचोदयात् इति श्यामागाय

त्री॥ नगवल्मीकजदेवि विद्महे विकटदंष्ट्रे धीमहि। तन्नस्तारे प्रचोदयात् इति वा॥ तारायै वि
द्महे महोग्रायै धीमहि। तन्नो देवि प्रचोदयात्॥ इति तारागायत्री॥ ध्यानं तु प्रातः॥ उद्यदा
दित्यसंकाशां पुस्तकाक्षवरान्वितां॥ हंसासनाश्रयां रक्ताजिनधरां ब्राह्मीं॥ मध्याह्ने तु॥ श्वे
ताम्बरधरां रौद्रीं वृषासनकृताश्रयां॥ त्रिनेत्रां वरदां पाशीं शूलचन्द्रकरोटिकां॥ सूर्यमंड
लमध्यायन्तु देवीं समभ्यसेत्॥ अपरसंध्या॥ श्यामवर्णां चतुर्बाहुं शंखचक्रलसत्करां॥ गु
दापद्मधरां देवीं गरुडासनकृताश्रयां॥ सायाह्ने वरदां देवीं गायत्रीं संस्मरेत्॥ ॥त्रिपुरादी
ध्यानविशेषो यथा॥ प्रातराधारकमले कृतनृत्यं मंडलोपरि। वाग्बीजरूपां वरदां विद्युत्स
दृशां भास्वरां॥ पुष्पबाणेक्षुकोदंडपाशांकुशलसत्करां॥ स्वेच्छानुग्रहतनुं पुष्पगुरुविद्या
हरात्मिकां॥ संध्यां हृदयांभोजकर्णिके सूर्यमंडले॥ कामबीजात्मिकां देवीं भजे कुंकुमारुण
नख्यां॥ प्रसूनबाणपुष्पेक्षुचापपाशांकुशान्वितां॥ प्रदितः स्यात्मनुस्यान्तिः षट्त्रिंशात्त्वरा
क्लिन्नी॥ सायं मांडलसरोजस्थां चंद्रहेमसमद्युतिं॥ शक्तिबीजात्मिकां चापबाणपाशांकुशा

न्वितां॥ युगनिशाहराकारां घटिकावरणान्वितां॥ चिंतयित्वा भगवतीं नित्याभिः परिवारितां
तारादौ॥ सूर्यायार्घ्यं दत्वा ताम्रादिपात्रे चंदनार्ककुसुमापराजितापुष्पाणि निःक्षिप्य उद्यदादि
त्यमंडलमध्यवर्त्तिन्यै नित्यचैतन्योदितायै श्रीमदेकजटायै इदमर्घ्यं स्वाहा॥ इति त्रिरर्घ्यं दत्वा
गायत्रीं जपेदिति विशेषः॥ अन्यत्र कालिकादिप्रयोगः॥ ततः सूर्यमंडले देवतां विभाव्य
मूलमंत्रं यथाशक्तिं जप्त्वा संहारमुद्रया देवतां स्वहृदयमानीय तीर्थं नमस्कृत्य यागस्था
नमाविशेत्॥ ॥इति स्नानविधिः॥ ॥ततः सामान्यार्घस्थापनाद्यासनोपवेशा
पर्यंतं कर्म समाप्य वामे ॐ गुरुभ्यो नमः॥ दक्षिणे ॐ गणेशाय नमः॥ गुरुं च परमादिं च
परापरगुरुं तथा॥ दक्षपार्श्वे गणेशं च मध्ये त्विष्टदेवं विभावयेत्॥ ततः फडिति मंत्रेण गं
धपुष्पाभ्यां करौ संशोध्य ऊर्ध्वोर्ध्वतालत्रयं दत्वा छोटिकाभिर्दशदिग्बंधनं कुर्यात्॥ ततो
वह्निरिति जलधारया अग्निप्राकारं विचिंत्य भूतशुद्धिं कुर्यात्॥ तद्यथा॥ अंके उत्तानौ करौ
कृत्वा सोहमिति॥ जीवात्मानं दीपकलिकाकारं मूलाधारस्थितकुंडलिन्या सह सुषुम्नावर्त्मना

६६

मूलाधारस्वाधिष्ठानमणिपूरकअनाहतविशुद्धआज्ञाख्यषट्चक्राणि नीत्वा शिरोव
स्थिताधोमुखसहस्रदलकमलकर्णिकांतर्गतपरमात्मनि संयोज्य॥ तत्रैव पृथिव्यप्तेजोवा
य्वाकाशगंधरूपरसस्पर्शशब्दनासिकाजिह्वाचक्षुस्त्वक्श्रोत्रपाणिपादपायूपस्थप्रकृति
मनोबुद्ध्यहंकाराश्च तुर्विंशतितत्वानि लीनानि विभाव्य यमिति॥ वायुबीजं धूम्रवर्णं वाम
नासापुटे विचिंत्य तस्य षोडशवारजपेन वायुना देहमापूर्य नासापुटौ धृत्वा चतुःषष्टि
वारजपेन कुंभकं कृत्वा॥ वामकुक्षिस्थकृष्णवर्णपापपुरुषेण सह देहं संशोष्य द्वात्रिंश
द्वारजपेन दक्षनासया वायुं रेचयेत्॥ ततो दक्षिणनासापुटे रमिति वह्निबीजं रक्तवर्णं
ध्यात्वा तस्य षोडशवारजपेन देहमापूर्य नासापुटौ धृत्वा चतुःषष्टिवारजपेन कुंभकं
कृत्वा पापपुरुषेण सह देहं दग्ध्वा तस्य द्वात्रिंशद्वारजपेन वामनासया भस्मना सह
वायुं रेचयेत्॥ ततः ठमिति चंद्रबीजं शुक्लवर्णं वामनासिकायां ध्यात्वा षोडशवारजपे
न ललाटे चंद्रं नीत्वा वमिति वरुणबीजं चतुःषष्टिवारजपेन तस्माल्ललाटचंद्राज्जलि

६७

तस्यधूम्यामारकायंणल्लिकयासमस्तदेहंविरज्वलमितिपृथ्वीबीजंस्यद्वात्रिंशद्वारजपे
नदेहंस्थदग्धंविचिंत्यदक्षिणेनवायुंरेचयेत्॥मंत्रसंख्ययावा॥तदुक्तंगोतमीये॥धूम्र
वर्णंततोवायुबीजंषड्बिंदुलांछितं॥पूरयेदिडयाचैवसंचिंत्यनीलमारुतं॥रक्तवर्णंव
ह्निबीजंत्रिकोणंस्वस्तिकलांछितं॥तेनपूरकयोगेनमात्रयाषोडशाख्यया॥चतुःषष्ट्या
मात्रयाचनिर्दहत्कुंभकेनतु॥वामपार्श्वेस्थितंपापपुरुषंकज्जलप्रभं॥ब्रह्महत्याशिरस्कं
धस्वर्णस्तेयभुजद्वयं॥सुरापानहृदायुक्तंगुरुतल्पकटिद्वयं॥तत्संसर्गिपदद्वंद्वमंगप्र
त्यंगपातकं॥उपपातकरोमाणंरक्तश्मश्रुविलोचनं॥खड्गचर्मधरंकुद्धंमेयंकुक्षौविचिं
तयेत्॥मूलाधारेस्थितेनैववह्निनानिर्दहेच्चतं॥एवंसंदह्यपारितोद्वात्रिंशन्मात्रयात
त॥भस्मानासंदहेन्मंत्रीरेचयेदिडयापुनः॥वामनासांचंद्रबीजंकंदद्रुतसमप्रभं
न्नालेंदुराजेसंयोज्यततःषोडशमात्रया॥सुषुम्नाचचतुःषष्टिमात्रयाबीजमेदवं॥
ध्यात्वामृतमयीवृष्टिंपंचाशद्वर्णरूपिणीं॥यादेहंविचिंत्यैवंमनसापिंगलाध्वना॥द्वात्रिं

शन्मात्रयामंत्रीलंबीजेनदृढंनयेत्॥स्वस्थानेहंसमंत्रेणपुनस्तेनैवत्वर्त्मना॥जीवतत्वा
निचानीयस्वस्थानेस्थापयेत्ततः॥इतिकृत्वामृतस्पृष्टिंमातृकान्यासमाचरेत्॥ततोहंस
इतिजीवंस्वहृदयमानीयकुंडलिनीपृथिव्यादीनिचयथास्थानमानयेत्॥तथाचगौतमी
ये॥सुषुम्नावर्त्मनासोहमितिमंत्रेणसाधकः॥सहस्रारेशिरस्थानेपरमात्मनियोजये
त्॥शिरोवस्करात्मविषयेहंसइतिमंत्रेणजीवादिकंपरमशिवेसंयोज्यसोहमितिमं
त्रेणस्वस्थानमानयेत्॥तथाचज्ञानार्णवे॥प्राणप्रतिष्ठयापश्चात्जीवंदेहेनिधापयेत्॥
मूरववृत्तंसमुच्चार्यहंसस्तुविपरीतकं॥उद्धरेत्परमेशानिविधेयंमहारीनयेत्॥प्राणप्र
तिष्ठामंत्रोयंसर्वकर्माणिसाधयेत्॥तेनैवविधिनादेविस्थिरीकुर्याच्चिरंतनं॥वाराही
तंत्रे॥मूलाधारात्ततोजीवंब्रह्ममार्गेणदेशिकः॥हंसेनपुष्करस्थानेपरमात्मनियोजयेत्॥
तंत्रांतरेच॥सोहमेवंसमानीयजीवंहृदिसमानयेत्॥भूतशुद्धिपदंयुक्तंतिस्रविश्व
हेश्वरे॥शरीराकारभूतानांभूतानांयद्विशोधनं॥अव्ययब्रह्मसंयोगाद्भूतशुद्धिरियंमता॥

अथमातृकान्यासः॥ ॥तत्रऋष्यादिन्यासः॥अस्यमातृकामंत्रस्यब्रह्माऋषिर्गायत्रीछं
दः॥मातृकासरस्वतीदेवताहलोबीजानिस्वराःशक्तयोलिपिन्यासेविनियोगः॥शिरसि
ब्रह्मणेऋषयेनमः॥मुखेगायत्रीछंदसेनमः॥हृदिमातृकासरस्वत्यैदेवतायैनमः॥गु
ह्येहल्भ्योबीजेभ्योनमः॥पादयोःस्वरेभ्यःशक्तिभ्योनमः॥ ॥अथकरांगन्यासः॥ ॥
अंकंखंगंघंङंआंअंगुष्ठाभ्यांनमः॥इंचंछंजंझंञंईंतर्जनीभ्यांनमः॥उंटंठंडंढंणंऊंमध्य
माभ्यांनमः॥एंतंथंदंधंनंऐंअनामिकाभ्यांनमः॥ओंपंफंबंभंमंऔंकनिष्ठाभ्यांनमः॥अं
यंरंलंवंशंषंसंहंळंक्षंअःकरतलकरपृष्ठाभ्यांनमः॥तथा॥अंकंखंगंघंङंआंहृदयाय
नमः॥इंचंछंजंझंञंईंशिरसेस्वाहा॥उंटंठंडंढंणंऊंशिखायैवौषट्॥एंतंथंदंधंनंऐंक
वचायहुं॥ओंपंफंबंभंमंऔंनेत्रत्रयायवौषट्॥अंयंरंलंवंशंषंसंहंळंक्षंअःअस्त्राय
फट्॥तद्यथाज्ञानार्णवे॥अंआंमध्येकवर्गः॥इंईंमध्येचवर्गः॥उंऊंमध्येटवर्गः॥एंऐंमध्ये
तवर्गः॥ओंऔंमध्येपवर्गः॥अंअःमध्येयशादयः॥बिंदुयुक्तंन्यसेत्प्रिये॥अनुस्वारविस

र्गांतियशावर्गेसध्यहृको॥ ॥अथांतर्मातृका॥ ॥अकारादिस्वरान्सबिंदून्षोडश
कमलेकंठमूलेन्यसेत्॥ककारादिद्वादशवर्णान्द्वादशदलेहृदयकमलेन्यसेत्॥डकारा
दिदशवर्णान्दशदलकमलेनाभौन्यसेत्॥बकारादिषड्वर्णान्षड्दलकमलेलिंगमू
लेन्यसेत्॥वकारादिचतुरोवर्णान्चतुर्दलकमलेमूलाधारेन्यसेत्॥हक्षौवर्णद्वयंद्वि
दलकमलेक्रमशोन्यसेत्॥तथाचज्ञानार्णवे॥षोडशपत्रांबुजेकंठेस्वरान्षोडशविन्यसे
त्॥द्वादशच्छदहृत्पद्मेकादीन्द्वादशविन्यसेत्॥दशपत्रांबुजेनाभौडकारादीन्न्यसेत्त
तः॥षट्पत्रमध्येलिंगस्थेबकारादीन्न्यसेत्षट्॥आधारेचतुरोवर्णान्न्यसेद्वादींश्च
तुर्दले॥हक्षौक्रमध्यमेपत्रेद्विदलेविन्यसेत्प्रिये॥वेदवेतु॥एकैकंवर्णमुच्चार्यमूलाधा
राद्विरोंतिकं॥नमोंतमितिविन्यस्यआंतरःपरिकीर्तितः॥तथांतर्मातृकान्यासोमूलाधा
रेचतुर्दले॥स्वर्णाभेवशषसैश्चतुर्वर्णविभूषिते॥षड्दलेविद्युतनिभेस्वाधिष्ठानेन
लात्विषि॥वह्निमयैर्युक्तैर्वर्णैःषड्भिश्चसंयुते॥मणिपूरेदशदलेनीलजीमूतसत्विषि॥

डादिफांतदले युक्ते बिंदुरूपे सितमस्तके॥ अनाहते द्वादशारे प्रवालरुचिसन्निभे॥ कादि
ठांतदलैर्युक्ते योगीनां हृदयंगमे॥ विशुद्धे षोडशदले धूम्राभे स्वरभूषिते॥ आज्ञाख्ये च
तुस्वर्णाभे द्विदले हक्षराजिते॥ सहस्रारे हिमानिभे सर्ववर्णविभूषिते॥ अकथादित्रिरे
खात्मसहलक्षत्रयभूषिते॥ तन्मध्ये परिबिंदुं च स्रष्टिस्थितिलयात्मकं॥ एवं समाहि
तमनो ध्यायेन्न्यासोयमांतरः॥ अथवा तन्मातृका ध्यानं॥ पंचाशल्लिपिभिर्विभक्तमुख
दोःपन्मध्यवक्षस्थलीं भास्वन्मौलिनिबद्धचंद्रसकलामापीनतुंगस्तनीं॥ मुद्रामक्षगुणं
सुधाढ्यकलशीं विद्यां च हस्तांबुजैर्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये इ
तिध्यात्वा न्यसेत्॥ तत्रांगुलिनियमस्तंत्रांतरे॥ ललाटे नामिकामध्ये विन्यसेन्मुखपंकजे
तर्जनीमध्यमानामा वृद्धानामेव नेत्रयोः॥ अंगुष्ठं कर्णयोर्न्यसेत् कनिष्ठांगुष्ठको नसोः
मध्यास्तिस्रो गंडयोश्च मध्यमां चोष्ठयोर्न्यसेत्॥ अनामां दंतयोर्न्यसेत् मध्यमामुत्तमांग
के॥ मुखेनानामध्यमां च हस्ते पादे च पार्श्वयोः॥ कनिष्ठानामिकांगुष्ठमध्यपृष्ठे च विन्य

सेत्॥ तासांगुष्ठानामिदेशे सर्वाःकृत्ती च विन्यसेत्॥ हृदये च तलं सर्वमंसयोश्च ककुस्थ
ले॥ हस्तपूर्वं हस्तयत्क्वचिन्मुखेषु तलमेव च॥ एतास्तु मातृकामुद्राः क्रमेण परिकीर्तिताः
नित्यनामाहतत्रैव॥ अज्ञात्वा विन्यसेद्यस्तु न्यासं तस्य तु निष्फलं॥ यथा च गौतमीये॥
ललाटमुखवृत्ताक्षि श्रुतिघ्राणेषु चैव गंडयोः॥ ओष्ठदंतोत्तमांगास्यदोःपत्संध्यग्रकेषु च
पार्श्वयोः पृष्ठतो नाभौ जठरे हृदयेंसके॥ ककुद्यंसे च हृत्पूर्वं पाणिपादौ युगे तथा॥ पा
जठराननयोर्न्यस्येन्मातृकार्णान्यथाक्रमात्॥ अं नमो ललाटे॥ आं नमो मुखवृत्ते॥
इं नमो दक्षचक्षुषि॥ ईं नमो वामचक्षुषि॥ उं नमो दक्षकर्णे॥ ऊं नमो वामकर्णे॥ ऋं नमो
दक्षनसि॥ ॠं नमो वामनसि॥ ऌं नमो दक्षगंडे॥ ॡं नमः वामगंडे॥ एं नमः ओष्ठे॥ ऐं न
मः अधरे॥ ओं नमः ऊर्ध्वदंते॥ औं नमः अधोदंते॥ अं नमो ब्रह्मरंध्रे॥ अः नमः मुखवृत्ते॥
कं नमो दक्षबाहुमूले॥ खं नमो कूर्परे॥ गं नमो मणिबंधे॥ घं नमोंगुलिमूले॥ ङं नमो
गुल्यग्रे॥ एवं चं वामबाहुमूलसंध्यग्रकेषु॥ एवं टं दक्षपादमूलसंध्यग्रेषु॥ एवं तं

वामपादमूलसंध्यग्रेषु॥ पं नमो दक्षपार्श्वे॥ फं नमो वामपार्श्वे॥ बं नमः पृष्ठे॥ भं नमो नाभौ
मं नमो जठरे॥ यं नमो हृदये॥ रं नमो दक्षबाहुमूले॥ लं नमः ककुदि॥ वं नमो वामबाहुमू
ले॥ शं नमो हृदयादिदक्षकरे॥ षं नमो हृदयादिवामकरे॥ सं नमो हृदयादिदक्षपादे॥ हं
नमो हृदयादिवामपादे॥ ळं नमो हृदाद्युदरे॥ क्षं नमो हृदादिमुखे॥ एवं च संहारमातृका
न्यासोपि दृश्यते॥ तस्या ध्यानं तु॥ अक्षस्रजं हरिणपोतमुदग्रटंकं विद्यां करैरविरतं दधतीं
त्रिनेत्रां॥ अर्धेंदुमौलिमरुणामरविंदरामां वर्णेश्वरीं प्रणमत स्तनभारनम्रां॥ न्यासस्तु ह
कारादि॥ यथा॥ हं नमो हृदादिमुखे इत्यादिक्रमेण प्रमाणं॥ तंत्रांतरे तु संधेयं॥ अमो माद्यंतो
नमोंतो वा सबिंदुर्बिंदुवर्जितः॥ पंचाशद्वर्णविन्यासः क्रमादुक्तो मनीषिभिरिति नहि॥ अ
परं च॥ चतुर्धा मातृका प्रोक्ता केवला बिंदुसंयुता॥ सविसर्गा ससोमा च या च रहस्यं प्रवक्ष्य
ति॥ विद्याकरी केवला च सोमया मुक्तिदायिका॥ सविसर्गा पुत्रप्रदा सबिंदुर्वित्तदायि
नी॥ विश्वेश्वरे॥ वाग्भवाद्या च वाक्सिद्धिरमाद्या श्रीप्रवृद्धये॥ हृल्लेखाद्या सर्वसिद्ध्यै का

माद्या लोकवशप्रदा॥ श्रीकंठाद्यामिमां न्यसेत् सर्वमंत्रः प्रसीदति॥ श्रीविद्याविषये तु नवरत्ने
श्वरे॥ विशेषमूलाकांक्षिभिः॥ वाग्भवाद्या नमोंता च न्यस्तव्या मातृका त्वरा॥ श्रीविद्याविषये
मंत्री वाग्भवाद्यां स्वसिद्धये॥ यामले॥ मूलमंत्रं लिपिन्यासौ विना यस्तु प्रपूजयेत्॥ विप
रीतं फलं दद्यादभक्त्या पूजनं यथा॥ सामान्यन्यासेऽङ्गुलिनियमस्तु गौतमीये॥ मनसा
वा न्यसेन्न्यासान् पुष्पैर्वा पयसा मुने॥ अंगुष्ठानामिकाभ्यां तु अन्यथा विफलं भवेत्॥ विशे
षन्यासे तु नायं क्रमः॥ रमादिविद्यायां विशेषमातृकान्यासो वक्ष्यः॥ अथ प्राणायामे
ऽङ्गुलिनियमो ज्ञानार्णवे॥ कनिष्ठानामिकांगुष्ठैर्यन्नासापुटधारणं॥ प्राणायामः स विज्ञे
यः सार्जनीमध्यमां विना॥ प्राणायामो द्विविधः॥ सगर्भो निर्गर्भश्च॥ सगर्भो मंत्रयोगेन
निर्गर्भो मात्रया भवेदिति॥ मात्रा च वामजानुनि तद्धस्तभ्रामणं यावता नेन वेत्॥ काले
न मात्रा सा ज्ञेया मुनिभिर्वेदपारगैः॥ ॥अथ प्राणायामः॥ ॥मूलमंत्रस्य बीजस्य
प्रणवस्य वा षोडशधा जपेन वायुं पूरयेत्॥ तथा च कालाक्रमे॥ प्राणायामत्रयं कुर्यात्॥

मूलेनप्रणवेनच॥अथवामंत्रबीजेनयथोक्तविधिनासुधीः॥तस्यचतुःषष्टिवाररूपेणवा
युंकुंभयेत्॥तस्यद्वात्रिंशद्वाररूपेणवायुंरेचयेत्॥पुनर्दक्षिणेनापूर्यकुंभकंकृत्वावामेन
रेचयेत्॥पुनर्वामेनापूर्यकुंभकंकृत्वादक्षिणेनरेचयेत्॥योगिकेपुनर्मात्रानियमः॥त
थाचगौतमीये॥मंत्रप्राणायामःप्रोक्तोयोगिकंकथयामिते॥पूरयेद्वामयाविद्वान्मात्रया
षोडशसंख्यया॥इत्यादि॥यद्वाचतुःषोडशाष्टवाररूपेणपूरकादिकंकुर्यात्॥तथाचतंत्रां
तरे॥पूरयेत्षोडशान्विर्वायुंधारयेत्तंचतुर्गुणैः॥रेचयेत्कुंभकार्द्धेनअशक्तस्तत्तुरी
यतः॥तद्दशांशेनतच्चतुर्थैःस्यादेवंप्राणसंयमः॥प्राणायामंविनामंत्रपूजनेनहियोग्यता॥
गोपालेविशेषोवक्तव्यः॥ ॥अथपीठन्यासः॥ ॥हृदि॥आधारशक्तयेनमः॥कूर्माय
नमः॥अनंतायनमः॥पृथिव्यैनमः॥क्षीरसागरायनमः॥श्वेतद्वीपायनमः॥मणिमंड
पायनमः॥कल्पवृक्षायनमः॥मणिवेदिकायैनमः॥रत्नसिंहासनायनमः॥सर्वत्रप्रण
वादिनमोंतेन॥ततोदक्षिणस्कंधे॥ॐधर्मायनमः॥वामस्कंधेॐज्ञानायनमः॥वामोरौॐ

वैराग्यायनमः॥दक्षिणोरौॐऐश्वर्यायनमः॥मुखेॐअधर्मायनमः॥वामपार्श्वेॐअज्ञा
नायनमः॥नाभौॐअवैराग्यायनमः॥दक्षिणपार्श्वेॐअनैश्वर्यायनमः॥तथाचशारदा
यां॥अंसोरुयुग्मयोर्विद्वान्प्रादक्षिण्येनदेशिकः॥धर्मंज्ञानंचवैराग्यंविन्यसेत्क्रमतः
सुधीः॥मुखपार्श्वेनाभिपार्श्वेअधर्मादीन्प्रकल्पयेत्॥पुनःहृदि॥अंआनंदकंदायनमः
संविन्नालायनमः॥सर्वतत्त्वात्मकपद्मायनमः॥प्रकृतिमयपत्रेभ्योनमः॥विकार
मयकेसरेभ्योनमः॥पंचाशद्वर्णबीजाढ्यकर्णिकायैनमः॥अंसूर्यमंडलायद्वादशकला
त्मनेनमः॥उंसोममंडलायषोडशकलात्मनेनमः॥मंवह्निमंडलायदशकलात्मनेन
मः॥संसत्वायनमः॥रंरजसेनमः॥तंतमसेनमः॥आंआत्मनेनमः॥अंअंतरात्मनेन
मः॥पंपरमात्मनेनमः॥ह्रींज्ञानात्मनेनमः॥इत्येतंविन्यस्यहृत्पद्मकेसरेषुतत्तत्क्रमो
क्तपीठशक्तीर्न्यसेत्॥पीठमनुंचन्यसेत्॥ततःऋष्यादिन्यासः॥कृष्णस्य॥महेश्वरमुखा
ज्ज्ञात्वायःसाक्षात्तपसामनुं॥संसाधयतिशुद्धात्मासतस्यऋषिरीरितः॥गुरुत्वान्मस्तके

चास्य न्यासस्य परिकीर्तितः॥ सर्वेषां मंत्रतत्वानां छादनाछंद उच्यते॥ अक्षरत्वात्पदत्वा
च्च मुखे छंदः समीरितं॥ सर्वेषामेव मंत्राणां नामाबलं ऋषेरणा तथा॥ हृदयांभोजमध्यस्थां देव
तां तत्र विन्यसेत्॥ ऋषिछंदो देवतानां विन्यासेन विना यदा॥ जप्यते साधिताप्येवं तत्र तुछं
फलं लभेत्॥ ऋषिछंदोपरिज्ञानात् न मंत्रः फलदो भवेत्॥ दौर्बल्यं याति मंत्राणां विनियो
गमजानतां॥ ततस्तत्तन्मंत्रोक्तन्यासान् कुर्यात्॥ तदुक्तं कुलार्णवे॥ आगमोक्तेन विधि
ना न्यासं नित्यं करोति यः॥ देवताभावमाप्नोति मंत्रसिद्धिः प्रजायते॥ यो न्यासकवचछंदो
मंत्रं जपति तत्प्रिये॥ विघ्नास्तद्दृष्ट्वा पलायंते सिंहं दृष्ट्वा यथा गजाः॥ अकृत्वा न्यासजालं यो
मूढात्मा जपेन्मनुं॥ सर्वविघ्नैः स बाध्यः स्याद्व्याघ्रैर्मृगशिशुर्यथा॥ अंगन्यासे तु अंगु
ष्ठौ नियमः॥ तर्जन्यनामिकामध्यमा हृदि॥ तर्जनीमध्यमे शिरसि॥ अधोंगुष्ठमुष्टिः शिखा
यां॥ हस्तद्वयांगुलिभिः शिरःप्रभृति पादपर्यंतं॥ तर्जनीमध्यमानेत्रत्रये॥ तर्जनीमध्यमा
भ्यांतर्ज्जिताज्येष्ठयोरिका च त्रिधैक दद्यात्॥ त्रिद्विसंख्या याष्टौ जसंज्ञये॥ अंगुलीनामिति

वचनात् दिति सर्वसाधारणं॥ वेष्टयेत्॥ अंगुष्ठ ऊर्ध्वयोर्हस्तशाखा तदा न वेष्टमुद्रा हृदये
शीर्षे कि चेति॥ अधोंगुष्ठास्तु मुष्टिः शिखायां चक्रदंड अंगुल्योर्वर्मणि स्मृतः॥ नाराच
मुष्ट्युद्धृतबाहुयुग्म अंगुष्ठतर्जन्युदितो ध्वनिस्त्र॥ विष्वग्विचालकथिता सा मुद्रा यत्रास्त्रि
णी तर्जनीमध्यमे नेत्र॥ ततस्तत्तत्केशोल्लमुद्रां प्रदर्श्य ध्यानं कृत्वा मानसैः संपूज्य शंखस्था
पनं तु दीक्षाप्रकरणोक्तं॥ ततः पीठपूजां कृत्वा देवमावाह्य पंचोपचारैराराध्य॥ ततः पीठ
स्योत्तरे वायव्यादीशानांतं गुरुपंक्तिं पूजयेत्॥ यथा॥ ॐ गुरुभ्यो नमः॥ ॐ परमगुरुभ्यो न
मः॥ ॐ परमेष्ठिगुरुभ्यो नमः॥ त्रिपुरादेविस्तो यगुरुपूजायकेभ्यः॥ ततः पीठमध्ये॥ ॐ आं
आधारशक्तये नमः॥ एवं कूर्माय शेषाय पृथिव्यै॥ क्षीरसमुद्राय॥ श्वेतद्वीपाय॥ मणिमंड
पाय॥ कल्पतरवे॥ रत्नवेदिकायै॥ रत्नसिंहासनाय॥ प्रणवादिनमोंतेन पूजयेत्॥ ततोग्नि
कोणे ॐ धर्माय नमः॥ नैर्ऋत्यां ॐ ज्ञानाय नमः॥ वायुकोणे ॐ वैराग्याय नमः॥ ऐशान्यां ॐ ऐ
श्वर्याय नमः॥ एवं पूर्वादिचतुर्दिक्षु अधर्माय॥ अज्ञानाय॥ अवैराग्याय॥ अनैश्वर्याय॥

पूजयेत्॥मध्येऽनंतादिहीज्ञानात्मने॥नमः इत्यंतं संपूज्य॥पूर्वादिकेसरेषु मध्ये च तत्तत्कल्पोक्त
पीठशक्तीः संपूज्य पीठमन्वंतं पूजयेत्॥तथा च शारदायां॥आधारशक्तिं संपूज्य पीठमन्वं
तमर्चयेदिति॥तारादिविद्यादौ विशेषो न कल्प्यः॥पूर्वादिनियमस्तु मालिनीतंत्रे॥पूज्यपूज
कयोर्मध्ये प्राचीति कीर्त्तितं बुधैः॥तद्दक्षिणं दक्षिणं स्यादुत्तरं चोत्तरं मतं॥पृष्ठं तु पश्चिमं
ज्ञेयं सर्वत्रैवं प्रयोजयेत्॥अत्र विशेषनियमस्तु मत्स्यसूक्ते॥यस्मिन्मंत्रे यंत्रनाथः॥
तत्रायं परिकल्प्येदिति॥अनुकल्पे यंत्रं तु लिखेत्पद्मं दलाष्टकं॥षट्कोणं कर्णिकं तत्र व
वेदद्वारोपशोभितं॥ततः पुनर्ध्यात्वा वाहनादि॥त्रैपुरमंत्रे विशेषोऽयं कल्प्यः॥आगमक
ल्पद्रुमे॥मूलमंत्रं समुच्चार्य तु पुष्पवर्त्मना सुधीः॥आनीय तेजः स्वस्थानात् नासिकारं
ध्रनिर्गतं॥करस्थे मार्कंडीजे चैतत्पुष्पसंचये॥संयोज्य मंत्रमध्येतत्संस्थाप्यावाहये
त्ततः॥प्राणप्रतिष्ठां तं कर्म कुर्यात्॥ततः षोडशोपचारेण पंचोपचारेण वा पूजां कुर्यात्॥
षोडशोपचारनियमस्तु॥आसनं स्वागतं पाद्यमर्घमाचमनीयकं॥मधुपर्काचमनस्ना

नं वासनाभरणानि च॥सुगंधिस्तु मनो धूपदीपनैवेद्यवेदनं॥प्रयोजयेदर्चनायामुपचा
रास्तु षोडश॥कालिकापुराणे तु षोडशोपचारा यथा॥आसनं पाद्यमर्घं च ततः आचम
नीयकं॥मधुपर्कं स्नानं जलं वस्त्रं चंदनं भूषणं॥पुष्पधूपं च दीपं च नैवेद्यं नमस्ततः परं॥नै
वेद्याचमनीयं च प्रदक्षिणनमस्क्रिया॥एते षोडश निर्दिष्टा उपचारास्तु पूर्वतः॥अथवा
एतेषामभावेन पंचोपचारान् प्रकल्पयेत्॥पुष्पदाने तु विशेषः॥पुष्पं वा यदि वा पत्रं
नेष्टमधोमुखं तु तत्॥दुःखदं तत्समाख्यातं यथोत्पन्नं तथार्पणं॥इति॥अधोमुखं फलने
ष्टं पुष्पांजलिविधौ न तु॥ततो मूर्द्धि हृदि पादे सर्वांगकेषु च॥मूलेन पुष्पांजलिं दत्वा त
त्कल्पोक्तावरणपूजां कुर्यात्॥तथा च॥ततः पुष्पांजलिं दत्वा परिवारार्चनं चरेदिति॥त
तः॥ततो धूपदीपौ दद्यात्॥तद्यथा॥ॐ जय ध्वनि मंत्रमातः स्वाहेति पुष्पाक्षतैर्घंटां संपूज्य वा
महस्तेन वादयन्॥तत्तन्मंत्रेण नीचैर्धूपं दद्यात्॥ततो मूलेन पुष्पांजलिं दत्वा नैवेद्यमानी
यफडिति संप्रोक्ष्य चक्रमुद्रया निरस्य तदुपरि मूलमष्टधा जप्त्वा धेनुमुद्रयामृतीकृत्य पुन

र्जलमुच्चायन्नैवेद्यं देवतां गंधादिभिरभ्यर्च्य नत्वा गीतैर्देवं संतोष्य ज्ञयज्ञयदस्तु कृविलोमार्घं
दत्वा पुष्पांजलिं दद्यात्॥ दाने तु मादौ मूलं ततोऽस्य देवो भैरवस्ततः परं॥ संप्रदानं तदंते च
ततस्त्वागमार्थकं पदं॥ एवं क्रमेण देवेशि उपचारान्प्रकल्पयेत्॥ नैवेद्यदाने पात्राणि यथा
यामले॥ तैजसे वा च पात्रे वा सौवर्णे राजते तथा॥ ताम्रे वा प्रस्तरे वापि पद्मपत्रे तथा पुनः॥
यज्ञदारुमये वापि नैवेद्यं कल्पयेद्बुधः॥ सर्वाभावे च माहेये स्वहस्तघटितं यदि॥ तथा
यत्तोयमर्घपात्रस्य तन्निधायानिवेदयेत्॥ अन्यतोयैस्तदुच्छिष्टमर्घपात्रस्थितेतरैः॥
न गृह्णाति महादेवि दत्तं विधिरातैरपि॥ मंत्रांते कर्मसन्निपातइतिस्मायात्॥ ततश्चुलु
कोदकमादाय इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वा
चा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा
मां मदीयसकलं सम्यगमुष्य देवतायै समर्पये॥ ॐ तत्सदिति नमस्कारान्तेन दद्यात् ततो होकार
सहस्रं रात्रं वा जप्त्वा॥ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपं॥ सिद्धिर्भवतु मे देवत

त्प्रसादात्त्वयि स्थिते॥ अन्यत्र गोप्ता त्वं देवी इति विरोधः॥ इति जपं समर्प्य स्तुत्वा नत्वाऽष्टांग
प्राणायामं कुर्यात्॥ पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा॥ वचसा मनसा चेति प्र
णामोऽष्टांग ईरितः॥ बाहुभ्यां च सजानुभ्यां शिरसा वचसा दृशा॥ पंचांगोयं प्रणामः स्यात्
पूजासु प्रवराविमौ॥ भूमौ निपत्य यः कुर्यात्कृतेऽष्टांग नतिं सुधीः॥ सहस्रजन्मजं पापं स
द्यायैकं ठ मा भूयात्॥ तथा वेदविदो भरां दत्वाय फलं लभन्ते नरः॥ तत्फलं लभते नत्वार
कृत्वाकृत्स्नप्रदक्षिणं॥ विम्बसारे॥ रोरवं हस्तेन सर्वत्र दक्षिणं पादिकी निर्तितं॥ नतिविरोध
स्तु यामले॥ त्रिकोणाकारसर्वत्र नतिराकृतेः समीरिता॥ दक्षिणाद्वाययां गत्वा दिशं तस्मा
अर्धांगनर्वी॥ ततश्च दक्षिणां गत्वा नमस्कारस्त्रिकोणवत्॥ अर्धचंद्रं महेशस्य पूजनं च स
मीरिता॥ शिवप्रदक्षिणं मंत्री सोमसूत्रं न लंघयेत्॥ तंत्रांतरे च॥ शिवप्रदक्षिणे मंत्री अ
र्धचंद्रक्रमेण च॥ सव्यापसव्यक्रमेणैव सोमसूत्रं न लंघयेत्॥ इति च॥ प्रसाय्य दक्षिणं ह
स्तं स्वयं नम्रः शिरा पुनः॥ दर्शयेद्दक्षिणं पार्श्वं मनसापि च दक्षिणं॥ त्रिधा चर्येदयेस्त

ष्यक्देवतायाःप्रदक्षिणे॥एकहस्तप्रणामश्च एवं चापिप्रदक्षिणं॥अकालेदर्शनंविसर्जनंहि
पूर्णंपुराकृतं॥देवतांगेआवरणदेवताविलोमक्रमस्येतिविसर्जनसंहारमुद्रयातत्तेजःपु
ष्पैःसार्द्धंस्वहृदयमानयेत्॥तथाच॥निधायदेवतांवक्ष्यात्तस्यैवहृत्सरसीरुहे॥स्वमन्त्रा
वशानापुष्पमाघ्रायोद्वासयेत्ततः॥ततऐशान्यांमंडलिकांकृत्वानिर्माल्यधारिणेदद्यात्॥वै
ष्णवेविष्वक्सेनायनमः॥शाक्तौशेषिकायैनमः॥शिवेचंडेश्वरायनमः॥सूर्येतेजश्चं
डायनमः॥गणेशेउच्छिष्टगणेशायनमः॥कालिकादौउच्छिष्टचांडालिन्यैनमः॥तथा
चविद्यानंदनिबंधे॥स्वर्गगणपतावुच्छिष्टाशेषोवेष्यवेलवे॥तेजश्चंडसमासोच्छिष्टसोनुष्ठि
ष्टपूर्विकां॥चांडालिशेषिकांचंडेश्वरंविष्वक्सेनंक्रमात्॥उपासहवर्ततेसादुर्गातस्याःपुत्रः
सोन्नोगणेशः॥ततःपादोदकंपीत्वानैवेद्यंकिंचित्स्वीकृत्यअवशिष्टंयोग्यायदत्वायथा
सुखंविहरेत्॥मत्स्यसूक्ते॥अनिवेद्यनभुंजीतमत्स्यमांसादिकंतुयत्॥अन्नंविलापयो
क्तंयद्धिस्थीरनिवेदितं॥एतत्तुतत्तद्देवतापरं॥तथाचभैरवतंत्रे॥हृदयेचबहिर्देवी

समर्प्यविधिवत्ततः॥निर्माल्यंचरुकंतोदेशेनैवेद्यंन्यसेत्सुधीः॥तंत्रांतरे॥निर्माल्यंशिर
साधार्यंसर्वांगेचानुलेपनं॥नैवेद्यंचोपभुंजीतदत्वातद्भक्तिशालिने॥देवतायाश्चाव
शिष्टंसलिलंशंखमध्यगं॥अंगुष्ठाग्रेणनुघ्राणंब्रह्महत्यांव्यपोहति॥ ॥इतिसामा
न्यपूजापद्धतिः॥ ॥यामाकुरायांप्रकृतिर्मुनिनिर्ज्ञायासौत्रिशक्तिश्चिवमन्त्रपूर्णा॥नि
त्यांचदुर्गांत्वरितांतथान्योन्नआमिनित्यांभुवनेश्वरींच॥कल्पे॥अथवक्ष्येजगद्धात्रीमु
ग्धुनांभुवनेश्वरीं॥ब्रह्मादयोपियांज्ञात्वालेभिरेश्रियमद्भुतां॥नकुलीशोग्निमारूढो
वामनेत्रार्द्धचंद्रवान्॥नकुलीशोहकारः॥अग्निरकारः॥वामनेत्रमीकारः॥अस्यपू
जाप्रकारःसामान्यपद्धत्युक्तः॥प्रातःकृत्यादिपीठन्यासांतंकर्मविधायहृत्पद्मकेसर
मध्येचपीठशक्तीर्न्यसेत्॥तद्यथा॥जयाविजयाअजिताअपराजितानित्याविला
सिनीदोग्ध्रीअघोरामंगलावाकांतु॥ॐजयायैनमः॥इत्यादिक्रमेणकर्णिकायां॥ह्रीं
आसनायनमः॥तत्रकुम्भादिन्यासः॥तथाचनिबंधे॥कृपिराक्षिर्नैवेद्यंदोग्धायत्रोछ

ह्रीं हकारो बीजं ईकारः शक्तिः रेफः कीलकं भुवनेश्वरी देवता चतुर्वर्गसिद्ध्यर्थे विनियोगः॥
शिरसि शिवाय ऋषये नमः॥ मुखे गायत्रीछंदसे नमः॥ हृदि भुवनेश्वर्यै देवतायै नमः॥
गुह्ये हं बीजाय नमः॥ पादयोः ईं शक्तये नमः॥ सर्वांगे रं कीलकाय नमः॥ ततो मंत्रन्या
सं कुर्यात्॥ शिरसि ह्रीं हृल्लेखायै नमः॥ वदने ऐं गगनायै नमः॥ हृदि ह्रीं रक्तायै नमः॥
गुह्ये ऐं कालिकायै नमः॥ पादयोः ॐ महोच्छुष्मायै नमः॥ एवं ऊर्ध्वप्राग्याम्योदीच्यपश्चि
मेषु वक्त्रेषु तान्न्यसेत्॥ एतासां बीजानि निबंधे॥ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं॥ सद्यादिह्रस्वपंचार्णान्यस्त
व्यान्वितसुप्रभाः॥ ततः करांगन्यासौ कुर्यात्॥ ह्रां अंगुष्ठाभ्यां नमः॥ ह्रीं तर्जनीभ्यां नमः॥
ह्रूं मध्यमाभ्यां वषट्॥ ह्रैं अनामिकाभ्यां हुं॥ ह्रौं कनिष्ठिकाभ्यां वौषट्॥ ह्रः करतलपृष्ठाभ्यां
अस्त्राय फट्॥ ह्रां हृदयाय नमो हृदि॥ ह्रीं शिरसे स्वाहा शिरसि॥ ह्रूं शिखायै वषट् शिखा
यां॥ ह्रैं कवचाय हुं सर्वांगे॥ ह्रौं नेत्रत्रयाय वौषट् नेत्रत्रये॥ ह्रः अस्त्राय फट् चतुर्दिक्षु
तथा॥ षड्दीर्घभाजा बीजेन कुर्यादंगक्रियां मनोः॥ स्वच्छंदसंग्रहे॥ स्वरं विहाय बीजं

स्वं दीर्घषड्कं नियोजयेत्॥ षडंगानि विधेयानि सर्वत्रायं विधिः स्मृतः॥ अंगुलिनियम
स्तु पूर्ववत्तु रूः॥ सर्वत्र करांगन्यासे एवं क्रमः॥ ततः ललाटे॥ ॐ गायत्रीसहितब्रह्म
णे नमः॥ दक्षिणकपोले॥ ॐ सावित्रीसहितविष्णवे नमः वामकपोले॥ ॐ वागीश्वरीसहि
तमहेश्वराय नमः वामकर्णे॥ ॐ श्रीसहितधनपतये नमः मुखे॥ ॐ रतिसहितस्मराय न
मः दक्षिणकर्णे पदि॥ ॐ पुष्टिसहितगणपतये नमः दक्षिणगंडकर्णांतराले॥ ॐ शंखनि
धये नमः वामगंडकर्णांतराले॥ ॐ पद्मनिधये नमः मुखे॥ ॐ भुवनेश्वर्यै नमः॥ एवं कंठ
मूल दक्षिणस्तने दक्षिणांसे हृदये वामस्तने वामांसे पार्श्वद्वये नाभिषु॥ तान्गायत्रीस
हितब्रह्मणे नमः॥ एवं न्यसेत्॥ तथा च वर्णनिर्णन्यासे तु विश्वसारे॥ ॐकाराद्यं ङेयुते
चैनमोंतं च यथास्थितिः॥ विधिना विन्यसेत्सर्वं शंकरस्य मते न च॥ एवं सर्वत्र तनोज्ञा
ने॥ ॐ ब्राह्म्यै नमः वामांसे॥ ॐ माहेश्वर्यै नमः वामपार्श्वे॥ ॐ कामायै नमः जठरे॥ ॐ वैष्ण
व्यै नमः दक्षिणपार्श्वे॥ ॐ वाराह्यै नमः दक्षिणांसे॥ ॐ ऐंद्र्यै नमः अपरगले॥ ॐ चामुंडा

येनमः हृदि॥ ॐ महालक्ष्म्यैनमः इति विन्यस्य मूलेन व्यापकत्रयं कुर्यात्॥ ततो ध्यानं॥ उद्यद्दिनक
रद्युतिमिंदुकिरीटां तुंगकुचां नयनत्रयसंयुक्तां स्मरमुखीं वरदांकुशपाशाभीतिकरां प्रभजेत्तु
वनेशीं॥ एवं ध्यात्वा मानसैः संपूज्य बहिः पूजामारभेत्॥ पूजायंत्रं च समष्टदलबाह्यवृत्तं षो
डशाच्छिदलं॥ विलिखेत्कर्णिकामध्ये षट्कोणमतिसुंदरं॥ चतुरस्रं चतुर्द्वारमेतन्मंडलमा
लिखेत्॥ ततो दीक्षापद्धत्युक्तक्रमेण शंखस्थापनं कुर्यात्॥ ततः सामान्यपद्धत्युक्तपीठपूजां
कृत्वा पीठशक्तीः पूजयेत्॥ तद्यथा पूर्वादिकेसरेषु॥ ॐ जयायै विजयायै अजितायै अपरा
जितायै नित्यायै विलासिन्यै दोग्ध्र्यै अघोरायै मध्ये मंगलायै॥ प्रणवादिनमोंतेन पूजयेत्
तदुपरि ह्रीं भुवनासनाय नमः॥ ततः पूर्ववद्ध्यात्वावाहनादिपुष्पदानपर्यंतं विधाय ह्रां
हृदयाय नमः॥ इत्यादिना षडंगेन पूजयित्वा पंचपुष्पांजलिं दद्यात्॥ ततः आवरणपूजा
कर्णिकामध्ये॥ ॐ हल्लेखायै नमः पूर्वे॥ एवं गगनायै नमः दक्षिणे॥ रक्तायै नमः उत्तरे॥
ॐ करालिकायै नमः पश्चिमे॥ ॐ महोच्छुष्मायै नमः॥ मध्ये बिंदुषट्कोणे पूर्वे॥ ॐ गायत्री स

हितब्रह्मणे नमः नैरृते॥ ॐ सावित्र्यै नमः॥ ॐ विष्णवे नमः वायव्ये॥ ॐ सरस्वत्यै नमः॥ रुद्रा
य नमः वह्निकोणे॥ ॐ श्रियै नमः ॐ धनपतये नमः पश्चिमे॥ ॐ रत्यै नमः ॐ स्मराय नमः ऐशा
न्यां॥ ॐ पुष्ट्यै नमः गणपतये नमः षट्कोणस्योभयपार्श्वयोः॥ ॐ शंखनिधये नमः॥ ॐ प
द्मनिधये नमः केसरेषु॥ अग्निनिरृतिवाय्वीशानमध्येषु चतुर्दिक्षु च ह्रां हृदयाय नमः
इत्यादिना षडंगानि पूजयेत्॥ तथा चानिबंधे॥ केसरेष्वग्निकोणादि हृदयादीनि पूजये
त्॥ नेत्रमग्रे दिक्षु चास्त्रं ध्यातव्या ह्यंगदेवताः॥ एवं सर्वत्र ज्ञेयं आदौ तु विशेषो वक्ष्यः
अष्टदलेषु पूर्वादि॥ ॐ अनंगकुसुमाय नमः॥ ॐ अनंगकुसुमायै नमः॥ ॐ मदनातुरा
य नमः॥ ॐ मदनातुरायै नमः॥ ॐ भुवनपतये नमः॥ ॐ गगनवेगायै नमः॥ ॐ शशिरेखा
यै नमः॥ ॐ गगनरेखायै नमः॥ ॐ अनंगमदनायै नमः॥ षोडशदलेषु पूर्वादि॥ ॐ करालै
नमः॥ ॐ विकरालायै नमः॥ ॐ उमायै नमः॥ ॐ सरस्वत्यै नमः॥ ॐ श्रियै नमः॥ ॐ दुर्गायै नमः॥
ॐ उमायै नमः॥ ॐ लक्ष्म्यै नमः॥ ॐ श्रुत्यै नमः॥ ॐ स्मृत्यै नमः॥ ॐ धृत्यै नमः॥ ॐ श्रद्धायै नमः॥

ॐ मेधायै नमः ॥ ॐ सत्यै नमः ॥ ॐ कान्त्यै नमः ॥ ॐ अथायै नमः ॥ तद्बहिः पूर्वादि ॥ ॐ अनंगरू
पायै नमः ॥ ॐ अनंगमदनायै नमः ॥ ॐ अनंगमदनातुरायै नमः ॥ ॐ भुवनवेगायै नमः ॥
ॐ भुवनमालिकायै नमः ॥ ॐ सर्वशिशिरायै नमः ॥ ॐ अनंगवेदनायै नमः ॥ ॐ अनंगमे
खलायै नमः ॥ तद्बहिः भूगृहे पूर्वादि लं ॥ ॐ इन्द्राय देवाय देवाधिपतये सायुधाय सवा
हनाय सपरिवाराय नमः ॥ ॐ रं अग्नये तेजोधिपतये सायुधायेत्यादि ॥ यं यमाय प्रेता
धिपतये सायुधेत्यादि ॥ क्षं निर्ऋतये रक्षोधिपतये सायुधेत्यादि ॥ वं वरुणाय जलाधि
पतये सायुधेत्यादि ॥ यं वायवे प्राणाधिपतये सायुधेत्यादि ॥ सं सोमाय ताराधिपतये
सायुधेत्यादि ॥ हं ईशानाय गणाधिपतये सायुधेत्यादि ॥ इन्द्रेशानयोर्मध्ये आं ब्रह्मणे
प्रजाधिपतये सायुधेत्यादि ॥ निर्ऋतिवरुणयोर्मध्ये ह्रीं अनंताय नागाधिपतये सायुधे
त्यादि ॥ तथा च लोकपालास्ततः पूज्याः समस्ताश्चतुरस्रके ॥ पुरुहूतेशयोर्मध्ये रक्षोव
रुणयोस्तथा ॥ ब्रह्मविष्णू सदा पूज्यौ दिग्गिरा चविदुर्बुधाः ॥ इन्द्रादिलोकपालानां येवं

ण्यास्ते ध्रुवादिकाः ॥ स्वस्वबीजान्विताः सर्वे चतुर्थीतुनमोन्तिकाः ॥ इति वचनात्सर्वत्र प्रणवा
दि ॥ तथा अंते यजेल्लोकपालान्स्वस्वपरिसदान्वितान् ॥ हेतिभिस्त्वधिष्ठोपेतान्वदिक्षु पूर्वा
दितो यजेत् ॥ सह्वाहनायेति क्रमदीपिका ॥ तद्बहिः पूर्वादि वज्राय शक्त्यै दंडाय खड्गाय
पाशाय अंकुशाय गदायै शूलाय पद्माय चक्राय ॥ प्रणवादि नमोन्तेन पूजयेत् ॥ ततो धू
पादि विसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं द्वात्रिंशल्लक्षजपः ॥ तथा च प्रजपेन्म
त्रं द्वात्रिंशल्लक्षमानतः ॥ त्रिस्वादुकैर्जुहुयात् अष्टद्रव्यैर्दशांशतः ॥ अष्टद्रव्याण्यथ प्रू ॥
अश्वत्थोदुंबरः प्लक्षन्यग्रोधसमिधस्तिलाः ॥ सिद्धार्थपयसान्नानि द्रव्याण्यष्टौ विदुर्बुधाः
त्रिस्वाद्विति घृतमधुशर्करा इति ॥ वाग्भवं शं भुवनितारमाबीजत्रयात्मकं ॥ अस्य संमुप
देन्मंत्री त्रिवर्गफलसाधनं ॥ न्यासपूजादिकं सर्वं पूर्ववत्समाचरेत् ॥ षडंगन्यासे तु वि
शेषः ॥ ऐं ह्रीं अंगुष्ठाभ्यां नमः इत्यादि ॥ तथा च षड्दीर्घभाजा बीजेन वा ग्वाद्येन कल्प
येत् ॥ ध्यानं तु ॥ सिंदूरारुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुरत्तारानायकशेखरां

स्मितमुखीमापीनवक्षोरुहं॥पाणिभ्यांमणिपूर्णरत्नचषकंरक्तोत्पलंबिभ्रतींसौम्यांरत्नघट
स्थसव्यचरणांध्यायेत्परामंबिकामितिध्यानं॥अस्यपुरश्चरणंजपोद्दशलक्षमानतः॥तथाच
रविलक्षंजपेन्मंत्रंपायसैर्मधुरान्वितैः॥तद्दशांशेनजुहुयात्मंत्रीइत्यादिवचनात्॥ ॥वाग्बीज
पुटामायाविद्येयंसुंदरीमता॥अस्यमंत्रस्यपूर्ववन्न्यासःकरांगन्यासश्च॥ऐंह्रींऐंअंगुष्ठाभ्यांनमः
इत्यादि॥ऐंह्रांऐंहृदयायनमःइत्यादि॥तथाचमध्येनदीर्घयुक्तेनवाकुपुटेनप्रकल्पयेत्॥ध्यानंतु॥
रपामांगींशशिशेखरांनिजकरैर्दानिंचरक्तोत्पलंरत्नाढ्यंचषकंपरंत्रयहरंसंबिभ्रतींशाश्वतं
॥मुक्ताहारलसत्पयोधरनतांनेत्रत्रयोल्लासिनींवंदेहंसुरपूजितांहरवधूंरक्तारविंदस्थितां
॥१॥एवंध्यात्वापूर्ववत्यजेत्॥अष्टपत्रेषुविन्यसेत्॥आंब्राह्म्यैनमः॥ईंमाहेश्वर्यैनमः॥ऊं
कौमार्यैनमः॥ऋंवैष्णव्यैनमः॥लृंवाराह्यैनमः॥ऐंइंद्राण्यैनमः॥औंचामुंडायैनमः॥अःमहाल
क्ष्म्यैनमः॥अंअसितांगायनमः॥इंरुरवेनमः॥उंचंडायनमः॥ऋंक्रोधायनमः॥लृंउन्मत्तायन
मः॥एंकपालिनेनमः॥ओंभीषणायनमः॥अंसंहारायनमः॥यद्वा॥अं॥आं॥असितांगब्राह्मीभ्यां

नमःइत्यादि॥तथाचदीर्घाद्यामातरःप्रोक्ताह्रस्वाद्याभैरवाःस्मृताः॥अस्यसर्वंपूर्ववत्बोध्यं॥अ
स्यपुरश्चरणंजपोदशलक्षः॥मधुरान्वितैःपलाशपुष्पैर्दशांशहोमः॥तथाच॥तत्वलक्षंजपे
न्मंत्रंजुहुयात्तद्दशांशतः॥पलाशपुष्पसंयुक्तैःपुष्पैर्वाराजवृक्षकैः॥तत्वलक्षंदशलक्षं॥अंतरं
गत्वादितिगुरवः॥चतुर्विंशतिलक्षमितिकेचित्॥ ॥अनंतोबिंदुसंयुक्तोमायाब्रह्माग्नितार
यान्वि॥पाशादित्र्यक्षरीमंत्रःसर्वकामफलप्रदः॥अस्यएकाक्षरीवत्ऋष्यादिछंदोदेवतान्यासः॥
अंगमंत्रस्यह्रीं॥अंगुष्ठाभ्यांनमइत्यादिनाच॥सर्वत्रबीजेनकरांगन्यासौकुर्यात्॥तथाचनिबं
धे॥रुद्रयामले॥पूर्वोक्तास्तुबीजेनांगक्रियामता॥ध्यानं॥वरांकुशौपाशमभीतिमुद्रांकरैर्वहं
तींकमलासनस्थां॥बालार्ककोटिप्रतिभांत्रिनेत्रांभजेहमाद्यांभुवनेश्वरीतां॥१॥अस्यपूजा
एकाक्षरीव॥अष्टदलेषुब्राह्म्यादियुगलंपूर्ववत्॥षोडशदलेपूजायाश्चमनुकृत्वातत्कोशा
दलात्मव॥अस्यपुरश्चरणंजपोदशलक्षः॥दधिमधुघृताक्तानिःअश्वत्थोदुंबरप्लक्षाणांसमि
द्भिस्तिलैर्दुग्धाक्तैःदशसहस्रहोमः॥तथाच॥हविष्याशीजपेन्मंत्रंतत्वलक्षंजितेंद्रियः॥त

सहस्रं च जुहुयात् तर्पणं तन्मंत्रवित्तमः॥ दधिक्षौद्रघृताक्ताभिः समिद्भिः क्षीरभूरुहां॥ तत्संख्यया
सलिलैः शुद्धैः पयोभिर्जुहुयात्ततः॥ अत्र तर्पणदशांशेन दशांशः कल्प्यते॥ होमदशांशमिति वचनात्॥ अ
स्मिन् भुवनेश्वरीमंत्रानन्तरं निबन्धाऽसम्प्रसिद्धत्वात्॥ ॥इति भुवनेश्वरीमंत्राः॥ ॥अथान्नपूर्णा
मंत्राः॥ ॥माया हृद्भगवत्यंते माहेश्वरीपदं ततः॥ अन्नपूर्णे च युगलं मनुः सप्तदशाक्षरः॥१
कल्पे च॥ प्रणवाद्या यदा देवी तदा सप्तदशाक्षरी॥ अर्थदा मोक्षदा चैव सदा विनयवर्द्धनी॥ श्री
बीजाद्या यदा देवी तदा सुखविवर्द्धनी॥ वाग्बीजाद्या यदा विद्या वागीशत्वप्रदायिनी॥ कामाद्या
च यदा विद्या सर्वकामप्रदायिनी॥ मायाश्रीयुग्मबीजाद्या सदा वित्तप्रदायिनी॥ श्रीमायायुग्म
बीजाद्या सदा संपत्तिपूरणी॥ अस्य पूजा प्रातःकृत्यादि पीठन्यासांतं विधाय हृत्पद्मकेसरे मध्ये
च भुवनेश्वरीपीठमन्त्रं तत्पीठशक्तिर्विमलादिन्यासं कुर्यात्॥ यथा॥ शिरसि ब्रह्मणे ऋष
ये नमः॥ मुखे पंक्तिछंदसे नमः॥ अन्नपूर्णादेवतायै नमः हृदि॥ तत्रैव॥ एतेषां मंत्राणां ब्र
ह्मा ऋषिर्विधीयते॥ पंक्तिछंदः समाख्यातं देवता चान्नपूर्णिका॥ ततः करांगन्यासौ॥ ह्रीं अं

गुष्ठाभ्यां नमः॥ ह्रीं तर्जनीभ्यां नमः॥ ह्रीं हृदयाय नमः॥ ह्रीं शिरसे स्वाहा॥ इत्यादि सर्वत्र बीजे
न कुर्यात्॥ तथा च निबंधे॥ अंगानि मायया कुर्यात् ततो देवीं विचिंतयेत्॥ कल्पे च॥ यद्बीजा
द्यास्त्वेद्विद्या तद्बीजेनांगकल्पनं॥ ततो ध्यानं॥ रक्तां विचित्रवसनां नवचंद्रचूडामन्नप्रदा
ननिरतां स्तनभारनम्रां॥ नृत्यंतमिंदुशकलाभरणं विलोक्य हृष्टां भजे भगवतीं भवदुःखहं
त्रीं॥१॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ ततः सामान्योक्तपीठपूजां विधाय भु
वनेश्वरीमंत्रोक्तपादिपीठमन्त्रं तत्पीठपूजां विधाय पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदान
पर्यंतं कर्म विधायावरणपूजामारभेत्॥ तद्यथा केसरेषु॥ ह्रीं हृदयाय नमः नैर्ऋते॥ ह्रीं शि
रसे स्वाहा वायव्ये॥ ह्रीं शिखायै वषट् ऐशान्यां॥ ह्रीं कवचाय हुं आग्नेये॥ ह्रीं नेत्रत्रयाय वौषट्
मध्ये॥ ह्रीं अस्त्राय फट् चतुर्दिक्षु॥ अष्टदलेषु पूर्वादि ब्राह्मीं माहेश्वर्यै कौमार्यै वैष्णव्यै वाराह्यै
इंद्राण्यै चामुंडायै महालक्ष्म्यै॥ सर्वत्र प्रणवादि नमोंतेन पूजयेत्॥ तत्रैव॥ दलेषु पूजयेद्देवता
ब्राह्मयाः क्रमतः सुधीः॥ अस्य प्रणवश्चतुर्दशस्वरो बिंदुयुक्॥ तथा च कालिकापुराणे

मंत्रसेतुकरणं कृत्वा ॥ ततः इंद्रादीन् वज्रादींश्च पूजयेत् ॥ धूपादिविसर्जनांतं कर्म समापये-
त् ॥ अस्य पुरश्चरणं जपः षोडशसहस्रसंख्यः ॥ तथा च ॥ यथाविधि जपेन्मंत्रं वसुयुग्मसह-
स्रकं ॥ साज्येनान्नेन जुहुयात्तद्दशांशमनंतरं ॥ ॥ अथ त्रिपुरामंत्रः ॥ ॥ श्रीमायामदनै-
श्रीं क्लीं मंत्रो बीजत्रयात्मकः ॥ अस्य पूजाप्रयोगः ॥ प्रातःकृत्यादि योगपीठन्यासांतं भुवनेश्वरोक्त-
जपादिपीठमन्वंतं विन्यस्य ऋष्यादिन्यासं कुर्यात् ॥ शिरसि संमोहनाय ऋषये नमः ॥ मुखे गायत्री-
छंदसे नमः ॥ हृदि त्रिपुरायै देवतायै नमः ॥ ततः करांगन्यासौ ॥ श्रीं अंगुष्ठाभ्यां नमः ॥ ह्रीं तर्ज-
नीभ्यां नमः ॥ क्लीं मध्यमाभ्यां नमः ॥ श्रीं अनामिकाभ्यां नमः ॥ ह्रीं कनिष्ठिकाभ्यां नमः ॥ क्लीं करतल-
पृष्ठाभ्यां नमः ॥ एवं हृदयादि न्यासांतं ॥ तथा च निबंधे ॥ त्रिपुरायाश्च द्विरुक्तैस्त्रीबीजैरंगानि वह्निक्रमा-
त् ॥ ततो ध्यानं ॥ पारिजातवने रम्ये मंडपे मणिकुट्टिमे ॥ रत्नसिंहासने रम्ये सद्वह्निकोणशोभिते ॥ म-
ध्यास्तात्कल्पवृक्षस्य निषण्णां देवतां स्मरेत् ॥ चापं पाशांबुजसरसिजान्यंकुशं पुष्पबाणान् ॥ बिभ्रा-
णां करसरसिजैरत्नमौलिं त्रिनेत्रां ॥ हेमाभांगीं कुचभरनतां रक्तमंजीरकांचीग्रैवेयाद्यैर्वि-

लसिततनुं भावयेच्छक्तिमाद्यां ॥ १ ॥ चामरादर्शतांबूलकरंडकसमुद्गकान् ॥ वहंतीभिः कन्याभिर्नि-
हृतीभिः परिवारितां ॥ करुणामृतवर्षिण्या पश्यंतीं साधकं दृशा ॥ अंबुजांकुशं तु शंखं वरं दधतीं
पद्मयुगलमिति दक्षिणामूर्तिवचनात् ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ॥ ततो मा-
तृकान्यासरूपपीठपूजां विधाय केसरेषु भुवनेश्वरीमंत्रोक्तजपादिपीठमन्वंतं संपूज्य पुनर्ध्यात्वावाह-
नादिपंचपुष्पांजलिदानपर्यंतं विधायावरणपूजां कुर्यात् ॥ तद्यथा ॥ अग्न्यादिवह्निकोणेषु ॥ ॐ
लक्ष्म्यै नमः ॥ एवं क्रमेण हृदये गौर्यै क्रियायै रत्यै कामायै वह्निकोणस्योत्तरपार्श्वयोः ॥ ॐ शंखनि-
धये नमः ॥ ॐ पद्मनिधये नमः ॥ केसरेषु ॥ अग्न्यादिकोणचतुष्टयेषु मध्ये दिक्षु च ॥ श्रीं हृदयाय न-
मः ॥ इत्यादिना षडंगानि पूजयेत् ॥ ततः पत्रेषु ब्राह्म्यादिमातरः पूज्याः ॥ तद्बहिर्दिशादीन् वनिता-
रूपान् पूजयेत् ॥ तथा च निबंधे ॥ लोकेशान् वनितारूपानर्चयेत्सौम्यविग्रहान् ॥ ततो धूपा-
दिविसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं द्वादशलक्षजपः ॥ तथा च ॥ भानुलक्षं जपेदेनं मधू-
तावत्सहस्रकं ॥ बिल्वारग्वधसंभूतैर्मधुराक्तैः समिद्वरैः ॥ जपापुष्पैश्च जुहुयात्तोषयेद्बहुना गुरुं

अरण्यकः श्रौनास्य॥ अयं मंत्रस्त्रिधा भवति॥ तथा च॥ मायादिर्वह्निवेदेवी कामादिर्यदि यं विधिः
रतिदक्षिणामूर्त्तिवचनात्॥ ततो त्रिधास्मेत्यरितां त्वरितं फलदायिनं॥ तारमायावर्मबीजं रुद्र
रीरास्वरान्वितः॥ कूर्मस्त्वदंत्यो भगवान् ह्रस्वी दीर्घतनुच्छदः॥ संवर्त्तो भगवान्मायाफडंतो
दशाक्षरः॥ मायाबीजं भुवनेश्वरी॥ वर्म हुं रुद्रः खकारः॥ ईश्वरस्वर एकारः॥ कूर्मश्च का
रः॥ तद्दंत्य छकारः॥ भग एकारः॥ तथा च॥ ह्रस्वी स्वरूपं दीर्घतनुच्छदं हूंकारः॥ सर्वत्र हका
रः भग एकारः तथा च॥ अस्यार्जुनऋषिर्विराट्छंदः त्वरिता देवता पुरुषार्थे विनियोगः॥
अस्य पूजापद्धतिः सामान्योक्तरूपात् ततः कृत्वादिपीठन्यासांतं कर्म विधाय कं सुरेषु भुवनेश्वरी मं
त्रोक्तं यादिपीठशक्तिं विन्यस्य मध्ये॥ हं हूं हं यज्ञ देह घुरु दं दमा चाप्य हिंगुलु॥ गर्ज गर्ज हुं हूं
ह्रीं पंचाननाय नमः॥ तथा च निबंधे॥ संवर्त्तको बिंदुयुक्तः कवचं द्वाक्षरं वियत्॥ वज्रदेह घुरु
द्वंद्वमाच्चाप्य हिंगुलुद्वयं॥ गर्जयुग्मं वियत्सेंदु वर्मास्त्रो दीर्घबिंदुमान्॥ पंचाननाय हृदयं पीठ
मंत्रः प्रकीर्तितः॥ ततः ऋष्यादिन्यास॥ शिरसि अर्जुनऋषये नमः॥ मुखे विराट्छंदसे नमः॥ ह

दि त्वरितायै देवतायै नमः॥ ततो मंत्रन्यासः॥ मूर्ध्नि ॐ नमः॥ भाले [illegible] मः॥ गले खे नमः॥ ह
दि च नमः॥ नाभौ छे नमः॥ गुह्ये क्षे नमः॥ ऊर्वोः स्त्री नमः॥ जान्वोः हूं नमः॥ जंघयोः क्षे नमः॥
पादयोः फट् नमः॥ तथा च निबंधे॥ मायाद्यवर्णान् विन्यसेन्मूर्ध्नि भाले गले हृदि नाभौ गुह्योरुयु
ग्मेषु॥ जानुजंघापदेषु च विन्यस्य व्यापकं कुर्यात् समस्तेनैव साधकः॥ ततो मूलेन त्रिधा व्या
पकं कुर्यात्॥ ततः करांगन्यासः॥ खे छे अंगुष्ठाभ्यां नमः॥ छे तर्जनीभ्यां स्वाहा॥ क्षः स्त्री मध्यमाभ्यां
वषट्॥ स्त्री हूं अनामिकाभ्यां हुं॥ हूं क्षे कनिष्ठिकाभ्यां वौषट्॥ क्षे फट् करतलपृष्ठाभ्यां फट्॥ एवं
हृदादि॥ तथा च निबंधे॥ कूर्मादिभिः समस्तैर्वर्णैः पूर्वपूर्वविवर्जितैः॥ द्वाभ्यां द्वाभ्यां षडंगानि कु
र्यात् साधकसत्तमः॥ ततो ध्यानं॥ श्यामां बर्हिकलापशेखरयुतामाबद्धपूर्णांशुकां गुंजाहा
रलसत्पयोधरयुतामष्टाहिपान् बिभ्रतीं॥ ताटंकांगदमेखलागुणरणन्मंजीरतां प्रापि
तान् कैरातीं वरदाभयोद्यतकरां देवीं त्रिनेत्रां भजे॥ १॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्था
पनं कुर्यात्॥ ततः सामान्यो रूपीठपूजां विधाय पद्मस्य केसरेषु पूर्वादिक्रमेण जयाविज

या अजिता अपराजिता नित्या विलासिनी दोग्ध्री अघोरा मंगलाः प्रणवादिनमोंतान् संपूज्य म
ध्ये॥ हूं फ्रें हं वज्रदेह गुरु गुरु हिं गुलु हिं गुलु गर्ज गर्ज हं फ्रें ह्सौं पंचाननाय नमः॥ ततः पूर्वोक्तं ध्या
त्वावाहनादिपंचपुष्पादानपर्यंतं विधायावरणपूजां कुर्यात्॥ अग्न्यादिकेसरेषु ॐ गायत्र्यै हृ
दयाय नमः॥ ॐ हं गायत्र्यै शिरसे स्वाहा॥ हूं क्लीं गायत्र्यै शिखायै वषट्॥ क्लीं फ्रें गायत्र्यै कवचा
य हुं॥ फ्रें हं गायत्री केसरे पूजयेत्क्रमात्॥ दलेषु पूजयेदेताः श्रीबीजाद्याः सुवृत्तिता॥ फ्रेंकारीं
खेचंडी छेदनी क्षेमनी स्त्रियं हकारी क्षेमकरी च फट्कारी मध्यतो यजेत्॥ चाये तु श्री क्षेमकायै नमः
इत्यादिक्रमेण बाह्ये च ततः फट्कारिण्यै नमः॥ द्वारस्योभयपार्श्वयोः॥ ॐ जयायै नमः॥ ॐ विजया
यै नमः॥ तद्बाह्ये किंकरा परहितत्वरिताः स्युः॥ स्थितेभ्यः हुं फट् इति मंत्रेण किंकरं पूजयेत्॥ अत्र इंद्रा
दिपूजा नास्ति अनुक्तत्वात्॥ ततो धूपादि विसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं लक्षसंख्यज
पः॥ तद्दशांशं बिल्वस्य समिद्वरैस्त्रिमध्वक्तैर्होमयेत्॥ तथा च लक्षसंख्यजपमंत्रेण मंत्रमेतं जि
तेंद्रियः॥ दशांशं जुहुयान्मंत्री बिल्वैस्त्रिमध्वक्तैः समिद्वरैर्होमयेदिति॥ ॥अथ नित्यामंत्रः॥

वाग्भवं कामबीजं च नित्यक्लिन्नं हे मदद्रवे पुनः॥ इत्येव ह्रियषं मंत्रो द्वादशार्णो यमादितः॥ अस्य पूजा
प्रयोगः॥ प्रातः कृत्यादि योगपीठन्यासांतं विधाय केसरेषु मध्ये च पूर्वादिक्रमेण जयादिभ्यो ह्रीं आ
सनाय नमः॥ इत्येवं विन्यस्य ऋष्यादिन्यासं कुर्यात्॥ तद्यथा॥ शिरसि संमोहनऋषये नमः॥ मुखे
निचृद्गायत्री छंदसे नमः॥ हृदि नित्यायै देवतायै नमः॥ ततः करांगन्यासः॥ ऐं अंगुष्ठाभ्यां
नमः॥ ऐं तर्जनीभ्यां स्वाहा॥ ऐं मध्यमाभ्यां वषट्॥ ऐं अनामिकाभ्यां हुं॥ ऐं कनिष्ठिकाभ्यां वौषट्
ऐं करतलपृष्ठाभ्यां फट्॥ एवं ऐं हृदयाय नमः॥ ऐं शिरसे स्वाहा॥ इति षडंगेषु न्यसेत्॥ तथा च
निबंधे॥ बाचा कृत्वा षडंगानि नित्यां ध्यायेद्यथाविधि॥ ततो ध्यानं॥ अर्द्धेंदुमौलिमरुणाभिराम
मंभोजपाशांकुशपूर्णकुंभाब्जहस्तां॥ रक्तांगरागवसनाभरणां त्रिनेत्रां ध्यायेच्छिवस्य वनि
तां मदविह्वलांगीं॥१॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ ततः पीठपूजां विधाय
केसरेषु पूजयादिपीठशक्तीः संपूज्य मध्ये ह्रीं आसनाय नमः॥ इति संपूज्य पुनर्ध्यात्वा वाहनादि
पंचपुष्पांजलिदानं विधायावरणपूजां कुर्यात्॥ तद्यथा॥ केसरेषु अग्न्यादिकोणचतुष्टये॥

ऐं हृदयाय नमः॥ ऐं शिरसे स्वाहा॥ ऐं शिखायै वषट्॥ ऐं कवचाय हुं॥ ऐं नेत्रत्रयाय वौषट्॥
दिक्षु ऐं अस्त्राय फट्॥ अष्टपत्रे पूर्वादि॥ ऐं नित्यायै नमः॥ एवं निरंजनायै नमः॥ क्लेदिन्यै॰॥
क्लिन्नायै नमः॥ मदनातुरायै नमः॥ मदद्रवायै नमः॥ द्रविण्यै नमः॥ द्राविण्यै नमः॥ प्रणवादि
मंतेन पूजयेत्॥ तद्बाह्ये॥ इंद्रादीन्वज्रादींश्च पूजयेत्॥ ततो धूपादि विसर्जनांतं कर्म समापये
त्॥ अथ पुरश्चरणं चतुर्लक्षं॥ तथा चतुर्लक्षं जपित्वा तिलमधुरा शर्कराक्तैः मधूकजैः कुसुमैर
युतं कृत्वा तो चयेक्रूरमाल्लन॥ ॥अथ वज्रप्रस्तारिणीमंत्रः॥ ॥वाग्भवं तारं नित्यक्लि
न्नेम्यो मदद्रवे स्वाहा तार्द्विसंख्याणोमंत्रो वरप्रदायकः॥ अस्य पूजामंत्रः॥ षट्कोणं द्वादश
दलं चतुर्द्वारं चतुरस्रं च॥ ततः प्रातः प्रातः कृत्यादि पीठन्यासांतं विधाय केसरेषु जयादि पीठ
मन्वंतं विन्यस्य ऋष्यादिन्यासं कुर्यात्॥ शिरसि अंगिरसे ऋषये नमः॥ मुखे अनुष्टुप् छंदसे न
मः॥ हृदि वज्रप्रस्तारिण्यै देवतायै नमः॥ ततः करांगन्यासौ॥ अंगुष्ठाभ्यां नमः॥ एवं तर्जनीभ्यां
स्वाहा॥ ऐं मध्यमाभ्यां वषट्॥ ऐं अनामिकाभ्यां हुं॥ ऐं कनिष्ठिकाभ्यां वषट्॥ ऐं करतलपृष्ठाभ्यां

फट्॥ एवं हृदयादिषु॥ तथा च निबंधे॥ वाग्भवेन षडंगानि विदध्यान्मंत्रवित्तमः॥ ततो ध्यानं॥ प्र
ब्रंरश्मयोते रविदलकमलेंऽतरे सन्निषण्णं रक्तांगी रत्नमौलिस्फुरितशशिकलां स्मेरवक्त्रां त्रि
नेत्रां॥ बीजापूरेषुपाशांकुशमदनधनुस्सत्कपालानि हस्तैर्बिभ्राणामुक्तनांगीस्तनभरणदंबि
कामाश्रयामः॥१॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं विधाय पूर्ववत्पीठपूजां कृत्वा पुनर्ध्या
वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधाय आवरणपूजामारभेत्॥ अग्न्यादिकोणमध्ये दिक्षु
च ऐं हृदयाय नमः॥ इत्यादि संपूज्य अष्टदलेषु पूर्वादि ऐं हल्लेखायै नमः॥ एवं क्लेदिन्यै नमः॥ क्लि
न्नायै॰ क्षोभिण्यै॰ मदनातुरायै॰ निरंजनायै॰ रागवत्यै॰ मदनावत्यै॰ मेखलायै॰ द्राविण्यै॰ वेगवत्यै॰
स्मरायै॰॥ तद्बहिः ब्राह्म्यादि मातृः पूजयेत्॥ तद्बहिः इंद्रादिदिगीश्वरान्॥ ततो धूपादिविसर्जनांतं क
र्म समापयेत्॥ अथास्य पुरश्चरणं लक्षजपः॥ तथा च॥ मंत्रं मंत्री जपेल्लक्षं जपांते जुहुयात्ततः॥ अ
मृतैराज्यसंयुक्तैः घृतसिक्तैः समीधरैः॥ राजवश्यो योनात्र॥ ॥अथ दुर्गा॥ ॥अथ दुर्गाम
न्त्रं वदे दुर्गापञ्चपदप्रदाः॥ मायादिकर्णविंद्वाम्भोमयोसौ सर्गवान्भवेत्॥ पंचांतकः प्रतिष्ठा

वान्हमाहतोनैर्ऋतिकासनः॥ताराद्दिहृदयांतोयंमंत्रोवसुहराक्षकः॥अद्रिर्दिकादंडएवतुकारः
पंचांतकोगकारः॥प्रतिष्ठाअकारः॥मारुतोयकारः॥नैर्ऋतिकोऐकारः॥अस्यपूजाप्रकारः॥प्रा
तःकृत्यादियोगपीठन्यासांतंविधायकेसरमध्येचपीठशक्तिर्विन्यसेत्॥तद्यथा॥आंप्रभायैन
मः॥ईंमायायैनमः॥ऐंसूक्ष्मायैनमः॥ऐंविशुद्धायैनमः॥ॐनंदिन्यैनमः॥ॐसुप्रभायैनमः॥अंवि
जयायैनमः॥अःसर्वसिद्धिदायैनमः॥तदुपरिॐवज्रनखदंष्ट्रायुधमहासिंहायहुंफट्नमः॥इ
तिन्यसेत्॥ततःऋष्यादिन्यासः॥शिरसिनारदऋषयेनमः॥मुखेगायत्रीछंदसेनमः॥हृदिदुर्गा
यैदेवतायैनमः॥ततःकरांगन्यासौ॥ह्रांॐह्रींदुंदुर्गायैअंगुष्ठाभ्यांनमः॥ह्रींॐह्रींदुंदुर्गायैतर्ज
नीभ्यांस्वाहा॥ह्रूंॐह्रींदुंदुर्गायैमध्यमाभ्यांवषट्॥ह्रैंॐह्रींदुंदुर्गायैअनामिकाभ्यांहुं॥ह्रौंॐह्रींदुंदुर्गा
यैकनिष्ठिकाभ्यांवौषट्॥ह्रःॐह्रींदुंदुर्गायैकरतलपृष्ठाभ्यांफट्॥एवंहृदयादि॥तथाचनिबंधे॥
नमस्कारविमुक्तेनमूलमंत्रेणसाधकः॥जात्याद्यैःसहकुर्वीतजातियुक्तैःषडंगकं॥ततोध्यानं
सिंहस्थाशशिशेखरामरकतप्रख्यैश्चतुर्भिर्भुजैःशंखंचक्रधनुःशरांश्चदधतीनेत्रैस्त्रिभिः

शोभितां॥आमुक्तांगदहारकंकणरणत्कांचीक्वणन्नूपुरांदुर्गांदुर्गतिहारिणींभवतुवोरत्नोल्ल
सत्कुंडलां॥१॥एवंध्यात्वामानसैःसंपूज्यशंखस्थापनंकुर्यात्॥ततःपीठपूजांकृत्वाकेसरेषुम
ध्येच॥आंप्रभायैनमः॥ईंमायायैनमः॥ऊंजयायैनमः॥ऐंसूक्ष्मायैनमः॥ऐंविशुद्धायैनमः॥ॐनं
दिन्यैनमः॥औंसुप्रभायैनमः॥अंविजयायैनमः॥अःसर्वसिद्धिदायैनमः॥तदुपरिॐवज्रनखदं
ष्ट्रायुधायमहासिंहायहुंफट्नमइतिपूजयेत्॥तथाच॥आदिह्रस्वत्रयंक्लीबरहितैःपूजयेदिमाः
प्रणवानंतरंवज्रनखदंष्ट्रायुधायच॥महासिंहासनायवर्मास्त्रांतोनतिःसिंहमनुर्मतः॥ततःपुन
र्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतंविधायावरणपूजामारभेत्॥अग्निनिर्ऋतिवाय्वी
शानकोणेषुमध्येदिक्षुच॥ह्रांह्रींॐह्रींदुंदुर्गायैहृदयायनमःइत्यादिनापूजयेत्॥ततःपत्रेषुपूर्वादि
जंजयायैनमः॥विंविजयायैनमः॥प्रंप्रीत्यैनमः॥कींकीर्त्यैनमः॥पंप्रभायैनमः॥श्रंश्रद्धायैनमः
मंमेधायैनमः॥शांशांत्यैनमः॥पत्राग्रेषुॐशंखायनमः॥चक्रायनमः॥गदायै॰खड्गाय॰पाशा
य॰अंकुशाय॰शराय॰चापायनमः॥तद्बाह्येइंद्रादीन्वज्रादींश्चपूजयेत्॥ततोधूपादिविसर्जं

तं कर्म्म समापयेत्॥ अस्य पुरश्चरणं अष्टलक्षजपः॥ तथा च॥ वसुलक्षं जपेन्मंत्रं तिलैर्मधुरलोडि
तैः॥ पयो धसा वा जुहुयात् तत्सहस्रं त्रितेंद्रियः॥ तेन वा चनिकोष्टसहस्रहोमः॥ ॥अथ महि
षमर्दिनी॥ ॥निबंधे॥ ॐ तं वियत्तत्स्यनं श्वेतो मर्दिनी ठद्वयं॥ ॐ तोमकारः॥ वियत्तहकारः
नयनं ईकारः॥ श्वेतष कारः॥ ठद्वयं स्वाहा॥ अष्टाक्षरी समाख्याता विद्या महिषमर्दिनी॥ विषं
हिमरश्मीजो ग्निरदिस्थो हनिचठद्वयं॥ विषं मकारः॥ हिस्वरूपं॥ मज्जा षकारः॥ कालो मकारः॥
अग्निरेफः॥ अद्रिर्दकारः॥ लएव इकारः॥ इति वचनादिकारयुक्तो दकारः॥ अयं मंत्रसारा
दिर्नयादिः कामादिर्यावादिर्बिध्न(?)ादिप्य(?) वचादि॥ तथा च विश्वसारे॥ प्रणवाद्यां जपे
द्विद्यां मायाद्यां वाग्भवे बुधः॥ वाग्भवाद्यां जपेत्तां तु देवीं वा कामबिन्दुके॥ पुटितां वाशु युग्मेन
मुखे युग्मके देशके॥ दशाक्षरीसमो नास्ति विद्या त्रिभुवनेश्वरः॥ प्रणवं च तथा माया नवोद्विद्या
पुनर्दश॥ कामं प्रणवमित्युक्तं नवोद्विद्या पुनर्दश॥ विना बीजैर्महाविद्यां नियोयां पारिकीर्तिता
अस्य प्रणामात … पादिपाठमासांतं कर्मसमाप्य केसरे … मध्ये च दुर्गा मंत्रोक्तपीठशक्तिपा

मनुं च न्यसेत्॥ ततः पूर्वोक्तरूपादिन्यासं कृत्वा करांगन्यासं कुर्यात्॥ तद्यथा॥ महिषहिंसि
के फट् हुं अंगुष्ठाभ्यां नमः॥ महिषशत्रोर्घोराघिक्रिं फट् हुं तर्जनीभ्यां स्वाहा॥ महिषं हे षय … षय फ
ट् हूं मध्यमाभ्यां वषट्॥ महिषं हन हन देवि कं फट् हुं अनामिकाभ्यां हुं॥ महिषसूदनि कं फट् हूं कनि
ष्ठाभ्यां वौषट्॥ महिषहिंसिके फं फट् हुं हृदयाय नमः॥ महिषशत्रोर्घोरा विंक्रिं फट् हुं शिरसे स्वाहा॥
महिषं हे षय हेषय फं फट् हुं शिखायै वषट्॥ महिषं हन हन देवि कं फट् हुं कवचाय हुं॥ महिष
सूदनि कं फट् हुं अस्त्राय फट्॥ तथा च तंत्रांतरे॥ महिषहिंसिके फं फट् हुं हृदये परिकीर्तितं॥ महिष
शत्रोर्घोरा … तिकं फट् हुं शिर ईरितं॥ महिषं हेषय हेषय कं फट् हुं ते शिखामनुः॥ महिषं हन युग्मांते
देवि कं फट् हुं तनुच्छदं॥ महिषांते सूदनि कं फट् हुं तेनास्त्रमीरितं॥ मंत्रैरेतैर्हि नियुक्तैः पंचांगानि प्र
कल्पयेत्॥ बिल्वैर्न यजेद्देवीं न तुलस्या कदाचन॥ न दर्वाखिरर्घपात्रं स्यात् … पितं पत्रयोनि
ना॥ विश्वामित्रस्य पात्रेण मुद्रारपिडिवां यजेत्॥ इति वचनात् दर्वाखनिषेधः॥ कालीवस्त्र
वेदेवीं कालीवस्त्रं समाप्नुयात्॥ ततो ध्यानं॥ गारुडोपलसन्निभां मणिमौलिकुंडलमंडितां नौ

मित्तालविलोचनां महिषोत्तमांगनिषेदुषीं॥ शंखचक्रकृपाणखेटकबाणकार्मुकशूलकं तर्ज
नीमपि बिभ्रतीं निजबाहुभिः शशिशेखरां॥१॥ एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कृत्वा
पीठपूजां विधाय केसरेषु मध्ये च पूर्वोक्तपीठशक्तिः पीठमनुं यजेत्॥ ततः पूर्ववत् ध्यात्वावा
हनादि पंचपुष्पांजलिदानपर्यंतं विधाय आवरणपूजामारभेत्॥ अग्निनिरृतिवायुईशा
नदिक्षु च पूर्ववत् हृदंगानि पूजयेत्॥ ततः पत्रेषु पूर्वादि॥ ॐ दुर्गायै नमः॥ ईं वरवर्णिन्यै नमः॥ ॐ आ
र्यायै नमः॥ कं कनकप्रभायै नमः॥ कृं कृत्तिकायै नमः॥ ऐं अभयप्रदायै नमः॥ ॐ कन्यायै
नमः॥ सुस्वरूपायै नमः॥ पत्राग्रेषु पंचवक्त्रायै नमः॥ शं शंखाय नमः॥ खं खड्गाय नमः॥ खं
खेटाय नमः॥ बां बाणाय नमः॥ धं धनुषे नमः॥ शं शूलाय नमः॥ तं तर्जन्यै नमः॥ तद्बहिरि
न्द्रादीन् वज्राद्यांश्च यजेत्॥ ततः धूपदीपादि विसर्जनांतं कर्म कुर्यात्॥ समापयेत्॥ अस्य पु
रश्चरणं अष्टलक्षजपः॥ अष्टसहस्रतिलैर्होमः॥ तथा च॥ अष्टलक्षं जपेन्मंत्रं तत्सह
स्रैस्तिलैः शुभैः॥ इत्यादिवचनात्॥ अथ बलिविधिः॥ एहि एहि पदद्वंद्वं गृह्ण गृह्ण पदद्वयं

मदीयं च बलिं देवि गृह्णापक पदद्वयं॥ साधयद्वितयं ब्रूयात् खादयद्वितयं पुनः॥ सर्वसि
द्धिपदं देहि तदा स्वाहापदं वदेत्॥ बलिदानस्य मंत्रोयं महर्दिग्भ्यः परिकीर्तितः॥ अनेन
मंत्रेण जपसमर्पणानंतरमुत्तरस्यां दिशि बलिं दद्यात्॥ ॥अथ जयदुर्गामंत्रः॥ ॥
तारे दुर्गेयुगं रक्षमस्योठांतं सलोचनं॥ द्विठांतोऽयं जयदुर्गेयं विद्या वेदाद्दर्णा हरी॥ रक्षं रे
फ॥ अंस्योरुकार॥ ठं तोयकार॥ लोचनमिकार॥ तथोक्तं॥ अस्य पूजा प्रातः कृत्यादि
दुर्गामंत्रोक्तं कृत्वादिन्यासांतं कर्म कृत्वा करांगन्यासौ कुर्यात्॥ यथा॥ ॐ दुर्गे अंगुष्ठाभ्यां
नमः॥ दुर्गे तर्जनीभ्यां स्वाहा॥ दुर्गायै मध्यमाभ्यां वषट्॥ भूतरक्षणि अनामिकाभ्यां हुं॥
ॐ दुर्गे दुर्गे रक्षणि कनिष्ठिकाभ्यां वौषट्॥ ॐ दुर्गे दुर्गे रक्षणि अस्त्राय फट्॥ एवं हृदयादिषु॥
तथा च निबंधे॥ तारादि दुर्गे हृदयं दुर्गे शिरउदीरितं॥ दुर्गायै स्याच्छिखावर्म भूतरक्षणि की
र्तितं॥ तारादि दुर्गेयुगलं रक्षणि अस्त्रमुदीरितं॥ ततो ध्यानं॥ कालाभ्राभां कटाक्षैररिकुलभयदां
मौलिबद्धेंदुरेखां शंखचक्रं कृपाणं त्रिशिखमपि करैरुद्वहंतीं त्रिनेत्रां॥ सिंहस्कंधाधिरू

ह्रां त्रिभुवनमखिलं तेजसा पूरयंतीं ध्याये दुर्गां जयाख्यां त्रिदशपरिवृतां सेवितां सिद्धिका
मैः ॥१॥ एवं ध्यात्वा मानसैः संपूज्य अर्घस्थापनं कुर्यात् ॥ ततः पूर्वोक्तपीठपूजां विधाय पू
र्ववत् पूजां कुर्यात् ॥ अस्य पुरश्चरणं पंचलक्षजपः ॥ घृतेन दशांशहोमः ॥ तथा च निबंधे
बाणलक्षं जपेन्मंत्रं घृतेन जुहुयात्ततः ॥ दशांशं च कृते वह्नौ आलेणानपिनी जयेत् ॥ महा
हरीदिते पीठे पूजयेत्पूर्ववत्सुधीः ॥ ॥इति जयदुर्गा॥ ॥अथ शूलिनीदुर्गामंत्रः॥
ज्वल ज्वल शूलपदस्यांते शूलिनीति पदं ततः ॥ दुष्टग्रह हुम स्यांते वह्निजायावधिर्मनुः ॥ अ
स्य पूजा ॥ ततः प्रातःकृत्यादि पीठन्यासांतं पूर्वोक्तदुर्गामंत्रोक्तं विधाय ऋष्यादिन्यासं कु
र्यात् ॥ तद्यथा ॥ शिरसि दीर्घतपसे ऋषये नमः ॥ मुखे ककुप्छंदसे नमः ॥ हृदि शूलिनी
देवतायै नमः ॥ ततः करांगन्यासौ ॥ शूलिनि दुर्गे हुं फट् अंगुष्ठाभ्यां नमः ॥ शूलिनि वर
दे हुं फट् तर्जनीभ्यां स्वाहा ॥ शूलिनि विंध्यवासिनि हुं फट् मध्यमाभ्यां वषट् ॥ शूलिनि अ
सुरमर्दिनि युद्धप्रिये त्रासय त्रासय हुं फट् अनामिकाभ्यां हुं ॥ शूलिनि देवसिद्धसुपूजि

ते नंदिनि रक्ष रक्ष महायोगेश्वरी हुं फट् कनिष्ठिकाभ्यां वौषट् ॥ एवं हृदयादि ॥ तथा च
निबंधे ॥ दुर्गे हृद्येव वर्षी वंविंध्यगेश्वरी क्रमात् ॥ शूलिन्याद्या हुं फडंताः पंचांगमनवः क्र
मात् ॥ ततो ध्यानं यथा ॥ अध्यारूढां मृगेंद्रं सजलजलधरश्यामलां हस्तपद्मैः शूलं बाणं
कृपाणं अरिजलजगदाचापपाशान्वहंती ॥ चंद्रोत्तुंगां त्रिनेत्रां चतसृभिरसिमाखेटकं
बिभ्रतीभिः कन्याभिः सेव्यमानां प्रकृतिनटन्नयदां शूलिनीं भावयामि ॥१॥ एवं ध्यात्वा
मानसैः संपूज्य अर्घस्थापनं कुर्यात् ॥ ततः पूर्वोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादि
पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजां कुर्यात् ॥ अग्निनिरृतिवायुईशानेषु दि
क्षु च पूर्वोक्तषडंगानि प्रपूजयेत् ॥ ततः पत्रेषु पूर्वादि ॥ ॐ दुर्गायै नमः ॥ एवं वरदायै ॥ विंध्य
वासिन्यै ॥ असुरमर्दिन्यै ॥ युद्धप्रियायै ॥ देवसिद्धसुपूजितायै ॥ नंदिन्यै ॥ महायोगे
श्वर्यै नमः ॥ ततः पत्राग्रेषु तदस्त्राणि शंखचक्रमसिपुनः ॥ गदेषुचापशूलानि पाशं
पद्मादिशो पिधान् ॥ अस्य पुरश्चरणं पंचलक्षजपः ॥ तथा च ॥ मनुमेनं जपेन्मंत्री वर्ण

लक्ष्मं विचक्षणः ॥ सर्पिषान्नेन वा होमः तद्दशांशमितो पलेदिति पाठोपमितोन्नयेत् ॥
अथ वर्णतनुं वक्ष्ये विश्वबोधविधायिनीं ॥ यस्यामनुपलब्धायां सार्वमितज्जगज्जडं ॥
अथ वागीश्वरीमंत्राः ॥ ॥ वद वद वाग्वादिनी वह्निवल्लभेति दशाक्षरः ॥ तथा चाभि
धेये ॥ अद्विवर्णसंरुद्धो वाग्वादिनी ठद्वयं ॥ सरस्वत्यां दशार्णोयं वागैश्वर्यप्रदः
तथा च ॥ भुवनेश्वरीसंपुटोयं महासारस्वतप्रदः ॥ अस्या मंत्रं ॥ व्योमेंदो वसनार्ण
कर्णिकमर्याद्वद्वैस्फुरत्केसरं पत्रांतर्गतपंचवर्गयशलार्णादित्रिवर्गक्रमात् ॥ आशा
स्वस्त्रिषु लांतलांगलियुजा क्षोणीपुरेणावृतं पद्ममिति ॥ अस्य पूजा ॥ प्रातः कृत्वादिपीठन्या
सं विधाय केसरेषु मध्ये च ॥ ॐ मेधायै नमः ॥ एवं प्रज्ञायै० ॥ प्रभायै० विद्यायै० धियै० स्मृत्यै०
बुद्ध्यै० विद्येश्वर्यै० ॥ मध्ये वर्णपद्मासनाय नमः ॥ ततः ऋष्यादिन्यासः ॥ तद्यथा ॥ शिरसि
कण्वऋषये नमः ॥ मायापुटितत्वेत्व बृहस्पतये रुषये नमः ॥ मुखे विराट्छंदसे नमः ॥
हृदि वागीश्वर्यै देवतायै नमः ॥ ॥ अथ मंत्रन्यासः ॥ ॥ ऐं शिरसि वं नमः ॥ श्रवण

योर्दं नमः ॥ वं नमः चक्षुषोः ॥ दं नमः वां नमः नासिकयोः ॥ यां नमः दिं नमः वदने ॥ निं न
मः लिंगे ॥ स्वां नमः गुह्ये ॥ हां नमः पादयोः ॥ करांगन्यासौ कृत्वा ध्यायेत् ॥ तथा च निबं
धे ॥ अस्य वर्णद्विवंगानि मातृकोक्तानि कल्पयेत् ॥ तरुणसकलमिंदोर्बिभ्रती शुभ्र
कांतीः कुचभरनमितांगी सन्निषण्णा सिताब्जे ॥ निजकरकमलोद्यल्लेखनीपुस्तकश्रीः
सकलविभवसिद्ध्यै पातु वाग्देवता वः ॥१॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्या
त् ॥ ततः पीठपूजां कृत्वा केसरेषु मध्ये च मेधादिपीठमंत्रांतं संपूज्य पुनर्ध्यात्वावाहनादि
पंचपुष्पांजलिदानपर्यंतं कृत्वा केसरेषु मध्ये चावरणपूजां कुर्यात् ॥ अग्निकोणे अंकं
आं हृदयाय नमः ॥ नैरृते ॥ इं चं ईं शिरसे स्वाहा वायुकोणे ॥ उं टं ऊं शिखायै वषट् ईशाने
एं तं ऐं कवचाय हुं मध्ये ॥ ओं पं औं नेत्रत्रयाय वौषट् दिक्षु ॥ अं यं शं अः अस्त्राय फट् पत्रे
षु पूर्वादि ॥ ॐ योगायै नमः ॥ एवं सत्यायै ॥ विमलायै० ॥ ज्ञानायै० बुद्ध्यै० स्मृत्यै० मेधायै० प्रज्ञा
यै० ॥ दलाग्रेषु ब्राह्म्याद्याः पूज्याः ॥ तद्बहिरिंद्रादीन्वज्रादींश्च पूजयेत् ॥ ततो धूपादिविसर्जां

तं कर्म समापयेत्॥ अस्य पुरश्चरणं दशलक्षजपः॥ तथा च॥ दशलक्षं जपेन्मंत्रं दशांशं जुहु-
यात्ततः॥ पुंडरीकैः पयोभ्यक्तैः स्तिलैर्वा मधुराप्लुतैरिति॥ हृदयांते भगवति वद वाग्य यु-
ग्मं ततः॥ वाग्देवि वह्निजायांतं वाग्बीजाद्यं समुद्धरेत्॥ अस्य पूजाप्रातःकृत्यादि पीठन्यासां-
तं कर्म विधाय केसरेषु मध्ये पूर्वोक्त पीठशक्तिः पीठमन्त्रं च जपेत्॥ ततः पूर्वोक्त ऋष्या-
दिन्यासं विधाय करांगन्यासौ कुर्यात्॥ तद्यथा॥ ऐं अंगुष्ठाभ्यां नमः॥ नमः तर्जनीभ्यां स्वा-
हा॥ भगवति मध्यमाभ्यां वषट्॥ वद वद अनामिकाभ्यां हुं॥ वाग्देवि कनिष्ठिकाभ्यां वौष-
ट्॥ स्वाहा करतलपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ तथा च निबंधे॥ मनोः षड्भिः पदैः कुर्यात्
जातियुक्तं षडंगकं॥ ततो ध्यानं॥ शुभ्रां स्वच्छविलेपमाल्यवसनां शीतांशुखंडोज्ज्वलां व्याख्या-
मक्षगुणं सुधाढ्यकलशं विद्यां च हस्तांबुजैर्बिभ्राणां कमलासनां कुचनतां वाग्देवतां सस्
मितां वंदे वाग्विभवप्रदां त्रिनयनां सौभाग्यसंपत्करीं॥१॥ एवं ध्यात्वा मानसैः संपूज्य शं-
खस्थापनं कुर्यात्॥ ततः पूर्वोक्तक्रमेण पूजयेत्॥ अस्य पुरश्चरणं अक्षलक्षजपः॥ तथा च

हविष्याशी जपेन्मंत्रं वसुलक्षं मनन्यधीः॥ दशांशं जुहुयाद्दंते तिलैराज्यपरिप्लुतैः॥ तारो मा-
या ऐं बिंदुः शक्तिस्तारं सरस्वती॥ इत्यानस्वंतिको मंत्रः प्रोक्त एकादशाक्षरः॥ अस्य पूजाप्रा-
तःकृत्यादि पूर्वोक्त पीठमन्त्रांतं विन्यस्य पूर्वोक्त ऋष्यादिन्यासं कुर्यात्॥ ततो मंत्रन्यासः॥ ॐ न-
मो ब्रह्मरंध्रे॥ ह्रीं नमो भ्रूमध्ये॥ चक्षुषोः ऐं ह्रीं नमः॥ कर्णयोः ॐ नमः॥ सं नमः नासिकयोः॥
रं नमः स्वां नमः मुखे॥ स्वैं नमः लिंगे॥ नं नमः गुह्ये॥ मं नमः॥ ततः करांगन्यासौ॥ ऐं अंगुष्ठा-
भ्यां नमः॥ ऐं तर्जनीभ्यां स्वाहा॥ ऐं मध्यमाभ्यां वषट्॥ ऐं अनामिकाभ्यां हुं॥ ऐं कनिष्ठिकाभ्यां
वौषट्॥ ऐं करतलपृष्ठाभ्यां फट्॥ एवं हृदयादि॥ तथा च निबंधे॥ ब्रह्मरंध्रे भ्रुवोर्मध्ये नवरं-
ध्रेषु च क्रमात्॥ मंत्रवर्णान्न्यसेन्मंत्री याथयेनांगकल्पने इत्यादि॥ ततो ध्यानं॥ वाणीं पूर्णनि-
शाकरोज्ज्वलमुखीं कर्पूरकुंदप्रभां चंद्रार्द्धांकितमस्तकां निजकरैः संबिभ्रतीं सादरात्॥ वी-
णामक्षगुणं सुधाढ्यकलशं विद्यां च तुंगस्तनीं दिव्यैराभरणैर्विभूषिततनुं हंसाधिरूढां भ-
जे॥१॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ ततः पीठपूजां विधाय केसरेषु मध्ये

चपर्यंतं पीठशक्तीः पीठमंत्रं यजेत्॥ पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतं समाप्या
वरणपूजामारभेत्॥ देव्या दक्षिणे ऐं संस्कृतायै नमः॥ वामभागे वामे प्राकृतायै॥ वाग्भवेन
तः केसरेषु अग्निकोणे ऐं हृदयाय नमः॥ नैरृते शिरसे स्वाहा॥ वायव्ये ऐं शिखायै वषट्॥
ईशाने ऐं कवचाय हुं॥ मध्ये ऐं नेत्रत्रयाय वौषट्॥ दिक्षु ऐं अस्त्राय फट्॥ ततः पत्रे पूर्वादि
ऐं प्रज्ञायै नमः॥ एवं मेधायै० श्रुत्यै० शांत्यै० स्मृत्यै०॥ प्रणवादिनमोंतेन पूजयेत्॥ ततः पत्रा
ग्रेषु ब्रह्माद्याः पूजयेत्॥ तद्बहिरिंद्रादीन् वज्रादींश्च पूजयेत्॥ ततो धूपादिविसर्जनांतं कर्म
समापयेत्॥ अस्य पुरश्चरणं द्वादशलक्षजपः॥ तथा च॥ जपेत् द्वादशलक्षाणि तत्सहस्रं
सितांबुजैः॥ नागचंपकपुष्पैर्वा जुहुयात्साधकोत्तमः॥ वाचस्पतेऽमृते प्लुवः प्लुरि
तिकीर्तयेत्॥ वाग्भवाद्यो मनुर्दशाख्यातो रुद्रसंख्याक्षरो मनुः॥ अस्य पूजादिकं पूर्ववत् करां
गन्यासस्तु॥ ऐं अंगुष्ठाभ्यां नमः॥ वाचस्पते तर्जनीभ्यां स्वाहा॥ अमृते मध्यमाभ्यां वषट्॥
प्लुवः अनामिकाभ्यां हुं॥ प्लुः कनिष्ठिकाभ्यां फट्॥ एवं हृदयादिषु॥ तथा च निबंधे॥ कुर्याद

गानि विधिवद्वागाद्यैः पंचभिः पदैः॥ ततो ध्यानं॥ आसीना कमले जपवटीपद्मद्वयं
पुस्तकं बिभ्राणा तरुणेंदुबद्धमुकुटा मुक्तेंदुकुंदप्रभा॥ भालोन्मीलितलोचना कुचभ
राक्रांता नवद्वंतयेभूयाद्वागधिदेवता सुरगणैः संसेव्यमानानिशं॥१॥ अस्य पुरश्च
रणं एकादशलक्षजपः॥ तथा च॥ रुद्रलक्षं जपेन्मंत्रं दशांशं जुहुयात् घृतैः॥ तोयश
यनं विष्णोः सकेवलचतुर्मुखं॥ अघसिंदुयुतो वह्निबिंदुस्थो बुमान् भृगुः॥ एता
नित्रीणि बीजानि सद्भिः सारस्वतार्थिनां॥ तोयं वकारः॥ विष्णुशयनमाकारः॥ केवलेन
अकाररहितेन ककारेण वाक्यवाग्भवं॥ केचित्तु लक्षितलक्षणया देवं वदंति॥ अकार
युक्तो वकारः॥ केमस्तकं केवलं तेकेवलोऽनुस्वारः॥ तद्युक्तेन ककारेण वर्त्तते तेन कामिति
तन्निरूढलक्षणया शक्तित्वमत्वात् वाक्यवाग्भवमितिपर्यायः॥ वस्तुतस्तु द्वादशस्वर
मुद्धृत्य बिंदुनादविभूषितं॥ बिंदुनादसमायुक्तं वह्निबीजं समुद्धरेत्॥ षष्ठस्वरसमायु
क्तं द्वितीयं बीजमुद्धरेत्॥ चंद्रबीजं समुद्धृत्य वरुणं योजयेत्ततः॥ त्रयोदशस्वरारूढं बिं

दुग्धाद्दधिघृतं॥ इति विश्वसारवचनात्॥ वाग्भवबीजमेव॥ अस्य पूजा पूर्ववत्॥ करां
गन्यासस्तु द्विरुक्तैस्त्रिभिर्बीजैर्विधेयः॥ तथा च निबंधे॥ अंगानि चास्य पंचांगी द्विरुक्तै
स्त्रितिसंभवैः॥ ध्यानं तु॥ मुक्ताहारावदातां शिरसि शशिकलासंकृताबाकृतिंः स्वैर्व्याख्यां
वर्णाक्षमालां मणिमयकलशीं पुस्तकं चोद्वहंतीं॥ आपीनोत्तुंगवक्षोरुहजघनविलसन्
मध्यदेशाम वाच्यां वामां नाडेचिराय त्रिभुवनवनितां पुंडरीके निषण्णां॥ १॥ अस्य पुर
श्चरणं त्रिजन्त्क्षजपः॥ त्रिजन्क्षं प्रजपेन्मंत्रं जुहुयात्तद्दशांशतः॥ पायसेराज्यसंसिक्तैः संस्कृ
ते हव्यवाहने॥ ॥अथ पारिजातसरस्वतीमंत्रः॥ ॥मंत्रदेवप्रकाशिकायां॥ स्व
चप्रणवहृल्लेखावृतहकारबिंदुसंयुक्तसरस्वतीऽन्तानतिश्च॥ अस्य पूजा प्रातःकृत्या
दिपीठमंत्रं विन्यस्य ऋष्यादिन्यासं कुर्यात्॥ शिरसि कण्वऋषये नमः॥ मुखे त्रिष्टुप्छंदसे न
मः॥ हृदि सरस्वत्यै नमः॥ ततो मातृकावत् करांगन्यासं विदध्यात्॥ मूर्ध्नि भ्रूमध्यनेत्रकर्ण
नासापुटद्वयवदनेगुह्यपादेषु एकादशासु न्यासः॥ दक्षिणामूर्तिसंहितायां तु॥ संपत्स

दायाज्ञेर न्यायाद्भवं बीजमालिखेत्॥ तारेण यस्मादेवेशि संपुटीकृत्य वित्॥ सरस्वतीह
दयांतो यं रुद्रारुपैर्नद्रीरितः॥ दक्षिणामूर्तिरिषिः प्रोक्ता गायत्री छंद ईरितं॥ पारिजातेश्वरी
वाणी देवता परिकीर्तिता॥ तृतीयं च द्वितीयं च बीजं शक्तिं च तारकं॥ कीलकं परमेशानि म
हासारस्वतप्रदा॥ षड्दीर्घस्वरसंभिन्नबीजेनांगानि विन्यसेत्॥ ततो ध्यानं॥ हंसारूढाव
हरसितहारेंदुकुंदावदाता वाणी मंदस्मितनरमुखी मौलिरद्धेंदुरेखा॥ विद्यावाणीरतनम
यघटाक्षस्रजाढीप्तहस्ताभ्याकुस्तान्वयदब्जिमनतप्राप्तये भारती स्यात्॥ १॥ अस्य पूजादि
कं पूर्वोक्तैकादशान्यासवत्॥ पुरश्चरणं तु द्वादशलक्षजपः॥ अर्कपुष्पैर्नागचंपकैर्वा जुहु
यात् द्वादशसहस्रकमिति सरस्वतीमंत्राः॥ ॥अथ लक्ष्मीमंत्रः॥ ॥अथ वक्ष्ये श्रियो
मंत्रान्लक्ष्मीसौभाग्यफलप्रदान्॥ यस्याः कटाक्षमात्रेण त्रैलोक्यमपि वर्धते॥ बीजं वह्निस
मारूढं वामनेत्रेंदुसंयुतं॥ बीजमेतच्छ्रियः प्रोक्तं सर्वकामफलप्रदं॥ अस्य पूजाप्रयोगः॥ प्रा
तःकृत्यादि पीठन्यासांतं कर्म विधाय केसरेषु मध्ये षु च॥ ॐ विभूत्यै नमः॥ ॐ उन्नत्यै नमः॥

ॐ कांत्यैनमः॥ ॐ सृष्ट्यैनमः॥ ॐ दीप्त्यैनमः॥ ॐ सरस्वत्यैनमः॥ ॐ तुष्ट्यैनमः॥ ॐ पुष्ट्यैनमः॥
श्रीं आसनायनमः॥ ततः ऋष्यादिन्यासः॥ शिरसि भृगुऋषयेनमः॥ मुखे निचृतछंदसेनमः
हृदि श्रियै देवतायैनमः॥ ततः करांगन्यासौ॥ श्रां अंगुष्ठाभ्यां नमः॥ श्रीं तर्जनीभ्यां नमः॥
श्रूं शिखायै वषट्॥ श्रैं कवचाय हुं॥ श्रौं नेत्रत्रयाय वौषट्॥ श्रः अस्त्राय फट्॥ अंगानि दीर्घ
युक्तानि रमाबीजेन कल्पयेत्॥ ततो ध्यानं॥ कांत्या कांचनसन्निभां हिमगिरिप्रख्यैश्चतुर्भिर्ग
जैः हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां श्रियं॥ बिभ्राणां वरमब्जयुग्ममभयं ह
स्तैः किरीटोज्वलां क्षौमाबद्धनितंबबिंबललितां वंदेरविंदस्थितां॥१॥ एवं ध्यात्वा मानसैः
संपूज्य शंखस्थापनं कुर्यात्॥ ततः पीठपूजां विधाय केसरेषु मध्ये च विभूत्यादि पीठमंत्रेण पी
ठं संपूज्य पुनर्ध्यात्वा आवाहनादि पंचपुष्पांजलिदानपर्यंतं कर्म विधाय आवरणपूजामारभेत्॥
तद्यथा॥ अग्न्यादिकोणकेसरेषु मध्ये दिक्षु च॥ श्रां हृदयायनमः॥ इत्यादिना संपूज्य अष्ट
दलेषु पूर्वादि॥ ॐ वासुदेवायनमः॥ ॐ संकर्षणायनमः॥ ॐ प्रद्युम्नायनमः॥ ॐ अनिरुद्धाय

नमः॥ विदिग्दलेषु॥ ॐ दमनकायनमः॥ ॐ सलिलायनमः॥ ॐ गुग्गुलवेनमः॥ ॐ कुरंडका
यनमः॥ ततो देव्या दक्षिणे॥ ॐ शंखनिधयेनमः॥ ॐ वसुधायैनमः॥ वामे ॐ पद्मनिधयेनमः
ॐ वसुमत्यैनमः॥ पत्राग्रेषु पूर्वादि॥ ॐ बलाक्यैनमः॥ एवं विमलायै॥ कमलायै॥ वनमालि
कायै॥ विभीषिकायै॥ मालिकायै॥ शांकर्यै॥ वसुमालिकायै॥ तद्बहिरिंद्रादीन् वज्रादीं
श्च पूजयेत्॥ ततो धूपदीपादि विसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं द्वादशलक्षजपः
तथा च॥ जानुदघ्ने जपेन्मंत्रं दीक्षितो विजितेंद्रियः॥ तत्सहस्रं चरुं कुर्यात् कमलैर्मधुरा
न्वितैः॥ जपांते जुहुयान्मंत्री तिलैर्वा मधुराप्लुतैः॥ बिल्वैः फलैर्वा जुहुयात् त्रिभिर्वा साध
कोत्तमः॥ बाध्यवं वनिताविलोमार्यामकरकेतनः॥ चतुर्वीजात्मको मंत्रश्चतुर्वर्गफलप्र
दः॥ अस्य पूजा सर्वपूर्ववद् बोध्यं॥ ध्याने तु विशेषः॥ तथा च॥ माणिक्यप्रतिमप्रभां हिमनिभैस्तुं
गैश्चतुर्भिर्गजैर्हस्ताग्राहितरत्नकुंभसलिलैरासिच्यमानां सदा॥ हस्ताब्जैर्वरदानमंबुज
युगाभीतिर्दधानां हरेः॥ कांतां कांक्षितपारिजातलतिकां वंदे सरोजासनां॥१॥ अस्य पुरश्च

रणं च दशलक्षजपः॥ तथा च॥ नानुलक्षं हविष्याशी जपेद्दंते सरोरुहैः॥ तत्कुर्यादारुणैः पुष्पै-
स्तत्सहस्रं जितेंद्रिय इति॥ नमः कमलवासिन्यै हृदयमिति प्रोक्तो दशाक्षरः॥ तथा च निबं-
धे॥ दीर्घयादि विसर्गांतो वलाम्भानुर्वसुंधरा॥ वांते सिन्यै प्रियायश्रूर्मनुप्रोक्तो दशाक्षरः॥
पूर्ववत् पीठमन्त्रं तं विन्यस्य ऋष्यादिन्यासं कुर्यात्॥ शिरसि दक्षिणामूर्तये नमः॥ मुखे विरा-
ट्छंदसे नमः॥ हृदि श्रियै देवतायै नमः॥ ततः कराङ्गन्यासौ॥ तद्यथा॥ देव्यै नमोऽङ्गुष्ठाभ्यां
नमः॥ पद्मिन्यै नमः तर्जनीभ्यां स्वाहा॥ विष्णुपत्न्यै नमो मध्यमाभ्यां वषट्॥ ॐ वरदायै नमो-
ऽनामिकाभ्यां हुं॥ ॐ कमलरूपायै नमः कनिष्ठिकाभ्यां फट्॥ ॐ देव्यै हृदयाय नमः॥ पद्मि-
न्यै नमः शिरसे स्वाहा॥ ॐ विष्णुपत्न्यै नमः शिखायै वषट्॥ ॐ वरदायै नमः कवचाय हुं॥
ॐ कमलरूपायै नमोऽस्त्राय फट्॥ तथा च निबंधे॥ देव्यै हृदयमाख्यातं पद्मिन्यै शिर ईरितं॥
विष्णुपत्न्यै शिखा प्रोक्ता वरदायै तनुच्छदं॥ अस्त्रं कमलरूपायै नमोंताः प्रणवादिकाः॥ ततो
ध्यानं॥ आसीना सरसीरुहे स्मितमुखी हस्तांबुजैर्बिभ्रती दानं पद्मयुगाभये च वपुषा सौदा-

मिनीसन्निभा॥ मुक्ताहारविराजमानपृथुलोत्तुंगस्तनोद्भासिनी पायाद्वः कमला कटाक्षविभवै-
रानंदयंती हरिं॥१॥ एवं ध्यात्वा मानसैः संपूज्य बहिः पूजामारभेत्॥ ततः शंखस्थापनं कृ-
त्वा पूर्वोक्तपीठसहितशक्तिसहितपीठमन्त्रेण पूजां विधाय पुनर्ध्यात्वावाहनादि पंच पुष्पां-
जलिदानपर्यंतं विधायावरणपूजामारभेत्॥ अग्न्यादिकोणचतुष्टयेषु॥ ॐ देव्यै नमो हृद-
याय नमः॥ ॐ पद्मिन्यै नमः शिरसे स्वाहा॥ ॐ विष्णुपत्न्यै नमः शिखायै वषट्॥ ॐ वरदायै नमः
कवचाय हुं॥ ॐ कमलरूपायै नमः अस्त्राय फट्॥ ततः पूर्वादिदलेषु पूर्ववत् बलाक्यादि
पूजयेत्॥ तद्बहिरिंद्रादीन् वज्रादींश्च पूजयेत्॥ ततो धूपादि विसर्जनांतं कर्म समापयेत्॥ अ-
स्य पुरश्चरणं जपो दशलक्षः॥ तथा च॥ दशलक्षं जपेन्मंत्रं मंत्रविद्विजितेंद्रियः॥ दशांशं जु-
हुयान्मंत्री मधुराक्तैः सरोरुहैः॥ तारो वाग्भवं माया रमा कामः हसौः जगत्प्रसूत्यै नमः॥ तथा
च॥ वाग्भवं शंभुवनिता रमा कंदर्पकेतनः॥ तार्त्तीयं च जगत्प्रायो यपूर्वबीजसमुद्धरेत्॥ अथा-
ग्न्योन्तगस्यै हृन्मंत्रोयं दशाक्षरः॥ महालक्ष्म्याः समृद्धिः स्यात्ताराद्याः सर्वसिद्धिदः॥ अस्य

पूजायां ततः ऋष्यादिन्यासं बीजोक्तरूपेण न्यासं विधाय ऋष्यादिन्यासं कुर्यात्॥ शिरसि ब्रह्मणे ऋषये न
मः॥ मुखे गायत्री छंदसे नमः॥ हृदि महालक्ष्मीदेवतायै नमः॥ मूलेन करौ संशोध्य अंगुष्ठादिक्र
मेण मूले कं तारादि नमोंतानि पंचबीजानि विन्यसेत्॥ यथा॥ ॐ ऐं नमः ॐ श्रियै नमः॥ ॐ ह्रीं नमः
ॐ ह्सौः नमः॥ ॐ जगत्प्रसूत्यै नमः॥ करतले॥ ततो मस्तकादिचरणांतं मूलेन व्यापकं न्य
सेत्॥ ततो मूर्धास्य हृदय गुह्य पादेषु पंचबीजानि विन्यसेत्॥ शेषाक्षराणि हृदये सप्तधातु
षु॥ तथा च निबंधे॥ ह्सौः संशोध्य मूलेन तारादि हृदयांतिकं॥ बीजानां पंचकं न्यसेत् अंगुली
षु यथाक्रमं॥ मंत्रशेषं न्यसेन्मंत्री तलयोः करयोरपि॥ मूर्धादिचरणांतं च व्यापकं मंत्रेण व्यापकं न्य
सेत्॥ मूर्धास्य हृद्गुह्यांघ्रौ पंचबीजानि विन्यसेत्॥ शेषान्न्यसेत् सप्तवर्णान् हृदये सप्त
धातुषु॥ ततः करांगन्यासौ॥ ऐं ज्ञानाय अंगुष्ठाभ्यां नमः॥ ह्रीं ऐश्वर्याय तर्जनीभ्यां स्वाहा॥
श्रीं शक्त्यै मध्यमाभ्यां वषट्॥ क्लीं बलाय अनामिकाभ्यां हुं॥ वीर्याय कनिष्ठिकाभ्यां वौ
षट्॥ जगत्प्रसूत्यै नमः तेजसे करतलपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ तथा च निबंधे॥ अंगानि

पंचभिर्बीजैरस्त्रांतोपांतकैर्न्यसेत्॥ ज्ञानैश्वर्यादिभिर्युक्तैश्चतुर्थ्यंतैः स जातिभिः॥ ज्ञानैश्वर्यश
क्ती च बलवीर्ये स तेजसा॥ ज्ञानैश्वर्यादयः प्रोक्ताः षडंक्रमादंगयोजिताः॥ ततो ध्यानं॥ बाला
र्कद्युतिमिंदुखंडविलसत्कोटीरहारोज्ज्वलां रत्नाकल्पविभूषितां कुचनतां शालेः करैर्मंजरीं॥
पद्मं कौस्तुभरत्नमप्यविरतं संबिभ्रतीं सस्मितां फुल्लांभोजविलोचनत्रययुतां ध्यायेत्परा
मंबिकां॥१॥ इति ध्यानं॥ विस्तारे तु शारदायां द्रष्टव्यं॥ इति ध्यात्वा मानसैः संपूज्य शंखस्थाप
नं कुर्यात्॥ आबीजोक्तरूपेण पूजां विधाय पुनर्ध्यात्वा आवाहनादि पंचपुष्पांजलिदानपर्यंतं वि
धाय आवरणपूजामारभेत्॥ यथा देव्या दक्षिणे ॐ शंकरनंदनाय नमः॥ एवं वामे पृष्ठमध्य
न्वने नमः॥ अग्न्यादिकोणे मध्ये दिक्षु ऐं ज्ञानाय नमः॥ इत्यादि पूजयेत्॥ पत्रेषु पूर्वादिदिक्षु
उमायै नमः॥ एवं सरस्वत्यै दुर्गायै धरण्यै गायत्र्यै देव्यै ... ये॥ दक्षिणे मरुत्सुतायै॥ वामे
सूर्यसुतायै॥ तथा शंखनिधये पद्मनिधये॥ पश्चिमे धरातत्त्वं वरुणं पूजयेत्॥ तद्बाह्ये
द्वादशराशीन् नवग्रहान् प्रत्येकेन पूजयेत्॥ तद्बाह्ये गजान् ऐरावत पुंडरीक वामनके

मुद्रयांजनपुष्पदंतः सार्वभौमस्सुप्रतीकान् ॥ ततइंद्रादींश्च संपूज्य धूपादि विसर्जितं कर्मस
मापयेत् ॥ अस्य पुरश्चरणं द्वादशलक्षजपः ॥ तथा च ॥ जानुजन्दंजपेन्मंत्रं दशांशं जुहुया
त् घृतैः ॥ जुहुयात्त्रिमधूल्लैः पद्मैः प्रत्येकमयुतद्वये ॥ तर्पयेत्ससलिलैः शुद्धैः सुगंधैरयुतद्
यं ॥ अयुतद्वयमित्यत्र वाचनिकव्यवस्था ॥ रांस्तुपत्नीश्रीयावृद्धाकामोन्नगवतीमहा ॥ श्र
लादित्तीधरादीर्घात्लिरूढादित्तिगवान्मरुत् ॥ प्रसीदयुगलंम्रम् श्रीरुद्धान्नुवनेश्वरी ॥ महा
लक्ष्मीनमोंतस्मात्प्रणवादिरयं मनुः ॥ महीलकारः ॥ नगवती एकारवत्ती श्रलाककाद
आदित्योमकारः ॥ धरालकारः ॥ दीर्घआकारयुक्तो लहो दिर्लकारः ॥ मरुत्यकारः ॥ एभ्रा
रयुक्तः ॥ अस्यध्यानमातः कृत्वादिपूर्वोक्तरूप्यादिन्यासं विधाय करांगन्यासौ कुर्यात् ॥ श्रीं
ह्रीं श्रीं कमलेश्री ह्रीं श्रीं अंगुष्ठाभ्यां नमः ॥ २ कमलालये २ तर्जनीभ्यां स्वाहा ॥ ३ प्रसीद २ मध्य
माभ्यां वषट् ॥ ४ प्रसीद २ अनामिकाभ्यां हुं ॥ ५ महालक्ष्मी २ कनिष्ठिकाभ्यां फट् ॥ एवं हृदया
दिषु ॥ तथा च निबंधे ॥ कमले हृदयं प्रोक्तं शिरः स्यात्कमलालये ॥ शिखा प्रसीदेतेनैव कव

चं चतुरक्षरैः ॥ अस्त्रमेतैः पदैः कुर्यात्त्रिबीजपुटितं क्रमात् ॥ ततो ध्यानं ॥ सिंदूरारुणकां
तिमब्जवसतिं सौंदर्यवारान्निधिं कोटिरांगदहारकुंडलकटीसूत्रादिभिर्भूषितां ॥ हस्ता
ब्जैर्वसुपत्रमब्जयुगलादर्शौ वहंतीं परामादितां परिचारिकाभिरनिशं ध्यायेत्प्रियां शा
र्ङ्गिणः ॥ १ ॥ एवं ध्यात्वा मानसैः संपूज्यार्घस्य स्थापनं कुर्यात् ॥ पूर्ववत्पीठपूजां विधाय
पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत् ॥ ततः के
सरेषु अग्न्यादिकोणेषु दिक्षु च श्रां ह्रीं श्रीं कमले २ हृदयाय नमः ॥ इत्यादि पूजयेत् ॥ दलमू
ले पूर्वादिदिक्षु श्रीधराय नमः ॥ एवं हृषीकेशाय॰ ॥ वैकुंठाय॰ विश्वरूपाय॰ वासुदेवाय॰
संकर्षणाय॰ प्रद्युम्नाय॰ अनिरुद्धाय॰ दलमध्येषु ओरत्यै॰ पार्वत्यै॰ चांद्र्यै॰ दाच्यै॰ दमनकौ
यं॰ सलिलाय॰ गुग्गुलवे ॥ कुरंडकाय॰ दलाग्रेषु अनुरागं॰ विसंवादं॰ विजयं॰ वल्लभं॰
मदं॰ हर्षं॰ बलं॰ तेजश्च इति महालक्ष्मीबाणान् पूजयेत् ॥ बाकं तु ॐ अनुरागाय महालक्ष्मी
बाणाय नमः ॥ इति क्रमेण पूजयेत् ॥ तद्बहिः इंद्रादीन्वज्रादींश्च पूजयेत् ॥ ततो धूपादि

विसर्जितं कर्म समापयेत् ॥ अस्य पुरश्चरणं लक्षजपः ॥ तद्यथा ॥ लक्षं जपेत् फलैर्बिल्वैः कुकु
पान्नमधुरोक्षितैः ॥ दशांशं संस्कृते वह्नौ प्राक् प्रोक्तेनैव वर्त्मना ॥ ॥ इति लक्ष्मीमंत्राः ॥
अथ गणेशमंत्राः ॥ ॥ पादांबुजध्यानवशेन यस्य विघ्नाः समस्ता विलयं प्रयांति ॥
सिंदूरकांतिगजराजवक्त्रं नौमि प्रलंबोदरमादिदेवं ॥१॥ अथ वक्ष्ये गणपतेर्मंत्रान् स
र्वार्थसिद्धिदायकान् ॥ यान् ज्ञात्वा मानवा नित्यं साधयंति मनोरथान् ॥२॥ पंचांतकं शशि
धरं बीजं गणपतेर्विदुः ॥ अस्यार्थः ॥ पंचांतकं गकारः ॥ अस्य पूजाप्रयोगः ॥ प्रातःकृत्या
दिपीठन्यासांतं कर्म विधाय केसरेषु मध्ये ॥ ॐ तीव्रायै नमः ॥ एवं ज्वालिन्यै० नंदायै० भो
गदायै० कामरूपिण्यै० उग्रायै० तेजोवत्यै० सत्यायै० विघ्ननाशिन्यै० तदुपरि ॐ सर्वशक्ति
कमलासनाय नमः इति पूजयेत् ॥ ततः ऋष्यादिन्यासः ॥ शिरसि गणकऋषये नमः ॥
मुखे निचृद्गायत्रीछंदसे नमः ॥ हृदि गणेशाय देवतायै नमः ॥ ततः करांगन्यासौ ॥ गां अं
गुष्ठाभ्यां नमः ॥ गीं तर्जनीभ्यां स्वाहा ॥ गूं मध्यमाभ्यां वषट् ॥ गैं अनामिकाभ्यां हुं ॥ गौं कनि

ष्ठिकाभ्यां वौषट् ॥ गः करतलपृष्ठाभ्यां फट् ॥ एवं गां हृदयाय नमः ॥ इत्यादि ॥ तथा च निबं
धे ॥ षड्दीर्घभाजा बीजेन कुर्यादंगानि षडंगक्रमात् ॥ ततो ध्यानं ॥ सिंदूराभं त्रिनेत्रं पृथु
तरजठरं हस्तपद्मैर्दधानं दंतं पाशांकुशेष्टान्युरुकरविलसद्बीजपूराभिरामं ॥ बालेंदुद्यो
तिमौलिं भजत गणपतिं रक्तवस्त्रांगरागं ॥१॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापना
दि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजां कुर्यात् ॥ तद्यथा ॥ कर्णिकायां पूर्वादि
दिक्षु ॐ गणाधिपाय नमः ॥ एवं गणेशाय० गणनायकाय नमः ॥ गणक्रीडाय० ततः के
सरेषु अग्निनिर्ऋतिवायुईशानकोणेषु मध्ये दिक्षु च गां हृदयाय नमः ॥ इत्यादिना पूजयेत् ॥
ततः पत्रमध्ये पूर्वादितः वक्रतुंडमेकदंतं महोदरं गजाननं ॥ लंबोदराख्यं विकटं विघ्नराजमनं
तरं ॥ धूम्रवर्णं पूजयेत् ॥ वाक्यं तु ॥ ॐ वक्रतुंडाय नमः ॥ इत्यादि ॥ दलाग्रेषु ब्राह्म्याद्या मातरः पू
र्ववत् पूज्याः ॥ तद्बहिः इंद्रादीन् वज्रादींश्च संपूज्य धूपादिविसर्जनांतं कर्म समापयेत् ॥ अस्य पु
रश्चरणं चतुर्लक्षं ॥ तथा च ॥ वेदलक्षं जपेन्मंत्रं दशांशं जुहुयात्ततः ॥ मोदकैः पृथुकैर्लाजैः स

केचिदिक्षुपर्वभिः॥ नारिकेलैर्मुनिलैः फलैः स्तूपकैः कदलीफलैः॥ अथ इष्टाणि विघ्नस्य कथितानि
मनीषिभिः॥ महागणपतिमंत्रः॥ श्रीशक्तिः स्मरभूः विघ्नबीजानि प्रथमं वदेत्॥ ङेऽंतं गणपतिं प
श्चाद्वरवरदं तेच वदेत्पदं॥ ततः सर्वजनं मेवशमानयपदद्वयं॥ अष्टाविंशत्यक्षरोयं तारादो मनु
रीरितः॥ स्मृतिस्थं मांसमौबिंदुयुक्तं स्मृबीजमीरितं॥ अस्यार्थः॥ स्मृतिर्गकारः॥ मांसं लकारः॥ नु
स्वरूपः॥ अस्य पूजाप्रयोगः॥ प्रातःकृत्यादि पीठन्यासांतं कर्म विधाय पूर्वोक्तपीठशक्तिमंत्र
त्रं विन्यस्य ऋष्यादिन्यासं कुर्यात्॥ तद्यथा॥ शिरसि गणकऋषये नमः॥ मुखे निचृद्गायत्रीछं
दसे नमः॥ हृदि महागणपतये देवतायै नमः॥ ततः करांगन्यासौ॥ ॐ श्रीं ह्रीं क्लीं ग्लौं गं अंगु
ष्ठाभ्यां नमः॥ एवं ॐ गीं तर्जनीभ्यां स्वाहा॥ ॐ गूं मध्यमाभ्यां वषट्॥ ॐ गैं अनामिकाभ्यां हुं॥ ॐ
गौं कनिष्ठाभ्यां वौषट्॥ ॐ गां हृदयाय नमः॥ ॐ गीं शिरसे स्वाहा॥ इत्यादि॥ तत्र च स्वबीजस्य स्व
बीजेन दीर्घभाजा प्रकल्पयेत्॥ ॐ गः करतलपृष्ठाभ्यां फट्॥ एवं ॐ गां हृदयाय नमः॥ इत्यादि
न्यसेत्॥ केचित्तु षडंगानि मनोरस्य यथाविधि विधानवित्॥ इति वचनात्॥ विधिह

स्तेव ग्रहणं॥ ततो ध्यायेत्॥ नवरत्नमयं द्वीपं स्मरेदिक्षुरसांबुधौ॥ तद्वेलाविधौतपर्यंतं मद
मारुतसेवितं॥ मंदारपारिजातादिकल्पवृक्षलताकुलं॥ तद्भूतरत्नधाराभिररुणीकृतभूत
लं॥ उद्यद्दिनकरेंदुभ्यां मुद्भासितदिगंतरं॥ अस्य मध्ये पारिजातं नवरत्नमयं स्मरेत्॥ ऋ
तुभिः सेवितं षड्भिरनिशं प्रीतिवर्द्धनैः॥ तस्याधस्तान्महापीठरचिते मातृकांबुजे॥ षट्को
णं तं षड्भिरनिशं प्रीतिवर्द्धनैः॥ तस्याधस्तान्महापीठरचिते मातृकांबुजे॥ षट्कोणं तं त्रिको
णस्थं महागणपतिं स्मरेत्॥ हस्तींद्राननमिंदुचूडमरुणच्छायं त्रिनेत्रं रसादाश्लिष्टं प्रिय
यास्य पद्मकरया स्वांकस्थया संततं॥ बीजपूरगदाधनुस्त्रिशिखरचक्राब्जपाशोत्पलं
॥ व्रीह्यग्रस्वविषाणरत्नकलशान्हस्तैर्वहंतं भजे॥ गंडपालीगलद्दानपूरलालसमानसा
न्॥ द्विरेफान्कर्णतालीभ्यां वारयंतं मुहुर्मुहुः॥ कराग्रधृतमाणिक्यकुंभवक्त्रविनिःसृतैः॥ रत्न
वर्षैः प्रीणयंतं साधकान्मदविह्वलान्॥ माणिक्यमुकुटोपेतं रत्नाभरणभूषितं॥ एवं ध्यात्वा मा
नसैः संपूजयेत्॥ अस्य पूजायंत्रं त्रिकोणं षट्कोणं बहिः॥ अष्टपत्रं सर्वं मातृकायंत्रवत्का

यै॥ तत्पूर्वोक्तपीठशक्तिसहितमन्त्वं तं संपूज्य पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतं
विधायावरणपूजां कुर्यात्॥ त्रिकोणबाह्ये पूर्वादिचतुर्दिक्षु पूर्वे बिल्ववृक्षाधः रतिरतिपतिं
उत्तरे॥ प्रीयंगुवृक्षाधः महावराहं॥ दक्षिणाग्रे लक्ष्मीविनायकं॥ x श्रियंश्रिपतिं दक्षिणे॥ वट
वृक्षाधः गौरीपश्चिमे पिप्पलवृक्षाधः x षट्कमध्ये वह्न्यग्रकोणे सिद्धिसहितमामोदं॥ अ
ग्निकोणे समृद्धिसहितमामोदं अग्निकोणं॥ समृद्धिसहितप्रमोदं ईशाने॥ कांतिसहितसु
मुखं पश्चिमे॥ मदवतीसहितदुर्मुखं नैरृते॥ मदद्रवासहितविघ्नराजं वायव्ये॥ द्राविणीस
हितषण्मनिधये नमः॥ ततः केसरमध्ये विघ्नकर्तारं पूजयेत्॥ षट्कोणस्य उभयपार्श्वयो
र्वसुधासहितपद्मनिधये नमः॥ ततः केसरमध्ये अग्न्यादिकोणेषु मध्ये दिक्षु च षडंबीजम
गां हृदयाय नमः॥ इत्यादिना पूजयेत्॥ पत्रमध्येषु ब्राह्म्याद्याः मातरः पूज्या इंद्रादीन् व
ज्रादींश्च पूजयेत्॥ धूपादिविसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं चतुश्चत्वारिंशत्
सहस्रार्धकं चतुर्लक्षं जपः॥ तथा च॥ ध्यायेन्मंत्रं जपेन्मंत्री चतुर्लक्षं समाहितः॥ चतुःसहस्रं

संयुक्तं चत्वारिंशत्सहस्रकं॥ दशांशं जुहुयात्तस्मै रक्तनिर्मोदकादिभिः॥ शक्तिरूढं निजं श्री
जं महागणपतिं वदेत्॥ इति मंत्रविधिः प्रोक्तो मंत्रोयं द्वादशाक्षरः॥ अस्य पूजाप्रयोगः प्रा
तः कृत्यादितो आदिपीठशक्तिसहितपीठन्यासं कुर्यात्॥ तद्यथा॥ शिरसि गणकऋषये नमः
मुखे निवृद्गायत्रीछंदसे नमः॥ हृदि शक्तिगणाधिपाय देवतायै नमः॥ ततः करांगन्यासौ
ह्रीं अंगुष्ठाभ्यां नमः॥ गं तर्जनीभ्यां स्वाहा॥ ह्रूं मध्यमाभ्यां वषट्॥ महागणपतये अनामिकाभ्यां
हुं॥ स्वाहा कनिष्ठिकाभ्यां वौषट्॥ समुदायस्य मूलस्य करतलपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ हृ
दयाय नम इत्यादि॥ तथा च निबंधे॥ व्यस्तैः समस्तैः मंत्रस्य पदैरंगानि कल्पयेत्॥ ततो ध्याये
त्॥ मुक्तागौरं मदगमुखं चंद्रचूडं त्रिनेत्रं हस्तैः स्वीयैर्दधतमरविंदांकुशौ रत्नकुंभं अंकस्थ
याः सरसिजरुचः स्तनधृतालिंगितापादिव्यायोनौ विनिहितकरं रत्नमौलिं नमामि॥ एवं ध्यात्वा
मानसैः संपूज्य शंखस्थापनादि नित्यादिपीठमन्त्वं तं संपूज्य पुनर्ध्यात्वा आवाहनादिपंचपुष्पां
जलिदानपर्यंतं विधाय तत्कोणेषु नाम्निपूर्वादिचतुर्दिक्षु षट्कोणे आमोदादीन् केस

रेषु॥ अग्न्यादिकोणेषु मध्ये दिक्षु च ॐ॥ हृदयाय नमः॥ इत्यादिना षडंगं संपूज्य पत्रेषु ब्राह्म्यादि
मातृकाः पूजयेत्॥ तद्बहिः दिक्षु इंद्रादीन् वज्राद्यांश्च संपूज्य धूपादि विसर्जनांतं कर्म समापयेत्॥ अ
स्य पूजायंत्रं महागणपतियंत्रवत्॥ अस्य पुरश्चरणं लक्षजपः॥ लक्षमेकं जपेन्मंत्रं अयुतं
स्य दशांशतः॥ जुहुयाद् अर्चितं वह्नौ दिनशो देवमर्चयेत्॥ शक्तिरुद्धनिद्रं वर्णमानपदद्वयं॥
ताराद्यो मन्त्रराख्यातो रुद्रसंख्याक्षरान्वितः॥ अस्य पूजाप्रयोगः॥ प्रातःकृत्यादि सर्वं पूर्ववत्
कार्यं॥ अंगन्यासस्तु एकेन त्रिभिस्त्रिभिर्वर्णैः समस्तेन प्रकल्पयेत्॥ तथा च निबंधे॥ एकेनादौ त्रि
भिर्वर्णैस्त्रिभिर्वर्णैर्मनंतरं॥ समस्तेनास्त्रमाख्यातं एवं कल्पनिदर्शनं मतं॥ एतानि अंगुष्ठा
दिषु हृदयादिषु विन्यसेत्॥ ततो ध्यायेत्॥ हस्तैर्बिभ्रत मिक्षुदंडवरदौ पाशांकुशौ पुष्कर
स्थः स्वप्रमदावरांगमनया श्लिष्टं ध्वजाग्रस्पृशा मांग्या विधृतां कपात्रिनयनं चंद्रार्द्ध
चूडं गजपारकं हस्तिमुखं स्मरामि सततं भोगाति जोलं विघ्नं॥१॥ इति ध्यानं॥ पूजादिकं तु पूर्वव
त्॥ अस्य पुरश्चरणं लक्षत्रयजपः॥ तथा च॥ लक्षत्रयं जपेन्मंत्रं मिक्षुदंडैर्दशांशतः॥ अथ

पैरायुक्तैर्वा जुहुयान्मंत्रसिद्धये॥ ॥अथ हेरंबमंत्रः॥ ॥तत्र निबंधे॥ पंचांतको विंदु
युतो वामकर्णविभूषितः॥ तारादि हृदयांतोयं हेरंबमनुरीरितः॥ चतुर्वर्णात्मको न्यणां चतु
र्वर्गफलप्रदः॥ अस्य पूजाप्रयोगः॥ प्रातःकृत्यादि पूर्वोक्तपीठशक्तिपीठन्यासं कृत्वा ऋष्यादि
न्यासं कुर्यात्॥ अस्य गणक ऋषिर्गायत्री छंदः॥ हेरंबो देवता गकारो बीजं बिंदुः शक्तिः करां
गन्यासौ॥ गां अंगुष्ठाभ्यां नमः॥ गीं तर्जनीभ्यां नमः॥ गूं मध्यमाभ्यां वषट्॥ गैं अनामिकाभ्यां
हुं॥ गौं कनिष्ठिकाभ्यां वौषट्॥ गः करतलपृष्ठाभ्यां फट्॥ एवं हृदयाय नमः इत्यादि॥ तथा च नि
बंधे॥ षड्दीर्घभाजा बीजेन षडंगानि प्रकल्पयेत्॥ ततो ध्यानं॥ मुक्ताकांचननीलकुंदघुसृण
छायैस्त्रिनेत्रान्वितैर्नागास्यैर्हरिवाहनं शशिधरं हेरंबमर्कप्रभं॥ दृप्तं दानमभीतिमोदकफ
लान्टंकं शिरो॥ क्षात्मिकां मालां मुद्गरमंकुशं त्रिशिखरं दोर्भिर्दधानं भजे॥१॥ एवं ध्यात्वा
मानसैः संपूज्य शंखस्थापनादि गणेशोक्तपीठशक्तिं संपूज्य॥ ॐ हुं हं महासिंहासनाय गां हेरंबा
सनाय नमः॥ इति संपूजयेत्॥ तथा च निबंधे॥ प्रणवं कवचं हृं हं महासिंहासनाय गां ततः॥ हि

रंखेतिपदं पश्चात्-आसनाय हृदंततः॥ आसेप्ययंमंत्रः॥ ॐगंमंत्रेणमूर्त्तिंसंकल्पयेत्॥ तथा
चनिबंधे॥ ताराद्विविघ्नबीजेनमूर्त्तिंतस्यप्रकल्पयेत्॥ आवाहनादिपंचपुष्पांजलिदानप
र्यंतंविधायावरणपूजामारभेत्॥ यथा-अग्न्यादिकोणेषु आदिद्वंद्वगांहृदयायनमः॥ इत्या
दिनापूजयेत्॥ पत्रेषुलोकपालान्तद्बहिर्वज्राद्यानपूजयेत्॥ ततोधूपादिविसर्जांतं
कर्मसमापयेत्॥ अस्यपुरश्चरणंत्रिलक्षजपः॥ तथाच॥ लक्षत्रयंजपेन्मंत्रंदशांशंजुहु
यात्ततः॥ गंक्षिप्रप्रसादनायहृदयंनमः॥ निबंधे॥ संवर्त्तकोनेत्रयुक्तः पाश्वोबिंद्वासने
स्थितः॥ प्रसादनायहृन्मंत्रः सबीजोमोदशाक्षरः॥ अस्यपूजाप्रातःकृत्यादिगणेशो
क्तपीठमासांतंकर्मसमाप्यऋष्यादिन्यासंकुर्यात्॥ शिरसिगणकऋषयेनमः॥ मुखेवि
राट्छंदसेनमः॥ हृदिक्षिप्रप्रसादनायदेवतायैनमः॥ एकादशवर्णकरांगन्यासौकृत्वाध्या
येत्॥ पाशांकुशौकल्पलतांविषाणंदधत्स्वशुंडाहितबीजपूरः॥ रक्तस्त्रिनेत्रस्तरुणेंदु
मौलिर्हारोज्ज्वलोहस्तिमुखोऽवतान्वः॥१॥ इतिध्यात्वामानसैःसंपूज्यशंखस्थापनंकुर्यात्

ततःपीठपूजांविधायपुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतंकर्मविधायावरणपूजां
कुर्यात्॥ आग्न्यादिषुगांहृदयायनमः इत्यादिनापूजयेत्॥ पत्राग्रेब्राह्म्याद्याः बहिरिंद्रादीन्
वज्राद्यांश्चपूजयेत्॥ ततोधूपादिविसर्जांतंकर्मसमापयेत्॥ अस्यपुरश्चरणंलक्षजपः॥ त
थाच॥ लक्षंजपेज्जपस्यांतेजुहुयाद्घृततिलैः॥ समधुरान्नैस्त्रितयैर्वाग्निमीरहविरीहितैः
अथहरिद्रागणपतिमंत्रः॥ ॥पंचांतकोधरासंस्थोबिंदुभूषितमस्तकं॥ एकाक्षरोम
हामंत्रः सर्वकामफलप्रदः॥ अस्यब्रह्मऋषिर्गायत्रीछंदोहरिद्रागणपतिर्देवतागकारो
बीजंलकारश्शक्तिबीजेनैवषडंगकं॥ ततोध्यानं॥ हरिद्राभंचतुर्बाहुंहरिद्रवसनंविभुं॥
पाशांकुशधरंदेवंमोदकंदंतमेवच॥ एवंध्यात्वागणपतिंपूजयेत्॥ आवरणपूजाविनि
योगादिकं एकाक्षरगणपतिमंत्रवत्॥ अस्यपुरश्चरणंचतुर्लक्षजपः॥ मधुरत्रयसं
युक्तहरिद्राचूर्णमिश्रितैस्तंदुलैर्होमः॥ ॥अथमंत्रांतरंचिंतामणौ॥ मंत्रोद्धारमिमंव
क्ष्येहेरंबएकदंतगजानने॥ इंदुबीजंसमुद्धृत्यनीजबीजंसमुद्धरेत्॥ चतुर्दशस्वरेणाढ्यंबिंदु

ऋषितमस्तकं ॥ एकादशीमहाविद्याकथितापद्मयोनिना ॥ अस्यप्रज्ञादिकं सर्वं महागणप
तिमंत्रयन्त्रवत्कार्यं ॥ करांगन्यासौ तु स्वबीजैर्नवहृद्दीर्घयुक्तेन करांगन्यासकल्पना ॥ अस्यनै
दानरंध्रहृत्याद्यंबाकृ अद्यांवामायाद्यांबाजपेत्सुधीः ॥ कामाद्यांवा वधूबीजाद्यांवाजपेत्स
दा ॥ ॐकाराद्यां महाविद्यां निजबीजादिकं तथा ॥ चतुर्दशीमहाविद्या सुंदरी चस्वरूपसंयुता
चतुर्वर्गात्मिका विद्या वह्निजाया वधिप्रिय ॥ एकाविद्यामहाविद्या त्रैलोक्ये चातिदुर्लभा ॥
चतुर्वर्गात्मिका विद्या वह्निजाया वधिप्रिये ॥ चतुर्वर्गप्रदा सा हि महापातकनाशिनी ॥
एषां प्रज्ञादिकं महागणपतिमंत्रवत्कार्यं ॥ ॥इतिगणेशमंत्राः॥ ॥ततोघृणि
ऋग्गुपश्चात् वामकर्णविभूषितं ॥ वृत्तासनो मरुच्छेदः सनेत्रोर्ध्वस्वपश्चिमः ॥ अस्यप्रह
रोमनुः प्रोक्तो मनोरन्निमतः परं ॥ अस्यप्रज्ञाप्रयोगः ॥ प्रातःकृत्यादिप्राणायामांतं कर्मवि
धाय पीठन्यासं कुर्यात् ॥ तत्र विशेषः ॥ हृदयस्य पूर्वादिदिक्षु मध्ये च ॥ ॐ मूलायनमः ॥ एवं वि
मलायनमः ॥ साराय ॥ समाराध्याय ॥ परमसुखायेति विन्यस्य आधारशक्त्यादि अंसूर्यमं

डलायनमः ॥ द्वादशकलात्मनेनमः ॥ इत्यंतं विन्यसेत् ॥ ॐ सोममंडलात्मनेनमः ॥ इत्यादि ॥ ॐ
ज्ञानात्मनेनमः ॥ इत्यंतं ॥ तथा च निबंधे ॥ प्रभूतं विमलं सारं समाराध्यमनंतरं ॥ परमादि
सुखं पीठं स्वचिंतितं प्रकल्पयेत् ॥ ततः केसरेषु मध्ये च रं दीप्तायै नमः ॥ एवं रीं सूक्ष्मायै ॥ रुं वि
जयायै ॥ रैं भद्रायै ॥ रैं विभूत्यै ॥ रों विमलायै ॥ रौं अमोघायै ॥ रं विद्युतायै ॥ रः सर्वतोमु
ख्यै ॥ तदुपरि ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठाय नमः ॥ तथा च निबंधे ॥ वदेत्पद
चतुर्थ्यंतं ब्रह्मविष्णुशिवात्मकं ॥ सौराय योगपीठाय नमः पदमनंतरं ॥ पीठमन्त्रोय
मारव्यातो दिनेशस्य जगत्पते ॥ ततः ऋष्यादिन्यासः ॥ शिरसि देवभागऋषये नमः ॥ मु
खे गायत्रीछंदसे नमः ॥ हृदि आदित्याय देवतायै नमः ॥ ततः करांगन्यासौ ॥ सत्यायतेजो
ज्वालामणे हुं फट् स्वाहा अंगुष्ठाभ्यां नमः ॥ एवं ब्रह्मणे॰ तर्जनीभ्यां स्वाहा ॥ विष्णवे
॰ मध्यमाभ्यां वषट् ॥ रुद्राय॰ अनामिकाभ्यां हुं ॥ अग्नये॰ कनिष्ठिकाभ्यां वौषट् ॥ सर्वा
य॰ करतलकरपृष्ठाभ्यां फट् ॥ एवं हृदयादिषु ॥ ततो मूर्तिन्यासः ॥ यथा ॥ शिरसि ॐ आदित्याय

नमः॥ मुखे एवं रवये हृदये॥ ॐ भानवे शिरसि भास्कराय चरणयोः॥ सूर्याय नमः॥ तथा च नि-
बंधे॥ आदित्यं विन्यसेत् मूर्ध्नि रविं च मुखतो न्यसेत्॥ हृदये भानुनामानं भास्करं गुह्यदेशतः॥ सू-
र्यं चरणयोर्न्यस्येत् हस्तैः सद्यादिपंचभिः॥ ततो मंत्रन्यासः॥ मूर्ध्नि ह्रीं नमः॥ आस्ये घं नमः॥ कंठे णिं न-
मः॥ हृदि सूं नमः॥ कुक्षौ र्यं नमः॥ नाभौ आं नमः॥ लिंगे दिं नमः॥ पादयोः त्यं नमः॥ ततो ध्यानं॥
रक्ताब्जयुग्माभयदानहस्तं केयूरहारांगदकुंडलाढ्यं॥ माणिक्यमौलिं दिननाथमीडे बंधूककां-
तिं विलसंत्रिनेत्रं॥१॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ ततो गुरुपंक्तिं पूजयि-
त्वा एतन्मंत्रोक्तप्रभूतेत्यादिसहितपीठपूजां कुर्यात्॥ ॐ खखोल्काय नमः॥ इति मंत्रेण मूर्त्तिक-
ल्पयेत्॥ तथा च निबंधे॥ तारादिखखोल्कायमनुनामूर्त्तिकल्पनं॥ सादह्निणां सर्वलोकात्मस्-
मावाह्य पूजयेत्॥ ततः आवाहनादिपंचपुष्पांजलिदानपर्यंतं विधायावरणमारभेत्॥
केसरेषु आग्नेयादिकोणमध्यदिक्षु सत्याय तेजोज्वालामणये हुं फट् स्वाहा॥ हृदयाय नमः॥ ए-
वं ब्रह्मणे ॐ शिरसे स्वाहा॥ विष्णवे ॐ शिखायै वषट्॥ रुद्राय ॐ कवचाय हुं॥ अग्नये ॐ ने-

त्रत्रयाय वौषट्॥ सर्वाय ॐ अस्त्राय फट्॥ दिक्पत्रे पूर्वादि॥ ॐ आदित्याय नमः॥ एवं रवये ॐ॥ ॐ
भानवे॥ ईं भास्कराय ॐ॥ अं सूर्याय॥ विदिक्पत्रेषु आग्नेयादि॥ ॐ उषायै नमः॥ एवं प्रज्ञायै नमः॥
यं प्रज्ञायै नमः॥ संसं ध्यायै नमः॥ तथा च निबंधे॥ अंगानि पूजयेदादौ दिक्पत्रेष्वर्कमूर्त्तयः॥
आदित्याद्यास्तथा अंगिराकयः कोणपत्रगाः॥ स्वस्वनामादिवर्णस्तु साध्यो बीजान्विता क्रमा-
त्॥ ततः पत्राग्रेषु ब्राह्म्याद्याः संपूज्य परतो रुणमर्चयेत्॥ तद्बाह्ये पूर्वादि इंद्रादीन् पूजयेत्
ॐ चंद्राय ॐ एवं मंगलाय ॐ बुधाय ॐ बृहस्पतये ॐ॥ शुक्राय ॐ मंदाय ॐ राहवे ॐ केतवे ॐ॥ ततः इंद्रा-
दीन् वज्रादींश्च संपूज्य॥ धूपादिविसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं अष्टलक्ष-
जपः॥ तथा च॥ वसुलक्षं जपेन्मंत्रं सन्निधिः हीरकारवीनां॥ तत्सहस्रं च जुहुयात् तद्दशांश-
कान्निर्जितेंद्रियः॥ याचनिक एवाहस्स हस्त होमः॥ आकाशमग्निदीर्घेंदुसंयुतं भुवने-
श्वरी॥ सर्गान्वितो मगुणानि स्मृतीयमुदीरितं॥ अस्य पूजाप्रातः कृत्यादि पूर्ववन्मंत्री
कृत्वा पीठन्यासं विधाय॥ पूर्ववन्मंत्री ऋष्यादिन्यासं कुर्यात्॥ ततो मंत्रन्यासः॥ आधारादि

पादपर्यंतं॥ ह्रूं नमः कंठादाधारपर्यंतं॥ ह्रौं नमः मूर्द्धादिकंठपर्यंतं॥ सः नमः॥ ततः करां
गन्यासौ॥ ह्रां अंगुष्ठाभ्यां नमः॥ ह्रीं तर्जनीभ्यां नमः॥ ह्रूं मध्यमाभ्यां नमः॥ ह्रैं अनामिका
भ्यां नमः॥ ह्रौं कनिष्ठिकाभ्यां वौषट्॥ ह्रः करतलपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ तथा
च निबंधे॥ दीर्घयुक्तेन बीजेन मध्येनांगानि कल्पयेत्॥ ततो ध्यानं॥ रक्तांबुजासनमशे
षगुणैकसिंधुं भानुं समस्तजगतामधिपं भजामि॥ पद्मद्वयाभयवरान् दधतं कराब्जै
र्माणिक्यमौलिमरुणांगरुचिं त्रिनेत्रं॥१॥ एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं वि
धाय पूर्वोक्तमंत्रक्रमेण मूर्तिं संकल्प्य पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं
विधायावरणपूजां कुर्यात्॥ अग्निनिर्ऋतिवाय्वीशानकोणेषु मध्ये दिक्षु च॥ ह्रां हृद
याय नमः इत्यादिना पूजयेत्॥ पत्रेषु चंद्रादीन् पूर्ववत् पूजयेत्॥ ततो धूपादि विसर्जनां
तं कर्म समापयेत्॥ अस्य पुरश्चरणं द्वादशलक्षजपः॥ तथा च॥ नोन्दलक्षं जपेन्मंत्रमा
लिनच दशांशतः॥ तिलैर्वा मधुरासिक्तैर्जुहुयाद्विजितेंद्रियः॥ साकारामग्निमवन

सद्यांतीश्रीह्रौ बिंदुधीशार्बिंदुमत्॥ मार्तंडभैरवं नाम बीजमेतदुदाहृतं॥ पुटितं बिंबबीजेन
सर्वकामफलप्रदं॥ रां तं दहननेत्रेंदुसहितं तदुदाहृतं॥ अस्य पूजाप्रातःकृत्यादि एतत्तं
त्रोक्तपीठन्यासांतं कर्म विधाय पूर्ववत् कुंभादिकं कुर्यात्॥ ततो मूर्तिन्यासः॥ ह्रें सूर्या
य नमोंगुष्ठयोः॥ ह्रीं भास्करायनमस्तर्जन्योः॥ ह्रूं भानवेनमो मध्यमयोः॥ ह्रैं रवये अना
मिकयोः॥ ह्रौं दिवाकरायनमः कनिष्ठयोः॥ ततः शिरसि वदने हृदि गुह्ये पादे तान्तत्त
ज्ञादिकान्न्यसेत्॥ तथा च निबंधे॥ पंचह्रस्वाद्यबीजेन पंचमूर्तिं प्रविन्यसेत्॥ अंगुष्ठा
दिकनिष्ठांतमंगुलिषु क्रमादिमाः॥ सूर्यस्तु भास्करो भानुस्ततो रविर्दिवाकरौ॥ शिरोव
दनहृद्गुह्यपाददेशेषु तान्न्यसेत्॥ ततः करांगन्यासौ॥ यथा॥ ह्रां अंगुष्ठाभ्यां नमः॥ ह्रीं
तर्जनीभ्यां स्वाहा॥ ह्रूं मध्यमाभ्यां वषट्॥ ह्रैं अनामिकाभ्यां हुं॥ ह्रौं कनिष्ठाभ्यां वौषट्॥ ह्रां
हृदयाय नमः॥ ह्रीं शिरसे स्वाहा॥ ह्रूं शिखायै वषट्॥ ह्रैं कवचाय हुं॥ ह्रौं नेत्रत्रयाय वौ
षट्॥ तथा च निबंधे॥ दीर्घयुक्तेन बीजेन नेत्रांतांगानि विन्यसेत्॥ ततो मूलबीजेन व्या

पर्कंकृत्वाध्यायेत्॥तथाच॥तत्रध्यापकंमूलबीजेनकुर्वीततदनंतरं॥हेमांभोजप्रवा
लप्रतिमनिजरुचाखट्वांगचापंचक्रंशक्तिंसपाशांसृणिमतिरुचिरामक्षमालांकपालं॥ह
स्तांभोजैर्दधानंत्रिनयनविलसद्वेदवक्त्राभिराममार्तंडंवल्लभार्धंमणिमयमुकुटंहा
रदीप्तंभजामः॥१॥एवंध्यात्वामानसैःसंपूज्यशंखस्थापनंकुर्यात्॥ततःपूर्वोक्तपीठंसंपू
ज्यपूर्वादिकर्णिकायांतुमायैनमः॥ॐप्रज्ञायै॰प्रज्ञायै॰संध्यायै॰इतिनमोंतेनसंपूज्यमू
लेनमूर्त्तिंसंकल्प्य॥ततःपूर्ववत्ध्यात्वाआवाहनादिपंचपुष्पांजलिदानपर्यंतंविधायाव
रणपूजामारभेत्॥तथाचनिबंधे॥षोडशीनादित्रियुक्तैःकर्णिकायांतुमायादिकाः॥पूर्व
वदिष्टसंपूज्यमूर्त्तिंमूलेनसंकल्पयेत्॥ततःपूर्वादिदिक्षुसूर्यंअरुणंभानुंरविंपूजयेत्
कोणेषुदिवाकरं॥ततोग्निनिर्ऋतिवायुईशानेषुह्रांहृदयायनमःइत्यादिपूजयेत्॥दि
वाग्रेह्रौंनेत्रत्रयायवौषट्॥ततःपूर्ववत्चंद्रादीन्ग्रहांश्चसंपूज्यग्रहेलोकपालान्
पूजयेत्॥तथाचनिबंधे॥ग्रहानहीनततोबाह्येलोकपालांस्ततःपरं॥ततोधूपादिविस

र्जनांतंकर्मसमापयेत्॥अस्यपुरश्चरणंलक्षत्रयसंख्याजपः॥त्रिमधुरोपेतैर्दशांशहो
मः॥तथाच॥लक्षत्रयंजपेन्मंत्रीबीजंबीजपुटीकृतं॥दशांशकमलैःकृत्वाजुहुयान्मधुरो
क्षितैः॥इमंमंत्रंजपेन्मर्त्यःकांतिपुत्रान्धनद्युतिं॥वाक्सिद्धिमतुलांलक्ष्मींसौभाग्यमपि
साधयेत्॥वियदर्द्धेंदुललितंतदादिःसर्गसंयुतः॥अजपास्वामनुःप्रोक्तोब्रह्मरूपःस्वरूपा
दपः॥अस्यपूजाध्यानःकृत्यादिपूर्वोक्तपीठमन्वेतंसमाप्यऋष्यादिन्यासंकुर्यात्॥शिरसि
ब्रह्मणेऋषयेनमः॥मुखेदेवीगायत्रीछंदसेनमः॥हृदिश्रीगिरिजापतयेदेवतायैनमः॥
ततःकरन्यासः॥ह्सांअंगुष्ठाभ्यांनमः॥इत्यादि॥ह्सांहृदयायनमःइत्यादि॥तथाचनिबं
धे॥ह्सांषड्दीर्घयुक्तेनकुर्यादंगक्रियांमनोः॥ध्यानं॥उद्यद्भानुस्फुरिततडिदाकारमर्द्धां
बिकेशंपाशाभीतिर्वरदपरशुंसंदधानंकराब्जैः॥दिव्याकल्पैर्नवमणिमयैःशोभितंविश्व
मूलंसौम्याग्नेयंवपुरवतुवःचंद्रचूडंत्रिनेत्रं॥१॥एवंध्यात्वामानसैःसंपूज्यशंखस्थाप
नंकुर्यात्॥एतन्मंत्रोक्तपीठपूजांविधायपुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यं

विधायावरणपूजामारभेत् ॥ ततोऽग्निनिर्ऋतिर्वायुईशानमध्येदिक्षु च हसा हृदयाय नमः
इत्यादि पूजयेत् ॥ तद्बाह्ये इंद्रादीन् वज्रादींश्च पूजयेत् ॥ ततो धूपादिविसर्जनांतं कर्म समाप
येत् ॥ अस्य पुरश्चरणं द्वादशलक्षजपः ॥ घृतयुक्तेन पायसेन दशांशहोमः ॥ तथा च ॥
मानुलक्षं जपेन्मंत्रं पयसा मधुसर्पिषा ॥ दशांशं जुहुयात् सम्यक् ततः सिद्धो भवेन्मनु
रिति ॥ क्रीडंतं रंगोपकुमारसंघैर्नंदांगने धूलिविलिप्तगात्रं ॥ गृहे गृहे यं नवनीतचौरं
तमादिदेवं पुरुषं प्रपद्ये ॥२॥ अथ वक्ष्ये महामंत्रान् विष्णोः सर्वार्थसिद्धिदान् ॥ यस्य च
स्मरणाद्यांतो भवाब्धेः परमात्मिताः ॥

॥ अथ विष्णुमंत्राः ॥

॥ तत्र वैष्णवाचमनं गो
तमीये ॥ केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्करौ ॥ द्वाभ्यामोष्ठौ च संस्पृश्य द्वाभ्यां मृ
ज्यान्मुखं ततः ॥ एकेन हस्तौ प्रक्षाल्य पादावपि तथैकतः ॥ संप्रोक्ष्यैकेन मूर्द्धानं ततः संकर्षणा
दिभिः ॥ आस्यनासाक्षिकर्णांश्च हृन्नाभ्युदरके स्पृशेत् ॥ स्पृशेदेवं मनुजो ह्याचमने वैष्णवाभ्यये
एवमानं ॥ श्रीधरहृषीकेशाभ्यां सादाभ्यां नारायणेन येत् ॥ केशवाय स्वा ॥ केशवनारायण

माधवगोविंदविष्णुमधुसूदनत्रिविक्रमवामनश्रीधरहृषीकेशपद्मनाभदामोदरसं
कर्षणवासुदेवप्रद्युम्नानिरुद्धपुरुषोत्तमअधोक्षजनरसिंहअच्युतजनार्दनउपेंद्रहरि
वैष्णवे ॥ याकांतं ॥ केशवाय नमः इत्यादि ॥ तथा च ॥ सचतुर्थीनमोंतैश्च नामभिर्विन्यसेद्
सुधीः ॥ तारं नमः पदं ब्रूयान्नरौघसमन्वितौ ॥ पवनोणायमंत्रोयं प्रोक्तश्च स्वरूपरः ॥
अस्य पूजां प्रातः कृत्वादिमातृकामंत्रकर्मविधाय केशवकीर्त्यादिन्यासं कुर्यात् ॥ अस्य ध्यानं
उद्यत्प्रद्योतनशततरुचिं तप्तहेमावदातं पार्श्वद्वंद्वे जलधिसुतया विश्वधात्र्या च जुष्टं ॥ नाना
रत्नोल्लसितविविधाकल्पमापीतवस्त्रं विष्णुं वंदे दरकमलकौमोदकीचक्रपाणिं ॥१॥
एवं ध्यात्वा न्यसेत् ॥ तद्यथा ॥ अं केशवाय कीर्त्यै नमो ललाटे ॥ वर्णान्वर्यस्तार्द्धचंद्रनित्यादि
दर्शनात् सर्वत्रानुस्वारः ॥ आं नारायणाय कांत्यै नमो मुखे ॥ इं माधवाय तुष्ट्यै नमो दक्षने
त्रे ॥ ईं गोविंदाय पुष्ट्यै नमो वामनेत्रे ॥ नमः सर्वत्र ॥ उं विष्णवे धृत्यै नमो दक्षकर्णे ॥ ऊं मधु
सूदनाय शांत्यै नमो वामकर्णे ॥ ऋं त्रिविक्रमाय क्रियायै नमो दक्षनासापुटे ॥ ॠं वामनाय

दयायैनमोवामनासापुटे॥लंश्रीधरायमेधायैनमोदक्षगंडे॥ळंहृषीकेशायहर्षायै
नमोवामगंडे॥एंपद्मनाभायश्रद्धायैनमोओष्ठे॥ऐंदामोदरायलज्जायैनमोऽधरे॥ओं
वासुदेवायलक्ष्म्यैनमोऊर्ध्वदंतपंक्तौ॥औंसंकर्षणायसरस्वत्यैनमोऽधोदंतपंक्तौ॥अंप्र
द्युम्नायप्रीत्यैनमोमस्तके॥अःअनिरुद्धायनिरत्यैनमोमुखे॥कंचक्रिणेजयायै॥खंगदि
नेदुर्गायै॥गंशार्ङ्गिणेप्रभायै॥घंखड्गिनेसत्यायै॥ङंशंखिनेचंडायै॥दक्षकरमूलसंध्य
ग्रकेषु॥चंहलिनेवाण्यै॥छंमुसलिनेविलासिन्यै॥जंशूलिनेविजयायै॥झंपाशिनेविर
जायै॥ञंअंकुशिनेविश्वायै॥वामकरमूलसंध्यग्रेषु॥टंमुकुंदायविनदायै॥ठंनंदजाय
सुनंदायै॥डंनंदिनेस्मृत्यै॥ढंनारायणायऋद्ध्यै॥णंनरकजितेसमृद्ध्यै॥दक्षपादमूलसं
ध्यग्रकेषु॥तंहरयेशुद्ध्यै॥थंकृष्णायबुद्ध्यै॥दंसत्यायभुक्त्यै॥धंसात्वतायसत्यै॥नंशौराय
क्षमायै॥वामपादमूलसंध्यग्रकेषु॥पंशूरायमायायैदक्षपार्श्वे॥फंजनार्दनायकुमायैवा
मपार्श्वे॥बंभूधरायक्लेदिन्यैपृष्ठे॥भंविश्वमूर्तयेक्लिन्नायैनाभौ॥मंवैकुंठायवसुदायैउ

दरे॥यंत्वगात्मनेपुरुषोत्तमायवसुधायैहृदि॥रंअसृगात्मनेबलिनेपरायैदक्षांसे॥लं
मांसात्मनेबलानुजायपरायैककुदि॥वंमेदात्मनेबलायसूक्ष्मायैवामांसे॥शंअस्थ्या
त्मनेवृषघ्नायसंध्यायैहृदादिदक्षकरे॥षंमज्जात्मनेवृषायप्रज्ञायैहृदादिवामकरे॥संशु
क्रात्मनेहंसायप्रभायैहृदादिदक्षपादे॥हंप्राणात्मनेवराहायनिशायैहृदादिवामपादे॥
ळंजीवात्मनेविमलायअमोघायैहृदादिउदरे॥क्षंक्रोधात्मनेनृसिंहायविद्युतायैहृदा
दिमुखे॥गौतमीये॥केशवादिरयंन्यासोन्यासमात्रेणदेहिनां॥अच्युतत्वंददातीहसत्यं
सत्यंनसंशयः॥तथाचगौतमीये॥मातृकांससमुच्चार्यकेशवायइतिस्मरेत्॥कीर्त्यैच
नमसायुक्तमित्यादिन्यासमाचरेत्॥केशवायततःकीर्त्यैकांत्यैनारायणायच॥इतिअग
स्त्यसंहितायां॥नत्वकेशवकीर्त्तिभ्यांनमइतितथाभुक्तिमुक्तिनिष्ठतोयंन्यासः॥श्रीबीजादि
कर्त्तव्यः॥यथा॥श्रीअंकेशवायकीर्त्यैनमइति॥गौतमीये॥एवंविन्यसेन्न्यासंलक्ष्मीबीज
पुरःसरं॥स्मृतिधृतिमहालक्ष्मीःप्राप्यंतेहरितांभजेत्॥ततस्तत्वन्यासः॥मातृकांतंतथा

वर्णबीजान्येकैकशो चरेत्॥ नमः परायेत्युच्चार्य जीवतत्वात्मनेनमः॥ इति जीतमवचनात्॥ सर्वतत्वपदप्रयोगः॥ मंनमः परायजीवतत्वात्मनेनमः॥ ळंनमः परायप्राणतत्वात्मनेनमः॥ बंनमः परायमतितत्वात्मनेनमः॥ फंनमः परायाहंकारतत्वात्मनेनमः॥ पंनमः परायमनस्तत्वात्मनेनमः॥ एतत्त्रितयं हृदये॥ नंनमः परायशब्दतत्वात्मनेनमो मस्तके॥ धंनमः परायस्पर्शतत्वात्मनेनमो मुखे॥ दंनमः परायरूपतत्वात्मनेनमो हृदि॥ थंनमः परायरसतत्वात्मनेनमो गुह्ये॥ तंनमः परायगंधतत्वात्मनेनमः पादयोः॥ णंनमः परायश्रोत्रतत्वात्मनेनमः कर्णयोः॥ ढंनमः परायत्वक्तत्वात्मनेनमः त्वचि॥ डंनमः परायनेत्रतत्वात्मनेनमो नेत्रयोः॥ ठंनमः परायजिह्वातत्वात्मनेनमो जिह्वायां॥ टंनमः परायघ्राणतत्वात्मनेनमो घ्राणयोः॥ ञंनमो परायवाक्तत्वात्मनेनमो वाचि॥ झंनमः परायपाणितत्वात्मनेनमः पाण्योः॥ जंनमः परायपादतत्वात्मनेनमः पादयोः॥ छंनमः परायपायुतत्वात्मनेनमो गुह्ये॥ चंनमः परायउपस्थतत्वात्मनेनमो लिंगे॥

ङंनमः परायाकाशतत्वात्मनेनमो मूर्ध्नि॥ घंनमः परायवायुतत्वात्मनेनमो मुखे॥ गंनमः परायतेजोतत्वात्मनेनमो हृदि॥ खंनमः परायजलतत्वात्मनेनमो लिंगे॥ कंनमः परायपृथ्वितत्वात्मनेनमः पादयोः॥ शंनमः परायहृत्पुंडरीकतत्वात्मनेनमो हृदि॥ हंनमः परायद्वादशकलाव्याप्तसूर्यमंडलतत्वात्मनेनमो हृदि॥ संनमः परायषोडशकलाव्याप्तसोममंडलतत्वात्मनेनमो हृदि॥ रंनमः परायदशकलाव्याप्तवह्निमंडलतत्वात्मनेनमो हृदि॥ षंनमः परायपरमेष्ठितत्वात्मने वासुदेवायनमो मस्तके॥ जीतमीये॥ शंबीजं हृत्पुंडरीकं तत्वं हृदि प्रविम्ससेत्॥ हंबीजं सूर्यमंडलतत्वं हृदि प्रविम्ससेत्॥ संबीजं चंद्रमंडलतत्वं तत्र प्रविम्ससेत्॥ रंबीजं वह्निमंडलतत्वं तत्र प्रविम्ससेत्॥ शंबीजं परमेष्ठितत्वं वासुदेवायमूर्ध्नि॥ यंनमः परायपुरुषतत्वात्मने॥ शंसंकर्षणायनमो मुखे॥ लंनमः परायचित्ततत्वात्मने प्रद्युम्नायनमो हृदि॥ रंनमः परायनिवृत्तितत्वात्मने निरुद्धायनमो लिंगे॥ वंनमः परायसर्वतत्वात्मने नारायणायनमः पादयोः॥ क्षौंनमः परायकोपतत्वात्मने

नृसिंहाय नमः गात्रे॥ तथा च गौतमीये॥ षंबीजं परमेष्ठितत्वं वासुदेवं च मूर्द्धि॥ रंबीजं मथ पुं
स्तत्वं संकर्षणं मथो मुखे॥ लंबीजं विश्वतत्वं प्रद्युम्नं च हृदि न्यसेत्॥ दुंबीजं निवृत्तितत्वं चानि
रुद्धमुपस्तके॥ लंबीजं सर्वतत्वं च पादे नारायणं न्यसेत्॥ हौंबीजं कोपतत्वं च नृसिंहं सर्वगा
त्रके॥ एवं तत्वानि विन्यस्य प्राणायामं समाचरेत्॥ फलं तु॥ तत्वन्यासं ततः कुर्यान्नृसाधकः सि
द्धिहेतवे॥ एतेन यो न देवस्य रूपतामेयात्स सो॥ ततो यथाविधि प्राणायामं कृत्वा पीठन्यासं
विधाय केसरेषु मध्ये च पूर्वादिदिक्षु विमलायै नमः॥ एवं उत्कर्षिण्यै॥ ज्ञानायै॥ क्रियायै॥ योगा
यै॥ प्रह्व्यै॥ सत्यायै॥ ईशानायै॥ अनुग्रहायै॥ तदुपरि ॐ नमो भगवते विष्णवे सर्वभूतात्मने वा
सुदेवाय सर्वात्मसंयोगपीठात्मने नमः॥ ततः ऋष्यादिन्यासः॥ यथा॥ शिरसि साध्यनाराय
णऋषये नमः मुखे॥ देवीगायत्रीछंदसे नमः हृदि॥ श्रीविष्णवे देवतायै नमः॥ ततः करांगन्या
सौ॥ तद्यथा॥ क्रुद्धोल्काय अंगुष्ठाभ्यां नमः॥ महोल्काय तर्जनीभ्यां स्वाहा॥ वीरोल्काय मध्य
माभ्यां वषट्॥ द्युल्काय अनामिकाभ्यां हुं॥ सहस्रोल्काय कनिष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ त

तो मंत्रेण षडंगं कुर्यात्॥ ॐ हृदयाय नमः॥ नं शिरसे स्वाहा॥ मों शिखायै वषट्॥ नां कवचा
य हुं॥ रां नेत्रत्रयाय वौषट्॥ यं अस्त्राय फट्॥ नां नमो दक्षपार्श्वे॥ यं नमो वामपार्श्वे॥ त
तः नमः सुदर्शनाय अस्त्राय फडिति मंत्रेण दिग्बंधनं कृत्वा मंत्रन्यासं कुर्यात्॥ तथा च क
ल्पे॥ मंत्रन्यासं ततः कुर्यात्सर्वकामफलप्रदं॥ यं विना नैव सिद्धिः स्यात्तन्न्यासं तु निष्फलं
भवेत्॥ तद्यथा॥ आधारे ॐ नमः॥ हृदये नं नमः॥ वक्त्रे मों नमः॥ दोर्युगले नां नमः॥ रां न
मः पादयोः॥ यं नमः हृदये॥ णां नमः नाभौ॥ यं नमः सर्वांगे॥ एवं कंठे नाभौ हृदि कुचयोः
पार्श्वयोः पृष्ठे च मूर्ध्नि आस्ये नेत्रयोः॥ श्रवणयोः घ्राणयोः हस्तयोः सं अंगुलीषु च॥ हृद
ये सप्तधातुषु प्राणेषु॥ सप्तधातवस्तु॥ त्वगसृङ्मांसमेदोस्थिमज्जाशुक्राणि धातवः॥ मू
र्ध्नि नेत्रे आस्ये हृदि कुक्षौ ऊरौ जंघायां पादयोः॥ जंघयोः अंसयोः ऊर्वोः पादयोः चक्रे
शंखं गदां पद्मं च विन्यसेत्॥ ॥अथ मूर्तिपंजरन्यासः॥ ॥ललाटे ॐ अं केशवाय
धात्रे नमः॥ नाभौ नं आं नारायणाय अर्यम्णे नमः॥ हृदि मों इं माधवाय मित्राय नमः

गस्यरूपतले त्वं ईं गोविंदाय वरुणायनमः दक्षिणपार्श्वे ॥ गं उं विष्णवेंशायेनमः दक्षिणां
से ॥ वं ऊं मधुसूदनाय भगायनमः गलदक्षिणभागे ॥ तं ऋं त्रिविक्रमाय विवस्वतेनमः
वामपार्श्वे ॥ वां ॠं वामनाय इंद्रायनमः ॥ स्वं ऌं श्रीधराय पूष्णेनमः ॥ गलवामभागे ॥ दं
ॡं हृषीकेशाय पर्जन्यायनमः पृष्ठे ॥ वां अं पद्मनाभाय त्वष्ट्रे नमः ककुदि ॥ यं अः दामोद
राय विष्णवेनमः शिरसि ॥ द्वादशात्मकं न्यसेत् ॥ तथा च निबंधे ॥ ललाटे केशवं धात्रा कु
क्षौ नारायणं पुनः ॥ अर्यम्णा हृदि मित्रेण माधवं कंठदेशतः ॥ वरुणेन च गोविंदं पुनर्द
क्षिणपार्श्वके ॥ अंशेन विष्णुमंसस्थं भागे न मधुसूदनं ॥ गले विवस्वता युक्तं त्रिविक्रमम
नंतरं ॥ वामपार्श्वस्थमिंद्रेण वामनाख्यमथांशके ॥ पूष्णा श्रीधरनामानं गले पर्जन्यसं
युतं ॥ हृषीकेशाकृयं पृष्ठे पद्मनाभं ततः परं ॥ त्वष्ट्रा दामोदरं पश्चात् विष्णुना ककुदि
न्यसेत् ॥ द्वादशात्मक महामंत्रं तनौ मूर्द्धि प्रविन्यसेत् ॥ पुनः किरीटमंत्रेण व्यापकं विन्यसे
त्ततः ॥ ततो मूलमंत्रं पठेत् ॥ चेतन्मात्मतत्वपुरकं कीर्तितं तन्मूर्द्धिस्थीय पुराखिलं सवासु

देवः ॥ अथ सप्तसु विनष्टपापसी वसितकं प्राप्नोति प्रकटितमंत्रवर्णकीर्णः ॥ न्यासफलं तु ॥
तन्मूर्त्तिपंजरन्यासो निहितः परमेष्ठिना ॥ सरून्यासात्तत्वेन मंत्री विष्णुमूर्त्तिरनुत्तमः ॥
मूर्त्तिपंजरन्यासमंत्रस्वरूपं केचित् ॥ धात्रीसहितकेशवायनमः ॥ केशवधात्रीभ्यां
नमः ॥ अन्ये ॐ केशवाय धात्रे नमः ॥ केशवाय धात्रीभ्यामिति वा धात्रीसहितकेशवा
य इति वा ॥ तथा च ॥ वासुदेवं मनोरेकं वर्णं क्लीबविवर्जितं ॥ स्वरैकं बिंदुसंयुक्तं च तु
र्थ्यां केशवादिकं ॥ तथा धात्र्यादिकं चोक्त्वा नमो न्यासस्तदाहृतः ॥ इति नारदतंत्रे ॥ ततः ॐ
किरीटकेयूरहारमकरकुंडलशंखचक्रगदांभोजहस्तपीतांबरधरश्रीवत्सांकितव
क्षस्थलश्रीभूमिसहितात्मज्योतिर्द्वयदीप्तिकरायसहस्रादित्यतेजसे नमः ॥ इति मंत्रेण
व्यापकं विन्यस्य स्वमूर्त्तौ प्रदर्प ध्यानं कुर्यात् ॥ उद्यत्कोटिदिवाकराभमनिशं शंखं गदां पं
कजं चक्रं बिभ्रतमिंदिराव सुमतीसंशोभिपार्श्वद्वयं ॥ कोटीरांगदहारकुंडलधरं पीतां
बरं कौस्तुभोदीप्तं विश्वधरं स्ववक्षसि लसत् श्रीवत्सचिह्नं भजे ॥ २ ॥ एवं ध्यात्वा मानसैः

संपूज्य शंखस्थापनं कुर्यात्॥ नरपात्रं तथा प्रोक्तं स्वर्णं वा राजतं तथा॥ पंचपात्रं हरेः
नाम्न तत्र नियोजयेत्॥ नैवेद्यदाने तु तत्रैव॥ स्वर्णे वा ताम्रपात्रे वा शैव्या पंकजे द
लादि॥ ततो विमलादिपीठशक्तिसहितपीठपूजां कृत्वा पुनर्ध्यात्वावाहनादि पंचपु
ष्पांजलिदानपर्यंतं विधायावरणपूजां कुर्यात्॥ तद्यथा॥ अग्निकोणे ॐ ज्वोल्काय हृद
यनमः॥ निरृते महोल्काय शिरसे स्वाहा॥ वायुकोणे वीरोल्काय शिखायै वषट्॥
शाने अत्युल्काय कवचाय हुं॥ दिक्षु सहस्रोल्काय अस्त्राय फट्॥ ततः केसरेषु पूर्व
ॐ नमः॥ नं नमः॥ मो नमः॥ रां नमः॥ यं नमः॥ णां नमः॥ यं नमः॥ ततो दलेषु पूर्वादि
षु॥ ॐ वासुदेवाय नमः॥ एवं संकर्षणाय॰॥ प्रद्युम्नाय॰ अनिरुद्धाय॰ अग्न्यादि
दलेषु॥ ॐ शांत्यै॥ एवं श्रियै॥ सरस्वत्यै॥ ततः पत्राग्रेषु पूर्वादि॥ ॐ चक्राय नमः॥ एवं
शंखाय॥ गदायै॥ पद्माय॥ कौस्तुभाय॥ मुशलाय॥ खड्गाय॥ वनमालायै॥ बहिरग्रे
ॐ गरुडाय दक्षिणे॥ ॐ शंखनिधये नमः॥ वामे ॐ पद्मनिधये नमः॥ पश्चिमे ॐ ध्वज

यनमः॥ अग्निकोणे ॐ विघ्नाय नमः॥ नैरृते ॐ आर्याय नमः॥ वायुकोणे ॐ दुर्गायै नमः॥
ईशाने सेनान्याय नमः॥ तद्बहिरिंद्रादीन् वज्रादींश्च संपूज्य धूपदीपौ दत्वा नैवेद्यं दद्या
त्॥ तद्यथा॥ नैवेद्यमानीय देवाय मूलेन पाद्याचमनीयं दत्वा फडिति मंत्रेण नैवेद्यं सं
प्रोक्ष्य चक्रमुद्रया अभिरक्ष्य यमिति मंत्रेण दोषसमूहं संशोष्य रमिति संदह्य वामक
रस्थोधरसानिपूर्णं वमिति अमृतीकृत्य विभाव्य मूलमंत्रमष्टधा जपेत्॥ ततो धेनुमुद्र
यामृतीकृत्य गंधपुष्पैर्नैवेद्यं संपूज्य कृतांजलिः सन् हरिं प्रार्थयेत्॥ अमृतमुखतो
महः प्रसदेदिति विज्ञाप्य स्वाहांतं मंत्रमुच्चार्य निवेद्य जलं दद्यात्॥ ततो मूलमुच्चार्य
एतन्नैवेद्यममुकदेवतायै नमः॥ ततो नैवेद्यमुद्धृत्य ॐ निवेदयामि भवते जुषाणे
दं हविर्हरे इति नैवेद्यं समर्प्य अमुकदेवतायै एतज्जलं॥ ॐ अमृतोपस्तरणमसि
इति स्वाहांतं जलं दत्वा वामहस्तेन ग्रासमुद्रां प्रदर्श्य दक्षिणहस्तेन प्राणादिमुद्राः प्रदर्शये
त्॥ यथा॥ ॐ प्राणाय स्वाहा॥ इति कनिष्ठानामिकांगुष्ठैर्न स्मरयेत्॥ ॐ उदानाय स्वाहा

तर्जनीमध्यमानामाभिरंगुष्ठेन स्पर्शयेत्॥ ॐ सम नामयस्वाहा सर्वांगुलीरंगुष्ठेन स्पर्शयेत्॥
ततोंगुष्ठाभ्यां अनामिकाग्रं स्पृशन्नधोनीनमत्॥ परायभवात्मने निरूढाय नैवेद्यं कल्पया
मि इति नैवेद्यमुद्रां प्रदर्श्य मूलमंत्रमुच्चार्य अमुकदेवं तर्पयामीति चतुर्वारं संतर्प्य श्री
मदमुकदेवतायै एतज्जलं अमृतोपिधानमसीति जलं दत्वा आचमनीयादिकं दद्यात्॥ वै
ष्णवेषु सर्वत्र नैवेद्यदाने अयमेव विधिः॥ ततः सामान्यक्रमेण विसर्जनांतं कर्म समाप
येत्॥ अस्य पुरश्चरणं षोडशलक्षजपः॥ तथा च॥ विकारलक्षं प्रजपेत् मनुमेनं समा
हितः॥ तद्दशांशं सरसिजैर्जुहुयान्मधुराप्लुतैः॥ ॥अथ रामनमंत्रः॥ ॥अनंतो
ष्णस नःस्वेंदुबीजं रामाय हृन्नमः॥ षडक्षरोयमादिष्टो भक्तानां कामदो मनुः॥ अस्य प
ञ्जप्रातःकृत्यादि वैष्णवोक्तपीठन्यासांतं कर्म विधाय ऋष्यादिन्यासं कुर्यात्॥ तद्यथा
शिरसि ब्रह्मणे ऋषये नमः॥ मुखे गायत्रीछंदसे नमः॥ हृदि श्रीरामदेवतायै नमः॥
ततः करांगन्यासौ॥ रां अंगुष्ठाभ्यां नमः॥ रीं तर्जनीभ्यां स्वाहा॥ रूं मध्यमाभ्यां वषट्॥ रैं

अनामिकाभ्यां हुं॥ रौं कनिष्ठाभ्यां वौषट्॥ रः करतलपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ त
तो मंत्रन्यासः॥ ब्रह्मरंध्रे रां नमः॥ भ्रुवोर्मध्ये रां नमः॥ हृदि मां नमः॥ नाभौ यं नमः॥ लिं
गे नं नमः॥ पादयोर्मं नमः॥ ततो मूर्त्तिपंजरादिन्यासविधिं विधाय ध्यायेत्॥ कालांभो
धरकांतिकांतमनिशं वीरासनाध्यासिनं मुद्रां ज्ञानमयीं दधानमपरं हस्तांबुजं जानुनी
सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभं राघवं पश्यंतं मुकुटांगदादिविविधाकल्पोज्ज्व
लं राघवं॥१॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ ततः पीठपूजां विधाय पू
र्वोक्तपीठशक्तिः पीठमनुं च संपूज्य पुनर्ध्यात्वा आवाहनादि पंचपुष्पांजलिदानपर्यंतं विधा
य वरणपूजामारभेत्॥ देवस्य वामपार्श्वे श्रीं सीतायै नमः॥ अग्रतः शार्ङ्गाय नमः॥ वा
मदक्षिणपार्श्वयोः शरेभ्यो नमः॥ चापाय नमः॥ तद्बहिः केसरेषु अग्न्यादिकोणेषु म
ध्ये दिक्षु च॥ रां हृदयाय नमः॥ इत्यादिना षडंगं पूजयेत्॥ ततो दलेषु पूर्वादिदिक्षु हनुम
ते नमः॥ ॐ सुग्रीवाय नमः॥ भरताय नमः॥ बिभीषणाय नमः॥ लक्ष्मणाय नमः॥ अंग

हायनमः॥शत्रुघ्नायनमः॥जांबवतेनमः॥दशग्रीवेरुषयेनमः॥एवंजयंतायनमः॥वि
जयाय॰सुराष्ट्राय॰वर्द्धनाय॰अकोपाय॰धर्मराजाय॰सुमंत्राय॰॥ततइंद्रादीन्वज्रा
दींश्चपूजयेत्॥धूपादिविसर्जांतंकर्मसमापयेत्॥अस्यपुरश्चरणंषट्लक्षजपः॥तथा
च॥कृतुलक्षंजपेन्मंत्रंदशांशंकमलैःशुभैः॥जुहुयाद्दचितेवह्नौब्राह्मणान्भोजयेत्त
तः॥अयंमंत्रःषड्विधः॥तथाच॥स्वकामशक्तियाकुलश्रीतारायैःपंचवर्णकः॥षड
क्षरःषड्विधःस्याच्चतुर्वर्गफलप्रदः॥ब्रह्मासंमोहनःशक्तिर्दक्षिणामूर्तिरुच्यते॥
अगस्तिश्रीधरःप्रोक्तामुनयोत्रक्रमादिमे॥अथवाकामबीजादिविश्वामित्रोमुनिर्मतः
छंदोगायत्र्यसंज्ञंचश्रीरामश्चैवदेवता॥ध्यानपूजादिकंपूर्ववत्॥तथाच॥जानकीवल्ल
भंङेंतंवह्निजायाक्रमादिकं॥दशाक्षरोयंमंत्रःस्याद्वसिष्ठःस्याद्दविविराट्॥छंदस्तुदे
वतारामसीतापाणिपरिग्रहः॥आद्योबीजंद्विठःशक्तिकामेनांगक्रियामता॥शिरोलला
टभ्रूमध्यतालुकर्णेषुहृदयेपि॥नाभ्यंघ्रुजानुपादेषुदशार्णान्विन्यसेन्मनोः॥अथध्यानं

अयोध्यानगरेचित्ररत्नसौवर्णमंडपे॥मंदारपुष्पैराबद्धवितानेतोरणान्विते॥सिंहा
सनसमारूढंपुष्पकोपरिराघवं॥रक्षोभिर्हरिभिर्देवैर्दिव्ययानगतैःशुभैः॥संस्तूय
मानंमुनिभिःसर्वतःपरिसेवितं॥सीतालंकृतवामांकंलक्ष्मणेनापिशोभितं॥श्यामंप्रस
न्नवदनंसर्वाभरणभूषितं॥अन्यत्सर्वंपूर्ववत्॥ध्यायेदेवंजपेन्मंत्रंवर्णलक्षमनन्य
धीः॥ ॥अथान्यमाह॥ ॥वह्निर्नारायणोब्जेनरःकेवलएवच॥षडक्षरोमंत्रराजोयं
सर्वाभीष्टफलप्रदः॥तारोमायारमानंगवाक्स्वबीजैस्तुषड्विधः॥त्र्यक्षरोमंत्रराजः
स्यात्सर्वाभीष्टफलप्रदः॥षडक्षरश्चंद्रकांतोमंत्रोयंचतुराक्षरः॥रामायहृन्मनुःप्रोक्तो
मंत्रराजस्वरूपकः॥ब्रह्मामुनिःस्याद्गायत्रीछंदोरामश्चदेवता॥एकाक्षरेतुद्वादशल
क्षंजपपुरश्चरणं॥तथाच॥जानुलक्षंजपेन्मंत्रंइतिवचनात्॥अन्येषडक्षरजपवत्तिवि
शेषः॥ध्यानपूजादिकंषडक्षरवत्॥ ॥अथरुक्ममंत्राः॥ ॥गोपीजनपदस्यांते
वल्लभायद्विठावधिः॥अयंदशाक्षरोमंत्रोदशाद्दष्टफलप्रदः॥अयंमंत्रः[illegible]कामबीजादिः

राशिनक्षत्रविचारेपुनर्बीजस्यहितेनविचारः॥बीजंपूर्वोक्तंपश्चात्स्वरहस्यंकथितंमुने॥
कामबीजस्यचावतादशाक्षरादिहोच्यते॥इतिगौतमीयात्॥तथाबृहद्गौतमीये॥योग
मोहैकनिलयोऽलुप्तबीजोदशाक्षरः॥उद्देत्पृथक्त्वेनकामबीजंमहामुने॥तद्योगात्
फलदोमंत्रोऽन्यथाकल्पकोटिभिः॥अस्यपूजाप्रयोगः॥प्रातःकृत्यादितत्त्वन्यासांतंवि
धायप्राणायामंकुर्यात्॥तथाचगौतमीये॥एवंतत्त्वादिविन्यस्यप्राणायामत्रयंचरेत्॥
कामबीजस्यएकवारजपेनदक्षिणनासयावायुंरेचयेत्पुनःसप्तवारजपेनवामयावा
युंपूरयेत्॥ततश्चनासापुटौधृत्वाविंशतिवारजपेनवायुंकुंभयेत्॥पुनर्वामेनरेचयेद्
दक्षिणेपूरयेत्ऊर्ध्वंकुंभयेत्॥पुनर्दक्षिणेनरेचयेद्वामेनापूर्यऊर्ध्वंकुंभयेत्॥
गौतमीयेतथाच॥यद्वादशाक्षरमंत्रजापीतेनैवाष्टादशविंशतिधारेचकादित्रयंकु
र्यात्॥अष्टादशाक्षरमंत्रजापीत्वष्टादशधाअन्यमंत्रजापीतुतत्तन्मंत्रवर्णसमसंख्यज
पनेरेचकादिकंकुर्यात्॥एकेनरेचयेत्कामबीजेनैवपृथक्पृथक्॥पूरयेत्सप्तसप्त

नविंशत्यारेचयेत्॥यद्वा॥दशाक्षरेणैतत्रअष्टाविंशतिरेचयेत्॥पूरयेद्वामतस्तद्वद्वा
रयेत्तत्प्रमाणतः॥प्राणायामोभवेदेवंरेचकपूरककुंभकैः॥अष्टादशाक्षरेणचेद्द्वावी
वंसमाचरेत्॥अन्यमनूनिर्वर्णन्निरूपमितुकृत्वात्तत्तन्मंत्रवर्णसंख्ययारेचकादित्र
यंकुर्यात्॥तथाच॥अष्टाविंशतिवारमिदंपूजदंमंत्रंदशार्णंजपन्नोपपद्येतयतेस्तुसंयुत
मतिष्टाष्टादशार्णेनचेत्॥अन्नत्रिवारमन्यमनून्निर्वर्णान्निरूपंजपेत्॥कुर्याद्रेचकपूर्वकं
मुनिपुरःप्राणप्रयोगंपुनःरेचयेन्मारुतंदक्षयादक्षिणः॥पूरयेद्वामयामन्यनाप्यापुनर्धा
रयेदीरितंरेचकादित्रयंस्यादित्यादि॥एतत्स्वरूपमंत्रविषयंनान्यत्र॥ततःपीठन्यासंवि
धायकेसरेषुमध्येविमलादिपीठमन्वंतंविन्यस्यऋष्यादिन्यासंकुर्यात्॥तद्यथा॥शिरसि
नारदऋषयेनमः॥मुखेविराट्छंदसेनमः॥हृदिश्रीकृष्णायदेवतायैनमः॥गुह्येकामबी
जायनमः॥पादयोःस्वाहाशक्तयेनमः॥मंत्राधिष्ठातृदेवतायैनमः॥इतिदृष्ट्वानमस्कुर्या
त्॥ततःप्रणवपुटितंमूलमंत्रंकरयोरंतर्मध्येपार्श्वेचत्रिशोविन्यस्यप्रणवपुटितान्मंत्र

वर्णान्त्यमंगुलीषु नमोंतान्न्यसेत्॥ तद्यथा॥ दक्षांगुष्ठे त्रिषु पर्वसु॥ ॐ गों ॐ नमः दक्षतर्जन्यां
ॐ पीं ॐ नमः दक्षमध्यमायां॥ ॐ जं ॐ नमः दक्षनासिकयोः॥ ॐ नं ॐ नमः दक्षकनिष्ठयोः॥ ॐ
वं ॐ नमः वामहस्तकनिष्ठायां॥ ॐ ल्लं ॐ नमः वामनामिकायां॥ ॐ भं ॐ नमः वाममध्यमायां
ॐ यं ॐ नमः वामतर्जन्यां॥ ॐ स्वां ॐ नमः वामांगुष्ठे॥ ॐ हां ॐ नमः अयं तत्सृष्टिन्यासः॥ एवं
दक्षिणांगुष्ठपूर्वं वामकनिष्ठांता स्थितिः॥ संहृतिश्च वामांगुष्ठादि दक्षिणांगुष्ठांतं॥ पुनः
सृष्टिस्थिति इति गौतमीयवचनात्॥ ततः स्थितिक्रमेणांगुलीषु दक्षिणांगानि विन्यसेत्॥
तद्यथा॥ गोंनमो दक्षांगुष्ठे॥ पींनमस्तर्जन्यां॥ जंनमो मध्यमायां॥ यंनमो नामिकायां॥ वंनमः
कनिष्ठायां॥ वामांगुष्ठान्तं नमः॥ तर्जन्यां जं नमः॥ वाममध्यमायां यं नमः॥ वामानामिका
यां स्वां नमः॥ वामकनिष्ठायां हां नमः करतलयोः॥ पंचांगन्यासः॥ अंगानि पंचकृतमुद्दचि
तासमेतैश्चक्रैरसृष्टमसुखवदत्तविसृपपत्नीः॥ त्रैलोक्यरक्षणयुक्ताप्यसुरांतकाञ्जपूसफट्
स्वान्निरूमंगपंचकं॥ सचक्रपिवीयचक्रदितं द्दशीर्यदि॥ अचक्राय स्वाहा॥ अंगुष्ठाभ्यां नमः

विचक्राय स्वाहा तर्जनीभ्यां स्वाहा॥ सुचक्राय स्वाहा मध्यमाभ्यां वषट्॥ त्रैलोक्यरक्षणचक्रा
य स्वाहा अनामिकाभ्यां हुं॥ असुरांतकचक्राय स्वाहा कनिष्ठाभ्यां फट्॥ ततो मूलमंत्रपुटिता
न्मातृकावर्णान्मातृकास्थानेषु न्यसेत्॥ ततः प्रणवपुटितं मूलमंत्रं आकेशादापादं आ
पादादाकेशांत्रिवारं विन्यस्य संहारसृष्टिन्ते देनदशतत्वानि विन्यसेत्॥ संहृतादनुगंतो
मंत्रं वर्णैः सृष्टियत्स्वनिन्नयेत्॥ प्रतिज्ञातः उद्धृतिः खलुपुरीरूपदेवोन्यासः समस्य कथया
म्यधुनाहं॥ तद्यथा॥ पादयोः गोंनमः॥ परायपृथ्वितत्वात्मने नमः॥ लिंगे पीं नमः पराय
जलतत्वात्मने नमः॥ हृदि जं नमः परायतेजतत्वात्मने नमः॥ मुखे नं नमः परायवायुतत्वा
त्मने नमः॥ शिरसि वं नमः परायआकाशतत्वात्मने नमः॥ हृदि भं नमः परायाहंकारत
त्वात्मने नमः॥ नों नमः परायमहततत्वाय नमः॥ सर्वांगे यं नमः परायप्रकृतितत्वात्म
ने नमः॥ स्वां नमः परायपुरुषरूपतत्वात्मने नमः॥ हां नमः परायपरतत्वात्मने नमः॥ इ
ति संहारक्रमः॥ सर्वांगे हां नमः॥ परायपरतत्वात्मने नमः॥ स्वां नमः परायपुरुषतत्वात्म

नेनमः॥ यं नमः पराय प्रकृतितत्वात्मने नमः॥ हृदि जं नमः पराय महत्तत्वात्मने नमः॥
अं नमः परायाहंकारतत्वात्मने नमः॥ शिरसि वं नमः परायाकाशतत्वात्मने नमः॥
मुखे रं नमः पराय वायुतत्वात्मने नमः॥ हृदि जं नमः पराय तेजस्तत्वात्मने नमः॥ लिंगे
पं नमः पराय जलतत्वात्मने नमः॥ पादयोः जों नमः पराय पृथ्वीतत्वात्मने नमः॥ न
तः स्थितिन्यासः॥ तत्र अंगुलिनियमो निबंधे॥ शिरसि विहिता मध्यमेवानामिका तर्जनी
कान्विता॥ आननसि विहितांगुष्ठसेहान्वितोथ कनिष्ठिका॥ नसि च वदने सर्वाः स्यात्
सि हृदि तर्जनी प्रथमा युक्तामध्यानामी कृतौ विहिता इति वै ता॥ एवांगुलयो जान्वोः॥
सांगुष्ठा तु पदद्वये लिंगे॥ तद्यथा॥ शिरसि गों नमः॥ मध्यमांगुल्या नेत्रयोः पीं नमः॥ त
र्जनीमध्यमाभ्यां कर्णयोः जं नमोंगुष्ठरहिताभिरंगुलिभिः घ्राणे॥ नं नमोंगुष्ठाभ्यां मु
खे वं नमः सर्वाभिरंगुलिभिः हृदि सं नमः॥ अंगुष्ठतर्जनीभ्यां उदरे॥ कं नमोंगुष्ठम
ध्यमाभ्यां लिंगे॥ यं नमोंगुष्ठरहिताभिरंगुलिभिः जानुनोः॥ स्वं नमोंगुष्ठरहिताभि

रंगुलिभिः पादयोः॥ हं नमः सर्वांगुलिभिः॥ अयं तु सृष्टिः॥ ॥अथ स्थितिक्रमः॥
हृदि गों नमः॥ अं अंगुष्ठतर्जनीभ्यां उदरे॥ पीं नमोंगुष्ठमध्यमाभ्यां लिंगे॥ जं नमोंगुष्ठ
रहिताभिरंगुलिभिः जानुनि॥ नं नमः अंगुष्ठरहिताभिरंगुलिभिः पादयोः॥ वं नमः स
र्वांगुलिभिः शिरसि॥ सं नमः मध्यमया नेत्रयोः॥ कं नमो मध्यमातर्जनीभ्यां कर्णयोः॥
यं नमो अंगुष्ठरहिताभिरंगुलिभिः घ्राणे॥ स्वं नमोंगुष्ठानामिकाभ्यां मुखे॥ हं नमः सर्वा
भिरंगुलिभिः॥ ॥अथ संहारक्रमः॥ पादयोः गों नमः॥ सर्वांगुलिभिः जानुनोः॥ पं न
मोंगुष्ठरहिताभिरंगुलिभिः लिंगे॥ जं नमोंगुष्ठरहिताभिरंगुलिभिः उदरे॥ नं नमो मध्यमा
भ्यां हृदि॥ वं नमः अंगुष्ठतर्जनीभ्यां मुखे॥ सं नमः सर्वाभिः नेत्रयोः॥ स्वं नमः तर्जनीमध्य
माभ्यां मूर्ध्नि॥ हं नमः मध्यमांगुल्याः॥ पुनः सृष्टिं स्थितिं च विन्यसेत्॥ तथा च निबंधे॥ स्त्री
णां यो विहितो न्यासो नांगुलिस्थानयोर्भवेत्॥ विद्यार्थी ब्रह्मचारी च पुनः सृष्टिं समाचरेत्॥ ग
हस्थश्च पुनः सृष्टिं स्थितिं च कुर्यात् प्रयत्नतः॥ यतिर्वैराग्ययुक्तश्च संहारांतं न्यसेत् तु॥

एतेन विद्यार्थित्रिलक्षादिगं चतुर्धा गृहस्थानां च पंचधा यतिविरक्तानां च यतिव्रतिदीक्षि
तानां च त्रिधा न्यासः ॥ तथा च निबंधे ॥ न्यासस्संहारांतो मस्करिवैखानसेषु विहितो यां स्थित्यंतो
गृहमेधिषु सृष्ट्यंतो यदर्लिनामिति प्राक् ॥ चैराश्रयपुंसि गृहस्थे संहारांतं केचिदाक्रराचार्याः
सहज्ञानी वनवासिनां स्थितिविद्यार्थिनां सृष्टिं केचित्तु न्यासत्रयं चैवं पर्यमाममनंति ॥ तेन स
वैरेव पंचधा न्यासः कर्तव्यः ॥ ॥ अथ विंशतिपंजरन्यासः ॥ ॥ तत्र निबंधे ॥ वर्णप
रं न्यासवरं न्यासविधं स्मृतिकरं मंत्रदशार्णैरिम यं गुप्तितमं मंत्रितैर्यः ॥ तद्यथा ॥ आधारे
गों नमः ॥ लिंगे पीं नमः ॥ नाभौ जं नमः ॥ हृदि नं नमः ॥ गले वं नमः ॥ मुखे ल्लं नमः ॥ अंसयो
र्भां नमः ॥ कुचौ स्वां नमः ॥ हां नमः कंधरायां ॥ गों नमः नाभौ ॥ पीं नमः कुक्षौ ॥ जं नमः हृदि ॥
नं स्तनयोर्वं ल्लं पार्श्वयोः ॥ भां यं श्रोण्योः ॥ स्वां हां शिरसि ॥ गों मुखे ॥ पीं नेत्रयोः ॥ जं नं कर्णयोः
वं ल्लं नासापुटयोः ॥ भां यं कपोलयोः ॥ स्वां हां एवं दक्षिणकरस्य मूलसंध्यग्रकेषु पंच दक्षि
णहस्तांगुलीषु पंच १० एवं वामकरमूलसंध्यग्रेषु पंच ५ वामहस्तांगुलीषु च ॥ पंक्ति

एवं दक्षिणवामपादयोर्मूलसंध्यग्रकेषु च पंचांगुलीषु च ॥ २० ॥ मूर्ध्नि गों तत्पूर्वे पीं तद्दक्षिणे
जं तत्पश्चिमे नं तदुत्तरे वं मूर्ध्नि सकले ल्लं भ्रुवोः भां यं कर्णयोः स्वां हां शिरसि गों नेत्रयोः पीं मु
खे जं कंठे नं हृदि वं उदरे ल्लं मूलाधारे भां दिंग गे यं जानुनि स्वां पादयोः हां श्रोत्रयोः ॥ गों गं
डयोः पीं अंसयोः ॥ जं स्तनयोः ॥ नं पार्श्वयोः ॥ वं कंठे ल्लं ऊर्वोः भां जानुनोः ॥ यं जंघयोः ॥ स्वां
पादयोः ॥ हां सर्वांगानि ॥ नमों तानि विन्यसेत् ॥ ततः पूर्ववत्मूर्त्तिपंजरन्यासः ॥ पुनः स्थि
स्थिति ॥ ततो दशांगपंचांगन्यासौ ॥ तद्यथा ॥ हृदि गों शिरसि पीं शिखायां जं सर्वांगे नं दक्षुवं द
हे पार्श्वे ल्लं वामपार्श्वे भां कटिदेशे यं पृष्ठे स्वां मूर्ध्नि हां ॥ आचक्राय स्वाहा हृदयाय नमः ॥ वि
चक्राय स्वाहा शिरसे स्वाहा ॥ सुचक्राय स्वाहा शिखायै वषट् ॥ त्रैलोक्यरक्षणचक्राय स्वा
हा कवचाय हुं ॥ असुरांतकचक्राय स्वाहा अस्त्राय फट् ॥ ततः किरीटमंत्रेण व्यापकं विधा
य वेणुबिल्वादि मुद्राः प्रदर्शयेत् ॥ ॐ नमः सुदर्शनाय अस्त्राय फट् इति मंत्रेण दिग्बंधनं कुर्यात्
किरीटादिकं तु सर्वत्र ॥ ततो ध्यायेत् ॥ स्मरेद्वृंदावने रम्ये मोहयंतमनारतं ॥ गोविंदं पुंड

रीकाद्यंगोपकन्यासहस्रकैः॥ आत्मनो वदनांभोजे प्रेरिताक्षिमधुव्रताः॥ पीडिताः कामबा
णेन चिरमाश्लेषणोत्सुकाः॥ मुक्ताहारलसत्पीनतुंगस्तनभरानताः॥ विस्रस्तधम्मिल्लवसना
मदस्खलितभाषणाः॥ दंतपंक्तिप्रभोद्भासिस्पंदमानाधरान्विताः॥ विलोभयंतीविविधै
र्विभ्रमैर्भावगर्विताः॥ फुल्लेंदीवरकांतिमिंदुवदनं बर्हावतंसप्रियं श्रीवत्सांकमुदारकौस्तु
भधरं पीतांबरं सुंदरं॥ गोपीनां नयनोत्पलार्चिततनुं गोगोपसंघावृतं गोविंदं कल
वेणुवादनपरं दिव्यांगभूषं भजे॥१॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ ततः
वैष्णवोक्तमन्वंतं पीठपूजां विधाय पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधाय
शरीरे स्वहृत्स्थितिदशांगपंचांगन्यासक्रमेण पूजयेत्॥ ततो मुखे ॐ वेणवे नमः॥ हृदि व
नमालायै नमः॥ ॐ कौस्तुभाय नमः॥ ॐ श्रीवत्साय नमः॥ ततोऽपरं पंचपुष्पांजलिदानं कुर्या
त्॥ शुक्लचंदनपंकिलां श्वेततुलसीं रक्तचंदनपंकिलां रक्ततुलसीं मूलेन दक्षिणवामपार्श्व
योर्दद्यात्॥ एवं हृदये॥ करवीरद्वयेन मूर्ध्नि पद्मद्वयेन तथांजलिं विधाय तुलसीद्वयं क

रद्वयं पद्मद्वयं शिरसि द्वयं दद्यात्॥ तथा च गौतमीये॥ दक्षिणं वासुदेवाख्यं स्वच्छं चेतन्यमव्य
यं॥ वामे रुक्मिणी नित्या रक्ताख्यं रजोगुणान्विता॥ ततः सर्वाणि पुष्पाणि सर्वत्रैव दद्यात्॥ ततः
आवरणपूजा॥ पूर्वे ॐ दामोदराय नमः॥ एवं दक्षिणे सुदामाय॥ पश्चिमे वसुदामाय॥ उत्तरे कि
णे॥ केसरेषु अग्निकोणे॥ आचक्राय स्वाहा हृदयाय नमः॥ निरृते विचक्राय स्वाहा शिर
से स्वाहा॥ वायव्ये सुचक्राय स्वाहा शिखायै वषट्॥ ईशाने त्रैलोक्यरक्षणचक्राय स्वाहा
कवचाय हुं॥ चतुर्दिक्षु असुरांतकचक्राय स्वाहा अस्त्राय फट्॥ ततः पत्रेषु पूर्वादिदिक्षु रुक्मि
ण्यै नमः॥ एवं सत्यभामायै॥ नग्नजित्यै॥ मित्रविंदायै॥ सुनंदायै॥ सुलक्षणायै॥ जांबवत्यै
सुशीलायै॥ पत्राग्रेषु पूर्वादिदिक्षु वसुदेवाय नमः॥ एवं देवक्यै॥ नंदाय॥ यशोदायै॥ बलभद्रा
य॥ सुभद्रायै॥ गोपेभ्यः॥ नमोंतैः पूजयेत्॥ तद्बाह्ये मध्ये पूर्वादिक्रमेण॥ ॐ मंदाराय नमः॥
एवं संतानाय॥ पारिजाताय॥ कल्पवृक्षाय॥ हरिचंदनाय॥ तद्बाह्ये इंद्रादीन् वज्रादींश्च पूज
येत्॥ ततः प्रोक्तरूपाष्टकेन पूजयेत्॥ ॐ श्रीकृष्णाय नमः॥ एवं वासुदेवाय नमः॥ देवकीनं

दनायनमः॥यदुश्रेष्ठायनमः॥वार्ष्णेयायनमः॥धर्मसंस्थापनायनमः॥असुराक्रांतभार
हारिणे॥असाकल्पयेत्॥अंगेंद्रवज्रादीन्पूजयेत्॥तथाचगौतमीये॥अथवांगैर्दिक्पति
भिस्तदस्त्रैरपिवार्चयेत्॥एवंवाभ्यर्च्यन्कृष्णंकामयुक्तोसमाजनं॥एतद्यजनाशाकल्पयेद
कृष्णाष्टकेनपूजयेत्॥ततोधूपादिविसर्जांतंकर्मसमापयेत्॥अस्यपुरश्चरणंदशलक्षज
पः॥दशांशहोमस्तुपयःपक्वदमन्नंप्रतिजप्यनिर्मलमतिर्दशाक्षरं॥जुहुयात्सितामधुप्लुतेने
धैरुणपंबुजैर्हुतवेद्दशायुतं॥अथपश्चिरयुगलबलंचेन्मधुपंचलक्षंप्रजपेत्तुजुहुयात्
म्भोरुजैःसार्द्धलक्षं॥अमलमतिरलंनपायसैरंबुजानांससितघृतसुसिक्तैरलंतेनहोमकर्म॥
दशाक्षरादौश्रीमायाकामः॥मायाश्रीकामः॥काममायाश्रीः॥त्रिविधस्त्रयोदशाक्षरोभव
ति॥श्रीशक्तिमारपूर्वश्चदशार्णः॥श्रीमारपूर्वकःकामशक्तिरमापूर्वोदशार्णमानवस्त्रय॥
इतिसनत्कुमारकल्पवचनात्॥एतेषांपूजाप्रातःकृत्यादिवेलयोःपीठन्यासांतंविधाय
ऋष्यादिन्यासंकुर्यात्॥तद्यथा॥शिरसिनारदऋषयेनमः॥मुखेगायत्रीछंदसेनमः॥हृदि

१९२

श्रीकृष्णायदेवतायैनमः॥ततःकरांगन्यासौ॥आचक्रायस्वाहाअंगुष्ठायनमः॥इत्यादिदशा
क्षरवत्॥ततःमूलार्णैर्देशात्तत्वमस्त्रिपंजरोन्यसेत्॥ततःकिरीटमंत्रेणव्यापकंकृत्वा॥यथा
शक्तिमुद्रांबध्वा॥ॐनमःसुदर्शनायअस्त्रायफडितिमंत्रेणदिग्बंधनंकृत्वाध्यायेत्॥आद्ये
मनौदशाक्षरस्यध्यानं॥द्वितीयेवसमाणरभ्यानिषेकयेत्॥तृतीयेतुध्यानं॥शंखचक्रधनुर्बा
णपाशांकुशधरोरुणः॥वेणुध्वनिधृतंदोर्भ्यांध्येयंकृष्णोदिवाकरे॥गौतमीये॥अत्रापि
दशाक्षरस्यध्यानं॥तथाच॥रमादिकामादिमंत्रद्वयमपिकृत्स्न॥अनयोर्मंत्रयोर्मंत्रीआचक्राद्यैः
षडंगकं॥कुर्याद्दशार्णवत्सर्वंध्यानंपूजादिकंसुधीः॥एवंध्यात्वामानसैःसंपूज्यशंखस्थापनं
कृत्वापैठस्थयोःरूपीठपूजांविधायपुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतंविधाय
पूर्वोक्तयंत्रपूजांकृत्वाआवरणपूजामारभेत्॥अस्यावरणानि॥अंगेंद्रवज्रादीनि॥ततःकृ
ष्णाष्टकेनसंपूज्यधूपादिविसर्जांतंकर्मसमापयेत्॥एतेषांपुरश्चरणंपंचलक्षजपः॥तथा
च॥पंचलक्षंजपेत्तावद्घृताक्तंपायसेनतु॥कृष्णायपदमाभाष्यगोविंदायततःपरं॥गोपीज

१९३

नपदस्यांते वज्रनाय स्वाहा वषि ॥ कामबीजादिराख्यातो मनुरष्टादशाक्षरः ॥ अस्य पुर
प्रयोगः ॥ प्रातः कृत्वादि वैष्णवोक्तपीठमन्वंतं विन्यस्य ऋष्यादिन्यासं कुर्यात् ॥ तद्यथा ॥ शि
रसि नारदऋषये नमः ॥ मुखे गायत्रीछंदसे नमः ॥ हृदि श्रीकृष्णदेवतायै नमः ॥ गुह्ये क्लीं
जाय नमः ॥ पादयोः स्वाहाशक्तये नमः ॥ ततः प्रणवपुटितमंत्रं त्रिशः ॥ करयोर्व्यापकां
गन्यासौ कुर्यात् ॥ क्लीं कृष्णाय अंगुष्ठाभ्यां नमः ॥ गोविंदाय तर्जनीभ्यां स्वाहा ॥ गोपीजन
मध्यमाभ्यां वषट् ॥ वल्लभाय अनामिकाभ्यां हुं ॥ स्वाहा कनिष्ठाभ्यां वौषट् ॥ एवं हृदयादि
षु ॥ ततो मूलेन मूर्द्धादिपादपर्यंतं त्रिशो व्यापकं प्रणवेन संपुटं कृत्वा पदमंत्रन्यासं कुर्यात् ॥ मूर्ध्नि
ललाटे भ्रूमध्ये कर्णयोश्चक्षुषोः ॥ घ्राणयोः वदने ग्रीवायां हृदि नाभौ कट्योः लिंगे जानुनोः पा
दयोः स्वाहा सर्वांगे ॥ एषु स्थानेषु प्रत्येकेन मंत्रवर्णान्नमोंतान् विन्यस्य ॥ शिरसि प्रणवं च
न्यसेत् ॥ ततो नयनमुखहृदयगुह्यांघ्रिषु मंत्रस्य पदपंचकं नमोंतं न्यसेत् ॥ पदपंचकं च तद्
यथा हृदयं ॥ ततोंगन्यासः ॥ क्लीं कृष्णाय हृदयाय नमः ॥ गोविंदाय शिरसे स्वाहा ॥ गोपीजन

शिखायै वौषट् ॥ वल्लभाय कवचाय हुं ॥ स्वाहा अस्त्राय फट् ॥ ततो दशतत्त्वकृतिपंजरन्यासौ
विधाय किरीटमंत्रेण व्यापकं कृत्वा ॥ यथाशक्ति मुद्रां बध्वा ॥ ॐ सुदर्शनाय अस्त्राय फडिति
मंत्रेण दिग्बंधनं कृत्वा दशाक्षरोक्तं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा ॥ वैष्णवोक्त
पीठमन्वंतं पीठपूजां विधाय पुनर्ध्यात्वा वाहनादि पंचपुष्पांजलिदानपर्यंतं विधाय ॥ क्लीं
इत्याद्यक्षरैः स्वतंत्रदंगेषु न्यासक्रमेण संपूज्यांगमंत्रैः संपूज्य पंचपुष्पांजलिं दद्यात् ॥ ततो
वैष्णवादिपूजनं कृत्वा दशाक्षरोक्तावरणपूजां कृत्वार्घ्यपादिविसर्जांतं कर्म समापयेत् ॥ अ
स्य पुरश्चरणं तु दशाक्षरपदवज्ज्ञेयं ॥ शक्तिश्रीपूर्वको ह्यष्टादशाक्षरो विंशदर्णकः ॥ अस्य प्र
योगः प्रातः कृत्वादि वैष्णवोक्तपीठमन्वंतं पीठन्यासं कृत्वा ऋष्यादिन्यासं कुर्यात् ॥ शिरसि
ब्रह्मणे ऋषये नमः ॥ मुखे गायत्रीछंदसे नमः ॥ हृदि श्रीकृष्णदेवतायै नमः ॥ गुह्ये क्लीं
बीजाय नमः ॥ पादयोः स्वाहाशक्तये नमः ॥ ततः करांगन्यासौ ॥ ह्रीं श्रीं क्लीं अंगुष्ठाभ्यां न
मः ॥ कृष्णाय तर्जनीभ्यां स्वाहा ॥ गोविंदाय मध्यमाभ्यां वषट् ॥ गोपीजन अनामिकाभ्यां हुं ॥

वक्त्राय कनिष्ठिकाभ्यां वौषट्॥ स्वाहा करतलकरपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ ततो मूलेन
व्यापकं कृत्वा मंत्रपुटितां मातृकान्न्यसेत् तत्तत्स्थानेषु न्यसेत्॥ ततो दशतत्त्वानि विन्यस्य पुन
र्मूलेन व्यापकं कुर्यात्॥ ततो न्यासः॥ मूर्ध्नि क्लीं नमः॥ कपोलयोः श्रीं नमः॥ भ्रुवोर्मध्ये क्लीं नमः
नेत्रयोः कृं नमः॥ कर्णयोः ष्णा नमः॥ नसोः य नमः॥ वदने गो नमः॥ चिबुके विं नमः॥ कं
ठे दा नमः॥ दोर्मूले य नमः॥ हृदि गो नमः॥ उदरे पी नमः॥ नाभौ ज नमः॥ लिंगे न नमः॥ आधा
रे व नमः॥ कट्यां ल्ल नमः॥ जान्वोः भा नमः॥ जंघयोः य नमः॥ गुल्फयोः स्वा नमः॥ पादयोः
हा नमः॥ ॥इति सृष्टिन्यासः॥ ॥हृदि क्लीं नमः॥ उदरे श्रीं नमः॥ नाभौ क्लीं नमः॥ लिंगे कृं
नमः॥ आधारे ष्णा नमः॥ कट्यां य नमः॥ जान्वोः गो नमः॥ जंघयोः विं नमः॥ गुल्फयोः दा॰
पादयोः य॰ मूर्ध्नि गो॰ कपोले पी॰ भ्रुवोर्मध्ये ज॰ नेत्रयोः न॰ कर्णयोः व॰ नसोः ल्ल॰ वदने भा॰
चिबुके य॰ कंठे स्वा॰ दोर्मूले हा॰ नमोंतं न्यसेत्॥ ॥इति स्थितिन्यासः॥ पादयोः क्लीं॰ ॥गुल्फ
योः श्रीं॰ जंघयोः क्लीं॰ जान्वोः कृं॰ कट्यां ष्णा॰ आधारे य॰ लिंगे गो॰ नाभौ विं॰ उदरे दा॰ हृदि य॰

दोर्मूले गो॰ कंठे पी॰ चिबुके ज॰ वदने न॰ नसोः व॰ कर्णयोः ल्ल॰ नेत्रयोः भा॰ भ्रुवोर्मध्ये य॰
भाले स्वा॰ मस्तके हा॰ इति नमोंतान्न्यसेत्॥ ॥इति संहारः॥ ॥पुनः स्थितिं कृत्वा मूर्ति
पंजरं विन्यस्य पुनः सृष्टिस्थितिं विन्यस्य षडंगानि समाचरेत्॥ तथा च निबंधे॥ सृष्टिस्थि
तिं च विन्यस्य षडंगानि समाचरेत्॥ गुणाग्निवेदकरणकार्णैरैः॥ क्लीं श्रीं क्लीं हृदयाय
नमः॥ कृष्णाय शिरसे स्वाहा॥ गोविंदाय शिखायै वषट्॥ गोपीजन कवचाय हुं॥ वल्लभा
य नेत्राभ्यां वौषट्॥ स्वाहा अस्त्राय फट्॥ ततः पूर्ववद्दिग्बंधनं च कृत्वा किरीटमुद्रां बध्वा
ध्यायेत्॥ तद्यथा॥ द्वारवत्यां सहस्रार्कभास्वरैर्भवनोत्तमैः॥ अनल्पैः कल्पवृक्षैश्च परिती
मणिमंडपे॥ ज्वलद्रत्नमयस्तंभद्वारतोरणकुड्यके॥ फुल्लस्रग्गुल्मसच्चित्रवितानोल्लंबिमौ
क्तिके॥ पद्मरागस्थलीराजद्रत्नभूमध्यमध्यतः॥ अनारततगलद्रत्नधारास्य सुरस्ततोर
धः॥ रत्नप्रदीपावलिभिः प्रदीपितदिगंतरे॥ उद्यदादित्यसंकाशे महासिंहासनांबुजे॥
समासीनोऽच्युतो ध्येयो द्रुतहाटकसन्निभः॥ समानोदितचंद्रार्कतडित्कोटिसमद्युतिः॥ स

र्वांगसुंदरः सौम्यः सर्वाभरणभूषितः ॥ पीतवासश्चक्रशंखगदापद्मोज्वलद्भुजः ॥ समा
रतीज्वलद्रूपधारीघृतरलरासपरांद्र ॥ वामपादांबुजाग्रेण मूलतापनावछवि ॥ रुक्मिणी
सत्यभामा च मूर्ध्नि रत्नौघधारया ॥ सिंचंत्यौ दक्षवामस्थे स्वदोःस्थकलशोत्थया ॥ नाग्नजि
ती सुनंदा च दिशंतौ कलशौ तयोः ॥ तास्यां च दक्षवामस्थे मित्रविंदासुलक्षणे ॥ रत्ननद्यौ
समुद्धृत्य रत्नपूर्णे धिरीतयोः ॥ जांबवती सुशीला च दिशंतौ दक्षवामके ॥ बहिः षोडश
साहस्रसंख्याताः परितः स्त्रियः ॥ कनकरत्नौघधारायाः स्वरत्नकलशोज्वलाः ॥ तद्बहिश्चा
ष्टनिधयः पूरयंतो धनैर्धरां ॥ तद्बहिर्वृष्णयः सर्वे पुरोवत्सुरादयः ॥ एवं ध्यात्वा मानसैः
संपूज्य शंखस्थापनं कुर्यात् ॥ अस्य पूजायंत्रं ॥ षट्कोणमध्यमष्टदलपद्मं विलिख्य षट्को
णमध्ये तु ससाध्यं कामबीजं विलिख्य तं श्रीं ह्रीं संपुटदशान्तिरक्षरैर्वेष्टयेत् ॥ ततो षट्को
णस्य प्राक्रक्षोऽनिलकोणे कुब्जाबीजं श्रीं ह्रीं घृन्तु वनेश्वरीं लिखेत् ॥ ततः षट्संधिषु क्लीं कृ
ष्णाय नमः ॥ इति वर्णान् लिखेत् ॥ ततः केसरेषु कामदेवाय विद्महे पुष्पबाणाय धीमहि

तन्नोऽनंगः प्रचोदयात् इति ॥ गायत्र्याक्षराणि त्रीणि त्रीणि पूर्वादिक्रमेण विलिखेत्
ततः पत्रेषु पूर्वादि नमो भगवते कामदेवाय सर्वजनसंमोहनाय ज्वल ज्वल प्रज्वल प्र
ज्वल सर्वजनस्य हृदयं मम वशं कुरु स्वाहा ॥ इति मालामंत्रस्य षट् षडक्षराणि विलिखे
त् ॥ तद्बाह्ये ष्वक्षराणि ॥ तथा च ॥ विलिख्य गंधपंकेन लिखेदष्टदलांबुजे ॥ कर्णिकायां च
षट्कोणे ससाध्यं तत्र मन्मथं ॥ श्रीं ह्रीं स्वां संपुटदशान्तिरक्षरैर्वेष्टयेत्स्मरं ॥ प्राक्रक्षोऽनि
लकोणेषु श्रियं श्रीं ह्रीं षु संविदं ॥ षडक्षरं षट्संधिषु केसरेषु त्रिशस्त्रिशः ॥ विलिखेत्
स्मरगायत्रीं मालामंत्रं दलाष्टके ॥ षट्कूटाः संलिख्य तद्बाह्ये वेष्टयेन्मातृकाक्षरैः ॥ भूबीजं
च लिखेद्बाह्ये मायामाये दिग्विदिक्ष्वपि ॥ भूगृहं चतुरस्रं स्यादष्टवज्रविभूषितं ॥ तद्यं
त्रमष्टदशाक्षरे द्वादशाक्षराबीजं षडक्षरदशाक्षरं ॥ चतुर्दशाक्षरैकादशाक्षराणि मि
ति ॥ यन्तु पद्ममष्टपत्राढ्यं तु चतुरस्रं सुलक्षणं ॥ चतुर्द्वारं पुरं मध्ये दलान्वितं ॥ षट्कोण
गर्भकामाख्यं ससाध्यं दशार्णविहितं ॥ षडक्षरं मन्त्रवरं षट्कोणे च विलिखेन्मध्यं ॥ इ

तिजोत्तमीये ॥ अष्टादशाक्षरदशाक्षरयोर्विशेषयंत्रमुक्तं दशाविषयं ॥ अन्यथापिन्या
यादिविरोधः स्यात् ॥ ततः पीठमन्वंतं पीठपूजां विधाय पुनर्ध्यात्वावाहनादिपंचपुष्पां
जलिदानपर्यंतं विधाय ॥ स्वहृत्स्थितिषडंगं च संपूज्य ॥ ॐ किरीटाय नमः ॥ एवं कुंडलाय
नमः ॥ चक्राय० शंखाय० गदायै० पद्माय० वनमालायै० श्रीवत्साय० कौस्तुभाय० पुनः
पंचपुष्पांजलिं दत्वावरणपूजामारभेत् ॥ यथा वह्निकोणेषु आग्नेयादिषु ॥ श्रीं क्लीं हृद
यायनमः ॥ कृष्णाय शिरसे स्वाहा ॥ इत्यादिना पूजयेत् ॥ ततो दिक्पत्रमूलेषु ॐ वासुदे
वायनमः ॥ एवं संकर्षणाय नमः ॥ प्रद्युम्नाय० अनिरुद्धाय० ॥ दिक्पत्रमूलेषु ॐ शांत्यै
नमः ॥ एवं श्रियै नमः ॥ सरस्वत्यै० रत्यै० ॥ पत्रपूर्वादिक्रमेण पूर्ववत् ॥ रुक्मिण्याद्याः पू
जयेत् ॥ अग्रे ॐ षोडशसहस्रमहिषीभ्यो नमः ॥ तद्बहिः पूर्वादिषु ॐ इंद्रनिधये नमः ॥ ए
वं निजनिधये ॥ कुमुदनिधये० मुकुंदनिधये० आनंदकच्छपनिधये० शंखनिधये० प
द्मनिधये० ॥ तद्बहिः इंद्रादीन्वज्रादींश्च पूजयेत् ॥ ततो धूपदीपादिविसर्जनांतं कर्म समाप

येत् ॥ अस्य पुरश्चरणं चतुर्लक्षः ॥ ध्यात्वैवं परमात्मानं विंशत्यर्णमनुं जपेत् ॥ चतुर्ल
क्षं जुहुनेद्दशांशेश्चत्वारिंशत्सहस्रकं ॥ वाग्भवं मारबीजं च रुक्मायच्च भुवनेश्वरी ॥ गोविंदाय
रमागोपीजनवल्लभेन्दुशिरः ॥ चतुर्दशस्वरोपेतः स्मृतः संगीतदुर्लभः ॥ द्वाविंशत्यक्ष
रो मंत्रो वागीशत्वप्रदायकः ॥ अस्य पूजा प्रातःकृत्यादिवैष्णवोक्तपीठन्यासं विधाय अ
ष्टादशाक्षरोक्तवत् ऋष्यादिन्यासं करांगन्यासौ च विधाय मुद्रादिदिग्बंधनं कृत्वा ध्यायेत्
वामोर्ध्वहस्ते दधतं विद्यासर्वस्वपुस्तकं ॥ अक्षमालां च दक्षोर्ध्वे स्फाटिकीं मातृकामयीं ॥
शब्दब्रह्ममयं वेणुमधः पाणिद्वये दितं ॥ गायंतं पीतवसनं श्यामलं कोमलच्छविं ॥ बर्हि
बर्हकृतोत्तंसं सर्वज्ञं सर्ववेदिभिः ॥ उपासितं मुनिगणैरुपतिष्ठेद्धरिं सदा ॥ एवं ध्यात्
वा विंशत्यर्णवत्पूजयेत् ॥ विशेषस्तु स्वहृत्स्थितिपूजनं नास्ति ॥ अस्य पुरश्चरणं चतु
र्लक्षजपः ॥ तथा च ॥ चतुर्लक्षं जपेन्मंत्रं मनुमंत्री स्वसंयतः ॥ पलाशपुष्पैः स्वाद्वक्तैश्चत्वा
रिंशत्सहस्रकं ॥ जुहुयात्क्रमेणानेन मंत्रः सिद्धो भवेद्ध्रुवं ॥ वाग्भवं कामबीजं च मायां

लक्ष्मीमनंतरं॥ दशार्णोमनुवर्यंचत्रयेछक्मोहरीमनुः॥ ब्रह्मसंहितायां तु॥ वाग्भवं भुव
नेशानीं श्रीबीजं कामराजकं॥ अस्य पूजाप्रयोगः॥ प्रातःकृत्यादि विधाय पीठन्यासं कृ
त्वा ऋष्यादिन्यासं कुर्यात्॥ तद्यथा॥ शिरसि ब्रह्मणे ऋषये नमः॥ मुखे गायत्री छंदसे न
मः॥ हृदि श्रीकृष्णदेवतायै नमः॥ न्यासपूजाजपहोमादि सर्वं दशार्णवत्॥ ध्याने तु वि
शेषः॥ ध्यायेद्वृंदावने रम्ये कांचनीभूमिमध्यगे॥ नानापुष्पलताकीर्णे दिव्यखंडैश्च
मंडिते॥ नवरत्नसमाख्ये भूषणैः परिभूषितं॥ श्रीयुक्तवक्षसि श्रीवत्सकौस्तुभोद्भासि
तांबरं॥ तारहारावलीरम्यं श्रीवत्सांकितवक्षसं॥ रोचनातिलकप्रायकं तलभ्रमरायि
तं॥ कंदर्पचापसदृशं वनमालाविराजितं॥ अनेकरत्नसंबद्धस्फुरन्मकरकुंडलं॥
बर्हिबर्हकृतोत्तंसं सर्वज्ञं सर्ववेदिनं॥ उपासितं मुनिगणैः पतिभिर्हरिं सदा॥ का
माहं रंधरासंस्थं गीतिबिंदुविभूषितं॥ त्रैलोक्यमोहनो विष्णुः कथितस्तव यत्नतः॥ अ
स्य पूजाप्रयोगः॥ प्रातःकृत्यादि विधाय पीठशक्तिपर्यंतं विन्यस्य तदुपरि पद्मिरा

ज्ञाय स्वाहेति पीठमंत्रं यजेत्॥ ततः ऋष्यादिन्यासः॥ शिरसि संमोहननारदऋषये नमः
मुखे गायत्रीछंदसे नमः॥ हृदि त्रैलोक्यमोहनविष्णवे नमः॥ ततः करांगन्यासौ॥ क्लीं अं
गुष्ठाभ्यां नमः॥ क्लीं तर्जनीभ्यां नमः॥ क्लीं हृदयाय नमः॥ इत्यादिना च॥ ततो बाणन्यासः
ॐ शोषणबाणाय नमः अंगुष्ठयोः॥ एवं तर्जन्यादि॥ ॐ मोहनं क्लीं संदीपनं ब्लूं तापनं सः
मादनं॥ न्यासेत्तु सर्वत्र बाणपदप्रयोगः॥ तथा मस्तकमुखहृदयलिंगपादेषु न्यसेत्
ततो ध्यायेत्॥ नंगविभ्रमंरांकांरां सर्वतेजोमयं वपुः॥ किरीटिनं कुंडलिनं केयूरव
लयान्वितं॥ मुक्तास्रग्दामसन्नद्धतुलाकोटिसमुज्वलं॥ नानालंकारसुभगं पीतांबरयु
गावृतं॥ गरुडोपरिसन्नद्धरत्नपंजरमध्यगं॥ उत्तप्तहेमसंकाशां लक्ष्मीं वामोरुसंस्थि
तां॥ सर्वालंकारसुभगां पद्मवासोयुगावृतां॥ स्वकामां लीलया देवीं मोहयंतं पुनः
पुनः॥ शंखचक्रगदापद्मपाशांकुशधनुःशरान्॥ धारयंतं जगन्नाथं रक्तपद्मारु
णेक्षणं॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं विधाय न्यासक्रमेण पीठपूजां कृत्वा

पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिं दत्वान्यासक्रमेण शरीरे बाणान् संपूज्य ॥ ॐ किरीटा
य नमः ॥ एवं कुंडलाय नमः ॥ शंखाय० चक्राय० गदायै० पद्माय० पाशाय० अंकुशाय०
धनुषे० शराय० हस्तेषु पूजयेत् ॥ ततो ह्रीं वत्साय ॥ कौस्तुभाय गले ॥ वनमालायै नितंबे ॥
पीतवसनाय वामांके ॥ श्रीलक्ष्म्यै नमः ॥ ततः केसरेषु अग्न्यादिकोणमध्ये दिक्षु ह्रां हृदया
य नमः इत्यादिना पूजयेत् ॥ ततः पूर्वादिदिक्षु बाणान् पूजयेत् ॥ कोणेषु पंचमं बाणं पू
जयेत् ॥ पत्रेषु पूर्वादिदिक्षु लक्ष्म्यै नमः ॥ एवं सरस्वत्यै ॥ रत्यै० प्रीत्यै० कीर्त्यै० कान्त्यै० तुष्ट्यै० पुष्ट्यै
तद्बहिर्लोकपालान् पूजयेत् ॥ नात्र वज्रादीनां पूजा अनुक्तत्वात् ॥ ततो धूपादिविसर्जनांतं
कर्म समापयेत् ॥ अस्य पुरश्चरणं द्वादशलक्षजपः ॥ तथा च ॥ रविलक्षं जपेन्मंत्रं तद्द जुहु
यात्तद्दशांशतः ॥ अमृतत्रयसिक्तेन पायसेन विधानवित् ॥ अथ वा रविसाहस्रं कृतता
यश्च तर्पयेत् ॥ कामबीजं हरीकेशाय हृन्मंत्रोष्टाक्षरः ॥ अस्य विधानं सर्वं पूर्ववत् ॥ लक्ष्मी
र्मायारमाबीजं चितं रूपपदं तथा ॥ स्वाहेति मंत्रराजोयं नक्षत्राक्षरपादपः ॥ अस्य पूजाप्र

योगः ॥ प्रातःकृत्यादि वैष्णवो रूपपीठमन्त्रं तं विन्यस्य ऋष्यादिन्यासं कुर्यात् ॥ तद्यथा ॥ शि
रसि नारदऋषये नमः ॥ मुखे अनुष्टुप्छंदसे नमः ॥ हृदि श्रीकृष्णाय देवतायै नमः ॥ ततः
करांगन्यासौ ॥ तद्यथा ॥ क्लां अंगुष्ठाभ्यां नमः ॥ इत्यादि ॥ क्लां हृदयाय नमः इत्यादिना च ॥
ततो ध्यानं ॥ कलायकुसुमश्यामं वृंदावनगतं हरिं ॥ गोपगोपीगवावीतं पीतवस्त्रयुगावृ
तं ॥ नानालंकारसुभगं कौस्तुभोद्भासिवक्षसं ॥ सनकादिमुनिश्रेष्ठैः संस्तुतं परयामु
दा ॥ शंखचक्रलसद्बाहुं वेणुहस्तद्वयेरितं ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कु
र्यात् ॥ ततो वैष्णवो रूपपीठमंत्रांतं पीठं संपूज्य पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदा
नं विधायावरणपूजामारभेत् ॥ तद्यथा ॥ केसरेषु अग्निनिर्ऋतिवायुईशानकोणेषु म
ध्ये दिक्षु च क्लां हृदयाय नमः इत्यादिना पूजयेत् ॥ तद्बहिरिंद्रवज्रादीन् पूजयेत् ॥ ततो
धूपादिविसर्जनांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं चतुर्लक्षजपः ॥ ध्यात्वैवं परमात्मा
नं चतुर्लक्षं मनुं जपेत् ॥ दशांशं जुहुयान्मंत्री कुसुमैर्ब्रह्मवृक्षजैरिति ॥ श्रीशाक्तिस्मर

कृष्णाय गोविंदाय शिवो मनुः॥ अस्य पूजा प्रयोगः॥ प्रातः कृत्यादि पूर्वोक्त पीठमन्वंतं पी
ठन्यासं विधाय रत्नाभिषेकवत् ऋष्यादिन्यासं कुर्यात्॥ ततः करांगन्यासौ॥ तद्यथा॥ श्रीं
अंगुष्ठाभ्यां नमः॥ ह्रीं तर्जनीभ्यां स्वाहा॥ क्लीं मध्यमाभ्यां वषट्॥ कृष्णाय अनामिकाभ्यां हुं
गोविंदाय कनिष्ठिकाभ्यां वौषट्॥ स्वाहा करतलपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ ततो मूर्ति
पंजरन्यासं विधाय मूर्द्धादि दिग्बंधनं विधाय विंशत्यर्णोक्तं ध्यात्वा तद्विधानेन पूजयेत्॥
सहितस्थितिक्रमेण पूजयेत्॥ तद्वर्णलक्षं जपात्॥ अस्य पुरश्चरणं जपहोमसाध्यम्॥ तारं हृ
द्भगवते रुक्मिणीवल्लभाय ठद्वयं॥ अस्य पूजा प्रातः कृत्यादि वैष्णवोक्त पीठमन्वंतं पीठ
न्यासं विधाय ऋष्यादिन्यासं कुर्यात्॥ शिरसि नारदऋषये नमः॥ मुखे अनुष्टुप् छंदसे
नमः॥ हृदि रुक्मिणीवल्लभाय देवतायै नमः॥ ततः करांगन्यासौ॥ ॐ अंगुष्ठाभ्यां नमः॥
नमः तर्जनीभ्यां स्वाहा॥ भगवते मध्यमाभ्यां वषट्॥ रुक्मिणीवल्लभाय अनामिका
भ्यां फट्॥ एवं हृदयादिषु॥ ततो ध्यानं॥ तापिंछच्छविसंकाशां प्रियतमां स्वर्णप्रभां बुजप्रो

द्यद्वामभुजं स्ववामभुजयाश्लिष्यन्दलं चिंतामयां॥ श्लिष्यंतीं स्वयमन्यहस्तविलसत्सौव
र्णनेत्राश्चिरं पायाद्वो मनसस्तुपीतवसनो नानाविभूषो हरिः॥१॥ एवं ध्यात्वा मानसैः
संपूज्य वैष्णवोक्त पीठमन्वंतं पीठपूजां विधाय पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदान
पर्यंतं विधायावरणपूजामारभेत्॥ केसरेषु अग्निनिरृतिवायुईशानकोणेषु दिक्षु च॥
ॐ हृदयाय नमः॥ नमः शिरसे स्वाहा॥ भगवते शिखायै वषट्॥ रुक्मिणीवल्लभाय कव
चाय हुं॥ स्वाहा अस्त्राय फट्॥ ततो दलेषु पूर्वादि ॐ नारदाय नमः॥ एवं पर्वताय बिल्वं॥
निषदं॥ उद्धवं॰ दारुकं॰ शैनेयं॰ विष्वक्सेनं च पूजयेत्॥ तद्बहिरिंद्रादीन् वज्रादींश्च संपू
ज्य धूपादिविसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं जपो लक्षजपः॥ तथा च॥ ध्यात्वैवं
रुक्मिणीनाथं जपेल्लक्षमिमं मनुं॥ अयुतं जुहुयात्सम्यैररुणैर्मधुराप्लुतैः॥ श्रीरात्रिकामम्
वैंगजन्नरात्रिरमांतिकं॥ दद्यान्तुरसएवासौ आदौ रात्रिरमांतितं॥ अनयोः कृष्णा
दिवंचांगानि दद्यात् हरवत् अस्याविंशत्यंतावत् पूजां कुर्यात्॥ ध्यानं तु॥ वरदाभयहस्ता

स्यांश्लिष्यंतंस्वांगगप्रियं॥पद्मोत्पलकरेतास्यांश्लिष्टंचक्रदव्यान्वलं॥अनयोपुरश्चरणंतु
दशलक्षंजपेदाज्यैस्तावत्सहस्रहोमः॥एवंनमसायुक्तंकृष्णगोविंदकौतथा॥श्रीपूर्वो
ऽनेनमुखार्यक्लिप्फट्स्वाहेतिकीर्तितः॥अस्यनारदऋषिरनुष्टुप्छंदः॥परमात्माहरिर्देवता
आचक्राद्यैरंगक्लृप्तिर्नः॥दशार्णविदस्यपूजाजपहोमादयः॥बीजत्राक्लींचतन्मने॥ ॥अ
थबालगोपालमंत्रः॥ ॥चक्रीवसुस्वरान्वितस्वगिरादीर्घोमनुर्मतः॥कृष्णइत्यतिबद्ध
रः॥कामपूर्वस्मर्णःसएवतु॥सएवचतुरर्णः॥स्यात्ङेतोऽस्यतुरक्षरः॥वह्नेतपंचवर्णः॥
स्यात्कृष्णायनमइत्यपि॥सएवकामपूर्वश्चेत्षडक्षरमनुर्मतः॥कृष्णायेतिस्मरद्वंद्वमध्य
पंचाक्षरोमतः॥गोपालायाग्निजायांतोवाषडक्षरउदाहृतः॥कामकृष्णः॥कामकृष्णायन
मोंतः॥कामकृष्णायठद्वयं॥गोपालायठद्वयं॥कामबीजकृष्णाय॥कामकृष्णायकामं॥ब
लवपुषेकृष्णायठद्वयं॥बालवपुषेकामबीजकृष्णायस्वाहा॥कामबीजांत्येकामबीजस्याम
लांगायनमः॥दधिभक्षणायठद्वयं॥कृष्णगोविंदकौऽन्तौ॥एतौकामाद्यौ॥श्रीराधिकारमण

यनमः॥एतेषांयंत्रंवृत्तमष्टदलंपद्मंमध्येहंवृत्तमध्यस्थंकामबीजं॥तथाचगौतमीये॥प
द्ममष्टपत्रकांतुचतुरस्त्रंसुलक्षणं॥चतुर्द्वारसमायुक्तंकामगर्भितकर्णिकं॥एतेषांपूजा
प्रयोगः॥प्रातःकृत्यादिपीठन्यासांतंविधायकृष्णादिमासंकुर्यात्॥
तद्यथा॥शिरसिनारदऋषयेनमः॥मुखेदेवीगायत्रीछंदसेनमः॥हृदिश्रीकृष्णायदेवता
यैनमः॥ततःकरांगन्यासौ॥तद्यथा॥क्लांअंगुष्ठाभ्यांनमः॥क्लींतर्जनीभ्यांस्वाहा॥क्लूंमध्य
माभ्यांवषट्॥क्लैंअनामिकाभ्यांहुं॥क्लौंकनिष्ठिकाभ्यांवौषट्॥क्लःकरतलपृष्ठाभ्यांफट्॥ए
वंहृदयादिषुपूर्ववत्मुद्रादिकंप्रदर्श्यध्यानंकुर्यात्॥अव्याद्व्याकोषनीलांबुजरुचिररुणांभो
जनेत्रोंबुजस्थोबालोजंघाकटीरस्थलकलितरणत्किंकिणीकोमुकुंदः॥दोर्भ्यांहैयंगवीनंद
धतिविमलंपायसंविश्ववंद्योगोगोपीगोपवीतोरुरुनखविलसत्कंठभूषश्चिरंनः॥१॥एवं
ध्यात्वामानसैःसंपूज्यशंखस्थापनंकुर्यात्॥ततोवैष्णवोक्तपीठमन्वंतपीठपूजांविधायपु
नर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतंविधायावरणपूजामारभेत्॥अग्न्यादिकोण

चतुर्थ्येषु मध्ये दिक्षु च क्लां हृदयाय नमः ॥ इत्यादिना संपूज्य इंद्रादीन् वज्रादींश्च पूजयेत्
ततो धूपदीपादि विसर्जांतं कर्म समापयेत् ॥ एतेषां पुरश्चरणं लक्षजपः ॥ तथा च ॥ ध्यात्वै
वमेव मंत्रेषां लक्षं जप्यामनुं ततः ॥ सर्पिः सितोपलोपेतैः पायसैरयुतं हुनेत् ॥ कामयोर्
तरूलपदं मंत्रोयं सद्यः फलप्रदः ॥ अस्य पूजा प्रातः कृत्यादि वैष्णवोक्तपीठमन्वंतं विधा
य पूर्ववत् ऋष्यादिन्यासं करांगन्यासौ च कृत्वा ध्यायेत् ॥ श्रीमत्कल्पद्रुमोद्यज्जलजकमल
सत्कर्णिकासंस्थितो यस्तच्छात्रबालं विपन्नोदरविसरदसंख्यातरत्नाग्निकीलः ॥ हेमाभेस्त
प्रोत्तिष्ठिभुवनमखिलं जानवयन् दीव्यवासुदेवः पायादं पायसादोऽनवरतनवनीता
घृतक्षीरवर्गीः सः ॥ १ ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं विधाय वैष्णवोक्तपीठमन्वं
तं संपूज्य पुनर्ध्यात्वा आवाहनादि पंचपुष्पांजलिदानं विधाय आवरणपूजामारभेत् ॥ पूर्ववद्
न्यासादिकोणेषु मध्ये दिक्षु च ॥ क्लां हृदयाय नमः ॥ तथा च निबंधे ॥ नारदोऽस्य मुनिः साधो रक्रो
च्छेदः परो मनुः ॥ पूर्ववत् ऋष्यादिन्यासं करांगन्यासौ कुर्यात् ॥ तद्यथा ॥ क्लां अंगुष्ठाभ्यां

नमः ॥ इत्यादि ॥ षड्दीर्घयुक्तेन ॥ अस्य पूजादिकं सर्वं पूर्ववत् ॥ ध्याने तु विशेषः ॥ आरक्तोद्या
नकल्पद्रुमतलविलसद्रत्नदीप्ताधिरूढं गोपीभ्यां प्रेक्षमाणं विकसितनववंधूकसिंदूर
भासं ॥ बालं नीलालकांतं करितरविलसद्वेणुघंटाद्युवं दे साईलकामांकुशालाजितगला
कल्पदीप्तं मुकुंदं ॥ १ ॥ ध्यात्वैवं पूर्ववच्चैनं जप्त्वा रक्तोत्पलैस्तरैः ॥ मधुरत्रयं पुनः कृत्वा अभ्यर्चि
त पूर्ववद्धरिं ॥ प्रणवो हृद्भगवतो वासुदेवाय कीर्तितः ॥ प्रधानं वैष्णवे तंत्रे मंत्रोयं द्वादशा
क्षरः ॥ अस्य पूजा प्रातः कृत्यादि पूर्वोक्तपीठमन्वंतं विन्यस्य ऋष्यादिन्यासं कुर्यात् ॥ शिर
सि प्रजापतये ऋषये नमः ॥ मुखे गायत्री छंदसे नमः ॥ हृदि वासुदेवाय देवतायै नमः ॥
ततः करांगन्यासौ ॥ ॐ अंगुष्ठाभ्यां नमः ॥ नमः तर्जनीभ्यां स्वाहा ॥ भगवते मध्यमाभ्यां व
षट् ॥ वासुदेवाय अनामिकाभ्यां हुं ॥ समस्तेन कनिष्ठाभ्यां फट् ॥ एवं हृदयादिषु ॥ ततो मंत्रन्या
सः ॥ मूर्ध्नि भाले दृशोरास्ये गले दोर्हृदयांबुजे ॥ कुक्षौ नाभौ ध्वजे जानुद्वये पदद्वये तथा ॥ दशा
क्षराणि विन्यसेत् ॥ ततो मूर्त्तिपंजरं विन्यस्य किरीटमंत्रेण व्यापकं कृत्वा ध्यायेत् ॥ विष्णुं शारद

चंद्रकोटिसदृशांशंखरथांगगदाम्भोजंदधतं सिताब्जनिलयं कांत्या जगन्मोहनं॥ आब
द्धांगदहारकुंडलमहामौलिस्फुरत्कंकणं श्रीवत्सांकमुदारकौस्तुभधरं वंदे मुनींद्रैः स्तुतं॥
१॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ ततो वैष्णवोक्तपीठपूजां विधाय पुनर्ध्या
त्वावाहनादिपंचपुष्पांजलिदानपर्यंतं विधाय आवरणपूजामारभेत्॥ यथा॥ अग्निनि
र्ऋतिवायुईशानकोणे दिक्षु च॥ हृदयाय नमः॥ इत्यादिना पंचांगेन पूजयेत्॥ ततोपत्रादि
दलेषु वासुदेवादीन् इंद्रादीन् वज्रादींश्च पूजयेत्॥ ततो धूपादिविसर्जनांतं कर्म समापयेत्
अस्य पुरश्चरणं द्वादशलक्षजपः॥ तथा च॥ वर्णलक्षं जपेन्मंत्रं दशांशं हुतो विजितेंद्रियः॥
तत्सहस्रं प्रजुहुयात् तिलै राज्यपरिप्लुतैः॥ हृल्लेखाबीजयुगलं रमाबीजद्वयं तथा॥ लसं
तेवासुदेवाय हृदं तर्पणं यादिकं॥ अस्य पूजादिकं वासुदेवमंत्रवत्॥ करांगन्यासस्तु॥
ॐ ह्रीं ह्रीं अंगुष्ठाभ्यां नमः॥ ॐ श्रीं श्रीं तर्जनीभ्यां स्वाहा॥ ॐ क्लीं मध्यमाभ्यां वषट्॥ ॐ वासुदे
वाय अनामिकाभ्यां हुं॥ ॐ नमः कनिष्ठाभ्यां फट्॥ एवं हृदयादि॥ ततो ध्यानं॥ विद्युच्चंद्रनिभं

वपुः कमलजावेक्षं ह्योरिकृतां श्रावत्स्नेहरसेन रत्नविलसत्क्षयान्नराजं कृतं॥ विद्यापंक
जदर्पणान्नमणिमयं कुंभं सरोजं गदां शंखं चक्रममुं चिविन्नदधितां बिम्बाश्रियं वः सदा॥१॥
अस्य पुरश्चरणं चतुर्दशलक्षजपः॥ तथा च॥ वर्णलक्षं जपेन्मंत्रं तत्सहस्रं सरोरुहैः॥ हो
मं कुर्याद्विकसितैर्मधुरत्रयसंयुतैः॥ वर्णलक्षमंत्रवर्णसंस्कारलक्षं॥ ॐ नमो विष्णवे सु
रपतये महाबलाय ठद्वयं॥ निर्बीजे॥ तारो हृद्विष्णवे पश्चात् ङेंतः सुरपतिर्नवेत्॥ महाब
लाय ठद्वयं मनुरष्टादशाक्षरः॥ अस्य पूजा प्रातः स्मृत्यादि॥ ॐ सोमं मंडलाय नमः॥ इत्यंतं
विष्णुरूप्यादिन्यासं कुर्यात्॥ शिरसि इंद्र ऋषये नमः॥ मुखे विराट् छंदसे नमः॥ हृदि द
धिवामनाय देवतायै नमः॥ ततः करांगन्यासो॥ ॐ अंगुष्ठाभ्यां नमः॥ नमः तर्जनीभ्यां
स्वाहा॥ विष्णवे मध्यमाभ्यां वषट्॥ सुरपतये अनामिकाभ्यां हुं॥ महाबलाय कनिष्ठाभ्यां वौषट्
स्वाहा करतलपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ ततो मंत्रन्यासः॥ शिरसि ललाटे चक्षुषोः क
र्णयोः ओष्ठयोर्जिह्वाकंठे बाहुद्वये उदरे नाभौ गुह्ये ऊरुद्वये जानुद्वये जंघाद्वये पदद्वये मं

त्रवर्णान्न्यसेत्॥ ॐ घां हृदयादौ यं हृदयं वर्णं॥ ततो मूर्त्तिपंजरादिकं विधाय ध्यानं कुर्यात्॥ यथा
मृत्क्यागौरं नवमणिलसद्भूषणं चंद्रसंस्थं शंखाकारैरलकलितकरैः शोभिवक्त्रारविंदं॥ हस्ता
ग्रैर्मांचनककलशाम्बुद्धृतोयान्निपूर्णं दध्यान्नाद्यं कनकचषकं धारयंतं नमामः॥ १॥ एवं
ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ ततश्चक्रमंडलं तत्पीठं संपूज्य पुनर्ध्यात्वा वाहना
दिपुष्पांजलिदानपर्यंतं विधायावरणपूजां कुर्यात्॥ तथा च॥ चक्रांतं कल्पिते पीठे प्राग्वत्ते
न समर्चयेत्॥ ॐ ऐरावताय दिग्गजाय नमः॥ इत्यादिक्रमेण पूजयेत्॥ ततो धूपादि विसर्जां
तं कर्म समापयेत्॥ अस्य पुरश्चरणं लक्षत्रयं जपः॥ तथा च॥ वर्णलक्षं जपेन्मंत्रं तद्दशांशं
घृतप्लुतं॥ पायसान्नं प्रजुहुयात् द्विजान्नं वा यथाविधि॥ ॥ अथ हयग्रीवमंत्रः॥ ॥
उद्गिरत्प्रणवोद्गीथ प्रवासकृत॥ सर्ववागीश्वरेत्यंते प्रवदेदीश्वरेत्यर्थः॥ सर्वदे
वमयाचिंत्यपदांते सर्वमुच्चरेत्॥ बोधयद्वितयांतोयं मंत्रस्त्वावादिरीरितः॥ ऐं ह्रीं श्रीं क्लीं क्लीं
सौं॥ जय जय रूप रूप निरंतरक्रीडासक्त मन्मुदित वेतसनिस्प्रियाय कृष्णाय गोपीजनव

ल्लभाय स्वाहा॥ ह्रीं श्रीं ऐं॥ तथा च॥ क्रमदीपिकायां॥ सत्याशौरीचतुर्यकाः शिखिवामने
त्रशशिखंडमंडिताः॥ जयरूपयुग्मनिरंतरा त्वन्द्रशिखिक्रियान्तिगस्य वत्तिरूपवर्णकाः॥
प्रतमसेततत्परक्रमदयुग्गुरुमारुतान्हराः॥ सचतुर्थीकूलपदनिरुक्तमृकोदराय
कृष्ण॥ मनुवर्यकस्त्ववसौसलक्षतो मुदि चेतयाधराच लस्तु तारमाहरैः स्फुरितं क्रमोत्क्र
मगातैः समरूपरत्॥ इतिदं तस्त्रयंबस्त्ववर्णं उद्धृतः कथितानुरंजनरमाकरो ह्यहत्॥ ततो
हयग्रीवमंत्रः॥ अस्य पूजाप्रातःकृत्यादि पीठमन्यं तं विधाय ऋष्यादिन्यासं कुर्यात्॥ यथा
शिरसि ब्रह्मणे ऋषये नमः॥ मुखे अनुष्टुप्छंदसे नमः॥ हृदि हयग्रीवाय देवतायै नमः॥ त
तः करांगन्यासौ॥ ॐ अंगुष्ठाभ्यां नमः॥ उद्गीवत्प्रणवोद्गीथ तर्जनीभ्यां स्वाहा॥ सर्ववागीश्व
रेश्वरः मध्यमाभ्यां वषट्॥ सर्ववेदमयाचिंत्य अनामिकाभ्यां हुं॥ सर्वं बोधय बोधय कनि
ष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ ततो ध्यानं॥ यथा शरच्छशांकप्रतिमं स्वच्छमुक्तामयैराभ
रणैः प्रदीप्तं॥ रथांगशंखांचितबाहुयुग्मं जानुद्वयन्यस्तकरं च नमामः॥ १॥ एवं ध्यात्वा मानसैः

संप्रसरां स्वस्थापनं कृत्वा वैलयो रूपीठपूजां विधाय त्वा हस्तं इत्यनेन मूर्त्तिं संकल्पयेत् ॥ त
थाच ॥ बीजेन मूर्त्तिं संकल्प्य बीजं मूर्द्ध्नि यते तथा ॥ वियद्भृगुस्थमघीशाविंदुयद्बीजमीरितं ॥
पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजां कुर्यात् ॥ यथा ॥ केस
रेषु दिक्षु चतुर्वेदान्दक्षपक्षे सामाथर्वौ च विदिक्षु स्मृतिन्यायमीमांसासर्वशास्त्राणि य
ते बस्मादिकोणेषु दिक्षु च ॥ ॐ हृदयाय नमः इत्यादि पंचांगानि पूजयेत् ॥ तथा च केसरे
षु चतुर्वेदांश्चतुर्दिक्षु समर्चयेत् ॥ विदिक्ष्वंगस्मृतिन्यायसर्वशास्त्राणि पूजयेत् ॥ अर्चयेत् प
त्रमध्येषु विधानेनांगदेवताः ॥ तद्बहिरिंद्रादीन्वज्रादींश्च पूजयेत् ॥ ततो धूपादिविस
र्जांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं त्रयस्त्रिंशल्लक्षजपः ॥ तथा च ॥ वर्णलक्षं जपेन्मंत्रं
कंदपुष्पैर्मधुप्लुतैः ॥ दशांशं वैष्णवेयह्नौ तद्भक्त्या मंत्रसिद्धये ॥ हकारसकारवहस्वरबिंद्वा
त्मकः ॥ चतुर्दशस्वरयुक्त इति कल्पांतरे ॥ तथा च कल्पे ॥ वियद्भृगुस्थमघीशाबिंदुमद्बीज
मीरितं ॥ एकाक्षरो मनुर्ज्ञो रुष्यत्वर्गफलप्रदः ॥ अस्य ब्रह्मऋषिस्त्रिष्टुप्छंदो हयग्रीवरू

पी विष्णुर्देवता हकारो बीजं उकारः शक्तिः हस्रां हस्रीं हस्रूं हस्रैं हस्रौं हस्रः ॥ इति षडंगकल्पना ॥ ध्या
नं ॥ धवलनलिननिष्ठं हीरगौरं करांभोजैर्जपवलयसरोजे पुस्तकौ निर्विदाने ॥ दधतममलव
क्त्राकल्पजालाभिरामं तुरगवदनजिष्णुं नौमि विद्याप्रविष्णुं ॥ १ ॥ अन्यच्च ॥ शारच्छशांकप्रभं
मश्ववक्त्रं मुक्तामयैराभरणैरुपेतं ॥ रथांगशंखौ दधिकरं च विद्याव्याख्यानमुद्रान्मकरं न
मामि ॥ २ ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा पीठपूजां कृत्वा पुनर्ध्यात्वावाहना
दि पंचपुष्पांजलिदानं विधायावरणपूजां कुर्यात् ॥ तत्रांगैः प्रथमावरणं ॥ प्राची हयमेधा
हयस्मृति हयविद्या हयलक्ष्मी हयवागीशा यविद्या विरागा हयनादविमर्दन हयैरहा निर्वि
त्तायं ॥ लक्ष्मी सरस्वती रंति प्रीति कीर्ति कांति तुष्टि पुष्टिभिस्तृतीयं ॥ कुमुदादिभिर्गजैश्चतुर्थं ॥ इं
द्रादिभिः पंचमं ॥ ततो धूपादिविसर्जांतं कर्म समापयेत् ॥ अस्य पुरश्चरणं लक्षं चतुष्टय
जपः ॥ तथा च ॥ वेदलक्षं जपेन्मंत्री दशांशं जुहुयात्ततः ॥ अनेन दशांशो होमः ॥ हयग्रीव
एकाक्षरादि चतुर्थ्यंत हयशीर्षाय नमोंतः ॥ तथा च कल्पे ॥ हयशिरः पदं ङेंतं हृदंतं च

सम्पुटरेत्॥स्वबीजादिनंत्र्यक्षुत्वर्यगंप्रजपेद॥अस्यब्रह्माऋषिरनुष्टुप्छंदः हयग्रीवरूपी
विष्णुर्देवता॥अमृतत्सर्वमिकारःस्वयं तु॥उद्गीथप्रणवोद्गीथसर्ववागीश्वरेश्वर॥सर्व
वेदमयाचिंत्यंसर्वंबोधयबोधय॥स्वाहांतोमनुराख्यातोबीजप्रणवसंपुटः॥विश्वतीर्ण
स्वरूपायचिन्मयानंदरूपिणे॥तुभ्यंनमोहयग्रीवविद्याबीजायविलवे॥स्वाहांतोमनुरा
ख्यातोहंसेनसंपुटीकृतः॥एतयोर्मंत्रयोःपूर्वानुष्टुत्रहयग्रीवमंत्रवत्सर्वंज्ञातव्यं॥
अथनृसिंहमंत्रः॥ ॥उग्रंवीरंवदेत्पूर्वंमहाविष्णुमनंतरं॥ज्वलंतंपदमाभाष्यस
र्वतोमुखमीरयेत्॥नृसिंहंभीषणंभद्रंमृत्युमृत्युंवदेत्ततः॥नमाम्यहमयंप्रोक्तोमंत्रर
ाजस्तुरुत्तमः॥अयंमंत्रोमायाप्रुटितोपिजयति॥अस्यपूजाप्रातःकृत्यादिपीठमन्त्यंतंविष
येरूप्यादिन्यासंकुर्यात्॥शिरसिब्रह्मणेऋषयेनमः॥मुखेअनुष्टुप्छंदसेनमः॥हृदिनृ
सिंहायदेवतायैनमः॥ततःकरांगन्यासौ॥चतुर्भिर्हृदयंवर्णैःशिरस्तावद्भिरुच्यते॥शि
खाष्टाभिःसमुद्दिष्टावद्भिःकवचमीरितं॥तावद्भिर्नयनंप्रोक्तंमंत्रःस्यात्करणान्तरे॥शि

रोललाटनेत्रेषुमुखवाहुंघ्रिसंधिषु॥साग्रेषुकुक्षौहृदयेगलपार्श्वद्वयेपुनः॥अप
राहृच्यककुदिन्यसेद्वर्णान्यथाक्रमः॥ध्यानं॥माणिक्यादिसमप्रभंनिजरुचासंत्रस्त
रक्षोगणंजानुन्यस्तकरांबुजंत्रिनयनंरत्नोल्लसद्भूषणं॥बाहुभ्यांधृतशंखचक्रमनिशं
दंष्ट्रोग्रवक्त्रोल्लसज्ज्वालाजिह्वमुदग्रकेशनिचयंवंदेनृसिंहंविभुं॥१॥एवंध्यात्वामा
नसैःसंपूज्यशंखस्थापनंविधायपीठस्यबोलपीठपूजांकृत्वापुनर्ध्यात्वावाहनादिपंचपु
ष्पांजलिदानपर्यंतंविधायावरणपूजामारभेत्॥तद्यथा॥केसरेषुअग्न्यादिकोणमध्यु
दिक्षुच॥अंगानिपूजयेत्॥उग्रंवीरंहृदयायनमः॥महाविष्णुंशिरसेस्वाहा॥ज्वलंतंसर्व
तोमुखंशिखायैवषट्॥नृसिंहंभीषणंकवचायहुं॥भद्रंमृत्युमृत्युंनेत्रत्रयायवौषट्॥
नमाम्यहमस्त्रायफट्॥ततःपूर्वादिदलेगरुडंशंकरंशेषंब्रह्माणंचसंपूजयेत्॥विदिग्द
लेषुश्रियंह्रियंधृतिंपुष्टिंचसंपूज्यवादिनमींतेनपूजयेत्॥तद्बहिरिंद्रादीन्वज्रादींश्चपू
जयेत्॥ततोधूपादिविसर्जनांतंकर्मसमापयेत्॥अस्यपुरश्चरणंद्वात्रिंशल्लक्षजपः॥तथा

च॥ वर्णलक्षं जपेन्मंत्रं तत्सहस्रं घृतप्लुतैः॥ पायसान्नैः प्रजुहुयात् विधिवत्संस्कृतेनले॥ पा
शः शक्तिः ह्रौं क्रौं वर्मफट्॥ तथा च निबंधे॥ पाशः शक्तिर्नरहरिं कुशी वर्मफडित्यनुः॥
षडक्षरो नरहरेः कथितो सर्वकामदः॥ अस्य पूजा प्रातःकृत्यादि विमलो वा रूपीठमन्त्रं तद्वि
न्यस्य ऋष्यादिन्यासं कुर्यात्॥ शिरसि ब्रह्मणे ऋषये नमः॥ मुखे पंक्तिछंदसे नमः॥ हृदि नृ
सिंहाय देवतायै नमः॥ ततः करांगन्यासौ कुर्यात्॥ आं अंगुष्ठाभ्यां नमः॥ क्रीं तर्जनीभ्यां
स्वाहा॥ ह्रौं मध्यमाभ्यां वषट्॥ क्रौं अनामिकाभ्यां हुं॥ हुं कनिष्ठाभ्यां वौषट्॥ फट् करतल
पृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ ततो ध्यानं॥ कोपादालोलजिह्वं विवृतनिजमुखं सोमसू
र्याग्निनेत्रं पादादानाभिरक्तप्रभमुपरि सितं भिन्नदैत्येंद्रगात्रं॥ चक्रं शंखं च पाशांकुशकुलि
शगदा दारुणान्युद्वहंतं भीतं भीत्याय दंष्ट्रमणिमय विविधाकल्पमाते नृसिंहं॥१॥ एवं
ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा वैमलो वा रूपीठपूजां विधाय पुनर्ध्यात्वावाहना
दिपंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत्॥ ततः केसरेषु अग्न्यादिकोण

मध्यदिक्षु॥ आं हृदयाय नमः॥ इत्यादि षडंगानि पूजयेत्॥ ततः पत्रेषु पूर्वादि शंखचक्रं
पाशं अंकुशं वज्रं गदां खड्गं खेटकं पूजयेत्॥ तथा च॥ अंगावृत्ते बहिश्चक्रं शंखं पाशांकु
शौ पुनः॥ वज्रं कौमोदकीं खड्गं खेटौ पत्रेषु पूजयेत्॥ तत इंद्रादीन् वज्राद्यांश्च पूजयेत्॥
ततो धूपदीपादि विसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं षड्लक्षजपः॥ तथा च॥ र
सलक्षं जपेदेनं घृतेन जुहुयात्ततः॥ तत्सहस्रं समिद्धेग्नौ तोषयेद्वसुनायकं॥ हकारो व
ह्निमान्रूढो मनुः स्वरसमन्वितः॥ एकाक्षरो मनुः प्रोक्तः सर्वकामफलप्रदः॥ अस्य पूजा
दिकं सर्वं मंत्रराजवत्॥ ऋषिरत्रिर्गायत्री छंदः॥ हकारो बीजं औकारः शक्तिः षड्दी
र्घयुक्तमंत्रेणांगकल्पना॥ अस्य पुरश्चरणं अष्टलक्षजपः॥ वसुलक्षं जपेन्मंत्रमित्यादि वच
नात्॥ जपद्वयं श्रीनृसिंहमंत्रे॥ जपद्वयं समुच्चार्य श्रीहृदयान्नृसिंह इत्यादि॥ अष्टाक्षरो म
नुः प्रोक्तो नतं कामदो मुनिः॥ अस्य ब्रह्मा ऋषिर्गायत्री छंदः॥ षड्दीर्घस्वरयुक्तेनश्री
बीजेनांगकल्पना॥ ध्यानार्चनादिकं मंत्रराजवत्॥ अस्य पुरश्चरणं अष्टलक्षजपः॥

तथा च॥ वसुलक्षं जपेन्मंत्री सादिवचनात्॥ ॥अथ हरिहरमंत्रः॥ ॥तारो माया प्र
सादं रां करं॥ नारायणाय नमः॥ प्रासादं माया तारः॥ अस्य पूजा प्रातःकृत्यादि पूर्वोक्तं॥ शै
वोक्तं पीठं विधाय ऋष्यादिन्यासं कुर्यात्॥ शिरसि नारायणऋषये नमः॥ मुखे अनुष्टुप्छं
दसे नमः॥ हृदि हरिहराय देवतायै नमः॥ गुह्ये रौं बीजाय नमः॥ पादयोः क्रौं शक्तये नमः॥ त
तः करांगन्यासौ॥ ओं अंगुष्ठाभ्यां नमः॥ इत्यादि षड्दीर्घेण॥ एवं हृदयादिषु॥ ततो ध्यानं॥
शूलं चक्रं पांचजन्यं मनजीतिं दधतं करैः॥ स्वस्वभूषास्त्रजीनार्धदेहं हरिहरं जपेत्॥ १॥ ए
वं ध्यात्वा मानसैः संपूज्य रां खस्थापनं कुर्यात्॥ वैष्णवोक्तं शैवोक्तं वा पीठे पूजां विधाय पुन
र्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत्॥ केसरेषु आग्ना
दिकोणमध्ये दिक्षु च हृां हृदयाय नमः इत्यादिना पूजयेत्॥ ततः पत्रेषु पूर्वादिदिक्षु लक्ष्म्यै नमः॥
एवं नारायण्यै धरायै भूधरायै अंबिकायै अंबिकायै गंगायै गंगाधरायै॥ तद्बहिरिंद्रादीन्
पूजयेत्॥ अत्र वज्रादि पूजा नास्त्यनुक्तत्वात्॥ ततो धूपादि विसर्जनांतं कर्म समापयेत्॥ अ

स्य पुरश्चरणं लक्षजपः॥ घृतपायसेनायुतहोमः॥ तथा च॥ लक्षमेकं जपेन्मंत्रं तद्दशांशं घृत
प्लुतैः॥ पायसैर्हवनं कुर्याद्विसंस्कृते हव्यवाहने॥ ॥अथ वाराहमंत्रः॥ ॥ततो नमो भ
गवते वराहरूपाय भूर्भुवः स्वः पतये भूमिपतित्वं देहि ददापय ठद्वयं॥ अयं मंत्रस्त्रयस्त्रिंशा
दक्षरः॥ तारं नमो भगवते वराहपदमीरयेत्॥ रूपाय भूर्भुवः स्वः स्यात् पतये तदनंतरं॥
भूपतित्वं मे पदं तदेहि तेच ददापय॥ वह्निजाया वधिर्मंत्रस्यात्त्रयस्त्रिंशदक्षरः॥ अ
स्य पूजा प्रातःकृत्यादि वैष्णवोक्तपीठमन्त्रांतं विन्यस्य ऋष्यादिन्यासं कुर्यात्॥ शिरसि भार्गव
ऋषये नमः॥ मुखे अनुष्टुप्छंदसे नमः॥ हृदि आदिवराहाय देवतायै नमः॥ ततः करांग
न्यासौ॥ एकदंष्ट्राय अंगुष्ठाभ्यां नमः॥ व्योमोल्काय तर्जनीभ्यां स्वाहा॥ तेजोधिपतये मध्य
माभ्यां वषट्॥ विश्वरूपाय अनामिकाभ्यां हुं॥ महादंष्ट्राय कनिष्ठाभ्यां फट्॥ एवं हृदयादि
षु॥ ततो ध्यानं॥ आपादं जानुदेशाद्वरकनकनिभं नाभिदेशादधस्तान्मुक्ताभं कंठदेशात्त
रुणरविनिभं मस्तकान्नीलभासं॥ ईडे हस्तैर्दधानं रथचरणदरौ खड्गखेटौ गदाख्यं शक्ति

दांनाग्नयेचह्निति धरणंलसतुदंष्ट्रमाद्यंवराहं ॥१॥ एवंध्यात्वामानसैःसंपूज्यशंखस्थाप
नंकुर्यात् ॥ ततःपंचपुष्पांजलिदानंविधायावरणपूजामारभेत् ॥ पूर्वादिदिक्षुएकदंष्ट्रा
यहृदयायनमः ॥ व्योमोल्कायशिरसेस्वाहा ॥ तेजोधिपतयेशिखायैवषट् ॥ विश्वरूपाय
कवचायहुं ॥ अग्निनिरृतिवायुईशानकोणेषुमहादंष्ट्रायास्त्रायफट् ॥ तद्बहिःपत्रेषु ॐ चक्रा
यनमः ॥ ॐ खड्गायनमः ॥ ॐ शंखायनमः ॥ ॐ खेटायनमः ॥ ॐ गदायैनमः ॥ ॐ शक्त्यैनमः
ॐ वराहायनमः ॥ ॐ अनंतायनमः ॥ तद्बहिरिंद्रादीन्वज्रादींश्चपूजयेत् ॥ ततोधूपादिवि
सर्जांतिंकर्मसमापयेत् ॥ अस्यपुरश्चरणंलक्षजपः ॥ तथाच ॥ लक्षमेकंजपेन्मंत्रंमधुराक्तैः
सरोरुहैः ॥ जुहुयात्तद्दशांशेनपीठेविष्णुःप्रपूजयेत् ॥ विष्णुमंत्रंरात्रौनजपेत् ॥ तथाच
वैशंपायनसंहितायां ॥ नजपेद्वैष्णवंरात्रौशाक्तिमंत्रेनदुष्यति ॥ ॥इतिविष्णुप्रकाप
रिविदः ॥ ॥अथवनरूपंचाक्षरमंत्रः ॥ ॥सचतृतीयस्वरयुक्तकपिलहरेशानवाग्नि
ज्ञापकाः ॥ अस्यप्रजापतिःन्यासादिवैष्णवोक्तपीठांतंविन्यस्यऋष्यादिन्यासंकुर्यात् ॥ यथा

शिरसिरुद्रऋषयेनमः ॥ मुखेपंक्तिछंदसेनमः ॥ हृदिलक्ष्मीस्वायदेवतायेनमः ॥ प्रकरोबी
जं ॥ स्वाहाशक्तिः ॥ ततोंगन्यासः ॥ ज्ञानज्ञानमहामतिस्वाहा ॥ इतिअंकन्यकरत्वअंगुष्ठादि
कनिष्ठांतांगुलिषुमंत्रवर्णान्विन्यस्यपादकटिहृदयवक्त्रमूर्द्धमंत्रावलीन्यसेत् ॥ ध्यानं ॥
वर्णातीवह्नियुग्मादुरकमलगतंमंत्रमूर्तावधंगोकिप्रकैणकालीसैन्ययवरकरंपद्मने
त्रंत्ववक्त्रं ॥ त्वसाहिछिदितुंडस्मरदखिलविषप्रोबणप्राणभूतंप्राणामेमांद्विवेदिचित
महतेमयंपाहिराजन्नयत्वं ॥ एवंध्यात्वामानसैःसंपूज्यशंखस्थापनंकृत्वावैष्णवोक्तपीठ
मन्वंतेपीठंसंपूज्यपुनर्ध्यात्वावाह्यवक्त्रद्वयेद्वयेकंकारमध्यस्थंरूकारेकारबिंदुकबीजयु
क्तकर्णिकंस्वछंदाष्टकंकेसरेकचटतपयशानाष्टवर्गयुक्ताष्टदलेमातृकापद्मेपाहिराजन्पू
जयेत् ॥ पश्चांगैःप्रथमावरणं ॥ अनंतपाराम्नुक्तीनस्तकर्कोटकपद्ममहापद्मशंखकुलि
काष्टनागैर्द्वितीयावरणं ॥ इंद्रियादितुंडस्मरदखिलविषप्रोबणप्राणभूतंप्राणप्रेले
द्रियवेदान्ममृतमयंपाहिराज्ञांपतित्वं ॥२॥ एवंध्यात्वामानसैःसंपूज्यशंखस्थापनंह

त्वावैस्वयोरूपीठमन्वंतंपीठंसंप्रसपूनर्ध्यात्वाप्याह्यावकद्वयकुंकारमध्यस्थंआकारेणा
रबिंदुकेबीजंमुखकर्णिकंस्वदंदाष्टकंकेसरेयचरतपयशलाष्टयगंमुखाष्टदलेमात्रका
पमीपद्मिराजंपूजयेत्॥अंगैःप्रथमावरणं॥अनंतकतक्षककर्कोटकपद्ममहापद्मशं
खमहापातकुलिकाष्टनागेन्द्रैर्द्वितीयवल्लं॥इंद्राद्यादिभिस्तृतीयावरणं॥अस्यपुरश्चर
णंपंचलक्षंजपः॥अथवापुरश्चरणार्थंमूलमयुतंप्रत्येकंलक्षरसदसंख्यंमालामंत्रंसहस्रं
जपेत्॥घृताक्तैःकुसुमैर्दशांशंहोमः॥मालामंत्रोयथा॥नमोभगवतेगरुडायकाला
ग्निवर्णायएह्येहिकालानलतीक्ष्णवापातयपातयमोहयमोहयविद्रावयविद्रावयभ्रमभ्रम
सवभ्रामयहनहनदहदहपचपचकंफट्स्वाहा॥क्ष्वीरादिवसाध्यतत्रोभवर्णैपूर्वोक्तमात्रका
हरंमयममृतात्मकंस्वेतपद्मंविचिंत्यतन्मध्येदष्टंसंस्मृत्यदष्टस्यमूर्ध्नियंत्रंहृदयनाभिषुव
हंठवंइतिबीजंचतुष्टयममृतम्राविवत्वेनसंचिंत्यदष्टशिरसउपरिचंद्रकांतवर्णंसुधामयं
गरुडंध्यात्वातद्दत्तस्थितामृतपदितैरवनिर्गतामृतधारयादष्टप्लावयंतंगरुडंध्यायन्

मंत्रंजपेत्॥एवंध्यानमात्रेणदष्टनिर्विषस्सुमुखायचिरंजीवेत्॥ॐनमोभगवतेगरुडायमन
हेंद्ररूपायपर्वतशिखराकाररूपायसंहरसंहरमोचयमोचयचालयचालयपातयपा
तयनिर्विषनिर्विषविषममृतंचाहारस्पर्शरूपमिमंप्रशमयस्वाहानमः॥नजललचूय
चूयक्षिपक्षिपहरहरस्वाहा॥अनेनगरुडमंत्रेणमंत्रीगरुडोहत्वातिमंत्रितंस्नापयन्नह्वि
तमपिअमृतंतरतिकिमुतयन्नृपानाधिकं॥ ॥इतिगरुडमंत्राः॥ ॥अथविषहराग्निमं
त्रः॥ ॥सचविसर्गबिंदुयुक्तखकारकद्वयरूपः॥अस्यपूजाप्रातःकृत्यादिकंकृत्वारुष्यादि
न्यासंकुर्यात्॥शिरसिअग्नयेऋषयेनमः॥मुखेपंक्तिछंदसेनमः॥हृदिअग्नयेदेवतायेनमः
खकारोबीजं॥बिंदुःशक्तिदीर्घस्वरयुक्तखकारेणकरांगन्यासौकुर्यात्॥ध्यानार्चनेवैश्वान
रमंत्रवत्॥अस्यपुरश्चरणंद्वादशसहस्रजपस्तत्राज्येनदशांशहोमः॥स्ववामसतअजपंच
दलंश्वेतपद्मंध्यात्वातत्कर्णिकायांसविसर्गखकारंपंचदलेषुसानुस्वारखकारंध्यात्वारक्त
वर्णममृतवर्णंविचिंत्यतत्स्पर्शनाक्षरबीजंनाशयेत्॥इत्थंकृतकारणविषरोगस्थंसद्य

दष्टोत्तरशतंजपेत्सर्ववृश्चिकादिविषज्वरानागविसर्पपछादिकुनातकृयोगादेसर्ववेद
नांचनाशयेत्॥ ॥इतिविषहराग्निमंत्रः॥ ॥अथवृश्चिकादिविषहरमंत्रः॥ ॥सच
ॐसर्वस्फुंफुं॥ॐहिलिमिलिविश्वरुद्रहुं॥ॐहिलिहिलिचिलिचिलिफुः॥अश्वत्थेफुः॥सर्वेभ्योदेवे
भ्यस्फुः॥एतेवृश्चिकविषहराः॥ॐगंस्फुः॥इतिमूषिकविषहरमंत्रः॥ॐरावणेफुः॥ॐअश
यनेविषयनेफुः॥एतन्मंत्रंजप्त्वातसर्पपञ्चपान्मुखकनाशनं॥ॐह्रींक्रांक्रूंजगरुॐस्वाहा
गरुडसक्रूंफट्इतिदुर्गामंत्रः॥इतिलूताविषहरः॥ॐनमोभगवतेविष्णवेभवभवहनहन
फुंफट्स्वाहा॥इतिविष्णुमंत्रः॥सर्वकीटजातिविषहरमंत्रः॥ ॥अथहनुमत्कल्पं॥ ॥
देव्युवाच॥शैवानिशौनानिपद्यानिशाक्तानिवैष्णवानिच॥साधनानिचसौराणिचान्या
नियानितानिच॥श्रुतानिदेवदेवेशत्वद्वक्त्रान्निःसृतानिच॥किंचिदस्तीहदेवानांसाधना
दिचकथ्यतां॥शंकरउवाच॥ ॥शृणुदेविप्रवक्ष्यामिसावधानावधारय॥हनुमत्साध
नंपुण्यंमहापातकनाशनं॥एतद्गुह्यतमंलोकेशीघ्रसिद्धिकरंपरं॥जयोयस्यप्रसादेनजो

कत्रयंजितोभवेत्॥तत्साधनविधिंवक्ष्येनृणांसिद्धिकरंकृतं॥विपत्तूमकलंहनूमतेतदनं
तरंरुद्रात्मकायकवचंपश्चादितिद्वादशाक्षरः॥एतन्मंत्रंसमाख्यातंगोपनीयंप्रयत्नतः॥
नवक्तव्येनवत्तव्याचदासोस्मितवसुंदरि॥एतन्मंत्रंमहागोप्यंप्रदत्तंहविदास्वयं॥जपेनसा
धनंकृत्वाजितंसर्वंचराचरं॥मयागतंविष्णुगेहेनिर्जनेपर्वतेवने॥एकाग्रचित्तमा
दायसाधयेत्साधनंमहत्॥नहामेनंसमुत्कोपयाचन्नंवारणंप्रति॥तिष्ठतिहवनेदुष्ट
घोरशंगसमुद्भवं॥लाक्षारक्तारुणंरौद्रंकालांतकजनोपमं॥ज्वलदग्निसमंनेत्रंसूर्य
कोटिसमप्रभं॥अंगदाद्यैर्महावीरैःवेष्टितंरुद्ररूपिणं॥एवंरूपंहनुमंतंध्यात्वायःप्र
जपेद्बुधः॥लक्षंजपात्प्रसन्नःस्यात्सत्यंतेकथितंमया॥ध्यानैकमात्रतःपुंसांसिद्धिरेव
नसंशयः॥प्रातःस्नात्वानदीतीरेउपविश्यकुशासने॥प्राणायामंषडंगंचमूलेनसकलं
न्यसेत्॥पुष्पांजल्यष्टकंदत्वाध्यात्वारामंसमीतकं॥ताम्रपात्रेततःपद्ममष्टपत्रंसकेस
रं॥रक्तचंदनघृष्टेनलिखितस्मराशलाकया॥कर्णिकायांलिखेन्मंत्रंतत्रावाह्यकपिंप्रभुं

कर्णिकायां हनुमंतं ध्यात्वा पाद्यादिकं ततः ॥ गंधपुष्पादिकं चैव निवेद्यमूलकं ततः ॥ सुग्री
वं लक्ष्मणं चैव चांगदं नलनीलकं ॥ वायुवर्णं च कुमुदं केसरिणं दले दले ॥ पूर्वादिक
क्रमतो देवि पूजयेद्गंधचंदनैः ॥ पवनं चांजनीं चैव पूजयेद्दक्षवामतः ॥ दलाग्रेषु
कपिचोपि पुष्पांजल्यकं ततः ॥ ध्यात्वा मंत्रं जपेल्लक्षं तथा चैव कृतसाधकः ॥ जलादिव
संस्थाप्य कुर्याद्विपूजनं महत् ॥ एकाग्रचित्तमनसा तस्मिन् पवननंदने ॥ दिवारात्रौ ज
पं कुर्याद्यावत्संदर्शनं भवेत् ॥ सुदृढं साधनं मत्वा निशीथे पवनात्मजः ॥ सुप्रसन्नस्त
तो भूत्वा प्रजानि साधकाग्रतः ॥ यथेप्सितं वरं दत्वा साधकाय कपिप्रभुः ॥ वरं लब्ध्वा सा
धकेंद्रो विहरेदात्मनः सुखैः ॥ एतद्धि साधनं पुण्यं देवानामपि दुर्लभं ॥ तवस्नेहात्समा
ख्यातं उक्तासि मम पार्वति ॥ ॥इति गारुडतंत्रे देवीश्वरसंवादे हनुमत्कल्पः ॥ ॥ न
तः हनुमतो गुह्यं लिख्यते वीरसाधनं ॥ आलिप्य कृत्तिं उच्चाय कृतनित्यकृतो द्विजः ॥ गत्वा
नदीतत स्नात्वा तीर्थमावाह्य चाष्टधा ॥ मूलमंत्रं ततो जप्त्वा सिंचेदादित्यसंख्यया ॥ ततो

230

वासः परिधाय गंगातीरे पर्वतागिरौ ॥ उपविश्य ॐ अंगुष्ठाभ्यां नमः ॥ ॐ हृदयाय नमः
इत्यादिना करांगन्यासौ कुर्यात् ॥ तत्र योगाय अकारादिवर्णानुच्चारेण वामनासापुटेन
वायुं पूरयेत् ॥ पंचवर्गानुच्चरन् कुंभयेत् ॥ यकारादिवर्णानुच्चरन् वायुं रेचयेत् ॥ एवं वा
रत्रयं कृत्वा मंत्रैश्चैव स्मरेदंगन्यासं कुर्यात् ॥ ततो ध्यायेत् हनुमंतं कपिकोटिसमन्वितं ॥
ध्यायंतं रावणं जेतुं दृष्ट्वा सत्वरमुत्थितं ॥ लंघनं च महावीरं पतितं वर्णन्तले ॥ गुरुं च र
ह्राधमुत्पाद्य गृहीत्वा गुरुपर्वतं ॥ हाहाकारैः सदर्पैश्च कंपयंतं जगत्त्रयं ॥ आब्र
ह्मांडं च समाव्याप्य कृत्वा भीमं कलेवरं ॥ इति ध्यात्वा षट्सहस्रं जपेत् ॥ अस्य मंत्रः ॥ स्ववी
जं पूर्वमुच्चार्य पवनं च ततो वदेत् ॥ नंदनं च ततो देयं ङेवशानेन लप्रिया ॥ दशार्णेयं
मनुः प्रोक्तो नराणां सुरपादपः ॥ सप्तमदिवसे महानर्थं चैव त्रिभागशेषे गुनियतसाग
छति ॥ यदि साधको मायांतरति ईप्सितं वरं विद्यां वापि धनं वापि राज्यं वा शत्रुविग्रहं ॥ त
त्क्षणादेव माप्नोति सत्यं सत्यं सुनिश्चितं ॥ ॥इति हनुमत्कल्पः समाप्तः ॥ ॥ अथ शिव

231

मंत्राः॥ ॥अथ वक्ष्ये महेशस्य मंत्रान्सर्वसमृद्धिदान्॥ ये पूर्वमृषयः प्रोक्ताः शिवसायु
ज्यमंजसा॥ सांतमोंकारसंयुक्तं बिंदुमस्तकभूषितं॥ प्रासादाख्यो मनुः प्रोक्तो नजनतां का
मदो मनुः॥ अस्य पूजा प्रातःस्नानादि मात्रिकान्यासं प्राणायामं विधाय श्रीकंठन्यासं मातृ
कास्थानेषु कुर्यात्॥ तथाच निबंधे॥ श्रीकंठोनंतसूक्ष्मश्च त्रिमूर्तिरमरेश्वरः॥ अर्घीशो
भावभूतिश्च तिथीशः स्थाणुको हरः॥ झिंटीशो भौतिकः सद्योजातश्चानुग्रहेश्वरः॥ अक्रू
रश्च महासेनः स्मृतास्ता स्वरमूर्तयः॥ क्रोधीशश्च प्रचंडेशः पंचांतक शिवोत्तमाः॥ अथैक
रुद्र कूर्मैकनेत्रश्च चतुराननः॥ अजेशः सर्वलोकानां - - लांगलिदारुकौ॥ अर्द्धना
रीश्वरोमाकांतश्चाषाढिदंडिनौ॥ वरदत्रिनमेषाख्यलोहितश्च शिखी तथा॥ छगलंड
द्विरंडेशौ समहाकालि - - ॥ पिनाकी शरवडीशाश्च बकस्तथा॥ श्वेतो भृग्वीशनकुलि
शिवाः संवर्तकस्तथा॥ एते रुद्राः समाख्याताः धृतशूलकपालकास्तथा॥ तद्यथा॥ ॐ अं श्रीकंठ
पूर्णोदरीभ्यां नमः॥ आं अनंतविरजाभ्यां नमः॥ इं सूक्ष्मेशशाल्मलिभ्यां नमः॥ नमः स

र्वत्र॥ ईं त्रिमूर्तिलोलाक्षिभ्यां॥ उं अमरेश्वरवर्तुलाक्षिभ्यां॥ ऊं अर्घीशदीर्घघोणाभ्यां॥ ऋं भा
रभूतिसुदीर्घमुखीभ्यां॥ ॠं अतिथीशगोमुखीभ्यां॥ ऌं स्थाणुदीर्घजिह्विकाभ्यां॥ ॡं हरकुं
डोदरीभ्यां॥ एं झिंटीशोर्द्ध्वमुखीभ्यां॥ ऐं भौतिकेश्वरविकृतमुखीभ्यां॥ ओं सद्योजातज्वाला
मुखीभ्यां॥ औं अनुग्रहेश्वरोल्कामुखीभ्यां॥ अं अक्रूरश्रीमुखीभ्यां॥ अः महासेनविद्या
मुखीभ्यां॥ कं क्रोधीशसर्वसिद्धिमहाकालिभ्यां॥ खं चंडेशत्रिसिद्धिसरस्वतीभ्यां॥ गं पंचांत
कगौरीभ्यां॥ घं शिवोत्तमत्रैलोक्यविद्याभ्यां॥ ङं एकरुद्रमंत्रशक्तिभ्यां॥ चं कूर्मात्मकशक्ति
भ्यां॥ छं एकनेत्रभूतमातृकाभ्यां॥ जं चतुराननलंबोदरीभ्यां॥ झं गजेशद्राविणीभ्यां॥ ञं
सर्वनागरीभ्यां॥ टं सोमेशखेचरीभ्यां॥ ठं लांगलिमंजरीभ्यां॥ डं दारुकरूपिणीभ्यां॥
ढं अर्द्धनारीश्वरवीरिणीभ्यां॥ णं उमाकांतकाकोदरीभ्यां॥ तं आषाढीपूतनाभ्यां॥ थं दंडी
भद्रकालीभ्यां॥ दं अद्रियोगिनीभ्यां॥ धं मीनशंखिनीभ्यां॥ नं मेषगर्जिनीभ्यां॥ पं लोहित
कालरात्रिभ्यां॥ फं शिखिकुब्जिकाभ्यां॥ बं छगलंडकपर्दिनीभ्यां॥ भं द्विरंडवज्राभ्यां॥ मं महा

कालजयाम्भां॥यंत्वगात्मवालीसुमुखेश्वरीम्भां॥रंअसृगात्मभुजंगेशरेवतीम्भां॥लंमां
सात्मपिनाकीशमाधवीम्भां॥वंमेदात्मखड्गीशवारुणीम्भां॥शंअस्थ्यात्मकेशवायवी
म्भां॥षंमज्जात्मश्वेतवक्त्रोविदारिणीम्भां॥संशुक्रात्मतिथीशसहजाम्भां॥हंप्राणात्मकन
कुलीशलक्ष्मीम्भां॥ळंजीवात्मशिवव्यापिनीम्भां॥क्षंक्रोधात्मकसंवर्तकमायाम्भां॥त
थाचनिबंधे॥पूर्णोदरीस्याद्विरजाशाल्मलीतदनंतरं॥लोलाक्षीवर्तुलाक्षीचदीर्घघोण
समीरिता॥सुदीर्घमुखीगोमुख्यौदीर्घजिह्विकातथैवच॥ — — कुंडोदरीचतथाविकृत
मुख्यपि॥ज्वालामुखीततोज्ञेयापश्चादुल्कामुखीतथा॥सुश्रीमुखीविद्यामुख्यौएतास्वः
स्वरशक्तयः॥महाकाली — — — सौसर्वसिद्धिसमन्विते॥गौरीत्रैलोक्यविद्यास्यात्मंत्र
शक्तिस्ततःपरं॥आत्मशक्तिर्भूतमातातथालंबोदरीचया॥द्राविणीनागरीभूयःखेचरी
चापिमंजरी॥रूपिणीविरिणीपश्चात्काकोदर्यपिपूतना॥स्याद्भद्रकालीयोगिन्यौशंखिनि
गर्जिनीतथा॥कालरात्रीकुब्जिकाचकपर्दिनीवज्रयासह॥जयाचसुमुखेश्वर्यःरेवतीम

धवीतथा॥वारुणीवायवीप्रोक्तापश्चाद्वक्त्रोविदारिणी॥ततश्चसहजालक्ष्मीव्यापिनीमा
ययातथा॥एतारुद्रांशपीठस्थाःसिंदूरारुणविग्रहाः॥रक्तोत्पलकपालाभ्यामलंकृतकरां
बुजाः॥साहित्येद्विवचनबहुवचनेद्वंद्वसमासोवाइतिन्यायादविरोधइदमेववाक्यं॥ततः
सामान्यपद्मस्यकर्णिकापीठन्यासंकृत्वापीठशक्तिन्यसेत्॥यथा॥ॐवामायैनमः॥एवंज्येष्ठायै॥
रौद्र्यै॥काल्यै॥कलविकरिण्यै॥बलप्रमथिन्यै॥सर्वभूतदमन्यै॥एताःहृत्पद्मस्यपूर्वादिकेसरे
ष्वविन्यस्यमध्ये॥ॐनमोमनोन्मन्यैनमः॥तथाचनिबंधे॥वामाज्येष्ठाततोरौद्रीकालीकलप
दादिका॥विकरिण्याख्याप्रोक्ताबलाद्याविकरिण्यथ॥बलप्रमथनीपश्चात्सर्वभूतदमन
न्यपि॥मनोन्मनीतिसंप्रोक्ताःशैवपीठस्यशक्तयः॥वामदेवोमुनिश्छंदःपंक्तिर्देवःसदाशि
वः॥ईशानाद्यास्तसेन्मूर्त्तिरंगुलादिषुचक्रमात्॥तदुपरिॐनमोभगवतेसकलगुणात्म
शक्तियुक्तायअनंताययोगपीठात्मनेनमः॥ततःऋष्यादिन्यासः॥शिरसिवामदेवऋष
येनमः॥मुखेपंक्तिछंदसेनमः॥हृदिसदाशिवायदेवतायैनमः॥ततःकरांगन्यासौ॥हां

अंगुष्ठाभ्यां नमः॥ हां हृदयाय नमः॥ इत्यादि षडंग दीर्घयुक्तेन न्यसेत्॥ ततईशानाद्याः पंच
मूर्त्तिर्न्यसेत्॥ यथा॥ अंगुष्ठयोर्हं ईशानाय॥ तर्जन्योर्हं तत्पुरुषाय नमः॥ मध्यमयोः हुं अ
घोराय नमः॥ अनामिकयोः हं वामदेवाय नमः॥ कनिष्ठिकयोः हं सद्योजाताय नमः॥ तत
स्तदंगुलीभिः हं ईशानाय नमः इति शिरो वदन हृद्गुह्यपदेषु मूर्त्तिर्न्यसेत्॥ ततऊर्ध्वादि दक्षि
णोत्तर पश्चिमेषु तत्तदंगुलीभिः तत्तद्बीजैस्तत्तन्मूर्त्तिर्न्यसेत्॥ स्वदस्फट तत्पर्यंतं न्यासं कृत्वा
ध्यायेत्॥ अस्य ज्ञानाधिकारात्॥ ततोर्ध्व पूर्व दक्षिण पश्चिमोत्तर मुखेषु ईशानस्य पंचक
लाब्रह्मरूच पंचपदादिकाः प्रणवाद्या नमोंता न्यसेत्॥ तद्यथा॥ ॐ ईशानः सर्वविद्यानां॥
ॐ शशिन्यै कलायै नमः॥ ईश्वरः सर्वभूतानां॥ ॐ अंगदायै कलायै नमः॥ ॐ ब्रह्माधिपति
र्ब्रह्मणोधिपतिः॥ ॐ इष्टदायै कलायै नमः॥ ॐ शिवोमेस्तु॥ ॐ मरीच्यै कलायै नमः॥ ॐ सदा
शिवो॥ ॐ अंशुमालिन्यै कलायै नमः॥ ततः पूर्व पश्चिम दक्षिणोत्तर वक्त्रेषु तत्पुरुषस्य
चतस्रः कला न्यसेत्॥ यथा ॐ तत्पुरुषाय विद्महे॥ ॐ शांत्यै कलायै नमः॥ महादेवाय धीम

हि॥ ॐ विद्यायै कलायै नमः॥ तन्नो रुद्रः ॐ प्रतिष्ठायै कलायै नमः॥ प्रचोदयात् ॐ निवृत्यै कला
यै नमः॥ ततो हृदय ग्रीवायां॥ अंसद्वये नाभौ कुक्षौ पृष्ठे वक्षसि अघोरस्याष्ट कला न्यसेत्
ॐ अघोरेभ्यः ॐ तमायै कलायै नमः॥ अथ घोरेभ्यः ॐ मोहायै कलायै नमः॥ घोर ॐ क्षमायै
कलायै नमः॥ घोरतरेभ्यः ॐ निद्रायै कलायै नमः॥ सर्वतः सर्व ॐ व्याधायै कलायै नमः॥
ततो गुह्य गुल्फद्वये ऊरुद्वये जानुद्वये जंघाद्वये स्फिक्द्वये कट्यां पार्श्वयोः॥ वामदेवस्य त्र
योदश कला न्यसेत्॥ यथा॥ ॐ वामदेवाय नमः॥ ॐ रजायै कलायै नमः॥ ॐ ज्येष्ठाय नमः॥
ॐ रक्षायै कलायै नमः॥ ॐ रुद्राय नमः॥ ॐ रत्यै कलायै नमः॥ ॐ कालाय ॐ पालिन्यै कलायै
नमः॥ ॐ कल ॐ कामायै कलायै नमः॥ ॐ विकरणाय ॐ संयामिन्यै कलायै नमः॥ ॐ बल ॐ क्रि
यायै कलायै नमः॥ ॐ विकरणाय ॐ बुध्यै कलायै नमः॥ ॐ बल ॐ स्थिरायै कलायै नमः
ॐ प्रमथनाय नमः ॐ रात्र्यै कलायै नमः॥ ॐ सर्वभूतदमनाय नमः ॐ भ्रामण्यै कलायै न
मः॥ ॐ उन्मनाय नमः ॐ ज्वरायै कलायै नमः॥ ततः पार्श्वयोस्तनयोर्नासिकायां मूर्ध्नि बा

कपुष्पेसद्योजातस्याष्टौकलान्यसेत्॥यथा॥ॐसद्योजातंप्रपद्यामिॐसिद्ध्यैकलायैनमः
ॐसद्योजातायवैनमः॥ॐऋद्ध्यैकलायै॥ॐभवेॐभूत्यैकलायैनमः॥ॐअभवेॐलक्ष्म्यैक
लायैनमः॥ॐअनादिभवेॐमेधायैकलायैनमः॥ॐभजस्वमांॐप्रज्ञायैकलायैनमः॥
ॐभवॐप्रभायैकलायैनमः॥ॐउद्भवायनमः॥ॐसुधायैकलायैनमः॥ततःपंचांगु
लीषुईशानाद्याःपंचरुचोन्यसेत्॥तद्यथा॥ॐईशानःसर्वविद्यानांब्रह्माधिपतिर्ब्रह्म
णोधिपतिर्ब्रह्माशिवोमेस्तुसदाशिवों॥१॥ॐतत्पुरुषायविद्महेमहादेवायधीमहितन्नोरुद्रः
प्रचोदयात्॥२॥ॐअघोरेभ्योथघोरतरेभ्यःसर्वतःसर्वेभ्योनमस्तेस्तुरुद्ररूपेभ्यः॥३॥ॐवा
मदेवायनमोज्येष्ठायनमोरुद्रायनमःकालायकलविकरणायनमोबलप्रमथनायनमः
सर्वभूतदमनायनमःउन्मनायनमः॥४॥ॐसद्योजातंप्रपद्यामिसद्योजातायवैनमः॥
भवेभवेनातिभवेभजस्वमांभवोद्भवायनमः॥५॥एवंमूर्ध्निआस्येहृदयेगुह्यपादे
षुतारुचोन्यसेत्॥ततोंगन्यासानंतरंकुर्यात्॥तद्यथा॥ऐंह्रींश्रींह्सौःसर्वज्ञायहृदया

यनमः॥अमृततेजोमालिनिनित्यतृप्तयेब्रह्मशिरसेस्वाहा॥ज्वलितशिखिशिखाय
अनादिबोधायशिखायैवषट्॥वज्रिणेअनंतशक्तयेअस्त्रायफट्॥एवंविन्यस्यध्या
येत्॥तद्यथा॥मुक्तापीतपयोदमौक्तिकजवावर्णैर्मुखैःपंचभिःत्र्यक्षैरंचितमीशमिं
दुमुकुटंपूर्णेंदुकोटिप्रभं॥शूलंटंककृपाणवज्रदहनान्नागेंद्रघंटांकुशान्पाशंभीति
हरंदधानममिताकल्पोज्ज्वलांगंभजे॥१॥एवंध्यात्वामानसैःसंपूज्यशंखस्थापनंकुर्या
त्॥अत्रशंखनिषेधः॥सर्वत्रैवप्रशस्तोब्जःशिवेसूर्यार्चनेविनेतिवचनात्॥ततःशै
वोक्तपाद्यदानंविधायपुनरावाहनादिपंचपुष्पांजलिदानपर्यंतंविधायावरणपू
जामारभेत्॥यथाऐशान्यांॐईशानायनमः॥पूर्वेॐतत्पुरुषायनमः॥दक्षिणेॐअघोरा
यनमः॥उत्तरेॐवामदेवायनमः॥पश्चिमेॐसद्योजातायनमः॥ततःईशानादिकोणे
षुॐनिवृत्यैनमः॥ॐप्रतिष्ठायैनमः॥ॐविद्यायैनमः॥ॐशांत्यैनमः॥ततोष्टपत्रेषुपूर्वादि
रूपातसितारक्तकृष्णारक्तांजनासितान्॥किरीटार्पितबालेंदुपमास्यात्रिनयनान्वितान्

त्रिनेत्रांस्सजहस्तांश्चचापहस्तान्मनोहरान्॥ ॐ अनंतायनमः॥ ॐ सूक्ष्मायनमः॥ ॐ शि
वोत्तमायनमः॥ ॐ एकनेत्रायनमः॥ ॐ एकरुद्रायनमः॥ ॐ त्रिमूर्त्तयेनमः॥ ॐ श्रीकंठायन
मः॥ ॐ शिखंडिनेनमः॥ तद्बाह्येउत्तरादिक्रमेण ॐ उमायेनमः॥ ॐ चंडेश्वरायनमः॥ ॐ नं
दिनेनमः॥ ॐ महाकालायनमः॥ ॐ गणेशायनमः॥ ॐ वृषायनमः॥ ॐ भृंगरीटयेनमः
ॐ स्कंधायनमः॥ तद्बाह्येपूर्वोक्तक्रमेण इंद्रादीन्वज्रादींश्चपूजयेत्॥ ततोधूपादिविस
र्जनांतंकर्मसमापयेत्॥ अस्यपुरश्चरणंपंचलक्षजपः॥ तथाच॥ एवंध्यात्वाजपेन्मंत्रंपंच
लक्षंमधुप्लुतैः॥ प्रसूनैःकरवीराद्यैर्जुहुयात्तद्दशांशतः॥ भुवनेशप्रणयेनमःशिवायभुव
नेशीपुनरस्यरुद्रोमनुः॥ षडक्षरःशांतिरूढःकथितोभष्टरःपरः॥ अस्यपूजाप्रातःकृ
त्यादिपूर्वोक्तपीठन्यासंविधायऋष्यादिन्यासंकुर्यात्॥ तद्यथा॥ शिरसि ॐ वामदेवायऋ
षयेनमः॥ मुखेपंक्तिछंदसेनमः॥ हृदिउमापतयेदेवतायेनमः॥ ततःकरांगन्यासौ॥ ॐ
अंगुष्ठाभ्यांनमः॥ नंतर्जनीभ्यांनमः॥ स्वाहामध्यमाभ्यांवषट्॥ शिंअनामिकाभ्यांहुं॥ वां

कनिष्ठाभ्यांवौषट्॥ यंकरतलपृष्ठाभ्यांफट्॥ एवंहृदयादिषु॥ ततोध्यानं॥ बंधूकाभंत्रिनेत्रं
शशिकलधरंस्मेरवक्त्रंवहंतंहस्तैःशूलंकपालंवरदमभययंचारुहासंनमामि॥ वामो
रुस्थंतनगयाकरतलविलसत्चारुरक्तोत्पलायाहस्तेनाश्लिष्टदेहंमणिमयविलसद्भू
षणयाप्रियाया॥१॥ एवंध्यात्वामानसैःसंपूज्यशंखस्थापनंकृत्वाशैवोक्तपीठपूजांवि
धायपुनर्ध्यात्वावाहनादिपंचपुष्पांजलिंविधायावरणपूजामारभेत्॥ पुष्पाकेसरेषु॥
अग्निनिरृतिवायुईशानकोणमध्येषुचतुर्दिक्षुच ॐ हृदयायनमः॥ नंशिरसेस्वाहा॥ मं
शिखायैवषट्॥ शिंकवचायहुं॥ वांनेत्रत्रयायवौषट्॥ शिंकवचायहुं॥ यांनेत्रत्रयाय
वौषट्॥ ततोमध्येपूर्वादिदिक्षुच॥ ॐ हृल्लेखायेनमः॥ एवंगगनायेनमः॥ रक्तायेनमः॥
करालिकायै॥ महोत्स्काये॥ ततःपत्रेषुपूर्वादिदिवमादीन्पूजयेत्॥ ॐ वमायनमः॥ एवं
क्षेत्रपालायनमः॥ दुर्गायै॥ कार्त्तिकेयाय॥ नंदिने॥ विघ्ननायकाय॥ रुपामाय॥ सेनापतये॥
ततःपूर्ववत्॥ पत्राग्रेउमादीन्पूजयेत्॥ तद्बाह्येअष्टाष्टमातरःपूज्याः॥ तद्बहिरिंद्रादीन्

वक्त्रादींश्च पूजयेत्॥ ततो धूपादिविसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं चतुर्दशल
क्षजपः॥ तथा च॥ मनुलक्षं जपेन्मंत्री तद्दशांशं यथाविधि॥ जुहुयान्मधुरासिक्तैरारग्व
धसमिद्वरैः॥ आरग्वधः शोणालुरिति ख्यातः॥ तथा च निबंधे॥ तारो माया वियद्बिंदुमनुस्वा
रसमन्वितं॥ पंचाक्षरः समाख्यातो यस्तु वर्णो मनुर्मतः॥ अस्य पूजा प्रातःकृत्यादिपीठोक्तपी
ठन्यासांतं विधाय पूर्वमंत्रवत्॥ ऋष्यादिन्यासकरांगन्यासौ च कुर्यात्॥ ततो ध्यानं यथा
वंदे सिंदूरवर्णं मणिमुकुटलसच्चारुचंद्रावतंसं नालोद्यन्नेत्रमादौ स्मितमुखकमलं दिव्य
भूषांगरागं॥ वामोरुन्यस्तपाणेररुणकुवलयं संदधत्याः प्रियायाः वृत्तोत्तुंगस्तनाग्रे नि
हितकरतलं वेददंडेषु हस्तं॥ १॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनादि पीठपूजांतं वि
धाय पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजां कुर्यात्॥ पूर्व
वदंगानि संपूज्य पत्रेषु अनंतादीन् पत्राग्रेषु ब्रह्मादीन् पूजयेत्॥ तद्बहिरिंद्रादीन् वज्रा
दींश्च पूजयेत्॥ ततो धूपादिविसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं अष्टलक्षजपः॥

तथा च॥ वसुलक्षं जपेन्मंत्रं मंत्री मंत्रविदां वरः॥ तत्सहस्रं प्रजुहुयात् पायसान्नैर्घृतप्लु
तैः॥ तारः स्थिरा वामकर्णो भृगुः सर्गसमन्वितः॥ स्यादुराज्ञा निगदितो मंत्रो मृत्युंजया
त्मकः॥ स्थिरा ठकारः॥ वामकर्ण ऊकारः॥ भृगुः सकारः॥ अस्य पूजा प्रातःकृत्यादिपीठो
क्तपीठन्यासांतं विधाय ऋष्यादिन्यासं कुर्यात्॥ यथा॥ शिरसि कहोलऋषये नमः॥ मु
खे देवीगायत्रीछंदसे नमः॥ हृदि मृत्युंजयाय देवतायै नमः॥ ततः करांगन्यासौ॥ यथा॥
सां अंगुष्ठाभ्यां नमः॥ सीं तर्जनीभ्यां स्वाहा॥ सूं मध्यमाभ्यां वषट्॥ सैं अनामिकाभ्यां हुं॥ सौं
कनिष्ठाभ्यां वौषट्॥ सः करतलपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ तथा च निबंधे॥ तारव्यहैः
स्वरैर्दीर्घैर्बिंद्वंगानि कल्पयेत्॥ अथवा मंत्रसंभूतैः पदैर्वा कल्पयेत्क्रमात्॥ भृगुणा
दीर्घयुक्तेन कुर्यादंगक्रियां मनोः॥ ततो ध्यानं॥ चंद्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयां
तःस्थितं मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभं॥ कोटीचंद्रगलत्सुधाप्लुततनुं
हारादिभूषोज्ज्वलं कांत्या विश्वविमोहनं पशुपतिं मृत्युंजयं भावये॥ १॥ एवं ध्यात्वा मान

सैः संप्रसरां खस्थापनादिपीठपूजां विधाय पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदान
पर्यंतं विधायावरणपूजामारभेत्॥ तद्यथा॥ केसरेषु अग्निनिरृतिवायुईशानकोणे
षु मध्येदिक्षु च सां हृदयाय नमः इत्यादि संपूज्य तद्बहिर्दिक्षु दादीन् वज्रादींश्च पूजयेत्॥ ततो
धूपादिविसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं लक्षत्रयजपः॥ तथा गुणलक्षं जपे
न्मंत्रं तद्दशांशं विशालधीः॥ जुहुयादमृताखंडैः मधुरदुग्धाज्यलोडितैः॥ प्रणवो हृदयं
पश्चात्तनो भगवते पदं॥ दक्षिणामूर्तिमह्यं मेधामुदीरयेत्॥ प्रयच्छ ठद्वयांतो यं षो
विंशत्यक्षरो मनुः॥ अस्य पूजा प्रातःकृत्यादिशैवोक्तपीठमन्वंतं विन्यस्य ऋष्यादिन्यासं कु
र्यात्॥ यथा॥ शिरसि चतुर्मुखऋषये नमः॥ मुखे देवीगायत्रीछंदसे नमः॥ हृदि दक्षिण
मूर्तये देवतायै नमः॥ ततः करांगन्यासौ॥ ॐ आं ॐ अंगुष्ठाभ्यां नमः॥ ॐ ईं ॐ तर्जनीभ्यां स्वा
हा॥ ॐ ऊं ॐ मध्यमाभ्यां वषट्॥ ॐ ऐं ॐ अनामिकाभ्यां हुं॥ ॐ औं ॐ कनिष्ठाभ्यां वौषट्॥ ॐ अः
ॐ करतलपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ तथा च निबंधे॥ तारुरुद्धैः स्वरैर्दीर्घैः बद्धैरंगं॥

निकल्पयेत्॥ अथवा मंत्रसंभूतैः पदैर्वा कल्पयेत् क्रमात्॥ ततो ध्यानं॥ वटद्रुमं महोन्न
यं पद्मरागफलोज्ज्वलं॥ गारुत्मतमयैः पत्रैः विचित्रैरुपशोभितं॥१॥ नवरत्नमहाकल्पै
रम्यमानैरलंकृतं॥ विचिंत्य वटमूलस्थं चिंतयेल्लोकनायकं॥२॥ स्फटिकरजतवर्णं मौक्ति
कीमक्षमालाममृतकलशविद्याज्ञानमुद्राः कराब्जैः॥ दधतमुरगकक्षं चंद्रचूडं त्रिनेत्रं
विधृतविबुधभूषं दक्षिणामूर्तिमीडे॥३॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनादि
शैवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतं विधायावर
णपूजामारभेत्॥ केसरेषु अग्निनिरृतिवायुईशानकोणेषु मध्ये दिक्षु च॥ ॐ आं अं हृ
दयाय नमः॥ इत्यादि पूजयेत्॥ पत्रेषु पूर्वादि॥ ॐ सरस्वत्यै नमः॥ एवं ब्रह्मणे॥ सनका
य सनंदनाय॥ सनातनाय॥ शुकाय व्यासाय॥ गणेश्वराय॥ तद्बहिः पूर्वादि सिद्धये॥
गंधर्वाय॥ योगीशाय॥ विद्याधराय॥ तद्बहिर्दिक्षु दादीन् वज्रादींश्च पूजयेत्॥ ततो धूपा
दिविसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं लक्षद्वयं जपः॥ तथा च॥ लक्षमेकं जपेन्मं

तं ब्रह्मचारी व्रतेस्थितः॥ कुर्यात्त्रसघृतैः पद्मैर्दशांशं संस्कृतेनले॥२॥ अग्निसंवर्तका
दित्यपातिसोमवह्निबिंदुमत्॥ चिंतामणिरितिख्यातं बीजं सर्वसमृद्धिदं॥२॥ अग्निरेफः॥ सं
वर्तकः ककारः॥ आदित्यो मकारः॥ अनिलो यकारः॥ वह्निरौकारः॥ अस्य पूजा प्रातः कृत्वा
दिशैवोक्तपीठमन्वंते विन्यस्य ऋष्यादिन्यासं कुर्यात्॥ यथा॥ शिरसि कश्यपऋषये नमः॥
मुखे अनुष्टुप्छंदसे नमः॥ हृदि अर्द्धनारीश्वराय देवतायै नमः॥ ततः करांगन्यासौ॥ रं
अंगुष्ठाभ्यां नमः॥ कं तर्जनीभ्यां स्वाहा॥ यं मध्यमाभ्यां वषट्॥ सं अनामिकाभ्यां हुं॥ वं कनि
ष्ठिकाभ्यां वौषट्॥ यं करतलपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ रेफादिवर्णैर्नैः षड्भिः कुर्यादंगा
नि षट् क्रमात्॥ ततो ध्यानं॥ नीलप्रवालरुचिरं विलसत्त्रिनेत्रं पाशारुणोत्पलकपाल
कशूलहस्तं॥ अर्द्धांबिकेशमनिशं प्रविभक्तभूषं बालेंदुबद्धमुकुटं प्रणमामि रूपं॥१॥ ए
वं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ ततः शैवोक्तपीठपूजां विधाय पुनर्ध्यात्वावा
हनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत॥ तद्यथा॥ केसरेषु अग्निनि

ऋतिवाय्वीशानकोणेषु मध्ये दिक्षु च रं हृदयाय नमः॥ इत्यादीन् पूजयेत्॥ ततः पत्रेषु पूर्व
वत् वज्रादीन् पत्राग्रेषु पूर्वादि ब्राह्मी माहेश्वरी कौमारी वैष्णवी वाराही इंद्राणी चामुंडा
महालक्ष्मीश्च पूजयेत्॥ तद्बहिरिंद्रादीन् वज्रादींश्च पूजयेत्॥ ततो धूपदीपादि विसर्जनांतं
कर्म समापयेत्॥ अस्य पुरश्चरणं लक्षजपः॥ तथा च॥ लक्षमेकं जपेद्बीजमिष्टं मंत्री वि
चिंतयन्॥ अयुतं मधुरासिक्तैर्जुहुयात्तिलतंदुलैः॥ पार्श्वो वह्निसमारूढस्सारनादा
ख्यबीजकं॥ धांतो वह्निसमारूढः स्तुर्यस्वरसमन्वितः॥ बिंदुमानद्वितीयं स्यात् दंतेसगि
तृतीयकं॥ नीलकंठात्मको मंत्रो विषद्वयहरः परः॥ अस्य पूजा प्रातः कृत्वा दिशैवोक्तपी
ठन्यासं विधाय ऋष्यादिन्यासं कुर्यात्॥ शिरसि अरुणऋषये नमः॥ मुखे त्रिष्टुप्छंदसे न
मः॥ हृदि नीलकंठाय देवतायै नमः॥ ततः करांगन्यासौ॥ यथा हर हर स्वाहा अंगुष्ठाभ्यां
नमः॥ कपर्दिने स्वाहा तर्जनीभ्यां स्वाहा॥ नीलकंठाय स्वाहा मध्यमाभ्यां वषट्॥ कालकूट
विषभक्षणाय हुं फट् अनामिकाभ्यां हुं॥ नीलकंठाय स्वाहा कनिष्ठाभ्यां फट्॥ एवं हृदयादिषु

मावरणं॥ इंद्रादिभिर्द्वितीयं॥ वज्रादिभिस्तृतीयं॥ ततो धूपादिविसर्जनांतं कर्म समापयेत्॥ अ
स्य पुरश्चरणं त्रिलक्षजपः॥ तथा च॥ गुणलक्षं जपेन्मंत्रं होमं कुर्याद्दशांशतः॥ मधुरत्रयसं
सिक्तैः सुमकुंदैस्तिलतंडुलैः॥ ॥इति शिवमंत्राः॥ ॥अथ क्षेत्रपालमंत्राः॥ ॥मंत्र
देवप्रकाशिकायां॥ स च क्षौमिति बीजादि क्षेत्रपालाय इत्युपेतनमोंतं प्रणवादिरयं मंत्रः॥
तथा च॥ वर्णास्त्रमो बिंदुयुक्तं क्षेत्रपालाय हृन्मनुः॥ ताराद्योरंध्रवर्णोयं क्षेत्रपालस्य ईरितः
अस्य पूजा प्रातःकृत्यादि प्राणायामांतं विधाय धर्मादिकल्पितपीठं विन्यस्य ऋष्यादिन्यासं कुर्या
त्॥ अस्य ब्रह्म ऋषिर्गायत्री छंदः॥ क्षेत्रपालो देवता क्षौमिति बीजं आयेति शक्तिः॥ बीजेनैवां
गन्यासः॥ ततो ध्यानं॥ भ्राजच्चंद्रजटाधरं त्रिनयनं नीलांजनाद्रिप्रभं दोर्दंडात्तगदाकपालम
रुणस्रग्वस्त्रगंधोज्वलं॥ घंटामेखलघर्घरध्वनिमिलत्झंकारभीमं विभुं वंदे निहितसर्पकुंडल
धरं श्रीक्षेत्रपालं सदा॥१॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ ततो धर्मादिपी
ठपूजां कृत्वा पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत्॥ त

पथ्या॥ अस्त्रैः प्रथमावरणं॥ अनलाह्वमग्निकेशाकरालघंटारवमहाक्रोधं॥ पिशिताशनपिं
गलाद्योर्द्धकैरीरणैर्द्वितीयं॥ इंद्रादिभिस्तृतीयं॥ वज्रादिभिश्चतुर्थं॥ अस्य पुरश्चरणं ल
क्षजपः॥ आज्येन चरुणा दशांशहोमः॥ तथा च शारदायां॥ लक्षमेकं जपेन्मंत्रं तु कृत्वा तद्दशां
शतः॥ चरुणा घृतसिक्तेन ततः क्षेत्रेशमर्चयेत्॥ मंत्रदेवप्रकाशिकायां तु॥ प्रणवसहितोमं
त्रः॥ तस्य पुरश्चरणं अयुतसंख्याजपः॥ ततो बलिविधिः॥ ॥रात्रौ गृहांगणे स्थंडिलं कृत्वा
तत्र देवं सपरिवारं संपूज्य देवस्य कपाले बलिमंत्रेण त्रिवारं बलिं दत्वा परिवारगणेभ्य
ः स्वस्वनामभिर्बलिं दद्यात्॥ बलिमंत्रस्तु॥ एह्येहि विदुर्विस्वरूप नंजयरनचर विघ्नपर
महाभैरव क्षेत्रपाल बलिं गृह्ण स्वाहा॥ यद्वा एह्येहि रुद्ररूप नंजय रहनर विघ्नं नाशय
महाबलिर्यं क्षेत्रपाल गृह्ण स्वाहा॥ बलिमपि सोपदंशं बृहत्पिंडनं कुर्यात्॥ फलं तु॥ ब
लिदानेन संतुष्टः क्षेत्रपाल गृह्ण स्वाहा॥ प्रयच्छति॥ कांतिमेधाबलारोग्यं तेजः पुष्टियशः
श्रियः॥ ॥अथ वटुकमंत्राः॥ ॥तत्र निबंधे॥ उद्धरेत् वटुकं जैं तं आपदुद्धारणं त

मस्तके प्रों नमः॥ कंठे त्रीं नमः॥ हृदि ठः नमः॥ ततो ध्यानं॥ बालार्कायुततेजसं धृतजटाजूटेंदु
खंडोज्ज्वलं नागेंद्रैः कृतशेखरं जपवटीं शूलं कपालं करैः॥ खट्वांगं दधतं त्रिनेत्रविलसत्पं
चाननं सुंदरं व्याघ्रत्वक्परिधानमब्जनिलयं श्रीनीलकंठं भजे॥१॥ एवं ध्यात्वा मानसैः
संपूज्य शंखस्थापनं कुर्यात्॥ शैवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादि चपुष्पांज
लिदानपर्यंतं विधाय आवरणपूजामारभेत्॥ ततः केसरेषु अग्न्यादिकोणेषु दिक्षु हर हर
हरयाय नमः॥ इत्यादि पूजयेत्॥ ततः इंद्रादीन् वज्रादींश्च संपूज्य धूपादि विसर्जांतं कर्म
समापयेत्॥ अस्य पुरश्चरणं त्रिजक्षं जपः॥ तथा च॥ लक्षत्रयं जपेन्मंत्रं तद्दशांशं सस
र्पिषा॥ हविषा जुहुयात् सम्यक् संस्कृते हव्यवाहने॥ प्रणवो हृन्नीलकंठाय नमः शाद्व
रः॥ अस्य पूजादिकं सर्वं पूर्ववत्॥ शिरो अस्य ब्रह्मऋषिर्गायत्री छंदः॥ हृदयरूपरंसा
हिनां गोनं तान्वितो मरुत्॥ पंचाक्षरो मनुः प्रोक्तस्ताराद्योयं षडक्षरः॥ अस्य पूजा प्रयो
गः॥ प्रातः कृत्यादि शैवोक्तपीठमभ्यर्च्य तं कर्म समाप्य ऋष्यादिन्यासं कुर्यात्॥ तद्यथा॥ शि

रसि वामदेवऋषये नमः॥ मुखे पंक्तिछंदसे नमः॥ हृदि ईशानाय देवतायै नमः॥ ततो मूर्त्तिन्या
सः॥ तर्जन्योः तत्पुरुषाय नमः॥ मध्यमयोः अघोराय नमः॥ कनिष्ठयोः सद्योजाताय नमः॥
अनामिकयोः वामदेवाय नमः॥ अंगुष्ठयोः ईशानाय नमः॥ तथा च निबंधे॥ मंत्रवर्णा
दिकान्न्यसेत्॥ पंचमूर्त्तिर्यथाक्रमं॥ तर्जनीमध्यमयो रत्नानामिकांगुष्ठके पुनः॥ एवं वक्त्रे हृदये
पादे गुह्ये मूर्ध्नि तान्न्यसेत्॥ एवं प्राग्याम्योदीच्यवारुणमध्यवक्त्रेषु तान्न्यसेत्॥ ततः करांगन्यासौ॥
ॐ अंगुष्ठाभ्यां नमः॥ नं तर्जनीभ्यां स्वाहेत्यादि॥ एवं हृदयादिषु॥ तथा च निबंधे॥ बह्निर्वर्णैः ष
डंगानि कुर्यान्मंत्रस्य देशिकः॥ ततो गोलकन्यासः॥ हृदि ॐ नमः॥ वक्त्रे नं नमः॥ अंसयोः मं
नमः॥ हृदि शिं नमः॥ ऊर्वोः वां नमः॥ यं नमः॥ एवं कंठनाभौ पार्श्वद्वये पृष्ठे हृदि एवं मूर्ध्नि वदने ने
त्रयोर्नसोः॥ एवं करपत्संधिषु साग्रेषु॥ एवं शिरोवदनहृत्कुक्षिऊरुपद्वये एवं वक्त्रे दं
सं मृगाक्षे यथदेषु॥ एवं वक्त्रांसकृत्पादोरुजठरेषु॥ तथा मूर्ध्नि ललाटोदरास्यहृदयेषु ता
पंचमूर्त्तीन्न्यसेत्॥ अनेन व्यापकं कुर्यात्॥ नमोस्तु स्थाणुभूताय ज्योतिर्लिंगामृतात्मने॥

चतुर्मूर्त्तिं विपूज्याथ ज्ञाविताङ्गायसंज्ञवे॥ ततो ध्यायेत्॥ ध्यायेन्नित्यं महेशं रजतगिरिनिभं
चारुचंद्रावतंसं रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नं॥ पद्मासीनं समंतात्
स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्वरूपं निखिलभयहरं पंचवक्त्रं त्रिनेत्रं॥१॥
एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्॥ ततः शैवोक्तपीठपूजां विधायावरणपूजा
मारभेत्॥ तद्यथा॥ कर्णिकायां पूर्ववदीशानादिपंचमूर्त्तीः संपूज्य कोणेषु निवृत्त्यादिकलाः
पूर्ववत् पूज्याः॥ ततोऽग्निनिर्ऋतिवायुईशानमध्यदिक्षु च षडंगानि पूजयेत्॥ तद्यथा॥ ॐ हृद
याय नमः॥ नं शिरसे स्वाहा॥ मः शिखायै वषट्॥ शिं कवचाय हुं॥ वां नेत्रत्रयाय वौषट्॥
यं अस्त्राय फट्॥ ततः पूर्ववत् अनंतादीन् पूजयेत्॥ ततः उत्तरादि उमादीन् पूजयेत्॥ तद्बा
ह्ये इंद्रादीन् वज्रादींश्च पूजयेत्॥ ततो धूपादिविसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं ष
ड्विंशल्लक्षजपः॥ पायसैराज्यसंमिश्रैः षड्विंशात्तत्वमुच्यते ऽनंतरंगत्वात्॥ अर्धीशो व
ह्निशिरो लांतस्तादांतईदितः॥ फुंतश्च ऽमंतो यद्विंदुर्लक्ष्म्यासमन्वितः॥ प्रकारांतरं॥ कर्मवि

लघुतो दंडी बीजमस्योच्यते बुधैः॥ वदेच्चंडेश्वरायेति बीजांते हृदयांतिकं॥ एवमादिष्टिनं
मंत्रं यथावत्संप्रयोजयेत्॥ अनयोः पूजाप्रयोगः॥ प्रातःकृत्यादि शैवोक्तपीठन्यासांतं क
र्म समाप्य ऋष्यादिन्यासं कुर्यात्॥ शिरसि त्रिपुरऋषये नमः॥ मुखे अनुष्टुप्छंदसे नमः॥ हृ
दि चंडेश्वराय देवतायै नमः॥ ततः करांगन्यासौ॥ दीप्तफट् अंगुष्ठाभ्यां नमः॥ ज्वलफट् तर्ज
नीभ्यां स्वाहा॥ ज्वालिनिफट् मध्यमाभ्यां वषट्॥ तेजःफट् अनामिकाभ्यां हुं॥ हनफट् कनिष्ठिका
भ्यां वौषट्॥ सर्वज्वालिनिफट् करतलपृष्ठाभ्यां फट्॥ एवं हृदयादि॥ तथा च निबंधे॥ हृदयं
दीप्तफट्प्रोक्तं ज्वलफट् शिर ईरितं॥ शिखा ज्वालिफट्युक्ता तेजःफट् कवचं स्मृतं॥ हनफट्
नेत्रमाख्यातं सर्वज्वालिनिफट् परं॥ ततो ध्यानं॥ चंडेश्वरं रक्ततनुं त्रिनेत्रं रक्तांशुकाढ्यं हृ
दि भावयामि॥ टंकं त्रिशूलं स्फटिकाक्षमालां कमंडलुं बिभ्रतमिंदुचूडं॥१॥ एवं ध्यात्वा मान
सैः संपूज्य शंखस्थापनं कुर्यात्॥ ततः शैवोक्तपीठपूजां विधाय हमिति बीजेन मूर्त्तिं संकल्प्य
पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदानपर्यंतं कर्म विधायावरणपूजामारभेत्॥ अंगैः प्रथ

था॥ कुरुद्वयं पुनर्जैत्तं समुद्धरेत्॥ एवं विंशति अक्षरात्मा शास्त्रिरुक्तो महामनुः॥ अस्य पूजा
प्रातः कृत्यादि प्राणायामांतं विधाय पीठन्यासं कुर्यात्॥ तद्यथा॥ धर्मादि अनेन्त्वयांतं दे
हे विन्यस्य ऋष्यादिन्यासं कुर्यात्॥ तद्यथा॥ शिरसि बृहदारण्यकऋषयेनमः॥ मुखे गाय
त्री छंदसे नमः॥ हृदि बटुकभैरवाय देवतायै नमः॥ ततो मूर्त्तिन्यासः॥ यथा ह्रौं ह्रीं ईशा
नाय नमः॥ अंगुष्ठयोः॥ ह्रैं ह्रीं तत्पुरुषाय नमः तर्जन्योः॥ ह्रूं ह्रूं अघोराय नमो मध्यमयोः
ह्रिं ह्रिं वामदेवाय नमो अनामिकयोः॥ ह्रं ह्रं सद्योजाताय नमः कनिष्ठयोः॥ पुनस्तत्तदंग
लिषु शिरोवदनगुह्यपादेषु तत्तद्बीजादिकास्ता मूर्त्तीर्न्यसेत्॥ तथा ऊर्द्ध्व प्राग्दक्षिणोदी
च्य पश्चिमेषु मुखेषु तान्न्यसेत्॥ तथा च निबंधे॥ अंगुली देह वक्त्रेषु मूर्त्तिन्यासो यथा पु
नः॥ सद्यादिपंचह्रस्वाद्यारात्रिबीजपुरःसरं॥ वकारं पंच ह्रस्वाद्य मायायानादिषु योज
येत्॥ ततः करांगन्यासः॥ तद्यथा॥ ॐ वां ह्रीं अंगुष्ठाभ्यां नमः॥ इत्यादि॥ ॐ ह्रां वां हृदयाय
नमः इत्यादिना च॥ षडदीर्घबीजढ्येनैव प्रणवाद्यनेन कुर्यात्॥ तथा च निबंधे॥ षड

दीर्घयुक्तमायाद्याबकारेण च तद्धृता॥ अंगानि जातियुक्तानि प्रणवाद्यानि कल्पयेत्॥ ततो ध्या
नं॥ तस्य ध्यानं त्रिधा प्रोक्तं सात्विकादि प्रभेदतः॥ वंदे बालं स्फटिकसदृशं कुंतलोल्लासिव
क्त्रं दिव्याकल्पैर्नवमणिमयैः किंकिणीनूपुराद्यैः॥ दीप्ताकारं विशदवसनं सुप्रसन्नं त्रिने
त्रं हस्ताब्जाभ्यां बटुकमनिशं शूलदंडौ दधानं॥१॥ राजसं यथा॥ उद्यद्भास्करसन्निभं त्रिन
यनं रक्तांगरागस्रजं स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः॥ नीलग्रीवमुदार
भूषणशतं शीतांशुचूडोज्ज्वलं बंधूकारुणवाससं भयहरं देवं सदा भावयेत्॥२॥ ता
मसं तु॥ ध्यायेन्नीलाद्रिकांतं शशिशकलधरं मुंडमालं महेशं दिग्वस्त्रं पिंगकेशं डम
रुमथ सृणिं खड्गशूलाभयानि॥ नागं घंटां कपालं करसरसिरुहैर्बिभ्रतं भीमदंष्ट्रं
सर्पाकल्पं त्रिनेत्रं मणिमयविलसत्किंकिणीनूपुराढ्यं॥३॥ सात्विकं ध्यानमाख्यातम
पमृत्युविनाशनं॥ आयुरारोग्यजननमपवर्गफलप्रदं॥ राजसं ध्यानमाख्यातं धर्मका
मार्थसिद्धिदं॥ तामसं शत्रुशमनं कृत्याभूतगदापहं॥ एवं ध्यात्वा मानसैः संपूज्य बं॥

खस्थापनं कुर्यात्॥ अस्य पूजायंत्रं॥ धर्माधर्मादिभिः स्फुरत्पीठे पंकजयोनिते॥ षट्कोणांत
स्त्रिकोणस्थे व्योमपंकजयोनिते॥ ततः पूर्ववत् ध्यात्वावाहनादिकं कुर्यात्॥ तत्र क्रमः॥ मूला
दि सद्योजातमंत्रेणावाहनं॥ मूलादि वामदेवेन स्थापनं॥ मूलेन सान्निध्यं॥ अघोरेण स
न्निरोधनं॥ तत्पुरुषेण योनिमुद्राप्रदर्शनं॥ ईशानेन वंदनमिति विशेषः॥ ईशानादिप्रथ
मावरणं॥ असितांगो रुरुश्चंडः क्रोध उन्मत्तसंज्ञकः॥ कपाली भीषणश्चैव संहारश्चाष्ट
भैरवाः॥ ततः कर्णिकायां दिक्षु कोणेषु व्योमपंकजदलेषु असितांगादीन् भैरवं यजेत्॥
ततः षट्कोणेषु पूर्वादि ह्रां वां इत्यादिना षडंगानि पूजयेत्॥ ततः पूर्वडाकिनी राकिनी ल
काकिनी शाकिनी हाकिनी मालिनी देवीपुत्रान् यजेत्॥ उमापुत्रान् रुद्रपुत्रान् मातृपुत्रान्
दक्षिणतो यजेत्॥ ऊर्ध्वं॥ ऊर्ध्वमुखीपुत्रान् अधो अधोमुखीपुत्रान् पूजयेत्॥ ततो दलपत्रेषु लो
कपालान् वज्रादिरूपान् पूजयेत्॥ तद्बहिः पूर्वे ब्रह्माणीपुत्रायः ईशाने माहेश्वरीपुत्रं उत्तरे
वैष्णवीपुत्रं अनिले कौमारीपुत्रं पश्चिमे इंद्राणीपुत्रं नैरृते महालक्ष्मीपुत्रं अनले वाराही

पुत्रं याम्ये चामुंडापुत्रं॥ तथा च निबंधे॥ ब्रह्माणीपुत्रकं पूर्वे माहेशीपुत्रमैश्वरे॥ वैष्णवी
पुत्रकं सौम्ये कौमारीपुत्रमालिने॥ इंद्राणीपुत्रकं चैव पश्चिमे पूजयेत्ततः॥ महालक्ष्मी
सुतं पश्चान्नैरृत्यां दिशि समर्चयेत्॥ वाराहीपुत्रकं याम्ये चामुंडापुत्रमानले॥ तद्बहिर्दश
दिक्षु हेतुकं त्रिपुरांतकं॥ वेतालं वह्निजिह्वं कालांतकं एकपादं द्विपादं भीमरूपं अचलहा
टकेश्वरान् पूजयेत्॥ योगिनीसहितदिग्योगीशानिरुतिषु पूजयेत्॥ अस्य पुरश्चरणं
एकविंशतिलक्षजपः॥ तथा च॥ वर्णलक्षं जपेन्मंत्रं हविष्याशी जितेंद्रियः॥ तद्दशांशं प्र
जुहुयात् तिलैर्मधुरसंयुतैः॥ ततो बलिदानं॥ पूर्वे विघ्नं दुर्गं समाराध्य बलिं दद्यात्॥
शाल्यन्नं पनसं सर्पिर्लाजं युक्तं निशाकरः॥ गुडनिस्तुषगापूपैर्मधुनक्तैः परिमिश्रितैः॥
कृत्वा वज्रमाराध्य देवं प्राग्रूपवर्त्मना॥ गंधचंदनपुष्पाद्यैर्विचित्रं तस्मै बलिं हरेत्॥ च
दा अन्नं नागमजं हत्वा राजसं प्रागुदीरितं॥ बलिप्रदानसमये दिक्पूर्णं सर्वसिद्धयं॥ नि
वेदयेद्बलिं ध्येन बटुकाय विशिष्टधीः॥ विदनयेछत्रु नाम्ना बलिमंत्रं तथा सुधीः॥ राजप

शस्य रुधिरं पिशितं च दिने दिने ॥ नरूपस्य गणेशः सार्धं सारमेयसमन्वितः ॥ बलिमंत्रो
यमाख्यातः सर्वेषां विघ्नप्रदः ॥ अनेन बलिना कौलो बटुकः परमेश्वरः ॥ सर्वगणेशो वि
मुंडेश्चाभिषिक्तो ददंत्येवसः ॥ एवं कृते परबलं हीयते नात्र संशयः ॥ मुद्गपायसादिनान्नहोतु
क्षेत्रपालं ॥ बलिविधानं परिवारबटुकेश्वरसंबोधनपूर्वकं ॥ रात्रौ बलिविसर्जनं ॥ स
कलाभिष्टप्रजप्रदं ॥ ॥ इति बटुकमंत्रः ॥ ॥ यत्पंकजरजो मरंदं दर्वं यद्योगतः
परशिवः परमेश्वरोऽभूत् ॥ यास्त्रिविपाजनयनंतनुते त्रिशास्यासाशां श्रेवि विजयते जग
देकमाता ॥१॥ अज्ञानतिमिरध्वंसी संसारार्णवतारकं ॥ आनंदबीजमवतादतकं त्रिपु
रं हरः ॥ अथ वक्ष्ये महाविद्यां त्रिपुरामपि गोपितां ॥ यां ज्ञात्वा सिद्धिसंधानामधिपो जायते
नरः ॥ ॥ अथ भैरवीमंत्रः ॥ ॥ तत्र शारदायां ॥ वियद्भृगुकलाशास्त्रेतिको बिंदु
शेखरः ॥ वियत्तदादिकं साग्निस्थितं वामाक्षिबिंदुमत् ॥ आकाशं भृगुवह्निस्थोमनुसर्गे
डुरवपत् ॥ पंचकूटात्मिका विद्या विद्या त्रिपुरसुंदरी ॥ प्रथमं वाग्भवं बीजं द्वितीयं काम

राजकं ॥ तृतीयं शक्तिबीजाख्यं त्रिभिर्बीजैरुदाहृतं ॥ अस्यार्थः ॥ शिवचंद्रवह्निवाग्भवं ॥ शि
वचंद्रकामपृथिवीवह्निचतुर्थस्वरबिंदुमत् ॥ शिवचंद्रेकयुक्तचतुर्दशस्वरबिंदुसविस
र्गः ॥ अस्याः पूजा प्रातः कृत्यादि प्राणायामांतं विधाय पीठन्यासं कुर्यात् ॥ पूर्वोक्तक्रमेण आ
धारशक्त्यादि ह्रीं ज्ञानात्मने नमः ॥ इत्यंतं विधाय हृत्पद्मस्य पूर्वादिकेसरेषु ॥ ॐ इच्छायै नमः
एवं ज्ञानायै ॥ क्रियायै ॥ कामदायिन्यै ॥ रत्यै ॥ रतिप्रियायै ॥ आनंदायै ॥ मध्ये मनोन्मन्यै ॥ तदु
परि ऐं परायै ॥ अपरायै ॥ अपरापरायै ॥ हसौः सदाशिवमहाप्रेतासनाय नमः ॥ इति वि
न्यस्य ऋष्यादिन्यासं कुर्यात् ॥ तथा च शारदायां ॥ तथा च वाग्भवं प्रोक्तं दक्षिणे लोहितो नलः ॥ शि
र्षबालपरा पश्चात् अपरायै हसौः पुनः ॥ सदाशिवमहाप्रेतं इति पद्मासनं नमः ॥ इति
न्यथा ॥ सर्वांगिकामबीजे कालिकायनमः ॥ ततो नाभ्यादिचरणपर्यंतं हस्त्वैं नमः ॥ हृ
दयान्नाभिपर्यंतं हसकलह्रीं नमः ॥ शिरसे हृदयांतं हसौं नमः ॥ आद्यबीजं दक्षि
णे करे द्वितीयं वामकरे तृतीयं उभयकरे ॥ ततो मूर्धादिपादाधारे यथा संख्येन बीजानिम

न्सेत्सुधीः ततः॥ तथा च निबंधे॥ नाभेराचरणं न्यसेत्प्राग्वन्मंत्रवित्तमः॥ हृदयान्नाभिपर्यं
तं कामं बीजं प्रविन्यसेत्॥ शिरसो हृत्प्रदेशांतं तार्तीयं विन्यसेत्ततः॥ आद्यं द्वितीयं करयो
स्तार्तीयमनुजयोर्न्यसेत्॥ मूर्धाधारे हृदि न्यस्येद्योबीजत्रयं क्रमात्॥ ततो नवयोनिन्या
सः॥ तद्यथा॥ आद्यबीजं दक्षकर्णे द्वितीयं बीजं वामकर्णे तृतीयं बीजं चिबुके॥ एवं वदने गं
ड्योः नेत्रयोः॥ नासिकांसयोः जठरे कूर्परयोः कुक्षौ जान्वोर्लिंगपादयोः गुह्ये हृदि स्तन
योः कंठे॥ तथा च निबंधे॥ नवयोन्यात्मकं न्यासं कुर्याद्बीजैस्त्रिभिः क्रमात्॥ कर्णयोश्चिबुके
भ्रुवोर्गंड्योर्वदने पुनः॥ नेत्रयोर्नासि विन्यस्येदंसयोर्जठरे पुनः॥ ततः कूर्परयोः कुक्षौ जा
न्वोर्ईजे मूर्धनि॥ पादयोर्गुह्यदेशे च पार्श्वयोर्हृदयांबुजे॥ स्तनद्वये कंठदेशे त्रिबी
जानि विन्यसेत्॥ ततो रत्यादिन्यासः॥ मूलाधारे ऐं रत्यै नमः॥ हृदि क्लीं प्रीत्यै नमः॥ भ्रूमध्ये
सौः मनोभवाय नमः॥ भ्रूमध्ये अमृतेश्यै नमः॥ हृदि क्लीं योगेश्यै नमः॥ मूलाधारे ऐं वि
श्वयोन्यै नमः॥ तथा च निबंधे॥ मूले रतिं हृदि प्रीतिं भ्रूवोर्मध्ये मनोभवं॥ बालाबीजैस्त्रि

भिर्न्यसेत्स्थानेष्वेषु विलोमतः॥ अमृतेशीं च योगेशीं विश्वयोनिं क्रमादतः॥ विलोमबी
जैर्विन्यस्येन्मूर्त्तिन्यासमथाचरेत्॥ अथ मूर्त्तिन्यासः॥ हसखौं ईशानमनोभवाय नमः
वक्त्रे॥ हसखैं तत्पुरुषमकरध्वजाय नमः हृदि॥ हसखें अघोरकुमारकंदर्पाय नमः गुह्ये॥
हसखीं वामदेवमन्मथाय नमः पादयोः॥ हसखं सद्योजातकामदेवाय नमः॥ एवं मूर्ध्व
प्राग्याम्योत्तरपश्चिमेषु मुखेषु ईशानमनोभवादिपंचमूर्त्तिस्तद्बीजादिकान्न्यसेत्॥ तथा
च निबंधे॥ स्वस्वबीजादिकं पूर्वं मूर्ध्नीशानमनोभवं॥ न्यसेद्वक्त्रे तत्पुरुषमकरध्वजनामकं वि
त्॥ हृद्यघोरकुमारादीन्कंदर्पमदनं तरं॥ गुह्यदेशे प्रविन्यसेत्कामदेवादिमन्मथं॥ स
द्योजातं कामदेवं पादयोर्विन्यसेत्ततः॥ ऊर्ध्वप्रादक्षिणोदीच्यपश्चिमेषु मुखेषु तान्॥ प्रवि
न्यसेद्यथापूर्वं गुरुर्मौनिसंस्थितः॥ स्मरादिपंचहृस्वाकंबीजन्यासं प्रकीर्त्तितं॥ ततो द्रां
द्राविण्यै नमो गुह्ययोः॥ ह्रूं क्षोभिण्यै नमः स्तनयोः॥ क्लीं वशीकरिण्यै नमो भ्रमयोः॥ ब्लूं
आकर्षिण्यै नमो नाभिकयोः॥ सः संमोहिन्यै नमः कनिष्ठयोः॥ तथा च ज्ञानार्णवे॥ पंच

बाणान्वक्रमेणैवकरांगुलीषुविन्यसेत्॥अंगुष्ठादिकनिष्ठांतंक्रमेणपरमेश्वरि॥ततस्त्वा
नेषुयथाक्रमंह्रींकामायनमः॥ततः करांगन्यासौकुर्यात्॥तथाचनिबंधे॥षड्दीर्घयुक्ते
नाद्येनबीजेनांगक्रियामता॥तद्यथा॥हस्रांअंगुष्ठाभ्यांनमः॥हस्रींतर्जनीभ्यांस्वाहा॥
हस्रूंमध्यमाभ्यांवषट्॥हस्रैंअनामिकाभ्यांहुं॥हस्रौंकनिष्ठाभ्यांफट्॥एवंहृदयादिषु
मूर्ध्निपादेवक्त्रेगुह्येहृदिपृष्ठेक्रमाद्बाणान्कामांश्चन्यसेत्॥तथाचतंत्रार्णवे॥तथाहृदयंसमा
लिख्यवह्निसंस्थंक्रमेणहि॥मुखवृत्तेननेत्रेणवामेनपरिमंडितं॥बाणद्वयमिदंप्रोक्तमाद
नंभूमिसंस्थितं॥चतुर्थस्वरबिंद्वाद्यनादरूपंवरानने॥पाशांकुशसमारूढंवामकर्णविभू
षितं॥बिंदुनादसमायुक्तंसर्गांश्चंद्रवान्प्रिये॥चंद्रबाणान्महेशानीमूर्ध्निह्रींमायां
शोनिशीपदे॥क्लींवशीकरणीवक्त्रेगुह्येकंबीजपूर्विकां॥आकर्षिणीहृदिपुनःसर्गांतांत्र्यगु
संयुतां॥सम्मोहनीक्रमादेवंबाणन्यासोयमीरितः॥पराबीजंमध्यबाणंबाणंवंपरमेश्व
रि॥क्लींबीजंस्त्रीबीजंचक्रमात्॥पंचकामइमेदेविनामानिशृणुवल्लभे॥काममन्मथकं

दर्पकमकरध्वजसंज्ञकाः॥मीनकेतुमहेशानिपंचमःपरिकीर्तितः॥उन्मादसंमोहनयो
रेकपर्यायः॥ततःस्वनंगादिन्यासः॥भालेऐंक्लींश्रींस्त्रींसःअनंगायैनमः॥भ्रूमध्येऐं
नंगायैनमः॥वदनेऐंप्र॰सपिलिनेनमः॥कर्णिकायांऐंप्र॰अनंगमालिन्यैनमः॥कंठेऐंप्र॰अनं
गायैनमः॥हृदिऐंप्र॰अनंगकुसुमायैनमः॥नाभौऐंप्र॰अनंगमेखलायैनमः॥लिंगमूले
ऐंप्र॰अनंगमदनायैनमः॥तथाच॥भालभ्रूमध्यवदनेघंटिकाकंठहृत्सुच॥नाभ्यधि
ष्ठानयोःपंचताराद्याःस्वनंगादिकाः॥न्यस्तव्याविधिनादेव्यामंत्रिणास्वनंगादिकाः॥अ
नंगस्यपिरलमथपरानंगमालिन्यनंतरं॥अनंगानंगकुसुमानंगाचानंगमेखला॥अनं
गमदनासर्वामदविभ्रमसंपरा॥बाणकामबीजंह्रींक्लींसस्मारापंचादितास्त्वमी॥ततोऽक्ष
वर्णन्यासः॥तद्यथा॥शिरसिअंनमः॥भालेआंनमः॥नमःसर्वत्र॥भ्रुवोर्मध्येइं॥ईं
कर्णयोः॥उंऊंनेत्रयोः॥ऋंॠंनासि॥लृंॡंगंडयोः॥एंओष्ठयोः॥ऐंदंतपंक्त्योः॥ओंऔं
मुखे॥अःचिबुके॥कंनमः॥एवंगले॥खंकंठे॥गंपार्श्वयोः॥घंङंस्तनयोः॥चंछंरोमलि

ञं ऊं कूर्परयोः॥ अं टं पाण्योः॥ ठं डं करपृष्ठयोः॥ ढं णं नाभौ॥ तं गुह्ये॥ थं ऊर्वोः॥ दं धं जानुनोः॥ नं
पं जंघयोः॥ फं बं भं स्फिस्थानयोः॥ ञं मं पत्तनयोः॥ यं चरणांगुष्ठयोः॥ रं कक्ष्योः॥ वं श्री बाह्वयोः॥
लं हृदि॥ शं गुह्ये॥ षं कर्णयोः॥ सं गंडयोः॥ सं नेत्रे॥ हं सर्वत्र॥ नमोंतेन न्यसेत्॥ तथा च तंत्रे
न्यसेत् शिरसि नासिकायां कर्णद्वियुगले नसि गंडयोरोष्ठयोर्दंतपंक्त्योरास्ये न्यसेत्स्वरान्॥
चिबुके च गले कंठपार्श्वयोस्तनयुग्मके॥ दोर्मूलयोः पाण्योस्तनः पृष्ठदेशतः॥ नाभौ गुह्ये
पुनश्चोर्वोर्जानुनोर्जंघयोस्ततः॥ स्फिचोः पत्तनयोः पश्चात् चरणांगुष्ठयोर्द्वयोः॥ कादिना
न्यासं सेदुर्णन्दस्थानेषु समाहितः॥ कक्ष्यांश्रेविद्यके पश्चात्करके हृदि गुह्यके॥ कर्णयोर्गं
डयोर्नेत्रे यन वा जरा हंसा हस्ते॥ अस्या विमानप्रविन्यस्येत् देवदेशिकसत्तमः॥ अस
कृद्येत् करन्यासं पर्यंतं कुर्यात्॥ ततः शिवं शंभुरांवध्यादेवीं ध्यायेत्॥ यथा॥ उद्यद्भानुस
हस्रकांतिमरुणक्षौमां शिरोमालिकां रक्तालिप्तपयोधरां जपवटीं विद्यामभीतिं वरं॥ हस्ता
ब्जैर्दधतीं त्रिनेत्रविलसद्वक्त्रारविंदश्रियं देवीं बद्धहिमांशुबद्धमुकुटां वंदे समंदस्मितां॥१॥

एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा आधारशक्त्यादि हूं ज्ञानात्मने नमः॥ इत्यं
तं संपूज्य पूर्वादिकेसरेषु मध्ये इच्छाज्ञानक्रियाभामिनी कामदायिनी रतिरतिप्रियानंदा
नध्ये चैव मनोन्मनी॥ एताः प्रणवपूर्वकं नमोंतं च पूजयेत्॥ ततः ऐं परायै हस्रौः सदाशि
व महाप्रेतासनाय नमः इत्यंतं संपूज्य॥ आग्नेयादिषु अंतरालेषु श्रीविद्यो गुरुपंक्तिं
पूजयेत्॥ तथा च निबंधे॥ वाग्भवं लोहितं वायव्यां श्रीकंठलोहितेन लः॥ दीर्घबाणायै परा
पश्चाद्परायै हस्रौः पुनः॥ सदाशिवमहाप्रेतं पद्मासनं नमः॥ अनेन मनुना दद्या
त् आसनं श्रीगुरुक्रमं॥ आग्नेयेष्वंतराले पूजयेत्कल्पयेत्ततः पंचभिः प्रणवैर्मंत्रं तस्य भा
वाद्देवं तां पूजयेत् आगमोक्तेन विधानेन समाहितः॥ तारयाक्षरात्रिकमल्लाहसं
खफ्रें हस्रौः पुनः॥ ॐ गुरुभ्यो नमः॥ गुरुपादुकाभ्यो नमः॥ परमगुरुभ्यो नमः॥ परमगुरु
पादुकाभ्यो नमः॥ ॐ आचार्येभ्यो नमः॥ ॐ आचार्यपादुकाभ्यो नमः॥ अस्याः पूजायंत्रसा
रार्दायां॥ पद्ममष्टदलोपेतं नवयोन्याढ्यकर्णिकं॥ चतुर्द्वारसमायुक्तं भूगृहे विलिखे

ततः ऐं ह्रीं श्रीं हसखफ्रें हसौः इति मंत्रेण बिंदुचक्रे देव्या मूर्तिं संकल्प्य त्रिखंडया मुद्रया पूर्व
वद्देवीं ध्यात्वावाहयेत्॥ देवेशि भक्तिसुलभे परिवारसमन्विते॥ यावत्त्वां पूजयिष्यामि ताव
त्वं सुस्थिरा भव॥ इत्यावाहनादि पंचपुष्पांजलिदानपर्यंतं विधाय आवरणपूजामारभेत्
तद्यथा॥ देव्या वामकोणे ऐं रत्यै नमः॥ दक्षिणकोणे क्लीं प्रीत्यै नमः॥ अग्निकोणे सौः मनो
भवाय नमः॥ कर्णिकायां अग्नीशासुरवायुमध्ये दिक्षु च पूर्वोक्तांगमंत्रेण पूजयेत्॥
तथा च ज्ञानार्णवे॥ अग्नीशासुरवायव्यमध्ये दिक्ष्वंगपूजनं॥ ततस्तत्र ऐं द्रां द्राविण्यै नमः
ह्रीं ह्रीं क्षोभिण्यै नमः॥ दक्षिणे क्लीं वशीकरिण्यै नमः॥ ब्लूं आकर्षिण्यै नमः॥ तथा च ज्ञानार्ण
वे॥ उत्तरस्यां द्वयं देवि दक्षिणस्यां द्वयं निशि॥ अथ त्रिकोणे कं क्रमेणैव पंचबाणान् ततो य
जेत्॥ पंचकामास्तथा देवी बाणवत्परिपूजयेत्॥ तथा च॥ पराबीजं मध्यबाणं वाग्भ
वं परमेश्वरि॥ क्लीं बीजं ततश्चैव लक्ष्मीबीजं च क्रमात्प्रिये॥ काममन्मथकंदर्पमकरध्वज
संज्ञकाः॥ मीनकेतुं महेशानि पंचमः परिकीर्तितः॥ ततोऽष्टयोनिषु पूर्वादि ऐं क्लीं ब्लूं स्त्रीं

सः अनंगायै नमः॥ ऐं पअनंगकुसुमायै नमः॥ ऐं पअनंगमेखलायै नमः॥ ऐं पअनंग
मदनायै नमः॥ ततोऽष्टपत्रेषु पूर्वादिक्रमेण ॐ असितांगभैरवब्राह्म्यै नमः॥ ॐ रुरु माहेश्व
र्यै नमः॥ ॐ चंड चामुंडायै नमः॥ ॐ संहार महालक्ष्म्यै नमः॥ तथा च निर्बंधे॥
अष्टयोनिष्वष्टशक्तीः पूजयेदनंगादिकाः॥ मातरो भैरवाक्रान्ता मदविभ्रमविह्वलाः॥
अष्टपत्रेषु संपूज्यास्तथा वस्त्रकुसुमादिभिः॥ तद्बहिः पूर्ववदिंद्रादीन् संपूज्य धूपादि विस
र्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं दशलक्षजपः॥ होमस्तु दशसहस्रं॥ तथा च
शारदायां॥ दीक्षां प्राप्य जपेन्मंत्रं तत्त्वलक्षं जितेंद्रियः॥ पुष्पैर्भानुसहस्राणि जुहुयात् ब्र
ह्मवृक्षजैः॥ ॥अथ संपत्प्रदा भैरवी॥ ॥यथासौ त्रिपुरा बाला तथा त्रिपुरभैरवी
सम्यक्प्रदा नाम तस्या मंत्रं शृणु निर्मलमानसे॥ शिवचंद्रौ वह्निसंस्थौ वामश्रवं तदनंतरं॥ का
मबीजं तथा देवि शिवचंद्रान्वितं ततः॥ पृथ्वीबीजान्वितं ह्यामं तार्तीयं शृणु वल्लभे॥ शा
क्तिबीजं महेशानि शिववह्निनियोजयेत्॥ क्रमाद्यपि परमेशानि हित्वा सर्वं तु बैंदवं॥ त्रि

पुराभैरवीमहासम्पत्प्रदाप्रिये॥ अस्यार्थः॥ त्रिपुराभैरवी विसर्गरहिता चेत् तदा सं
पत्प्रदा भवति॥ अस्याः ध्यानं॥ आताम्रार्कसहस्राभां स्फुरच्चंद्रजटाधरां॥ किरीटरत्न
विलसत्चित्रविचित्रमौक्तिकां॥ स्रवद्रुधिरपंकाढ्यमुंडमालाविराजितां॥ नयनत्रय
शोभाढ्यां पूर्णेंदुवदनान्वितां॥ मुक्ताहारलताराजत्पीनोन्नतघनस्तनीं॥ रक्तांबरपरीधा
नां यौवनोन्मत्तरूपिणीं॥ पुस्तकं चाभयं वामे दक्षिणे चाक्षमालिकां॥ वरदानरतां नित्यां
महासम्पत्प्रदां स्मरेत्॥ न्यासपूजादिकं तु पूर्ववत्॥ अंगमंत्रे तु विशेषः॥ ह्रीं क्लैं क्लीं
बीजैः करांगन्यासकल्पना॥ अस्याः पुरश्चरणं त्रिलक्षजपः॥ बालादेव्याः पूजादिकं नित्यं
कृत्वा तु॥ तथा च॥ न्यासपूजादिकं सर्वं कुमार्युदितवत् व्रते॥ लक्षजपः पुरश्चरणमिति केचि
त्॥ सिद्धविद्यात्वात्॥ ॥अथ कौलेशभैरवी॥ ॥ज्ञानार्णवे॥ सम्पत्प्रदाभैरवी
वत् विधिः कौलेशभैरव्याः॥ हसाद्या सैव देवेशि त्रिषु बीजेषु पार्वति॥ इयं तु सहवाद्या
स्यात् पूजाध्यानादिकं तथा॥ अस्यार्थः॥ त्रिकूटे सकारादिश्चेत् तदा कौलेशभैरवी भवति

अस्याः पूजाध्यानादिकं तु सम्पत्प्रदावत्॥ सम्पत्प्रदाभैरव्याः आद्यं तु रेफवर्जितं॥ चेत्तदा
भयविध्वंसिनी भवति॥ दक्षिणामूर्त्तौ तथादर्शनात्॥ ॥अथ सकलसिद्धिभैरवी॥ ॥
ज्ञानार्णवे॥ एतस्या एव विद्याया आद्यं तु रेफवर्जितं॥ तदेयं परमेशानी नाम्ना सकलसि
द्धिदा॥ सम्पत्प्रदाभैरवीवत् ध्यानपूजादिकं तथा॥ अस्यार्थः॥ कौलेशभैरवी आद्यं
तु रेफवर्जितं चेत्तदा सकलसिद्धिदा भवति॥ ध्यानपूजादिकं तु सम्पत्प्रदावत्॥ ॥
अथ चैतन्यभैरवी॥ ॥ज्ञानार्णवे॥ वाग्भवं बीजमुच्चार्य जीवप्राणसमन्वितं॥ सर्व
लोके भुवनेशानी द्वितीयं बीजमुद्धरेत्॥ जीवप्राणं वह्निसंस्थं शक्रस्वरविभूषितं॥ विस
र्गाढ्यं महेशानि विद्या त्रैलोक्यमातृका॥ अस्यार्थः॥ चंद्रस्वरद्वादशस्वरसंयुक्तं बिंदुना
दकलाढ्यं चंद्रकामपृथिवीमहामायाचंद्रशिववह्निचतुर्दशस्वरविसर्गाढ्यं च॥ अस्या यं
त्रं॥ त्रिकोणं चैव षट्कोणं वसुपत्रं वरानने॥ चतुरस्रं चतुर्द्वारमेवं मंडलमालिखेत्॥
अस्याः पूजा आधारशक्त्यादि ह्रीं ज्ञानात्मने नमः इत्यंतं समाप्य पूर्ववदित्क्रमेण केसरेषु॥

ॐ वामायै नमः॥ एवं ज्येष्ठायै नमः॥ रौद्र्यै॥ अंबिकायै॥ इच्छायै॥ ज्ञानायै॥ क्रियायै॥ कुब्जिका
यै॥ चित्रायै॥ विषघ्निकायै॥ दूत्यै॥ आनंदायै॥ मध्ये ह्सौः सदाशिवमहाप्रेतपद्मासनाय
नमः॥ संपत्प्रदाबालाकौलेश्वरी सकलेहदा विद्यानां एतावापाठ्यदाकृय॥ ज्ञानार्णवोक्तव
त्॥ ततः ऋष्यादिन्यासः॥ शिरसि दक्षिणामूर्तये ऋषये नमः॥ मुखे पंक्तिश्छंदसे नमः॥ हृदि
चैतन्यभैरव्यै देवतायै नमः॥ ततः करांगन्यासौ॥ पूर्वबीजमुच्चार्य अंगुष्ठाभ्यां नमः॥ द्वि
तीयबीजमुच्चार्य तर्जनीभ्यां नमः॥ तृतीयबीजमुच्चार्य मध्यमाभ्यां वषट्॥ पुनः प्रथम
मुच्चार्य अनामिकाभ्यां हुं॥ द्वितीयमुच्चार्य कनिष्ठाभ्यां वौषट्॥ तृतीयमुच्चार्य करतलप
ष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ तथा च॥ द्विरावृत्त्या न्यसेत् षडंगानि सर्वांगजन्तुणं॥ ततो ध्या
नं॥ उद्यद्भानुसहस्राभां नानालंकारभूषितां॥ मुकुटाग्रलसच्चंद्ररेखां मुक्तांबरान्वितां
पाशांकुशधरां नित्यां वामहस्तकपालिनीं॥ वरदानपरां शान्तां पीनोन्नतघनस्तनीं॥
एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा पीठपूजामाधारशक्त्यादि ज्ञानात्माजेह्लादिपा

ध्याक्षिपीठमनुं पूजयेत्॥ ततो भैरवमुख्यगुरुपंक्तिं संपूज्य पुनर्ध्यात्वावाहनादि पंचपुष्पांज
लिदानपर्यंतं विधायावरणपूजामारभेत्॥ तद्यथा॥ तत्र प्रथमं षडंगपूजा॥ आग्नेयकोणे प्रथम
बीजमुच्चार्य हृदयाय नमः॥ ईशाने द्वितीयबीजमुच्चार्य शिरसे स्वाहा॥ तृतीयबीजं नैर्ऋ
ते उच्चार्य शिखायै वषट्॥ वायुकोणे पुनः प्रथमबीजमुच्चार्य कवचाय हुं॥ मध्ये द्वितीय
बीजमुच्चार्य नेत्रत्रयाय वौषट्॥ चतुर्दिक्षु तृतीयबीजमुच्चार्य अस्त्राय फट्॥ ततः पूर्व
वत् मातृगणं संपूजयेत्॥ ततः षट्कोणे पूर्वादिषु डाकिन्यै नमः॥ एवं राकिन्यै नमः॥ एवं ला
किन्यै नमः॥ काकिन्यै॥ हाकिन्यै॥ अष्टदले पूर्वादिपूर्वोक्तानंगकुसुमादीन् पूजयेत्
पत्राग्रे पूर्वादिषु परभृते नमः॥ एवं सारसाय॥ शुकाय॥ निर्घोषाय॥ मेघाय॥ हृतिवा
अपांगाय॥ भ्रूविलासाय॥ हाराय॥ नाराय॥ ततः इंद्रादीन् वज्रादींश्च पूजयेत्॥ ततो धूपा
दिविसर्जनांतं कर्म समापयेत्॥ अस्याः पुरश्चरणं लक्षजपः॥ तथा च ज्ञानार्णवे॥ लक्षसंख्यं
जपेन्मंत्रमित्यादिवचनात्॥ ॥अथ कामेश्वरीभैरवी॥ ॥ज्ञानार्णवे॥ कामेश्वरी

रुद्राणीं पूर्वसिंहासने स्थिता॥ एतस्या एव विद्याया बीजद्वयमुदाहृतं॥ तदंते परमेशानी
नित्यक्लिन्ने मदद्रवे॥ एतस्या एव तार्तीयं रुद्राणी परमेश्वरी॥ पूजाध्यानादिकं देवी चै
तस्या इव पूर्ववत्॥ त्रिकोणे तु विशेषोस्ति कथयामि वरानने॥ अग्रकोणक्रमेणैव नि
त्यांक्लिन्नां मदद्रवां॥ षडंगावरणं पश्चात् पूजयेत् सर्वसिद्धये॥ ॥अथ षट्चक्रभै
रवी॥ ॥तत्र ज्ञानार्णवे॥ हाकिनी राकिनी बीजे लाकिनी काकिनीयुगं॥ राकिनी हाकिनी
बीजे भास्वती सुरसुंदरी॥ आद्यमेकारसंयुक्तमर्धकारमंडितं॥ शक्रस्वरान्वितं दे
वि तार्तीयं बीजमादिशेत्॥ बिंदुनादकलाक्रांतं तृतीयं रोलसंज्ञये॥ एषा विद्या महेशानि
पश्चिमाम्नायगा भवेत्॥ तृतीयं बीजं सविसर्गमित्यादि॥ तंत्रांतरे॥ ठरौ स्वामादनं बीजं
शिव पत्र त्रिधा लिखेत्॥ अर्धेन्दुशक्रकलया क्रमात्तं परिमंडितं कुरु॥ बिंदुनादान्वितं
चाद्य युग्ममंत्यविसर्गवत्॥ चतुरस्रं चतुर्द्वारि नियं मंडलमालिखेत्॥ षडंगावरणं देवी
पूर्ववत् पूजयेच्छिवे॥ रत्यादि तृतीयं देवी त्रिकोणे परिपूजयेत्॥ डाकिन्याद्यास्तु षड्

गु
कोणे वसुपत्रे ततः परं॥ आम्नायाद्यायुधं पश्चाद् विपत्रे ततः परं॥ बालायाः पीठशक्तिस्तु
वामाद्याः पूजयेत् क्रमात्॥ चतुरस्रे लोकपालान् वज्रादीन् परमेश्वरी॥ अनेनैव विधा
नेन नित्याद्यां भैरवीं यजेत्॥ ॥अथ भोगमोक्षदाभैरवी॥ ॥तत्र ज्ञानार्णवे॥ एत
स्या विद्यायाः षड्वर्णं व्युत्क्रमशः स्थितान्॥ विपरीतान्वदन्प्रोक्तं विद्येयं भोगमोक्षदा॥ मा
सपूजादिकं सर्वमस्याः पूर्ववदाचरेत्॥ ॥अथ रुद्रभैरवी॥ ॥ज्ञानार्णवे॥ शिवचं
द्रौ मादनान्तं पार्श्वं वह्निसमन्वितं॥ शाकिनीं बिंदुनादकलाढ्यं वाग्भवं प्रिये॥ ॥अथ
संपत्प्रदाभैरवी॥ ॥संपत्प्रदायाः भैरव्याः कामबीजं न देवहि॥ सदाशिवं तु बीजं तु
महासिंहासनस्य च॥ एषा विद्या महेशानि लिपितुं नैव शक्यते॥ अस्यार्थ॥ शिवचक्रं का
मतपांतयहूर्युक्तं एकारशास्वरविशिष्टं बिंदुनादकलाक्रांतं वाग्भवं बीजं शिवचक्रं काम
पार्श्ववह्नि चतुर्थस्वरविशिष्टं नादबिंदुकलान्वितं कामराजबीजं शक्तिकूटं तृतीयं॥ अ
स्याः पूजायंत्रं॥ त्रिकोणं चैव वृत्तं च वृत्ताष्टदलपंकजं॥ वृत्तं भूमंडलं च॥ अस्य पूजा प्रा

तः कृत्वादिप्राणायामपर्यंतं विधायचैतन्मंत्रैरघोरवत्पाठन्यासं कुर्यात्॥ अत्र पाठमं
त्रस्तु॥ अघोरे ऐं घोरे ह्रीं सर्वतः सर्वसर्वेभ्यो घोरघोरेतिरेभ्यः श्रीं नमस्ते रुद्ररूपेभ्यः ऐं
ऐं॥ ततः ऋष्यादिन्यासः॥ यथा शिरसि दक्षिणामूर्तये ऋषये नमः॥ मुखे पंक्तिछंदसे न
मः॥ हृदि रुद्रभैरव्यै देवतायै नमः॥ ततः करांगन्यासः॥ प्रथमबीजमुच्चार्य अंगुष्ठाभ्यां
नमः॥ द्वितीयबीजमुच्चार्य तर्जनीभ्यां स्वाहा॥ तृतीयबीजमुच्चार्य मध्यमाभ्यां वषट्॥ पुनः
प्रथमबीजमुच्चार्य अनामिकाभ्यां हुं॥ द्वितीयबीजमुच्चार्य कनिष्ठाभ्यां वौषट्॥ तृतीय
बीजमुच्चार्य करतलपृष्ठाभ्यां फट्॥ एवं हृदयादिषु॥ ततो ध्यानं॥ उद्यद्भानुसहस्राभां
चंद्रचूडां त्रिलोचनां॥ नानालंकारसुभगां सर्ववैरिनिकृंतनीं॥ धमद्रुधिरमुंडालीकं
लितां रक्तवाससीं॥ त्रिशूलं डमरुं खड्गं तथा खेटकमेव च॥ पिनाकं च शरान्देवी पाशां
कुशयुगं क्रमात्॥ पुस्तकं चाक्षमालां च देवीं शिवासनस्थितां॥ एवं ध्यात्वा मानसैः संपू
ज्य पूर्ववत् शंखस्थापनं कृत्वा कर्म कुर्यात्॥ ततश्चैतन्मंत्रैरघोरपाठपूजां विधाय ए

तन्मंत्रोक्तपाठमंत्रेण पीठं संपूज्य पूर्ववद्ध्यात्वा आवाहनादि पंचपुष्पांजलिदानपर्यंतं वि
धाय आवरणपूजामारभेत्॥ यथा॥ अग्निकोणे प्रथमबीजमुच्चार्य हृदयाय नमः॥ ईशा
ने द्वितीयबीजमुच्चार्य शिरसे स्वाहा॥ नैरृत्ये तृतीयबीजमुच्चार्य नेत्रत्रयाय वौषट्॥
वायव्ये पुनः प्रथमबीजमुच्चार्य कवचाय हुं॥ मध्ये द्वितीयबीजमुच्चार्य नेत्रत्रयाय वौ
षट्॥ चतुर्दिक्षु पूर्वादि तृतीयबीजमुच्चार्य अस्त्राय फट्॥ ततः त्रिकोणे रत्यादिमन्मथं
पत्रमूले अनंगादिकाः पूजयेत्॥ पत्रेषु असितांगभैरवादीन्पूजयेत्॥ भूगृहे इंद्रादिलो
कपालान्वज्रादींश्च पूजयेत्॥ ततो धूपादि विसर्जनांतं कर्म समापयेत्॥ अस्याः पुरश्च
रणं लक्षजपः॥

॥अथ भुवनेश्वरीभैरवी॥

॥तत्र ज्ञानार्णवे॥ हसाद्यं वाग्भवं
चाद्यं हसाकांते स्वरेश्वरी॥ भूबीजं भुवनेशानी द्वितीयं बीजमुद्धृतं॥ शिवचंद्रो महेशा
नि भुवनेशी च भैरवी॥ तथा हंसास्त्रयो पि हसकाररूढाः वस्वार्द्धपंक्तिः स्वरसंवलि
ताः आद्योसबिंदुपरतो विसर्गी॥ मध्ये विरिंचीन्द्र हराग्नियुक्तः॥ अस्यार्थः॥ शिवचंद्र

वाग्भवइतिप्रथमबीजं॥ शिवचंद्रकामपृथिवीमहामायाइतिद्वितीयंबीजं॥ शिवचंद्रच
तुर्दशस्वरविसर्गस्तृतीयंबीजं॥ अस्यायंत्रंचैतन्मन्त्रैरवीवक्ष्यं॥ पूजनंचप्राणायामं
तंविधायचैतन्मन्त्रैरष्यक्षपीठन्यासंकृत्वाऋष्यादिन्यासंकुर्यात्॥ तद्यथा॥ शिरसिदक्षि
णामूर्त्तयेऋषयेनमः॥ मुखेपंक्तिछंदसेनमः॥ हृदिभुवनेश्वर्यैदेवतायैनमः॥ ततःक
रांगन्यासौ॥ षड्दीर्घनाज्ञांमध्येकुर्यादंगक्रियामनोः॥ तेनषड्दीर्घयुक्तेनमध्यबीजेन
करांगन्यासः॥ यथा॥ हसकलह्रांअंगुष्ठाभ्यांनमः॥ हसकलह्रींतर्जनीभ्यांस्वाहा॥ हसक
लह्रूंमध्यमाभ्यांवषट्॥ हसकलह्रैंअनामिकाभ्यांहुं॥ हसकलह्रौंकनिष्ठाभ्यांवौषट्॥ हस
कलह्रःकरतलपृष्ठाभ्यांफट्॥ एवंहृदयादिषु॥ तथाचज्ञानार्णवे॥ मध्यबीजेनदेवेशिष
ड्दीर्घस्वरभेदिना॥ षडंगानिप्रविन्यस्यध्यायेद्देवींचतुर्भुजां॥ ततोध्यानं॥ जपाकुसुमसं
काशांदाडिमीकुसुमोपमां॥ चंद्ररेखांजटाजूटांत्रिनेत्रांरक्तवाससीं॥ नानालंकारसुभगां
पीनोन्नतपयोधरां॥ पाशांकुशावरांभीतिधारयंतींशिवाश्रये॥ अनयैवचैतन्मन्त्रैरवी

बत्करणीयं॥ भुवनेश्वरीमन्त्रैरभिधांतरमथोच्यते॥ सहार्घासेवदेवेशितदासाकले
श्वरी॥ ध्यानपूजादिकंसर्वमितस्याएवपार्वति॥ इयंसहार्घाचेत्सकलेश्वरी॥ ध्यानपूजा
दिकंतुपूर्ववत्॥ अथत्रिपुराबालामंत्रः॥ तत्रशारदायां॥ अधरेबिंदुमानाद्यंअस्तिंद्र
स्वराशियुतः॥ द्वितीयभृगुसर्गाद्योमनुस्तार्तीयमीरितं॥ एषाबालेतिविख्यातात्रैलो
क्यवशकारिणी॥ अस्यार्थः॥ वाग्भवंकामबीजंचचंद्रबीजंसविसर्गंचतुर्दशस्वरसंयु
क्तः॥ अस्याःपूजादिकंतुत्रिपुरभैरवीवत्शारदायामुक्तत्वात्॥ ज्ञानार्णवेतुविशेषः॥ अ
सन्न्यासादिकंएतद्बीजेनैवकुर्यात्॥ करांगन्यासस्तुद्विरुक्त्या॥ अस्यापुरश्चरणंत्रिलक्ष
जपः॥ तथाचज्ञानार्णवे॥ सूर्यस्वरसमुक्तायबिंदुनादकलान्वितं॥ स्वरांतंपृथिवीसंस्थं
तुर्यस्वरसमन्वितं॥ बिंदुनादकलाक्रांतंसर्गवान्भृगुरव्ययः॥ शक्रस्वरसमोपेतावि
द्येयंसुंदरीमता॥ अस्यदक्षिणमूर्त्तिसंहितायामप्येवं॥ एषाविसर्गबिंदुंताराताए
तांविद्यांसमुद्धृत्यसारसमुच्चयादौरागपबोधनात्॥ तद्यथा॥ विद्याभूलोमत्तिरेखाम

योक्ता ज्ञातव्येयं सर्वथा सिद्धिकामैः देव्याः शापेन विद्येयमाद्याः पूर्वं तेन प्राणहीना न चैस
ति॥ मुंडमालातंत्रेपि॥ कुमार्याश्च विधेयं तथा शापं नाति सुव्रते॥ अंतिमे न तु संजनितेन वि
द्या न सिध्यति॥ न चैवं शारदी रूपा विद्या पिशाचस्यादिति वाच्यं॥ तस्याज्ञानालंबोक्ष विद्ध
रित शापोद्धारमाह मुंडमालातंत्रे॥ केवलं त्रितयरूपेण शक्तिरूपेण केवलं॥ मायाप्रतिष्ठि
ता विद्या इति हकार सकारौ याष्टवौ कामराजे च॥ तार्त्तीयबीजे हकारः॥ वक्ष्यमाणसारस
मुच्चये॥ तथा च दर्शनात्॥ रुद्रयामले॥ वाग्भवं प्रथमं देवि कामराजं द्वितीयकं॥ तृतीयं श
क्तिबीजं तु शिवयुक्तं सदा न्यसेत्॥ एषा बाला समाख्याता सर्वदोषविवर्जिता॥ तथा च
श्रीक्रमे वाग्भवं क्लेदिनी बीजमित्यादि॥ वर्णजं हंसपेम्यं त्रैदशांशं हवनं न्यसेत्॥ तर्पणं च
तथा कुर्यान् सर्वसौभाग्यभाग्भवेत्॥ मंत्रांतरे॥ क्रमो वाग्भवं क्लेदिनी बीजं ईकारांतं ततः
पठेत्॥ शक्तिमौकारसंयुक्तं विसर्गं तदधः पठेत्॥ नादबिंदुशिवाक्रांतं बीजं परमदुर्लभं॥ ए
तद्बीजत्रयं देवि सौः क्लीं च ततः परं॥ इयं पंचाक्षरी विद्या कथिता भुवि दुर्लभा॥ तत्रैव॥ बा

ला बीजत्रयं देवी हसाद्यं वाग्भवं स्मृता॥ हसाद्यं चा महाज्ञागे स्मृतादि दोषशांतये॥ तत्रै
व॥ पाशाबीजं महेशानि शक्तिं शिवस वह्निकं॥ द्वादशस्वरसंयुक्तं नादबिंदुसमन्वितं॥
कामराजं प्रवक्ष्यामि ह्रींकारं शक्तिरेव कं॥ वह्निबीजं मनुर्युक्तं नादबिंदुससर्गकं॥ चतु
र्दशाक्षरी विद्या षोडशी मध्यमं त्वं विके॥ हंसबीजं ततः पश्चात् षोडशी कथिता मया॥ तत्रै
व॥ बालाबीजत्रयं देवी कूटत्रयं नवाक्षरी॥ वियत्कूटत्रयं देवि त्रैरवाख्यान वकूटं वि
यत्कूटं श्रीक्रमे संहारसोमबीजं च वह्निरेकारसंयुतं वियत्शक्तिश्च कामश्च इंद्रो वह्निश्च
मायया नादबिंदुकलाक्रांतं कूटं परमदुर्लभं॥ औकारांतं वह्निश्च औकारांतः समायु
क्तं विसर्गनादकं दितं इति मंत्रांतरं॥ श्रीक्रमे॥ शिवः शक्तिश्च वाग्बीजं नादबिंदुकला
न्वितं॥ वाग्भवं कथितं देवी कामराजं शृणु प्रिये॥ शिवशक्तिर्मदनेंदु वह्निमायासमन्वि
तं॥ नादबिंदुकलाक्रांतं कूटं परमदुर्लभं॥ शिवश्चंद्रश्च संघातसर्गं बिंदुकलान्वितः
एतान्नवाक्षरी बाला सर्वदोषविवर्जिता॥ अस्यार्थः॥ शिवश्चंद्रवाग्भवं प्रथमं॥ शिवचं

ऽ कामभूयवह्नित्र्यस्वरबिंदुयुक्तं द्वितीयं ॥ शिवचंद्रचतुर्दशस्वरबिंदुविसर्गयुक्तं तृतीयं ॥
अयं चंद्रादित्यश्च तथा त्रिपुरासाभैरवी प्रयुता ॥ कुलपूर्वदिशि कैर्यदिव्ये तत्कुलपूर्वा शिव
शीघ्रफलदा भुवि विधेया स्तूयते ॥ पश्चज्जने प्रतिलोम्याद्यं तु शक्तिबालाभैरवी ॥ त्रिपुरासा
दे ॥ शिवा हसने के तु लमादि बीजं जगस्यपूर्वाक्षमबीजमेतत् ॥ परं शिरसि तेजगदितत्रिवर्ण
संकेतविद्यागुरुवक्त्रगम्या ॥ मंत्रांतरे ॥ श्रीक्रमे शक्तिशिवो वह्निबीजं द्वादशस्वरबिंदुकं ॥
शक्तिमहेशौ कामश्च ईशो वह्निर्इंदुनायया ॥ शक्तिशिवश्च वह्निश्चमन्वंस्वरविसर्गकः ॥ नाद
बिंदुकलायुक्तं बीजमेतत्प्रकीर्तितं ॥ एतासां यंत्रं पूर्ववत् ॥ पूजादिकं तु भैरवीवत् ॥ पुर
श्चरणं लक्षजपः ॥ श्रीक्रमादौ तथोक्तत्वात् ॥ एतासंदीपनी विद्या श्रीक्रमे ॥ वदयुग्मं महे
शानि वाग्वादिनि ततः परं ॥ एवा त्वक्षा हरी विद्या या श्रवाद्येन नियोजयेत् ॥ क्लीं क्लें क्लेदि
नी देवेशि महामोहं ततः कुरु ॥ कामराजं समुच्चार्य प्रणवं तदनंतरं ॥ महामोहं कुरुप
श्चात् शक्तिकूटं तथोच्चरेत् ॥ जपेदाद्यंजपेलक्ष्यात्सप्तधा रमनुक्रमात् ॥ ॥ अथा

अन्नपूर्णाभैरवी ॥ ॥ ज्ञानार्णवे ॥ तारं तु भुवनेशानीं श्रीबीजं कामबीजकं ॥ हृदंते
भगवत्यंते माहेश्वरीपदं ततः ॥ अन्नपूर्णे च युगलं विधेयं वह्निदाहरा ॥ तथा च के
स्ये ॥ कामबीजं विना देवी त्रिबीजकामदायदा ॥ तत्पंचविंशत्यक्षरी देवी धनधान्यसमृद्धि
दा ॥ अस्याः पूजाप्रातःकृत्यादि सामान्यपीठकृपीठन्यासं विधाय केसरे पूर्वादि ॥ त्रै
वामायै नमः ॥ एवं ज्येष्ठायै ॥ श्रेष्ठायै ॥ रौद्र्यै ॥ काल्यै ॥ कलविकरिण्यै ॥ बलविकरिण्यै ॥ सर्वभू
तदमन्यै ॥ मनोन्मन्यै ॥ तत्समीपे तु ॥ जयायै ॥ विजयायै ॥ अजितायै ॥ अपराजितायै ॥
नित्यायै ॥ विलासिन्यै ॥ दोग्ध्र्यै ॥ अघोरायै ॥ नभ्रे मंगलायै ॥ ततः ह्सौः सदाशिवमहाप्रे
तपद्मासनाय नमः ॥ ततो ऋष्यादिन्यासः ॥ शिरसि ब्रह्मणे ऋषये नमः ॥ मुखे पंक्तिछंद
से नमः ॥ हृदि अन्नपूर्णेश्वर्यै नमः ॥ ×देवतायै× ततः करांगन्यासौ ॥ ह्रां अंगुष्ठाभ्यां न
मः इत्यादि ॥ ह्रां हृदयाय नमः इत्यादि ॥ तथा च ज्ञानार्णवे ॥ भुवनेश्या महेशानि षड्दी
र्घस्वरभिन्नया ॥ षडंगानि ति ॥ ततः पदन्यासः ॥ मूर्ध्नि ॐ नमः ॥ चक्षुषोः ह्रीं नमः ॥ कर्णयोः

श्रीं नमः॥ क्लीं नमः नमो॥ भगवती नमः माहेश्वरी नमः मुखे॥ अन्नपूर्णे नमः गुह्ये॥ स्वा
हा नमः पुनः गुह्यादि मूर्द्धांतं न्यसेत्॥ तत्रैव॥ एवमेव पुनर्ध्येयं पुनरेकहृदयं ततः॥ न्यसेत्ति
स्थितूर्द्ध्वपदोन्मेतानि पार्वति॥ ततो ब्रह्मरंध्रमुखहृदयमूलाधारेषु चतुर्बीजानि विन्य
सेत्॥ शेषं गुह्यं सर्वत्र नमोंतानि न्यसेत्॥ ततो मूलेन व्यापकं विन्यस्य ध्यानं कुर्यात्॥ तप्तकां
चनवर्णाभां बालेंदुकृतशेखरां॥ नवरत्नप्रदीपितमुकुटांकां कुमारुणां॥ चित्रवस्त्रपरि
धानां वरांकरां हीं त्रिलोचनां॥ सुवर्णकलशाकारपीनोन्नतघनस्तनीं॥ गौरी रधामधव
लं पंचवक्त्रं त्रिलोचनं॥ प्रसन्नवदनं शांतं भुजगालंकृतं विराजितं॥ कपर्दिनं स्फुरत्सर्पभू
षणं कुंदसमन्वितं॥ नृत्यंतमनिशं हृष्टं हृष्टानंदमयं परं॥ सानंदमुखलोलाढ्यां मेख
लाभ्यां नितंबिनीं॥ अन्नदाननिरतां रत्नाभ्यां समलंकृतां॥ इति ध्यात्वा मानसैः संपूज
यं बहिः स्थापनं कुर्यात्॥ अस्याः पूजायंत्रं त्रिकोणं च चतुष्पत्रं वसुपत्रं ततः परं॥ कलायं
त्रं च भूबिंबं चतुर्द्वारं समालिखेत्॥ ततः पीठपूजां विधाय पुनर्ध्यात्वावाहनादि पंचपु

ष्पांजलिदानपर्यंतं विधाय आवरणपूजामारभेत्॥ कर्णिकायां अन्नेशास्तुरवायव्यम
ध्ये दिक्षु ह्रां हृदयाय नमः इत्यादिना पूजयेत्॥ त्रिकोणाग्रे ॐ ह्रौं नमः शिवायेति शिवं पू
जयेत्॥ वामकोणे ॐ नमो भगवते वराहरूपाय भूर्भुवः स्वः पतये भूमिपतित्वं देहि
मे ददापय स्वाहेति मंत्रेण वराहं पूजयेत्॥ दक्षिणकोणे ॐ नमो नारायणाय इति नाराय
णं पूजयेत्॥ ततो वामे दक्षिणे च ॐ श्रीं अन्नमस्तदर्थं देह्यन्नाधिपतये ममान्नं प्रदापय स्वा
हा॥ ॐ श्रौं इत्यंते न भूमिश्रियौ पूजयेत्॥ ततश्चतुर्दले पूर्वतः आरभ्य ऐं परविद्यायै नम
॥ ह्रीं भुवनेश्वर्यै नमः॥ श्रीं कमलायै नमः॥ क्लीं सुभगायै नमः॥ तथा चक्रे नालवे॥ ता
रे त्वं परविद्यां च भुवनेशीं तवात्मना॥ कमलां च मयाचेकैकामेन सुभगां यजेत्॥ अ
ष्टपत्रेषु ब्रह्माद्यिमात्र पूजयेत्॥ षोडशपत्रेषु ॐ अमृतायै अन्नपूर्णायै नमः॥ एवमो
मानदायै नमः॥ ॐ लक्ष्म्यै॥ गं पुष्ट्यै॥ वं प्रीत्यै॥ तिं रत्यै॥ मां क्रियायै॥ हें श्रियै॥ श्वं सुधायै॥ वि
राज्यै॥ अं ज्योत्स्नायै॥ नं हैमवत्यै॥ पुं छायायै॥ र्णें पूर्णायै॥ स्वां नित्यायै॥ हां अमावास्यायै

एताः अन्नपूर्णांताः प्रजपेत्॥ तथा च ज्ञानार्णवे॥ द्विषष्ठिवर्णैः प्रकाश्य अन्नपूर्णांतराद्यिका
चतुरस्रे योगपीठान्ते प्रजपेत्॥ तत्रैव॥ चतुरस्रे योगपीठान्ते क्रमेण परिपूजयेत्॥
ततो धूपादिविसर्गांतं कर्म समापयेत्॥ अस्याः पुरश्चरणं लक्षजपः॥ तथा च॥ एवं ध्या
त्वा जपेन्मंत्रं लक्षसंख्यामनन्यधीः॥ साज्येनान्नेन कुर्यात्तद्दशांशमनंतरं॥ ॥६
तिन्नेश्वरीमंत्रपरिच्छेदः॥८ ॥अथ श्रीविद्या॥ ॥तत्र मेरुः॥ अग्निश्चंद्रः शिवो माया
शक्तिः कृष्णाध्वमादनौ॥ अर्धचंद्रश्च बिंदुश्च नवार्णो मेरुरुच्यते॥ महात्रिपुरसुंदर्या मं
त्रमेरुः समुद्धृतः॥ ज्ञानार्णवे॥ सकलाभुवनेशानी कामेशी बीजमुद्धृतं॥ अनेन सक
ला विद्या कथयामि वरानने॥ शक्तं तत् तुर्यवर्णेयं कमलमध्ये सुलोचने॥ वाग्भवं पंचव
र्णं कामराजमथोच्यते॥ मादनं शिवचंद्राढ्यं शिवांतं मीनलोचने॥ कामराजमिदं त
द्वषड्वर्णं सर्वमोहनं॥ शक्तिबीजं वरारोहे चंद्राढ्यं सर्वमोहनं॥ एतामुपास्य देवेशी
कामः सर्वांगसुंदरः॥ कामराजीन वेद्देवी विद्येयं ब्रह्मरूपिणी॥ अस्यार्थः॥ शक्तिरेका

रः॥ तुर्यस्वर ईकारः॥ तेन ककार एकार ईकार लकारः महामायाया वाग्भवकूटं॥ शिवो हका
रः॥ चंद्रः सकारः॥ तेन हकार सकार ककार हकार लकार महामाया इति कामराजकूटं
चंद्रः सकारः॥ तेन सकार ककार लकार महामाया शक्तिकूटं कामराजविद्येयं॥ का
मराजाख्यविद्यायाः शक्तिं तुर्यं च सुंदरि॥ हित्वा मुख्येशि वेदाद्यां लोपामुद्राप्रकाशि
ता॥ अस्यार्थः॥ कामराजाख्यविद्याया वाग्भवे एकारं ईकारं च त्यक्त्वा आदौ हकारं स
कारं च दद्यात् चंद्रपीठे॥ क शिवो जगत् तुर्यौ चरमामायेति वाग्भवं॥ शिवकामौ जगं
तुर्यः रमामायेति कामकं॥ जीवकामौ जगं तुर्य लपरा शक्तिकूटकं॥ मानवीयं स
मुद्रीता सर्वदेवैर्नमस्कृता॥ अनयोर्भेदमग्रे वक्ष्यामः॥ कामराजाख्यविद्याया वाग्भ
वे न वरानने॥ विद्योद्धारं प्रवक्ष्यामि शक्तिमादनमध्यगं॥ शिवं कुर्यात् वाग्भवे तुरि
याद्यं कामराजकं॥ चंद्राद्यं तु तृतीयं स्यात् विद्येयमनुपूजिता॥ अस्यार्थः॥ कामस
तः शिवस्तदनंतरमेकारस्तत ईकारादित्रयं वाग्भवकूटं मध्यकूटं शिवाद्यं तृतीयं

चंद्राख्यं ॥ ज्ञानार्णवे ॥ श्रृणु देवि प्रवक्ष्यामि लोपामुद्रान्वितां परां ॥ सहाद्यं वाग्भवं देवी चं
द्रार्धं शिवमध्यगं ॥ मादनं कामराजे तु शक्तिबीजं सहाननं ॥ चंद्रार्धपतिता विद्येयं भोग
मोक्षफलप्रदा ॥ अस्यार्थः ॥ सकार हकारादि कामराजविद्यावाग्भवकूटं वाग्भवं ॥ सकार
स्ततो हकारः कामस्ततः शिवः एकारस्तत ईकारस्ततो लकारः ततो महामाया इति काम
राजकूटं ॥ अस्य वाग्भवकूटमेव शक्तिकूटं ॥ कामराजाख्यविद्यायास्तार्त्तीयं सुरवंदिते
हसाद्यं शक्तिबीजं स्यात् विद्या अगस्त्यपूजिता ॥ अस्यार्थः ॥ कामराजाख्यविद्यापदेच्य
वाग्भवे कामराजकूटमस्यापि तदेव शक्तिकूटं तु सहाद्यमिति विशेषः ॥ कामराजाख्यवि
द्यामधिकृत्य चंद्रपीठे एतस्याः शक्तिकूटं चेद्गुह्यं भुपुरःसरं ॥ भुक्तिमुक्तिप्रदा विद्या लो
पामुद्राभ्युपासिता ॥ इयं तु द्वितीया लोपामुद्रा ॥ कामराजाख्यविद्यायावाग्भवे मादनं त्यज
चंद्रं तत्रैव संयोज्य कामराजे ततः परं ॥ हित्वा चंद्रं मुखे कुर्यात् विद्येयं नंदिपूजिता ॥ अस्या
र्थः ॥ कामराजविद्याया वाग्भवे कामं त्यक्त्वा चंद्रं दद्यात् कामराजे पुनः शिवांते चंद्रं त्यक्त्वा

चंद्राख्यं कुर्यात् ॥ अन्यत्तु समानं ॥ कामराजाख्यविद्याया हित्वा भूमिं तृतीयके ॥ शक्तिबीजस्थि
ता देवी चंद्राधः कुरु तत्र च ॥ तेन शक्तिकूटं चंद्रेंदु कामं महामायात्मकं विद्येयमिंद्रोपा
सिता ॥ लोपामुद्राख्यविद्याया द्वितीया महेश्वरी कामराजे भृगुं हित्वा तार्त्तीयस्य कामः
शिवः ॥ दक्षिणामूर्तिसंहितायां च ॥ सहाद्यमन्यसहयोर्मध्ये कः स्याद्यपूजितः ॥ अस्यार्थः ॥
द्वितीयलोपामुद्रायाः कामराजकूटे सकारं त्यजेत् ॥ तृतीयकूटे अंत्यसकारोपरि ककारं द
द्यात् ॥ विद्येयं सर्वपूजिता ॥ लोपामुद्रां द्वितीयां तु विलिख्य सुरसुंदरि ॥ पुनर्विलिख्य ता
मेव चतुर्थे पंचमे स्थितां ॥ हित्वा तु भुवनेशानिं कोणे आरेण योजयेत् ॥ चतुर्थकूटं महावि
द्याशांकरेण प्रपूजिता ॥ अस्यार्थः ॥ द्वितीयायां लोपामुद्रां विलिख्य पुनरपि तामेव विलि
ख्य चतुर्थकूटे पंचकूटे स्थितां भुवनेशीं त्यक्त्वा एकोच्चारेण योजयेत् ॥ उच्चारणं तु पूर्वं
त्रिकूटमुच्चार्य कामेकारस्तुर्येंदुशां भुराद्यां ककंदपशिवेंदु चंद्रकामपार्थिवी महामाया
उच्चरेत् ॥ लोपामुद्रां पुनर्देवि विलिख्य तदनंतरं ॥ नंदिकेश्वरविद्यायां च बहुकूटाये

स्मबीजं भवेत्॥ अस्यार्थः॥ पुनः शादस्वरस्मात् द्वितीयां लोपामुद्रामित्यर्थः॥ कामराजाख्यविद्या
याश्चिकूटे भुवराननेः॥ याश्चितान्मुवल्लेशानी द्विधा कुरु महेश्वरि॥ बिंदुहीना नादहीना
दुर्वासः पूजिता भवेत्॥ दक्षिणामूर्तौ च॥ मायास्थाने हृदि वर्णयुगलं चक्रमालिखेत्॥ अस्या
र्थः॥ कामराजाख्यविद्यायाः त्रिकूटभुवनेश्वरी॥ द्विगुणीकृत्य नादबिंदुहीनां कृत्वोच्चरे
त्॥ पाश्चिमाधिको षोडशी माहा॥ चंद्रांतं वारुणांतं च शक्रादिसहितं पृथक्॥ वामाक्षिबिं
दुनादाढ्यं विश्वमातृकलात्मकं॥ विद्यादौ योजयेद्देवि सा तु ज्ञानस्वरूपिणी॥ त्रिकूटास
कलाभेदाः पंचकूटा भवंति हि॥ वैलबीजस्य कूटस्यात् षट्कूटा शांकरी भवेत्॥ अस्या
र्थः॥ चंद्रांतं हकारः॥ वारुणांतं शकारः॥ शक्रादि रेफः॥ वामाक्षि ईकारः॥ विद्यादौ पूर्वोक्त
विद्यादौ॥ वेदादिमंडितादेवि शिवशक्तिमयी सदा॥ तस्माद्वेदैः सकलाः षट्कूटा पर
मेश्वरी॥ वैलबीजं च कूटस्यात् सप्तकूटा तु शांकरी॥ अस्यार्थः॥ पूर्वोक्तबीजद्वयवक्ती
वेदादिः प्रणवः मंडिता आदौ भूषिता॥ ॥ अथ महाषोडशी॥ ॥ आद्यबीजद्वयं च

द्विपरीतक्रमेण हि॥ विलिख्य परमेशानि ततो मानिस्मुदुरेत्॥ अंतर्मुखी वरारोहे कुमा
रि त्रिपुरेश्वरी॥ एभिस्तु पंचसंख्याकैः बीजैः संपुटितां जपेत्॥ षट्कूटां परमेशानि विद्धे
यं षोडशाक्षरी॥ त्रिकूटाः सकलाभेदे षोडशार्णा भवंति हि॥ वैलबीजे कोण विंशार्ण शिवास
तदशाक्षरी॥ अस्यार्थः॥ आद्यबीजद्वयं मायारमात्मकं तस्य विपरीतक्रमः॥ आदौ रमा
पश्चान्माया॥ अंतर्मध्ये स्थितं कामबीजं मुखे आदौ यस्याः कुमार्याः॥ एतैः पंचसंख्याकैः
बीजैः षट्कूटां नवकूटां सप्तकूटां वा संपुटितं संपुटवत्कृतां तेन अनुलोमपुटितामि
त्यर्थः॥ केचित्तु॥ अनुमत एव वदंति तन्न॥ यथा योगिनीतंत्रे॥ श्रीबीजं मायास्मरयोनि
योक्लिस्तारं च मायाक्रमलाद्यविद्या॥ शक्त्यादिबीजैश्च विलोमतो सा श्रीषोडशी पंच च शिव
प्रदिष्टा॥ तथारुद्रयामले॥ श्री माया मदनो वाणी परा तारं शिवप्रिया॥ हरिप्रिया त्रिकू
टा सा परा वाणी मनोभवः॥ माया लक्ष्मी महाविद्या श्रीबीजं षोडशी परा॥ दक्षिणामूर्तौ॥
द्वितीयस्यादियुग्मं तु विपरीतं लिखेत्सुधीः॥ बालां चांतर्मुखां कृत्वा विलिखेत्तदनंतरं॥

तारं मायां ततो लक्ष्मीं तथा कूटत्रयं लिखेत्॥ कलया संपुटं कुर्यात् रमाख्यां परमेश्वरीं॥
कलया पूर्वोक्तरूपं च कलया रमाख्यां प्रणवादि षट्कूटां रमाख्यामिति पाठः अयमेवार्थः
केचित्तु कलयास्थाने बालाया पाठं कुर्वंति॥ ततः परमेश्वरीमिति च बालायाश्चांतर्मुख्या
संपुटं वदंति रमाख्यां श्रीं परमेश्वरीं॥ ह्रीमिति च॥ तेन उत्तरदले ह्रीं ऐं क्लीं सौः श्रीं ह्रीं इति
वदंति॥ अनन्वयापत्तेश्च सर्वतंत्रविरोधात्॥ श्रीक्रमसंहितायां॥ श्रीमायामदनो
योनिः परैताविमुखे कुरु॥ वेदादिभुवनेशानि श्रीबीजं च त्रिकूटकं॥ षट्कूटां संपु
टिकुर्यात् आद्यैः पंचभिरक्षरैः॥ मायातंत्रे॥ लक्ष्मी परा मदनयोनियुता चरा ह्रींसा
रं परा च कमलाप्रथमा च विद्या॥ शक्त्यादि निश्च विपरीततया प्रदिष्टं श्रीमंत्रराजमुदि
तं परदेवतायाः॥ एतेनानुलोमतः॥ पंचबीजैः संपुटितामिति च मतं हेयं॥ क्रमतो तु
तन्त्र॥ नयरत्नेश्वरे॥ मंत्रमादौ यदि सर्वं साध्यसंज्ञामनंतरं॥ विपरीतं पुनश्चांते मंत्र
त संपुटं स्मृतं॥ पुनः क्रमतो तु॥ रमामायातारः परा लक्ष्मीः कुमारिका विद्याप्यस्ता बाला

श्री॥ परा तथाप्यस्ता विपरीता तथेति व्यस्तेत्यर्थः॥ कुमारी चांतर्मुखी॥ अत्र कुमारीकानं
तरं ताराद्दित्रिबीजसंबंधं तत्र यावत्तावज्ज्ञातृश्री पराचेति पाठेन केवलं बाला व्यस्ता श्री
पराचेति विद्यायां षोडशबीजात्मां स्वरूपकथनं वा॥ तेन श्रीमायातारं माया श्रीबालात्रिकू
टं॥ व्यस्ता बाला रमामायेति मतं च हेयं॥ कुलामृते॥ श्रीबीजं शक्तिबीजं च कामबीजं च वा
ग्भवं॥ बालांतसंस्थितं बीजं प्रणवं च ततः परं॥ शक्तिबीजं रमां चैव विद्यां च परमेश्व
री॥ लोपा बाला कामराजं वा त्रिकूटा नववा परं॥ विम्बस्य पुनराद्यानि बीजानि पंच सुंदरि॥
विपरीतक्रमेणैव विम्बस्तत् षोडशी परा॥ यामले॥ लक्ष्मी परा मदनवाग्भवशक्तिबीजं
तारं च भूतिकमलेक पिता च विद्या॥ कूटत्रयं च विपरीततया नियुक्तं श्रीषोडशाक्षरमि
हागमसुप्रसिद्धं॥ त्रिकूटं कामादि बालाया चकारात् रमां मायां च॥ निबंधे॥ शांतं तं चि
वपूर्वसहमयुतं स्वस्थांतमस्तान्वितं देवीं दक्षिणबाहुशाक्रनयनं कामं कलांछितं॥
दंतं तोर्ध्वमुखं ससर्गीयदशानं शोभमुखेनान्वितं बीजं पंचकमित्थमेव मुदितं सर्वार्थसिद्धि

प्रदं ॥१॥ वेदाद्यं त्रिगुणं रमामथ वदेत् कामेन संसेवितां लोपामुद्रपुनरेव पंचकमथो पू
र्वं विलोमक्रमैः ॥ एषा श्रीपरमा परात्परतरा सर्वार्थसिद्धिप्रदा सारात्सारतरा सम
स्तजगतां मुक्तिप्रदा शांभवी ॥२॥ रीं श्रीं ब्रह्मरूपा सकलगुणमयी निर्गुणा निःप्रपंचा
साक्षात्कामदुघा सुरमुनिवहैर्वंदितानंदरूपा ॥३॥ स एव अंतो यस्य तेन सांतः षका
रः ॥ सदा वांतो यस्य तेन यकारः ॥ शिवो हकारः तस्य पूर्वस्य प्रमो रेफः ॥ स्वस्वांतमीकारः ॥
सम्मनुस्वारः ॥ तेन रमाबीजं देवीमायां ॥ दक्षिणबाहुककारः ॥ शक्रो लकारः ॥ कामो बिं
दुकला कामकला तेन कामबीजं ॥ दंतांत ऐकारः ॥ ऊर्ध्वमुखं मुखस्य ऊर्ध्वबिंदुः ॥ जीवः सका
रः ॥ शेषदर्शनमीकारः मुखं विसर्गः तेन पराबीजं वेदाद्यं प्रणवः त्रिगुणमाया ॥ ज्ञाना
र्णवे ॥ वक्त्रकोटिसहस्रैस्तु जिह्वाकोटिशतैरपि ॥ वर्णितुं नैव शक्यो यं श्रीविद्याषोडशाक्ष
री ॥ बैल्वबीजात्मना बलात् स्मरात्माय गुणवर्णने ॥ यतो निरक्षरं वस्तु परात्त्रैव कारणं
मुक्तीच्छतां हि परपंचमध्यमानध्यमोन्नयेत् ॥ ब्रह्मविद्यास्वरूपा हि भुक्तिमुक्तिफलप्रदा

एकोच्चारेण देवेशि वाजपेयस्य कोटयः ॥ अश्वमेधसहस्राणि प्रदक्षिणं भुवस्तथा ॥ का
शपादितीर्थयात्रास्तुः सर्वे कोटिर्यान्विताः ॥ तुलां नायांति देवेशि नात्र कार्या विचारणा ॥ ए
कोच्चारेण गिरिजे किं पुनर्ब्रह्मकेवलं ॥ षोडशार्णमहाविद्यानप्रकाश्या कदाचन ॥ गोपि
तव्या त्वया भद्रे स्वयोनिरिव पार्वति ॥ सिद्धियामले ॥ कामो माया रमा वाग्भा त्रिकूटा श्री
मंगांकुशौ ॥ काली कामकला कूर्चं सर्वादीनमेवं प्रिये ॥ श्रीमहाषोडशी पंचयारम्या ताम्रु
वनत्रये ॥ ज्ञानेन मम्लुहाविद्या सर्वाम्नायैर्नमस्कृता ॥ सप्तरूपमहाविद्यास्तंत्रादौ कथि
ताः प्रिये ॥ सारात्सारं स्तुता या या या विद्याः सुगोपिताः ॥ बकुना किमिहोक्तेन तेषां सारा
तिषोडशी ॥ रुद्रयामले ॥ लोपामुद्राबीजं वेत्तुप्ष्यं तेदियथो जनात् ॥ सकारं कामराजो
दौ लोपात् षोडशाक्षरी ॥ अनया सदृशी विद्या नर्ण गोचरे ॥ तत्रैव विद्याराज्ञी वाग्भ
वे तु कांते नंत नियोजयेत् ॥ षोडशार्ण महाविद्या चित्कलैकमयी मृका ॥ लोपा वाग्भवरा
जं तेशिवबीजं नियोजयेत् ॥ तत्रैव शक्तिबीजेन लोपासप्तदशाक्षरी ॥ यस्याः स्मरण

मात्रेण शिवो नयति नाम्यथा॥ अणिमाद्यष्टसिद्धिर्गो साह्याद्य त्रिपुरं दर॥ तत्रैवाष्टदशा
क्षरी॥ यथा लोपामुद्रिकृत्य॥ अधरं बिंदुनायुक्तं वाग्भवाद्योनियोजयेत्॥ मादनं काम
जाद्येनात्रियाद्येमहेश्वरी॥ भृगुः सर्गान्वितो देवी मनुना च समन्वितः॥ अष्टादशाक्षर
ह्येषा श्रीविद्यास्तु विदुर्लभा॥ श्रीगुरोः कृपया देवी नित्यसिद्धिप्रदायिनी॥ नवलक्षं तु चि
त्वा तु लोपामुद्रां महेश्वरी॥ अष्टादशाक्षरी विद्याप्यष्टाभ्या वरानने॥ अनयाप्याशुपनाभि
तिकुर्वंतस्य विनश्यति॥ सर्वकल्याणदा विद्या सर्वविघ्नविनाशिनी॥ सर्वलोकाम्पदा दे
वी सर्वमंगलकारिणी॥ अनयास्य दशी विद्यात्रैलोक्ये चातिदुर्लभा॥ तत्रैव कामराजाख्य
विद्यायां वाग्भवादौ तु वाग्भवं॥ भुवनेशी कामराजे श्रीबीजं शक्तिपूर्वतः॥ एषाप्यष्टदशाक्ष
का सर्वसिद्धिप्रदायिका॥ भोगमोक्षप्रदा साक्षात् चतुर्वर्गप्रदायिका॥ अनयास्य दशी वि
द्या न विद्या न च गोचरे॥ नास्ति नास्ति पुनर्नास्ति सत्यं सत्यं वरानने॥ तत्रैव॥ प्रणवं पूर्वम
प्यन्ततो वै कुलसुंदरि॥ कामाक्षरं शक्तियर्णं पुरंदर हरीततः॥ भुवनेशीं समुद्धृत्य वि

लोमां बालिकांततः॥ प्रणवं सविसर्गं तु पुनश्च कुलसुंदरि॥ लोपावाग्भवमुद्धृत्य विलोमां बा
लिकांततः॥ प्रणवं सविसर्गं तु ततो वै कुलसुंदरि॥ शक्तिकूटं मध्यभागे हकारं योजयेत् द्वि
विलोमो बालिकांतत्र प्रणवं सविसर्गकं॥ इयं श्रीपरमा विद्या केवला मोक्षदायिनी॥ अ
स्या जपहुतध्यानैर्वाञ्छितं साधयेत्साधकः॥ तस्याः स्मरणमात्रेण शिवो नयति नान्यथा॥ कु
लसुंदरि बालाभ्यस्तार्णः प्रणवः॥ ॥अथ ब्रह्मविद्यामाह॥ ॥श्रीक्रमे॥ तां विद्यां
शृणु देवेशि कामबिंदुसमन्वितं॥ नादबिंदुकलाभेदात् तुरीयस्वरसंयुतं॥ महाश्रीसुंदरी वि
द्या महात्रिपुरसुंदरि॥ ककारे सर्वमुत्पन्नं कामकैवल्यदायकं॥ लकारे सकलैश्वर्यं ईकारे
सर्वसौख्यदं॥ एवं बीजत्रयं जह्नि विद्यानां सारसंग्रहं॥ वाग्भवं कामबीजं च शक्तित्वेन नि
योजयेत्॥ कामराजं लोपामुद्रयोर्विशेषमाह॥ कुलीं ऽ ऐं॥ श्री परा वाग्भवाद्यैश्च ईश्वरी
तारमन्मथे॥ आद्यन्ते निर्भया नां सुंदरी षड्विधा भवेत्॥ तथा च॥ नयीमाद्ये॥ माया का
मश्रीकामबीजं काममायाश्रीबीजं तथा श्रीमायाकामबीजं तथा त्रिविद्या दशाक्षरी॥ कुली

शरीतथाप्रतिपादितं॥कामंमायारमापूर्वंमायावल्लभीश्वरस्तथा॥रमामायातथाकामोथ
स्तुर्चंशादेरीत्रिधा॥शांभवशक्तिनेदमाह॥हंसमहेश्वरतंत्रे॥प्रकारश्चेदमनसाप्तजये
षदिमाधकः॥तांविद्यांशृणुदेवेशिक्रमेणकथयामिते॥पूर्वोद्धृतंकामराजंतदेवंशांभ
वंविदुः॥ककारादिर्यदाविद्यापूर्वाम्नायप्रचोदिता॥हेयंसाकिलितोमंत्रःसिद्धिदोमं
त्रिणांनसः॥एतच्छांभवमुद्दिष्टंशृणुशाक्तंवरानने॥स्वरयोनिजलोकोमं[illegible]लोत्रित
यंनगवदाचार्येणप्रतिपादितं॥शाक्तिकामराजंतुश्रीक्रमे॥मायाबीजंततोहिंदीकामं
राकंवियत्क्रमात्॥ज्ञातवेदोमगांकेनलांछितापरमेश्वरी॥एतद्याभ्नवकूटंचपूर्व
वत्कामराजकं॥तथैवशक्तिबीजंतुसुंदर्येवाप्रकीर्तिता॥अत्रापिपूर्ववत्बीजसंयोगः
मायाईकारः॥हिंदिएकारः॥पुनःशाक्रमाह॥एतद्रूगंततोमायाभ्रलाशक्तोहरोग्निना॥वा
मनेत्रेणसंयुक्तोनादबिंदुविभूषितः॥एतद्वाग्भवमुद्दिष्टंपूर्ववत्कामशक्तिकं॥नगंएका
रः॥अत्रविशेषः॥ब्रह्मबीजंयदारम्यात्त्रिकूटेदेविदुर्जने॥प्रथमासुंदरिदेविविद्विता

याब्रह्मसुंदरी॥शक्तिकूटेमहेशानि-अनंतसुंदरीमता॥एषातुषोडशीविद्यामततमेदेनदर्शि
ता॥त्रिकूटांतेहंसबीजंबिंदुसर्गविभूषितं॥एषाश्रीमाएसंयुक्तादारिद्र्यदुःखमोचनी
विद्यायात्रिपुरेश्वर्याविद्यात्रैलोक्यदुर्जया॥अत्रपादइतिविख्यातासीयशक्तिसमन्विता
कोटिग्रंथेमयानोक्ताश्रीक्रमेत्वयिदर्शिता॥शाक्तेलोपान्तशक्तिमहेशःकामश्चईंक
बीजंततःपरं॥महामायाततःपश्चात्तत्रयस्त्रीहाहृदाम्महं॥पूर्ववत्कामराजाख्येव
लोनिष्कलितात्मको॥इतिशक्तेर्महाविद्यापश्चिमाम्नाययोजिता॥शक्तिःसकारः॥पूर्व
वत्कामराजविद्यावत्॥अत्रापिपूर्ववत्बीजसंयोगः॥शक्तिबीजंशक्तिसोमंमादनं
चपुरंदरं॥व्योमवह्निसमायुक्तंतुरीयस्वरबिंदुकं॥पूर्ववत्कामराजंतुशक्तिबीजंस
मुद्धरेत्॥एषाविद्यामहेशानिचलितुंनैवशक्यते॥शक्तिःसकारः॥सोमःसकारःपूर्वव
त्कामराजविद्यावत्॥शिवशक्तिभुवनेशानिवाग्भवंबीजमुत्तमं॥कामंव्योमचदेवेशि
महामायाततःपरं॥सोमंव्योमसमहामायानवार्णापरिकीर्तिता॥रुद्रशक्तिरियंदेविप्र

वन्हिजाये हि नायिकां ॥ ईश्वर उवाच ॥ एकादशाक्षरी विद्या भैरव्याः कथिता मया ॥ इदानीं तव
प्रीत्यर्थं कथयामि परां वरां ॥ मादनं गोत्रजित्कांतो रेफवामार्धचंद्रवान् ॥ नादबिंदुसमायु
क्तः कथितः परमेश्वरी ॥ आलोंबुगगनं शाक्तीन कुलीशेन जःशशी ॥ माया बिंदुसनादेन
कामबीजं समुध्दरेत् ॥ शक्तिर्मादनश्चाकूर्चहरीवह्निउमायया ॥ बिंदुनादसमाक्रांतं कथि
तः कामदो मनुः ॥ एषा विद्या महेशानि कथिते कादशाक्षरी ॥ मादनं पंचवक्रं च लोहिता
रुद्रयोगिनी ॥ पुरंदरो महामाया वाग्भवं बीजमुत्तमं ॥ पूर्ववत्कामराजाख्यमुध्दरेद्देवि सुं
दरी ॥ एतन्मंत्रं समुद्दिष्टं शाक्तं तु कथयामि ते ॥ लोहितः सकारः ॥ रुद्रयोगिनी समकारः
पूर्ववत्कामराजवत् ॥ भ्वीरं गगनं हां तं कालमिंद्रं महेश्वरं ॥ वामाक्षि वह्नि बिंदाढ्यं वा
ग्भवं परमेश्वरी ॥ कामबीजं शाक्तिकूटं पूर्ववत्तु समुध्दवेत् ॥ भ्वीरं सकारः ॥ हां तं हका
रः ॥ कालो मकारः ॥ पूर्ववत्कामराजविद्यावत् ॥ ततो हमुत्तरान्मायेंद्रलुदेविविशेवतः
विष्णुरीशस्ततो हांतं कालेशः पृथिवी ततः ॥ भुवनेशी ततः पश्चाद्वाग्भवं कथितं तव ॥ का

मराजं शाक्तिकूटं पूर्ववत्कथितं प्रिये ॥ विष्णुईशः ॥ सकारयुक्तहकारः ॥ कालेशो मकारः ॥ सो
ऽन्यां कथयिष्यामि श्रृणुष्वैकाग्रमानसे ॥ शक्तिस्वयंभुरुद्रश्च शक्रस्तु भुवनेश्वरी ॥ शिवो
मादनरुद्रेंद्रमहामाया ततः परं ॥ कामः शिवस्ततो ब्रह्माइंद्रश्च भुवनेश्वरी ॥ एषा तु पर
मेशानि सुंदरी सुरगोदया ॥ वाग्बीजं विजयामायाब्रह्मा शक्रस्तु पार्वती ॥ नमस्यं शिव
शक्तिं च मादनो हरइंद्रकः ॥ महामाया ततः पश्चात्शक्तिर्मनुस सगर्गकः ॥ बंद्रः प्रजापतिः
शक्रो महामाया ततः परा ॥ सप्तदशाक्षरी विद्या महात्रिपुरसुंदरी ॥ सर्वांगे हंसलं पु
क्तांविंशाक्षरी सदा भवेत् ॥ देव्युवाच ॥ भाषास्वहि श्लिष्टितिरितिनिराशः पंचसुंदरि ॥ कथ
यस्व प्रसो देव यदि तेऽस्ति मयि ॥ ईश्वर उवाच ॥ शिवो मादन इंद्रश्च शक्तिश्च भुवनेश्वरि
ब्रह्मा शिवेंद्र शक्तिश्च महामाया ततः परा ॥ मादनेंद्रौ शक्तिशिवौ महामाया तदंतिके ॥
एषा पंचदशी नाम श्रीमत्त्रिपुरसुंदरी ॥ शक्तिः सकारः ॥ एषान्नाम ॥ शिवश्चेंद्रस्तथा
कामः शक्तिश्च भुवनेश्वरी ॥ शिवेंद्र कामइंद्रश्च ततश्च परमेश्वरी ॥ शक्तिकामश्च शक्रश्च

महामायाततःपरा॥एषास्याद्धिरितिर्यात्रैलोक्यपरमेश्वरी॥क्षितिरेषा॥शिवेंदुकामशक्ति
श्चतत्पराभुवनेश्वरी॥शिवशक्तिमादनेंद्रोशिवयुह्रीदुमायया॥शिवःशिवश्चकलहाव
ह्निमायेंदुविभूषिता॥एषासंहृतिः॥शक्तोब्रह्माइंद्रबीजंमहामायाततःपरं॥वाग्भवंकथि
तंचैतत्कामराजंततःस्मृतं॥शक्तिःशिवोमादनेंद्रोतत्परापरमेश्वरी॥महेशोब्रह्माहंस
श्चेंद्रोपिपरमेश्वरी॥सहेशःशक्तिकामश्चपुरंदरोवियत्तथा॥अग्निमायाकलायुक्तं
नादबिंदुविभूषितं॥हंसोहकारः॥मायाकलाईकारः॥एषास्वभावती॥ब्रह्ममहेशाइंद्र
श्चशक्तिश्चभुवनेश्वरी॥ब्रह्मावियन्मरुच्छक्तिस्तत्पराभुवनेश्वरी॥मादनंसोमशक्ति
श्चशक्तिश्चपरमेश्वरी॥मरुत्यकारः॥एषामधुमती॥कामकेश्वरीविद्येयंत्रिकूटक्र
मपाठिता॥सोमाग्न्यात्मकत्रिकूटेनपंचम्याःपंचम्याःपंचकूटकं॥त्रिपुरायामहाविद्याकूटै
कादशनिर्मिता॥ ॥अथपंचमी॥ ॥कामंविष्णुयुतंदेवीशक्तिर्मायेंद्रमेवच॥मह
मायांततःपश्चाद्वाग्भवंबीजमुद्धरेत्॥विष्णुयुक्तंअकारयुक्तमित्यर्थः॥शक्तिरेकारःमा

याईकारः॥वियत्चंद्रस्ततःपश्चात्कलोनकुलीवह्निच॥मायास्वरेणसंयुक्तंनादबिंदुक
लान्वितं॥प्रथमंकामराजस्यबीजंपरमदुर्लभं॥वियद्विष्णुयुतंकामहंसःशक्रस्ततःपरं
महामायाततःपश्चात्स्वभावतीतिकथ्यते॥एतद्द्वितयंकामकूटं॥हंसोहकारः॥मादनंशि
वबीजंचवायुबीजंततःपरं॥इंद्रबीजंततःपश्चान्महामायांसमुद्धरेत्॥इतितृतीयं॥इयं
मधुमती॥शिवबीजंततःकामंइंद्रंदेवीनियोजयेत्॥महामायांततःपश्चात्शक्तिकूटंस
मुद्धरेत्॥देवीसकारं॥जीवप्राणौमहादेवीमादनंतदनंतरं॥इंद्रबीजंततःपश्चाद्भुवनेशी
तदनंतरं॥इतियाशक्तिकूटं॥जीवंसकारः॥प्राणोहकारः॥अथवादेवदेवेशीसौभाग्
ग्याख्यावाग्भवं॥कूटत्रयंकामबीजंशक्तिबीजंचपूर्ववत्॥एषाशक्तामहादेवीपंचमी
परमेश्वरी॥वामनेत्रादिकूटंवाभगादिकूटमेववा॥परिहासिद्धिदानित्यासर्वदोष
विवर्जिता॥भगएकारः॥एतेनाष्टधापंचमीवाग्भवशक्तिकूटभेदेन॥तथाचयामले
द्विविधापंचमीविद्यापंचपंचाक्षरीपरा॥मध्येषडक्षरंचैवशक्तिश्चचतुरक्षरा॥षडिति

कामराजविद्यायामध्यकूटं॥शक्तिकूटमितिकामराजस्यशक्तिकूटमित्यर्थः॥एवाचतुर्धा
याज्ञवकूटभेदात्॥एतयोःकामराजस्यतृतीयकूटंतुतत्रैव॥कामबीजंमहेशानीशिव
बीजंस्ततःपरं॥तदधोहंसबीजंतुइंद्रबीजंविचिंतयेत्॥महामायाततःपश्चात्कूटंपर
मदुर्लभं॥एकापूर्वंयदष्टधाऽन्यस्यतुधा॥तथातत्वबोधे॥कामाकारापराशक्तिसंस्थान
कृतरूपिणी॥तंत्रे॥कामबीजंमहेशानिशंभुबीजंततःपरं॥तदधश्चेंद्रबीजंतुपृथ्वीबीजं
ततोलिखेत्॥तदंतेचमहामायाकूटंपरमदुर्लभं॥एवाऽष्टधानभेदाऽधाऽन्यस्माच
तुधातिनवद्वात्रिंशत्रूपिणी॥एतासांचविद्यानांप्राणांश्रृणुवरानने॥रमांमायांहंस
बीजंवाग्भवाद्येनियोजयेत्॥शक्त्यंतेतुमहादेविहंसमायांरमांतथा॥एभिर्युक्तेनदेवे
शिविद्याजपनमाचरेत्॥जपश्चसप्तवारमेवदीपनंतथादर्शनात्॥एतासामितिपू
र्वोक्तश्रीक्रमोक्तविद्यानांपंचम्यांविशेषः॥तद्यथा॥रमांमायांहंसबीजंवाग्भवाद्येनियो
जयेत्॥शक्त्यंतेतुमहेशानिहंसमायांरमांतथा॥कामराजत्रयोदशीककारंशक्तिसंयु

तं॥मायाबिंदुस्वरयुतंसूर्यकोटिसमप्रभं॥प्रथमंकामकूटस्यचाद्येनियोजयेत्॥इदंवांतं
वह्निसमायुक्तंवामनेत्रविभूषितं॥नादबिंदुसमायुक्तंश्रीयोबीजमुदाहृतं॥द्वितीयंकाम
राजंवैजपेत्कूचसुंदरि॥गगनंवह्निसंयुक्तंवामनेत्रसमन्वितं॥नादबिंदुसमायुक्तंमा
याबीजंप्रकीर्तितं॥मधुमतीजपेश्चापिसर्वकामफलप्रदां॥ ॥इतिचेतनी॥ ॥अ
थदीपिनी॥ ॥तारलक्ष्मीचवाग्बीजंमन्मथंभुवनेश्वरीं॥एतत्कृत्वाततःपश्चाद्दीप
नाख्यंसमुच्चरेत्॥प्रणवंभुवनेशानींरमांकामंचवाग्भवं॥कामबीजंततोजप्त्वात्रैलो
क्यक्षोभकारकं॥ओंकारश्चैववाग्बीजंरमामन्मथमायया॥स्वभावतीमंदेवेशिजपेन्म
त्रसमाहितः॥प्रणवंचाधरंकामंरमाचभुवनेश्वरीं॥मधुमतीततोजप्त्वामायांश्रीं ह्रीं
कूर्चबीजकं॥प्रणवाद्यंचदेवेशिहंसबीजपुरीकृतं॥एतद्बीजंसमुच्चार्यशक्तिकूटंततो
जपेत्॥जपनियमस्तु॥जपेदादौजपेत्पश्चात्सप्तवारमनुक्रमात्॥कामराजादिविद्या
नांदीपनंचैवकारयेत्॥वाग्भवेकामराजेतुशक्तिकूटेसुरेश्वरि॥तत्रक्रमः॥पंचमी

वाबीधं वाग्भवं शक्तिकूटयोर्दीपिनी कामकूटे पुनः ॥ प्रणवे भुवनेशानी रमा कामं च वा
ग्भवं दीपिनीमिति ॥ सर्वकूटेश्वरसंबंधः सौभाग्या विद्यामधिरूप्य योगिनीहृदये ॥
स्वरव्यंजनभेदेन सप्तत्रिंशात्मभेदिनी ॥ सप्तत्रिंशात्तभेदेन षट्त्रिंशात्तत्वरूपिणी ॥ ता
वती वस्वमोघा च विद्येयं ब्रह्म्यते सदा ॥ श्रीकंठदशकं तत्वदष्टकस्य हि वाचकं ॥ प्राणम
तस्त्रिनोदेवि तत्वदेकादशः परः ॥ ॥ अथ श्रीयंत्रं ॥ ॥ यथा बिंदुमात्रांस्तमष्टको
ण एतत् यंत्रसंहारचक्रं ॥ द्विर्दशारं चतुर्दशारं स्थितिचक्रमितत्त्रयं ॥ अष्टपत्रं षोडशादलं
त्रिवृत्तं भूसदनत्रयं ॥ चतुर्द्वारसमायुक्तं एतत्सृष्ट्यात्मकं ॥ तद्वक्ष्यामनले ॥ बिंदुत्रिकोणव
सुकोणदशारयुग्ममन्वस्रनागदलसंगतषोडशारं ॥ वृत्तत्रयं च धरणीसदनत्रयं च
श्रीचक्रराजमुदितं परदेवतायाः ॥ एवं चक्रराजं सिंदूरकुंकुमादिलिखितं सुवर्णरजत
पंचरत्नस्फाटिकताम्राष्टलोहं वा कुर्यात् ॥ भैरवे ॥ योऽस्मिन् यंत्रे महेशानि केसरा
णि प्रकल्पयेत् ॥ योगिनिसहितास्तस्य हिंसां कुर्वंति भैरवाः ॥ इति वचनान्मात्र केसरा

णि ॥ स्वच्छंदभैरवे ॥ कुर्यात्स्थंडिले यंत्रं हस्तमात्रं सुंदरं ॥ रत्नादिषुनिमनिमानमिछाव
शात्तद्यजयेदिति ॥ रक्तेन रजसा पूर्य श्रीचक्रं त्वभिपूजयेत् ॥ नश्यंति सर्वविघ्नानि प्राप्यते च
यथेप्सितं ॥ दशभागं सुवर्णस्य ताम्रस्य द्विदशं तथा ॥ षड्युगांरजतस्यापि चैतन्मोहत्रयं
स्मृतं ॥ चक्रेस्मिन्पूजयेद्यो हि स सौभाग्यमवाप्नुयात् ॥ अणिमाद्यष्टसिद्धीनामधिपो जाय
ते चिरात् ॥ विद्रुमैरचिते यंत्रे पद्मरागेप्यवा प्रिये ॥ इंद्रनीलेपि वैडूर्ये स्फाटिके मरकतेपि वा
धनं पुत्रं तथा दारान् यशांसि जनेत् ध्रुवं ॥ ताम्रं तु कांतिदं यंत्रं स्वर्णजं शत्रुनाशनं ॥ रा
जतं हेमदं चैव स्फाटिकं सर्वसिद्धिदं ॥ अत्र यंत्रमात्रमिति ज्ञेयं ॥ ॥ अथ चक्रादिनाशे प्रा
यश्चित्तमाह ॥ ॥ दग्धं च स्फुटितं यंत्रं हृतं चौरेण वा प्रिये ॥ उपवासं प्रकुर्वीत दिनमेक
मतंद्रितः ॥ लक्षमात्रं जपेद्विद्यां होमतर्पणपूर्विकां ॥ सहस्रा च गुरुं तस्य ब्राह्मणानपि
भोजयेत् ॥ लक्षं जप्त्वा दशांशतो होमस्तद्दशांशं च तर्पणं ॥ लक्षमयुतं नित्यं के कदाचिद्
लुप्तं चिह्नं वा स्फुटितादि विरूपणं ॥ नग्नं करोति यो मर्त्यो मृत्युस्तस्य ध्रुवं भवेत् ॥ तस्माच्च

तीर्थराजेयागंगादिसरितांवरे॥समुद्रेएकत्रिपेदेवीनत्स्यादुःखमाप्नुयात्॥इयंतुयं
त्रमात्रविषयं॥ ॥अथश्रीचक्रपादोदकमाहात्म्यं॥ ॥गंगापुष्करनर्मदाचयमु
नागोदावरीगोमतीगंगाद्वारगयाप्रयागबदरीवाराणसीसिंधुषु॥रेवासेतुसरस्वती
प्रभृतीषुब्रह्मांडभांडोदरेतीर्थस्नानसहस्रकोटिफलदंश्रीचक्रपादोदकं॥ ॥अथ
दर्शनफलं॥ ॥सम्यक्दानतःकृच्छ्रंकृत्वायत्फलंसमवाप्नुयात्॥तत्फलंलभतेनत्वा
कृत्वाश्रीचक्रदर्शनं॥षोडशमहादानानिकृत्वायल्लभतेफलं॥तत्फलंसमवाप्नोतिकृ
त्वाश्रीचक्रदर्शनं॥सार्द्ध~~अथत्रयं~~कोटितीर्थस्नात्वायत्फलमश्नुते॥तत्फलंलभते
नत्वाकृत्वाश्रीचक्रदर्शनं॥ ॥अथसंक्षेपपद्धतिः॥ ॥प्रातःकृत्यादिप्राणा
यामांतंकर्मविधायऋष्यादिन्यासंकुर्यात्॥ततोवशिन्यादिन्यासः॥तद्यथा॥अं१६व
शिनीवाग्देवतायैनमोब्रह्मरंध्रे॥कं५कलह्रींकामेश्वरीवाग्देवतायैनमोललाटे॥
चं५वांमोदिनीवाग्देवतायैनमोभ्रूमध्ये॥टं५ह्लूंविमलावाग्देवतायैनमोतंकंठे॥

तं५ज्म्र्रींअरुणावाग्देवतायैनमोहृदि॥पं५ह्स्ल्व्यूंजयिनीवाग्देवतायैनमःनाभौ॥
यं५झ्म्र्व्यूंसर्वेश्वरीवाग्देवतायैनमःआधारे॥शं५क्ष्म्र्रींकौलिनीवाग्देवतायैनमःस
र्वांगे॥ ॥अथऋष्यादिन्यासः॥ ॥तथाचसमयांके॥त्रिपुरसुंदरीमंत्रस्यदक्षि
णामूर्त्तयेऋषयेनमःशिरसि॥पंक्तयेछंदसेनमःमुखे॥त्रिपुरसुंदर्यैदेवतायैन
मोहृदि॥अस्यत्रिपुरसुंदरीमंत्रस्यदक्षिणामूर्त्तिऋषिःपंक्तिछंदःत्रिपुरसुंदरीदेवता॥
ऐंबीजंकामराजंकीलकंतार्त्तीयंशक्तिःपुरुषार्थचतुष्टयेविनियोगः॥तथाचज्ञानार्ण
वे॥बीजंतुवाग्भवंशक्तिस्तार्त्तीयंकीलकंततः॥कामबीजंमहेशानिबीजन्यासस्ततःपरं
शिरसिदक्षिणामूर्त्तयेऋषयेनमः॥मुखेपंक्तिछंदसेनमः॥हृदित्रिपुरसुंदरीदेवता
यैनमः॥गुह्येवाग्भवायबीजायनमः॥पादयोस्तार्त्तीयशक्तयेनमः॥सर्वांगेकामरा
जायकीलकायनमः॥तथाचवाग्भवादिस्वरूपंदक्षिणामूर्त्तौनिःसरंतिमहामंत्राममा
ग्नेश्चस्फुलिंगवत्॥तथैवमातृकावर्णानिःसृतावाग्भवात्प्रिये॥अतएवतदेवास्यावाग्

वंबीजमुच्यते॥ योबिंदुपुरुषरूपेण स्फुरंति विश्वमातृका॥ महामोहेन देवेशी कीलयं
तीजगत्रयं॥ अतस्तत्कीलकं देवी तेन सोऽगप्यगर्विता॥ पालयंती जगत्सर्वं तेन यंत्रा
त्त्रिरुच्यते॥ ॥अथ करन्यासः॥ ॥अं मध्यमाभ्यां नमः॥ आं अनामिकाभ्यां नमः॥
सौ कनिष्ठाभ्यां नमः॥ अं अंगुष्ठाभ्यां नमः॥ आं तर्जनीभ्यां नमः॥ सौः करतलपृष्ठाभ्यां न
मः॥ ॥अथांगन्यासः॥ ॥ऐं हृदयाय नमः॥ क्लीं शिरसे स्वाहा॥ सौः शिखायै वषट्
ऐं कवचाय हुं॥ क्लीं नेत्रत्रयाय वौषट्॥ सौः अस्त्राय फट्॥ ततो मूलेन व्यापकं कुर्यात्॥
ततो ध्यानं॥ तद्यथा॥ बालार्कमंडलाभासां चतुर्बाहुं त्रिलोचनां॥ पाशांकुशधरां चापं धा
रयंतीं शिवां श्रये॥ इति ध्यात्वा मानसैः संपूज्य आनंदात्मिति चिंत्वा स्वशंखस्थापनं कुर्या
त्॥ श्रीचक्रपुरतः स्ववामे षट्कोणमध्ये त्रिकोणं विलिख्य मध्ये त्रिपादिकां संस्थाप्य मू
लेन षट्कोणं पूजयेत्॥ फडिति शंखं प्रक्षाल्य तत्र गंधपुष्पादिकं निक्षिप्य मूलेनापूर्य मं
डलादिकं पूजयेत्॥ मं वह्निमंडलाय दशकलात्मने नमः॥ इति त्रिपादिकायां अं सूर्यमं

डलाय द्वादशकलात्मने नमः इति शंखे॥ उं सोममंडलाय षोडशकलात्मने नमः इति जले॥
ततो ॐ गंगे च यमुने चैव गोदावरी सरस्वती॥ नर्मदे सिंधु कावेरी जलेऽस्मिन् संनिधिं कुरु॥
इत्यादिना तीर्थमावाह्य हुमित्यवगुंठ्य वषडंगेन संपूज्य धेनुमुद्रां प्रदर्श्य मूलमंत्रमष्टधा जप्त्वा
तज्जलं प्रोक्षण्यां किंचिन्निक्षिप्य तेनोदकेनात्मानं पूजोपकरणं चाभ्युक्षयेत्॥ तद्दक्षिणे पाद्या
दिपात्रं संस्थाप्य आसनपूजामारभेत्॥ ततः पर्युपरि यंत्रस्य आधारशक्तये नमः॥ ॐ कू
मायायि नमः॥ ॐ पृथिव्यै नमः॥ ॐ अनंताय नमः॥ एवं सांबुध्ययेरमदीपाय नमः॥ नंदनो
द्यानाय रत्नमंडपाय कल्पवृक्षाय रत्नवेदिकायै रत्नसिंहासनाय पाठोपरि बैंदवचक्राय
हस्नोः सदाशिवमहाप्रेतपद्मासनाय नमः॥ पंचायतने चेदस्मिन् समये गणेशादिपूजा
सर्वत्र प्रणवादि नमोंतेन पूजयेत्॥ ततो बैंदवे हसरैं हसकलरीं हसरौः इति मूर्त्तिं संक
ल्प्य त्रिखंडाख्यमुद्रां बध्वा पूर्ववत् ध्यात्वा प्रथम हन्नासापुटेन तेजोमयं पुष्पांजलावानीय
ॐ महापद्मवनांतस्थे कारणानंदविग्रहे॥ सर्वभूतहिते मातरेह्येहि परमेश्वरि॥ इति

मूर्त्तौ संस्थाप्य वाहनादि यथोपचारेण पूजां विधाय षडंगानि पूजयेत्॥ अग्नीशासुरवा
युमध्ये दिक्षु चाग्नेयकूटमुख्याय हृदयाय नमः॥ कामराजमुख्याय शिरसे स्वाहा॥ शक्तिबी
जमुख्याय शिखायै वषट्॥ पुनर्वाग्भवकूटमुख्याय कवचाय हुं॥ कामराजमुख्याय नेत्रत्र
याय वौषट्॥ शक्तिकूटमुख्याय अस्त्राय फट्॥ ततो मध्ये प्राक्क्रमेण मध्ये गुरुपंक्तिं पूज
येत्॥ ऐं ह्रीं श्रीं गुरुभ्यो नमः॥ ३ गुरुपादुकाभ्यो नमः॥ ३ परमगुरुभ्यो नमः॥ ३ परापरगु
रुभ्यो नमः॥ ३ परापरगुरुपादुकाभ्यो नमः॥ ३ परमेष्ठिगुरुभ्यो नमः॥ ३ परमेष्ठिगुरुपा
दुकाभ्यो नमः॥ ३ आचार्येभ्यो नमः॥ ३ आचार्यपादुकाभ्यो नमः॥ ततश्चतुरस्रस्य प्रथम
रेखायां ऐं ह्रीं श्रीं अणिमाद्यष्टसिद्धिश्रीपादुकां पूजयामि नमः॥ मध्यरेखायां ब्राह्म्याद्य
ष्टदेवीश्रीपादुकां पूजयामि॥ अंतरेखायां सर्वसंक्षोभिण्यादिमुद्राश्रीपादुकां पूजयामि
नमः॥ सर्वत्र आवरणपूजायां श्रीपादुकापदप्रयोगः॥ तथा च तंत्रांतरे॥ श्रीपदं पूर्वमु
च्चार्य पादुकापदमुद्धरेत्॥ पूजयामि नमः पश्चात् पूजयेदंगदेवताः॥ चक्राग्रे ३ त्रिपुर

चक्रनायिकाश्रीपादु०॥ अत्र त्रैलोक्यमोहने चतुरस्रचक्रे त्रिपुराचक्रनायिकाधिष्ठिते
एता अणिमाद्याः प्रकटयोगिन्यः समुद्राः सायुधाः सपरिवाराः सवाहनाः पूजितास्तर्पि
ताः संतुष्टाः सर्वार्घ्येण मूलदेव्यै समर्पयेत्॥ त्रिपुरापदव्युत्पत्तिस्त्रयाराहितंत्रे॥ ब्रह्मविष्णु
महेशाद्यैस्त्रिदशै रर्चिता पुरा॥ त्रिपुरेति तदा नाम कथिदेव तत्र सा च॥ तर्पणं तु वामहस्ते
न॥ तथा स्वतंत्रे॥ अंगुष्ठानामिकायोगाद्वामहस्तस्य पार्वति॥ तर्पयेत्सुंदरीदेवीं समु
द्रां च सवाहनां॥ ततः षोडशदले अं ३ कामाकर्षिण्यादिषोडशनित्याश्रीपादु०॥ चक्राग्रे ३ त्री
पुरेशीचक्रनायिकाश्रीपादुकां पू०॥ अत्र सर्वाशापरिपूरके षोडशदले चक्रे त्रिपुरेशीच
क्रनायिकाधिष्ठिते एताः कामाकर्षिण्याद्याः गुप्तयोगिन्यः समुद्रा इत्यादि मूलदेव्यै समर्प
येत्॥ अष्टदले ३ अनंगकुसुमादिदेवीश्रीपादु०॥ चक्राग्रे ३ त्रिपुरसुंदरीचक्रनायि
काश्रीपादु०॥ अत्र संक्षोभणकरे अष्टदलचक्रे त्रिपुरसुंदरीचक्रनायिकाधिष्ठिते एता अनं
गकुसुमाद्या गुप्ततरयोगिन्यः समुद्रा इत्यादि मूलदेव्यै समर्पयेत्॥ चतुर्दशारचक्रे पू

सर्वसंक्षोभणादिचतुर्दश देवीश्रीपादु०॥ चक्राग्रे त्रिपुरवासिनी चक्रनायिकाश्रीपादु०॥ अत्र
सौभाग्यदायके चक्रे त्रिपुरवासिनी चक्रनायिकाधिष्ठिते एताः सर्वसंक्षोभिण्याद्याः शक्तयः
समुद्राइत्यादिमूलदेव्यै समर्पयेत्॥ बहिर्दशारचक्रे सर्वसिद्धिप्रदादिदेवीश्रीपादु०॥ च
क्राग्रे त्रीपुराश्रीचक्रनायिकाश्रीपादु०॥ अथ सर्वार्थसाधके बहिर्दशारचक्रे त्रीपुराश्रीच
क्रनायिकाधिष्ठिते एतांस्सर्वसिद्धिप्रदादिदेव्यः कुलकौलिनियोगिन्यः समुद्राइत्यादिमूलदेव्यै
समर्पयेत्॥ अंतर्दशारचक्रे सर्वज्ञादिदेविश्रीपादु०॥ चक्राग्रे त्रिपुरमालिनी चक्रना
यिकाश्रीपादु०॥ अत्र सर्वरक्षाकरे चक्रे त्रिपुरमालिनि चक्रनायिकाधिष्ठिते एताः सर्वज्ञा
द्याः देव्यो निगर्भयोगिन्यः समुद्राइत्यादिमूलदेव्यै समर्पयेत्॥ अष्टारचक्रे त्रिपुरसिद्धा
चक्रनायिकाधिष्ठिते एता रहस्ययोगिन्यः समुद्राइत्यादिमूलदेव्यै समर्पयेत्॥ अत्रांतराले
अस्त्रोपांगानि पूजयेत्॥ ततोऽग्निकोणे कामेश्वरी नित्याश्रीपादु०॥ दक्षिणकोणे वज्रे
श्वरी नित्याश्रीपादु०॥ वामकोणे भगमालिनी नित्याश्रीपादु०॥ चक्राग्रे त्रिपुरांबिकाश्रीपा

दु०॥ अत्र सर्वसिद्धिप्रदे त्र्यस्रारचक्रे बाणपाशांकुशविभूषितांतराले त्रिपुरांबिका च
क्रनायिकाधिष्ठिते एताः कामेश्वर्याद्या रहस्यातिरहस्ययोगिन्यः समुद्राइत्यादिमूलदेव्यै
समर्पयेत्॥ ततो बिंदुमध्ये बीजत्रयं पूर्वमुच्चार्य श्रीमहात्रिपुरसुंदरीनित्याश्रीपादु०॥
इति त्रिवारं पूजयेत्॥ वामे योनिमुद्राश्रीपादु०॥ चक्राग्रे त्रिपुरभैरवीश्रीपादु०॥ अ
त्र सर्वानंदमये परब्रह्मरूपिणी बैंदवे चक्रे त्रिपुराभैरवी चक्रनायिकाधिष्ठिते सर्व
चक्रेश्वरी योगिन्यः सायुधाः सवाहनाः सपरिवाराः पूजितास्तर्पिताः संतु॥ ततो धूपा
दिविसर्जनांतं कर्म समापयेत्॥ अस्य पुरश्चरणं लक्षजपः॥ तथा वामकेश्वरतंत्रे॥ तत्र
स्थित्वा जपेल्लक्षं साक्षाद्देवीस्वरूपधृक्॥ किंशुकैर्हवनं कुर्याद्दशांशं च वरानने॥
कुसुंभकुसुमैर्वापि मधुरत्रयमिश्रितैः॥ ॥ अथ श्रीविद्याविशेषपद्धतिः॥ ॥
यथा॥ ओं ललितमुक्तैउच्चाय। रात्रियासः परिस्मअगुरुं यथोक्तरूपं ध्यात्वा ऐं ह्रीं श्रीं ह
सक्षं हसक्षमलवरयूं सहक्षमलवरयीं हसौः श्रीः अमुकानंदनाथश्रीपादुकां पूजया

मि नमः॥ अमुकराश्यंबाश्रीपादुकां पूजयामि इति स्वस्वनामानसेः संपूज्य गंधादिभिः पूज-
येत्॥ यथा ॐ ह्रीं श्रीं लं पृथिव्यात्मकं गंधं समर्पयामि नमः कनिष्ठाभ्यां॥ हं आकाशात्मकं पुष्-
पं समर्पयामि नमोंगुष्ठाभ्यां॥ यं वाय्वात्मकं धूपं समर्पयामि नमस्तर्जनीभ्यां॥ रं वह्न्या-
त्मकं दीपं समर्पयामि नमो मध्यमाभ्यां॥ वं अमृतात्मकं नैवेद्यं समर्पयामि नमः अना-
मिकाभ्यां॥ ततो योन्यंजलिमुद्रे प्रदर्श्य नमस्कृत्य स्तुतिं कुर्यात्॥ अखंडमंडलेत्यादि शे-
षं सामान्यपद्धतिक्रमेण कुर्यात्॥ ॥अथ श्रीविद्यायां विशेषस्नानं॥ ॥तद्यथा॥
वैदिकं स्नानं विधाय षडंगानि विधाय क्रोमिति अंकुशमुद्रया सवितृमंडलात्तीर्थमावाह्य
मूलविद्यया शक्तिबीजमुद्धृत्य योनिमुद्रया तज्जले निक्षिप्य ततो धेनुयोनिमुद्रे प्रदर्श्य मू-
लवाग्भवबीजेन दशवारमभिमंत्र्य तन्मुखारविंदनिर्गतामृतधारां बुद्ध्वा सप्तकृत्वा आ-
त्मानमभिषिंच्य पुनरेकविंशतिवारं मूलविद्ययाभिमंत्र्य पुनर्मूलविद्यामुच्चरन् दे-
व्याः पादारविंदाद्यो विगलदमृतधारया त्रिवारं निमज्ज्योत्थाय पुनर्योनिमुद्रया त्रिवारं

सप्तवारं शिरस्यभिषेकं विधाय तत्रैवाचम्य तीरमागत्य अनुपहते वाससी परिधाय मृद-
यज्ञीयभस्मना त्रिपुंड्रं शिरस्यात्मकं अर्धचंद्ररूपं विधाय ततोऽर्घ्यमर्घ्यांतं कर्म विधाय त-
र्पणं कुर्यात्॥ तथा च षडंगान्यपि विन्यस्य तीर्थमंकुशमुद्रया क्रोंमंत्रेण समावाह्य ततः
सवितृमंडलात् शक्तिबीजं समुद्धृत्य निक्षिपेद्योनिमुद्रया॥ धेनुमुद्रायोनिमुद्रे ते त-
त्र प्रदर्शयेत्॥ मूलवाग्भवबीजेन मंत्रयित्वाथ देवतां॥ आनंदामृतवारिणा मध्यस्थप-
रिचिंतयेत्॥ देविमुखारविंदनिर्गतामृतधारया॥ सप्तकृत्वो जपेद्विद्यामभिषिंचे-
त्स्वकं तनुं॥ एकविंशतिवाराणि जपेद्विद्यामनंतरं॥ देव्याः पादारविंदाद्यो निमज्ज्योत्तीर्य
साधकः॥ शुचिते वाससी पश्चात्परिदध्यादनंतरं॥ आचम्य प्राङ्मुख आसीनो मूल-
मंत्राभिमंत्रितं॥ धृत्वा भालतलेन स्वपूर्ववत् श्रीगुरुं स्मरेत्॥ ततः सूर्यमंडलवासिने
देवतायै ततः परं॥ अर्घ्यमंजलिमादाय गायत्र्या च त्रिरुत्क्षिपेत्॥ यथाशक्ति जपेद्देवीं
गायत्रीं तदनंतरं॥ तर्पणार्घ्यं समाचम्य प्राणायामस्य साधकः॥ वस्त्रं रुद्रं स्नात्वादिपा

न्तयेद्वांगिरसं ततः॥ वेदान्गावसत्तोऽनलविष्णुरुद्रान्नयत्र हान्॥ लोपामुद्रां महर्षी
चान्यास्तथाम्वितीर्थके॥ नक्षत्रराशियोगांश्चकरणानियथाक्रमं॥ चतुर्थीवह्निजायां
तं देवतार्थे प्रतर्पयेत्॥ नरिचमत्रिपुलहं पुलस्त्यंक्रतुमेव च॥ वसिष्ठं च नरद्वाजं गौत
मागस्त्यनामकौ॥ अग्निघात्तावर्हिषदपितॄंश्च स्वपितृक्रमं॥ त्रिधाऽन्ते हृदंताश्च पितृ
तार्थेन तर्पयेत्॥ भैरवान्क्षेत्रपालांश्च कुमारीयोगिनीगणं॥ भूतानिसर्वसत्वानि
तर्प्यंलं तानितर्पयेत्॥ ततो देवीं तर्पयेत्॥ दक्षिणामूर्त्तिसंहितायामपि॥ तर्पणं च ततः
कुर्यात्देवविधिपूर्वकं॥ तस्मिन्जले त्रिकोणवृत्तं चतुरस्त्रं विभाव्य गणेशावटुकौ
चक्रवामदक्षिणं संतर्प्य॥ त्रिकोणवृत्तचतुरस्त्रांतराले ईशानादिवायव्यंतांश्च समाणग्
रुपंक्तिः संपूज्य तस्य त्रिकोणमध्ये साध्यसिद्धासनमंत्रैर्व समाणैः संतर्प्य जले भगव
तीमावाह्य परामृतधारया पूर्वक्रमेण संतर्प्य त्रिकोणेषु कामेश्वर्यादि देवीत्रयं सम
यविद्यया संतर्प्य चतुरस्त्रकोणेषु अंगदेवतास्तर्पयेत्॥ ततः आवरणदेवतां तर्प

णं ततः सूर्यार्घं दत्वा ततः हंसः सोहमित्युपस्थाय सवितृमंडले तार्थं विसृज्य नियतवच
नो यागस्थाने गच्छेत्॥ यागस्थानं कालिकुलसंतारे॥ अरण्ये स्वस्वकामानां सिध्यर्थे पू
जनं हितं॥ निष्कामानां मुमुक्षूणां गृहे शास्तं सदार्चनं॥ ऋषीनां मुनिमुख्यानां दीक्षितानां
द्विजन्मनां॥ गृहेपि यजनं शास्तं रसैर्दक्षिणसंभवैः॥ कुलार्णवेपि॥ एकांते निर्जने रम्ये
देशे बाधाविवर्जिते॥ सुखासने समासीनं प्राङ्मुखो वाप्युदङ्मुखः॥ तन्त्रादौ सूर्यपूजा
तद्रूपं रुद्रयामले॥ आदित्यं पूजयेदादौ प्रत्यक्षं लोकसाक्षिणं॥ अन्यथा नैव सिद्धिः स्या
द्कल्पकोटिशतैरपि॥ बृहत्तंत्रराजेपि॥ स्नानं सविधि वैसंध्या तर्पणं सूर्यपूजनं॥ कृ
त्वा पूजालये वात्र पंचमीं पूजयाम्यहमिति॥ ततो द्वारि गत्वा ॐ आत्मतत्वाय स्वाहा॥ ॐ
विद्यातत्वाय स्वाहा॥ ॐ शिवतत्वाय स्वाहा॥ इत्यनेनाचम्य सामान्यार्घं विधाय द्वारपू
जां कुर्यात्॥ तद्यथा॥ बालयामूर्ध्ने दक्षिणवामपार्श्वयोः उपर्यधः ऐं ह्रीं श्रीं गां गणपत
ये नमः॥ ऐं ह्रीं श्रीं क्षां क्षेत्रपालाय नमः॥ द्वारश्रियै नमः॥ देहल्यै नमः॥ ततो वामपाद

पुरःसरमंतः प्रविश्य अग्न्यादिकोणेषु ॥ गां गणपतये नमः ॥ दुं दुर्गायै नमः ॥ एं वं वटुका
यनमः ॥ क्षां क्षेत्रपालाय नमः ॥ मध्ये रत्नमंडपाय नमः ॥ दक्षिणे कामदेवाय रत्यै नमः ॥ वसं
ताय प्रीत्यै नमः ॥ गां गणपतये नमः ॥ सां सरस्वत्यै नमः ॥ श्रीं श्रियै नमः ॥ सोमसूर्यगाय
त्र्यां ॥ सरस्वतीं श्रियं मायां दुर्गां च तदनंतरं ॥ भद्रकालीं ततः स्वस्तिं स्वाहां चैव शुभंकरीं
गौरीं च लोकधात्रीं च तथा वागीश्वरीमपि ॥ एताः पूजयेत् ॥ ततः ऐं ह्रीं श्रीं रक्तद्वादशशा
क्तियुक्ताय दीपनाथाय नमः इति पुष्पांजलिं मुंचेत् ॥ ततोस्त्रेण वामपार्ष्णिघातेन भौमा
न्विघ्नानुत्सार्य अस्त्रेण जलेनांतरीक्षगतान् श्रीबालाम्बस्ततीक्ष्णदृष्ट्यावलोकेन दिव्या
न्विघ्नानुत्सार्य सिद्धार्थकुसुमान्यादाय ऐं ह्रीं श्रीं अपसर्पंतु ते भूता इति विघ्नानुत्सार
येत् ॥ ततो नैरृत्यां ब्रह्मणे नमः ॥ वास्तोष्पतये नमः ॥ आधारशक्तिकमलासनाय
नमः ॥ इत्यासनं संपूज्य तत्रोपविश्य भूतशुद्ध्यादिप्राणायामांतं विधाय ऋष्यादिन्यासं
कुर्यात् ॥ कल्पसूत्रे ॥ यद्यपि वाय्वग्निसलिलात्मकप्राणायामैः शोषणदहनप्लावनं च वि

धायत्रिः प्राणायामेति तथापि मातृकान्यासानंतरं प्राणायामो बोध्यः ॥ तथा च तंत्रांत
रे ॥ भूतशुद्धिं विधायेत्थं मातृकान्यासमाचरेत् ॥ प्राणायामत्रयं कृत्वा न्यासान्दशान् स
माचरेत् ॥ तद्यथा ॥ शिरसि दक्षिणामूर्तये ऋषये नमः ॥ मुखे पंक्तिछंदसे नमः ॥ हृदि त्रि
पुरसुंदर्यै नमः ॥ गुह्ये वाग्भवाय बीजाय नमः ॥ पादयोः शक्तिकूटाय नमः ॥ सर्वांगे का
मबीजाय कीलकाय नमः ॥ तंत्रांतरे ॥ ऋषिन्यासो मूर्ध्नि दिशेच्छंदस्तु मुखपंकजे ॥ देवता हृ
दये चैव बीजं तु गुह्यदेशतः ॥ शक्तिं च पादयोश्चैव सर्वांगे कीलकं न्यसेत् ॥ ततः करांग
न्यासः ॥ यथा ऐं मध्यमाभ्यां नमः ॥ क्लीं अनामिकाभ्यां नमः ॥ सौः कनिष्ठाभ्यां नमः ॥ ऐं
तर्जनीभ्यां नमः ॥ सौः करतलपृष्ठाभ्यां नमः ॥ तदुक्तं ॥ एतद्बीजं द्विरावृत्त्य मध्यमाद्यंगुलीषु च
मुष्टिके रस्य कुर्वीत तलयोः पृष्ठयोरपि ॥ चतुर्थीनेति संयुक्ता नाममंत्रैः पृथक्पृथक् ॥
ततो बालामुच्चार्य महात्रिपुरसुंदर्यात्मानं रक्ष रक्ष हृदये अंजलिं दद्यात् ॥ पुनः सौः अ
स्त्राय फडिति दिग्बंधनं कुर्यात् ॥ तथा च ॥ बालाबीजत्रयं पूर्वं तथा त्रिपुरसुंदरि ॥ आत्मानं

रहः रहेति कुर्यात् हस्तां हृदि स्पृशन् ॥ तथैवास्त्रेण मुद्रया कुर्यात् दिग्बंधनं ततः ॥ ततो बालांते
ऽमृतार्णवासनाय नमः ॥ पादयोर्बालांते त्रिपुरेश्वरि पोतांबुजासनाय नमः ॥ इति जानुद्व
ये ॥ तथा च यामले ॥ अमृतार्णवरा शांते पूर्वासनाय नमो मनुः ॥ पादयोर्विन्यसेत् श्रीबा
लांते त्रिपुरेश्वरि ॥ पोतांबुजासनायांते नमो जानुनोर्विन्यसेत् ॥ ह्रीं क्लीं सौः त्रिपुरसुंदरि
देव्यासनाय नमः ऊरुद्वये ॥ तथा ह्रीं क्लीं सौः त्रिपुरेशु स्वासुंदरीति पदं ततः ॥ इति तु देव्या
सनं चांते नमः ऊरुद्वयं न्यसेत् ॥ हैं हं क्लीं हसौः चांते त्रिपुरवासिनी चक्रासनाय नमः इति
स्फिक्द्वये प्रविन्यसेत् ॥ हसैं हसक्लीं हसौश्चेति त्रिपुराश्रीपदं ततः ॥ सर्वमंत्रासनायांते
नमो गुह्ये प्रविन्यसेत् ॥ ह्रीं क्लीं ब्लैं त्रिपुरमालिन्यः नाभिदेशे प्रविन्यसेत् ॥ हसैं हसक्लीं
हसौरंते त्रिपुराख्या पदं ततः ॥ पर्यंकशक्तिपीठासनाय नमः स्ववक्षसि प्रविन्यसेत् ॥ ततः
त्रिकूटविद्याबीजांते महात्रिपुरभैरवी ॥ सदाशिवमहाप्रेतपद्मासनाय नमः ॥ नमस्तथ
मंत्रेण ब्रह्मरंध्रस्थाने प्रविन्यसेत् ॥ हैं हं क्लीं हसौः त्रिपुरवासिनी चक्रासनाय नमः स्फिद्व

द्वये ॥ हैं सं हसक्लीं हसौः त्रिपुराश्रीसर्वमंत्रासनाय नमो गुह्ये ॥ ह्रीं क्लीं त्रिपुरसुंदरि हृदया
य नमः ॥ क्लीं नित्यतृप्तिशक्तिश्रीमहात्रिपुरसुंदरी शिरसे स्वाहा ॥ क्लीं त्रिपुरमालिनी साध्य
सिद्धासनाय नमः नाभिदेशे ॥ हं सं रैं हसकलहरीं हसस्रौः त्रिपुरांबा पर्यंकशक्तिपीठास
नाय नमः वक्षसि ॥ त्रिकूटविद्यानो बीजांते महात्रिपुरभैरवी सदाशिवमहाप्रेतपद्मास
नाय नमो ब्रह्मरंध्रे ॥ ॥ अथ षडंगन्यासः ॥ ॥ ऐं सर्वज्ञाशक्ति महात्रिपुरसुंदरी हृद
याय नमः ॥ क्लीं नित्यतृप्तिशक्तिश्रीमहात्रिपुरसुंदरी शिरसे स्वाहा ॥ सौः अनादिबोधशक्ति
श्रीमहात्रिपुरसुंदरी शिखायै वषट् ॥ ऐं स्वतंत्रशक्तिश्रीमहात्रिपुरसुंदरी कवचाय हुं ॥ क्लीं
अलुप्तशक्तिश्रीमहात्रिपुरसुंदरी नेत्रत्रयाय वौषट् ॥ सौः अनंतशक्तिश्रीमहात्रिपुरसुं
दरी अस्त्राय फट् ॥ तथा च नवरत्नेश्वरे ॥ सर्वज्ञता नित्यतृप्तता च अनादिबोधः स्वतंत्रता
च ॥ अलुप्तशक्तित्वमनंतता च षडाहुरंगानि शिवस्य शैवाः ॥ तथा बीजांते नामसंयो
जनातियुक्तं षडंगकं ॥ ततो वशिन्यादिन्यासः ॥ संक्षेपप्रयोगतः क्रमः ॥ ततो नवयोन्यास

कन्यासः॥ तथा बालायास्त्रिप्रवेशान्मानयो मांकितं न्यसेत्॥ प्रयोगस्तत्रैरत्नप्रकरणे
उक्तः॥ पुनर्बालां समुच्चार्य गोलकत्वेन चिंतयेत्॥ पुनर्बालां समुच्चार्य चतुरस्रां विचिंतये
त्॥ ॥अथ पीठतत्वन्यासो॥ ॥अथाद्यं वाग्भवमुच्चार्याग्निचक्रे कामगिरिपीठे मित्री
शनाथात्मिके रुद्रात्मशक्ती कामेश्वरीदेवीश्रीपादुकायै नमः आधारे॥ द्वितीयमुच्चार्य
क्रे पुनःगिरिपीठे षष्ठीशनाथात्मिके विष्णवात्मशक्ती चक्रेश्वरीश्रीपादुकायै नमः हृदये॥ तृती
यकूटमुच्चार्य सोमचक्रे जालंधरपीठे श्रीचर्यानाथात्मिके परंब्रह्मात्मशक्ती श्रीमहात्रिपु
रसुंदरीचक्रेश्वर्यै नमो ब्रह्मरंध्रे॥ वाग्भवमुच्चार्य आत्मतत्वव्यापिकायै श्रीमहात्रिपुरसुंद
र्यै नमः आधारे॥ द्वितीयमुच्चार्य विद्यातत्वात्मव्यापिकायै श्रीमहात्रिपुरसुंदर्यै नमः हृ
दये॥ तृतीयमुच्चार्य शिवतत्वव्यापिकायै श्रीमहात्रिपुरसुंदर्यै नमः भ्रूमध्ये॥ तुरीयमु
च्चार्य सर्वतत्वव्यापिकायै श्रीमहात्रिपुरसुंदर्यै नमो ब्रह्मरंध्रे॥ ततः पंचदशीन्यासः॥
तद्यथा॥ मूले हृदि च स्तनयोः कर्णयोः नसोः मुखभुजयुगपृष्ठजानुयुगनाभिषु न्यसेत्क

नमोंतं मूलमंत्रं वर्णं न्यसेत्॥ ॥अथ षोडशीन्यासः॥ ॥ब्रह्मरंध्रे संपूर्णं विद्यां रक्त
वर्णं विचिंतयेत्॥ सोऽनाग्नपदं त्रिनीमुद्रां वामांगे न्यासमयेद्बुधः॥ रिपुजिह्वाग्रहा मुद्रां वाम
पादतले न्यसेत्॥ ततो योनिमुद्रां मुखे दत्वा अनिवंद्य च पुनर्ब्रह्मरंध्रे मणिबंधे ललाटे
मालिकां तां न्यसेत्॥ ललाटे मालिकां कुर्यात् षोडशार्णं स्मरेद्बुधः॥ संमोहनाख्यो देवे
शि न्यासोऽयं द्रोहकारकः॥ ततस्त्रैलोक्यमरुणं ध्यायेत् श्रीविद्यां मनसि स्मरन्॥ ततः पा
दयोः जंघयोः जान्वोः कट्यां अंसयोः पृष्ठे॥ नाभौ पार्श्वद्वये चापि स्तनयोरंसयोस्तथा॥ कर्ण
योः ब्रह्मरंध्रे च वदने क्रमशः न्यस्य पार्वति॥ ततः कर्णप्रदेशे करे वै तदनुक्रमात्॥ संहारोयं
महान्यासो बीजैः षोडशभिः क्रमात्॥ ॥इति संहारन्यासः॥ ॥ततः स्थितिन्यासः॥
करयोरंगुलीषु पंच ब्रह्मरंध्रे मुखे हृदि त्रयं नाभ्यादिपादपर्यंतं एवं कंठान्नाभिपर्यं
तं परं॥ एवं ब्रह्मरंध्रात् कंठपर्यंतं पादयोः पंच॥ ॥अथ सृष्टिन्यासः॥ ब्रह्मरंध्रे लला
टे नेत्रे श्रवणे घ्राणे हृदि दंतांत ऊर्ध्व जिह्वायां चिबुके पृष्ठे सर्वांगके हृदि स्तने कुक्षौ लिंगे च

षोडशावर्णन्न्यसेत्॥ ॥अथमातृकान्यासः॥ ॥ऐं ह्रीं श्रीं अंविघ्नेश्वरश्रीभ्यांनमःशिरसि॥
३आंविघ्नराजह्रीभ्यांनमोमुखवृत्ते॥३इंविनायकतुष्टिभ्यांनमोदक्षिणचक्षुषि॥३ईंशिवोत्तु
मशांतिभ्यांनमोवामनेत्रे॥३उंविघ्नकृत्पुष्टिभ्यांनमोदक्षकर्णे॥३ऊंविघ्नहृत्सरस्वतीभ्यां
नमोवामकर्णे॥३ऋंविघ्नराजरतिभ्यांनमोदक्षनसि॥३ॠंगणनायकमेधाभ्यांनमोवामन
सि॥३ऌंएकदंतकांतिभ्यांनमोदक्षगंडे॥ॡंद्विदंतकामिनीभ्यांनमोवामगंडे॥३एंगजद
तमोहिनीभ्यांनमऊर्ध्वे॥३ऐंनिरंजननंदाभ्यांनमोऽधरे॥३ओंकंदर्पन्ततीव्राभ्यांनम
ऊर्ध्वदंते॥३औंदीर्घमुखज्वालामुखीभ्यांनमोऽधोदंते॥३अंशंखकर्णनंदाभ्यांनमोब्रह्म
रंध्रे॥३अःवृषध्वजस्वरसाभ्यांनमोमुखे॥ऐंह्रींश्रींकंगणनाथकामरूपाभ्यांनमोम
णिबंधे॥३खंगजेंद्रक्ष्मात्राभ्यांनमोदक्षकूर्परे॥३गंशूर्पकर्णजायिनीभ्यांनमोमणिबंधे॥
३घंत्रिनेत्रसत्याभ्यांनमोंगुलीमूले॥३ङंलंबोदरविघ्नेशाभ्यांनमोंगुल्यग्रे॥३चंमहामो
दस्वरूपिणीभ्यांनमोवामस्कंधे॥३छंचतुर्मूर्तिकामदाभ्यांनमोवामकूर्परे॥३जंसदाशिव

मदविह्वलाभ्यांनमोमणिबंधे॥३झंआमोदविकराभ्यांनमोंगुलिमूले॥ञंदुर्मुखघूर्णभ्यां
नमोंगुल्यग्रे॥३टंसुमुखभूतिभ्यांनमोदक्षिणकट्यधः॥३ठंप्रमोदभूतिभ्यांनमोजानुनि॥
३डंएकपादसतीभ्यांनमोंगुल्फे॥३ढंद्विजिह्वरमाभ्यांनमोंगुल्यधः॥३णंसुरमानुषीभ्यांन
मोंगुल्यग्रे॥तंवीरमकरध्वजाभ्यांनमोवामकट्यधः॥थंषण्मुखविकर्णभ्यांनमोजानुनी॥
३दंवरदभ्रूकुटीभ्यांनमोंगुल्फे॥३धंवामदेवलज्जाभ्यांनमोंगुल्यधः॥३नंवक्रतुंडदीर्घ
घोणाभ्यांनमोंगुल्यग्रे॥३पंह्रिरंडकधनुर्धराभ्यांनमःकट्यां॥३फं - - - ॥३
बंयामिनीरात्रिभ्यांनमःपृष्ठवंशे॥३भंमत्तचंद्रिकाभ्यांनमोनाभौ॥३मंविमत्तशशिप्र
भाभ्यांनमउदरे॥यंमत्तवाहनलोलाक्षीभ्यांनमोहृदि॥३रंजटिचपलाक्षीभ्यांनमोद
क्षस्कंधे॥३लंमुंडिरद्धिभ्यांनमोककुदि॥३वंखड्गिदुर्भगाभ्यांनमोवामस्कंधे॥३शंव
रेण्यसुभगाभ्यांनमोहृदयादिदक्षहस्ते॥३षंवृषकेतनशिवाभ्यांनमोहृदावामहस्तके
३संभक्तप्रियदुर्गाभ्यांनमोहृदक्षपादे॥३हंगणेशगणहविघ्नहराभ्यांनमोहृदादिवाम

पादे॥ ॐ ॐं मेघनादकाकिन्यां नमो हृदादिउदरे॥ ॐ ह्रं गणेश्वरकुन्तिकायां नमो मुखे॥
इति गणेशन्यासः॥ ॥अथ ग्रहन्यासः॥ ॥ॐ अं आं आदित्यरुचिरायां नम हृदया
धः॥ यं धं सोमसं डलायां नमो भ्रूमध्ये॥ तथा चक्रानार्णवे॥ स्वरैरकं हृदि मस्तके॥ यथ
जैनिरारिपृत॥ क्रमयुग्मे इत्यादि॥ ॐ कं धमं अंगारकरक्तायां नमो नेत्रे॥ ॐ चं धवं बुधपन्ना
नरूपायां नमो हृदयोपरि॥ ॐ टं धवं बृहस्पतिपराश्विनीयां नमः कंठे॥ ॐ तं धसं शुक्रकेन्दा
दिन्यां नमो हृदये॥ ॐ पं धरं शनैश्चरशाकिन्यां नमो नाभौ॥ ॐ शं धरं राहुरूपायां नमो
वक्षसि॥ ॐ क्षं ह्रं कं केतुवायव्यायां नमो गुह्ये॥ ॥अथ नक्षत्रन्यासः॥ ॥ॐ अं आं अश्वि
नीललाटे॥ ॐ इं भरण्यै नमो वक्षसि॥ ॐ ईं उं ऊं कृत्तिकायै नमो वामनेत्रे॥ ॐ ऋं ॠं ऌं ॡं रोहि
ण्यै नमो दक्षकर्णे॥ ॐ एं मृगशीर्षायै नमो वामकर्णे॥ ॐ ऐं आर्द्रायै नमो दक्षनासायां॥
ॐ ओं औं पुनर्वसवे नमो वामनासायां॥ ॐ कं पुष्यायै नमो दक्षकरे॥ ॐ खं गं आश्लेषायै नमो द
क्षस्कंधे॥ ॐ घं ङं मघायै नमः कूर्परे॥ ॐ चं पूर्वफाल्गुन्यै नमो दक्षभुजमध्ये॥ ॐ छं जं उत्तर

326

फाल्गुन्यै नमो वामभुजमध्ये॥ ॐ झं ञं हस्तायै नमो दक्षमणिबंधे॥ ॐ टं ठं चित्रायै नमो वाममणि
बंधे॥ ॐ डं स्वात्यै नमो दक्षस्तने॥ ॐ ढं णं विशाखायै नमो वामस्तने॥ ॐ तं थं दं अनुराधायै नमो
नाभौ॥ ॐ धं ज्येष्ठायै नमो दक्षकटौ॥ ॐ नं पं फं मूलायै नमो दक्षजानुनि॥ ॐ बं पूर्वाषाढायै नमो द
क्षिणोरौ॥ ॐ भं उत्तराषाढायै नमो वामोरौ॥ ॐ मं श्रवणायै नमो दक्षजानुनि॥ ॐ यं रं धनिष्ठायै न
मो वामजानुनि॥ ॐ लं शतभिषायै नमो दक्षगुल्फे॥ ॐ वं शं पूर्वाभाद्रपदायै नमो वामगुल्फे॥
ॐ षं सं हं उत्तराभाद्रपदायै नमो दक्षपादतले॥ ॐ ळं क्षं अं अः रेवत्यै नमो वामपादतले॥ ॥
अथ योगिनीन्यासः॥ ॥अं आं १६ डां डीं डूं डः मलवरयूं डाकिन्यै मां रक्षरक्ष त्वगात्मने न
मः कंठे॥ कं धचं धटं ठं रां रीं रूं रमलवरयूं राकिन्यै मां रक्षरक्ष रक्तात्मने नमो हृदि॥ ॐ डं ढं णं तं
धपं फं लां लीं लूं लमलवरयूं लाकिन्यै मां रक्षरक्ष मांसात्मने नमो नाभौ॥ ॐ बं भं मं यं रं लं कां कीं
कूं कमलवरयूं काकिन्यै मां रक्षरक्ष मेदात्मने नमः स्वाधिष्ठाने॥ ॐ वं शं षं सं सां सीं सूं सम
लवरयूं साकिन्यै नमो मूलाधारे॥ ॐ हं क्षं हां हीं हूं हमलवरयूं हाकिन्यै नमः भ्रूमध्ये॥ ॥अ

327

यराशिन्यासः ॥ अं आं इं ईं मेषराशये नमो दक्षपादे ॥ ॐ उं ऊं ऋं वृषराशये नमो वृषणे ॥ ॐ ॠं
लृं लॄं मिथुनराशये नमो दक्षकुक्षौ ॥ ॐ एं ऐं कर्कराशये नमो दक्षहृदये ॥ ॐ ओं औं सिंहराशये
नमो दक्षबाहुमूले ॥ ॐ अं अः शं षं सं हं ळं क्षं कन्याराशये नमो मस्तके ॥ ॐ एवं कं ५ तुलारा
शये नमो वामपादे ॥ ॐ चं ५ वृश्चिकराशये नमो वाहुमूले ॥ ॐ टं ५ धनराशये नमो वामहृदये
ॐ तं ५ मकरराशये नमो वामपादे ॥ ॐ पं ५ कुंभराशये नमो पृष्ठे यं ध मीनराशये नमो उद
रे ॥ ॥ अथ पीठन्यासः ॥ ॥ अं वाराणसीपीठाय नमः शिरसि ॥ ॐ आं कामरूपपीठाय न
मः मुखवृत्ते ॥ ॐ इं नेपालपीठाय नमः दक्षचक्षुषि ॥ ॐ ईं पौंड्रवर्द्धपीठाय नमो नेत्रे ॥ ॐ उं
पुरस्थिरपीठाय नमो दक्षकर्णे ॥ ॐ ऊं कान्यकुब्जपीठाय नमो वामकर्णे ॥ ॐ ऋं पूर्णशैलपी
ठाय नमो दक्षनसि ॥ ॠं अर्बुदपीठाय नमो वामनसि ॥ ॐ लृं आम्रातकेश्वरपीठाय नमो
दक्षगंडे ॥ ॐ लॄं एकाम्रपीठाय नमो वामगंडे ॥ ॐ एं त्रिस्रोतपीठाय नमः ऊर्ध्वोष्ठे ॥ ॐ ऐं कामकोट
पीठाय नमो अधरे ॥ ॐ ओं चंद्रपुरपीठाय नमः ऊर्ध्वदंते ॥ ओं श्रीपीठाय नमो दंताधः ॥ ॐ अं न

ग्रुनगरपीठाय नमो उत्तमांगे ॥ ॐ अः केदारपीठाय नमो मुखे ॥ ॐ कं कामरूतेश्वरपीठाय
नमः दक्षांसे ॥ ॐ खं ओंकारपीठाय नमो दक्षकूर्परे ॥ ॐ गं जालंधरपीठाय नमो मणिबंधे ॥ ॐ
घं मालवपीठाय नमोंऽगुल्यध ॥ ॐ ङं नरुपीठाय नमो नखाग्रे ॥ ॐ चं देवीकोटपीठाय नमो
वामस्कंधे ॥ ॐ छं गोकर्णपीठाय नमः कूर्परे ॥ जं मंगलकोटपीठाय नमो मणिबंधे ॥ ॐ झं अ
ट्टहासपीठाय नमोंऽगुल्यध ॥ ॐ ञं विरजापीठाय नमो वामांगुल्यग्रे ॥ ॐ टं राजगृहपीठाय
नमो दक्षिणकट्यध ॥ ॐ ठं महापथपीठाय नमो दक्षजानुनि ॥ ॐ डं कोलागिरिपीठाय नमो
दक्षगुल्फे ॥ ढं एलापुरपीठाय नमो जानुनि ॥ णं ॐ दं चरित्रपीठाय नमो गुल्फे ॥ ॐ धं क्षी
रिकापीठाय नमोंऽगुल्यध ॥ ॐ नं हस्तिनापुरपीठाय नमः पृष्ठे ॥ ॐ पं उड्डीशपीठाय नमो द
क्षपार्श्वे ॥ ॐ फं प्रयागपीठाय नमो वामपार्श्वे ॥ बं षष्ठीशपुरपीठाय नमः पृष्ठे ॥ ॐ भं मा
यापुरपीठाय नमो वामनाभौ ॥ मं जलेश्वरपीठाय नमः उदरे ॥ ॐ यं मलयपीठाय नमो द
क्षांसे ॥ ॐ रं रौमपीठाय नमो वामांसे ॥ ॐ लं महामेरुपीठाय नमः ककुदि ॥ ॐ वं गिरिपीठाय

नमोवामबाहुमध्ये॥ ३ रांमहेन्द्रपीठायनमः हृदादिदक्षहस्ते॥ ३ मंमायापुरपीठायनमः हृ
दादिवामहस्ते॥ ३ संहिरण्यपुरपीठायनमो हृदादिदक्षपादे॥ ३ हंमहालक्ष्मीपुरपीठायन
मो हृदयादिवामपादे॥ ३ ओंउड्डीयानपीठायनमो हृदाद्युदरे॥ ३ हंछायाछत्रपीठायनमो
हृदादिमुखे॥ ॥ इतिपीठन्यासः॥ ॥ अयंपीठन्यासोमातृकान्यासानंतरंकर्तव्य
मितिसंप्रदायः॥ ॥ अथत्रिपुरान्यासः॥ तथाचतंत्रे॥ त्रिपुरान्यासंततःकुर्यात्सर्वका
मार्थसिद्धये॥ अस्यास्तुन्यासमात्रेणजीवन्मुक्तोनयेन्नरः॥ ३ अंकामिनीत्रिपुरायैनमः॥
३ आंमालिनीत्रिपुरायैनमः॥ ३ इंमदनात्रिपुरायैनमः॥ ३ ईंउन्मादिनीत्रिपुरायैनमः॥ ३
उंद्राविनीत्रिपुरायैनमः॥ ३ ऊंखेचरीत्रिपुरायैनमः॥ ३ ऋंघंटिकात्रिपुरायैनमः॥ ३ ॠंकु
लाचलित्रिपुरायैनमः॥ ३ ऌंक्लेदिनीत्रिपुरायैनमः॥ ३ ॡंशिवदूतीत्रिपुरायैनमः॥ ३ एंसु
भगात्रिपुरायैनमः॥ ऐंभगवाहात्रिपुरायैनमः॥ ३ ओंविद्येश्वरीत्रिपुरायैनमः॥ ३ औंम
हालक्ष्मीत्रिपुरायैनमः॥ ३ अंकौलिनीत्रिपुरायैनमः॥ ३ अःकामेश्वरीत्रिपुरायैनमः॥ ३

कंकुलमालिनीत्रिपुरायैनमः॥ ३ खंव्यापिनीत्रिपुरायैनमः॥ ३ गंसुभगात्रिपुरायैनमः
३ घंवागीश्वरीत्रिपुरायैनमः॥ ३ ङंकालिकात्रिपुरायैनमः॥ ३ चंपिंगलात्रिपुरायैनमः
३ छंनागसर्पिणीत्रिपुरायैनमः॥ ३ जंस्कंददतित्रिपुरायैनमः॥ ३ झंनीलपताकात्रिपुरा
यैनमः॥ ३ ञंसिद्धेश्वरीत्रिपुरायैनमः॥ ३ टंमहासिद्धेश्वरीत्रिपुरायैनमः॥ ३ ठंअमो
घात्रिपुरायैनमः॥ ३ डंरत्नमालात्रिपुरायैनमः॥ ३ ढंमंगलात्रिपुरायैनमः॥ ३ णंन
गमालिनीत्रिपुरायैनमः॥ ३ तंरौद्रीत्रिपुरायैनमः॥ ३ थंयोगेश्वरीत्रिपुरायैनमः॥
३ दंअंबिकात्रिपुरायैनमः॥ ३ धंअट्टहासात्रिपुरायैनमः॥ ३ नंव्योमव्यापिनीत्रिपुरा
यैनमः॥ ३ पंवज्रेश्वरीत्रिपुरायैनमः॥ ३ फंदूतीनिणीत्रिपुरायैनमः॥ ३ बंशांभवीत्रिपु
रायैनमः॥ ३ भंअनंगात्रिपुरायैनमः॥ ३ मंलोकेश्वरीत्रिपुरायैनमः॥ ३ यंरक्तात्रिपु
रायैनमः॥ ३ रंसुरक्तात्रिपुरायैनमः॥ ३ लंभ्रुकुटात्रिपुरायैनमः॥ ३ वंअपरात्रिपुरायै
नमः॥ ३ शंशाश्वतात्रिपुरायैनमः॥ ३ षंविमलात्रिपुरायैनमः॥ ३ संअघोरात्रिपुरायै

नमः॥ ३ ह्रं भैरवीत्रिपुरायै नमः॥ ३ ह्रैं अमोघात्रिपुरायै नमः॥ ३ ह्रं सर्वाकर्षिणी त्रिपु
रायै नमः॥ ॥इति पंचाशत्त्रिपुरान्यासं मातृकास्थानेषु विन्यसेत्॥ ॥अथ का
मरतिन्यासः॥ ॥ऐं ह्रीं श्रीं क्लीं अं कामरतिम्बां नमः॥ ॐ आं कामप्रीतिम्बां नमः॥ ॐ इं का
मकामिनीम्बां नमः॥ ॐ ईं कान्तमोहिनीम्बां नमः॥ ॐ उं कामधरककमलाम्बां नमः॥ ॐ ऊं
कामचारविलासिनीम्बां नमः॥ ॐ ऋं कर्णिकल्पलताम्बां नमः॥ ॐ ॠं कोमलरूपामलाम्बां न
मः॥ ॐ लृं कामवर्द्धकविजयाम्बां नमः॥ ॐ ॡं कामविस्मयाम्बां नमः॥ ॐ एं रणविराजाद्वि
म्बां नमः॥ ॐ ऐं रमणीजेलिहाम्बां नमः॥ ॐ ओं रतिनाथदिगंबराम्बां नमः॥ ॐ औं रतिप्रि
यरामाम्बां नमः॥ ॐ अं रात्रिनाथकुड्डिकाम्बां नमः॥ ॐ अः स्मरकान्ताम्बां नमः॥ ॐ कं र
मणसमाम्बां नमः॥ ॐ खं निशाचरकस्मनाम्बां नमः॥ ॐ गं नंदनमोहिनीम्बां॥ ॐ घं नंद
ककामदाम्बां॥ ॐ ङं मदनसुलोचनाम्बां॥ ॐ चं नंदलावण्याम्बां॥ ॐ छं निशाचरमर्दिनीम्बां
ॐ जं रतिहंसकलहप्रियाम्बां॥ ॐ झं पुष्पधनुकांक्षिणीम्बां॥ ॐ ञं महाधनुसुमुखीम्बां॥

ॐ टं अमलनलिनीम्बां॥ ॐ ठं नीलाम्बरमञ्जरिनीम्बां॥ ॐ डं आमणपालिनीम्बां॥ ॐ ढं अम
णशंखिनीम्बां॥ ॐ णं रूपामनुग्धाम्बां॥ ॐ तं अमणीरमाम्बां॥ ॐ थं अंगुरमाम्बां॥ ॐ दं
कान्तचामरलोलाम्बां॥ ॐ धं अमारहस्यचंचलाम्बां॥ ॐ नं मोहनदीर्घिकाम्बां॥ ॐ पं ने
त्रकमतिम्बां॥ ॐ फं मुग्धलोलाक्षिम्बां॥ ॐ बं मोहवर्द्धनजंगिनीम्बां॥ ॐ भं मोहकचपेटा
म्बां॥ ॐ मं मन्मथनाम्बां॥ ॐ यं मत्तंगमालिनीम्बां॥ ॐ रं भृंगनायकेदंशिनीम्बां॥ ॐ लं गा
यकविम्बतोमुखीम्बां॥ ॐ वं दिग्गीजनंदीम्बां॥ ॐ शं नर्तकिनंदिनीम्बां॥ ॐ षं लीखंकांतिनी
म्बां॥ ॐ सं उन्मत्तकुलकंठिम्बां॥ ॐ हं संयत्तकोदरीम्बां॥ ॐ ळं मेघरूपामलाम्बां॥ ॐ क्षं का
मवर्द्धनसोन्मत्ताम्बां॥ एतान्मातृकास्थानेषु नमोतान् विन्यसेत्॥ ॥इति कामरति
न्यासः॥ ॥षोडशनित्या यथा॥ प्रथमा सुंदरी॥ कौमारी तिसमाख्याता तन्येव नगमा
लिनी॥ नित्यक्लिन्ना च भेरुंडा तथैव वह्निवासिनी॥ वज्रेश्वरी च दूती च त्वरिता तु असुंद
री॥ नित्यानीलपताका च विजया सर्वमंगला॥ ज्वालामालिनी विचित्रा तां तां पंचदशा प्रथी

ष्ठिता॥ एतेषां मंत्राणां यथाज्ञानार्णवे॥ शृणु देवि प्रवक्ष्यामि नित्यमंडलमुत्तमं॥ बालातारं च
हल्लांते कामेश्वरीपदं च देत्॥ इच्छाकामफलस्यांते प्रदे सर्वपदं च देत्॥ ततः शत्ववशं
ब्रूयात्कुरि सर्वजगत्प्रदं॥ क्षोभण्यांते करि ब्रूयात् ह्रंकारत्रयमालिखेत्॥ पंचबाणान्
समालिख्य संहारेण कुमारिकां॥ एषा कामेश्वरी नित्या प्रसंगात्कथिता शिवे॥ वाग्भवं
भगरात्मांते भगे भगिनी चालिखेत्॥ भगोदरी भगांते च तथा मालेभगावहे॥ भगगु
ह्ये भगप्रांते योनिप्रांते भगांकिते॥ निपातिनी च सर्वांते ततो भगवशंकरि॥ भगरूपे
ततो लेख्यं नीरजायतलोचने॥ नित्यक्लिन्ने भगप्रांते स्वरूपे सर्वचालिखेत्॥ भगानीम
ह्यानयांते वरदे च समालिखेत्॥ रेते सुरेते भगचक्लिन्ने मदद्रवे ततः॥ क्लेदय द्रावया
चाथ मोघे सर्वसत्वान् भगेश्वरी॥ अमोघे भगविच्छे च क्षुभ क्षोभय संततं॥ सत्वान् भ
गेश्वरी ब्रूयात् वाग्भवं ब्लूं छमादिकं॥ ब्लूं मो ब्लूं च हें ब्लूं च हें क्लिन्ने च ततः परं॥ सर्वाणि
च भगान्यंते मे वशं चानयेति च॥ स्त्रीबीजं च हरप्रांते रनेमात्मकमक्षरं॥ भुवनेशीस

मालिख्य विधेयं भगमालिनी॥ पराबीजं समुच्चार्य नित्यक्लिन्ने मदद्रवे॥ अग्निजायान्विता
तंत्रो नित्यक्लिन्ने यमारिता॥ प्रणवं पूर्वमुच्चार्य तथा कुर्या युगं च देत्॥ तन्मध्ये विलिखेद्
वीजं रेफात्मकमक्षरं॥ चवर्गमित्यहीनं तु विलिखेद् हृत्संस्थितिं॥ चतुर्दशस्वरोपेतं विंदु
नादांकितं पृथक्॥ वह्निजायान्वितो विद्या भेरुंडा देवता भवेत्॥ परां वालिख्य च हंते या
सिम्सेन मद्दसपि॥ अष्टार्णेयं महादेवि देवता वह्निवासिनी॥ नित्यक्लिन्नां समालिख्य मु
खेतारं समालिखेत्॥ हल्लेखांते रेफमांते चंद्रबीजं विनिर्गमेत्॥ चतुर्दशाक्षरी विद्या
देवी वज्रेश्वरी भवेत्॥ पराबीजं समुच्चार्य शिवदूती च ङेयुता॥ हृदंतीयं मनुर्देवी दूति
सर्वसमृद्धिदा॥ ईंकारं हृपवाचास्वं विधेयं त्वरिता भवेत्॥ सर्वसिंहासनमथ वा लैव
कुलसुंदरि॥ बालया पुटितां कुर्यात्तथा वै नित्यभैरवी॥ पंचबाणाश्च देवेशि नित्यत्वरा
क्षोहरी भवेत्॥ अथवाद्यं चाक्षरी बाणबीजे निलियम परा भवेत्॥ प्रणवं भुवनेशानी
रेफमात्मकमक्षरं॥ रुमात्मकं द्वितीयं तु भवनचपंकुरां ततः॥ नित्यशाहं समुधत्पसंबोम

चमरद्वा॥ कचचं चां करां मायां नित्यानीलपताकिनी॥ यांतं कालसमायुक्तं रेफं राक्रस्व
रान्वितं॥ बिंदुनादात्मका देवी नित्येयं विजयान्वयेत्॥ यद्वा यांतं कालाग्निवायुः ततः श
क्रविभूषितः॥ नादबिंदुकलायुक्ता नित्येयं विजयान्वयेत्॥ चंद्रं वारुणसंयुक्तं तारबीजं स
मालिखेत्॥ चतुर्थ्यंतां ततो देवीं विलिखेत्सर्वमंगलां॥ हृदंतोयं मनुर्देवी नित्येयं सर्व
मंगला॥ तारं हृद्गगवंत्यंते ज्वालामालिनी देवी च॥ द्विरुच्चार्य चसवंतिभ्रूतसंहारकारि
के॥ ज्ञानवेदस्त्रिलं लिख्य ज्वलंति पदयुग्मकं॥ ज्वलेति प्रज्वलद्वंद्वं हुंकारत्रयमालिखेत्॥ ०
वह्निबीजत्रयं रं चअस्त्रस्वाहान्वितो मनुः॥ इदं नित्या महेशानि ज्वालामालिनिका परा॥
चवर्गांतिमस्वरांतं चराक्रस्वरविभूषितं॥ बिंदुनादकलाक्रांतं विचित्रा परमेश्वरी॥ अका
रादिषु सर्वेषु स्वरेषु क्रमतो यजेत्॥ स्वरेषु परमेशानि श्रीविद्यां विश्वमातृकां॥ स्वरव
र्जित्स्ते द्वियांनीरज्ञायतजीवनां॥ तेन एतास्त्र बोडशान्यासस्थानेषु विन्यसेत्॥ यथा ऐं ह्रीं
श्रीं ऐं क्लीं सौः ॐ कामेश्वरी इच्छाकामफलप्रदे सर्वसत्ववशंकरि जगत्क्षोभण करि हूं हूं

श्रां श्रीं क्लीं ब्लूं सः सौः क्लीं ऐं कामेश्वरी नित्याकलायै नमः॥१॥ आं ऐं ह्रीं श्रीं ऐं भगभुगे भगि
नी भगोदरी भगमाले भगावह भगगुह्ये भगयोनि भगनिपातिनी सर्वभगवशंकरि
भगरूपे नित्यक्लिन्ने भगस्वरूपे सर्वाणि भगानि मे ह्यानय वरदे रेते भगक्लिन्ने क्लिन्नद्रवे क्लि
दय द्रावय अमोघे भगविच्छे क्षोभे क्षोभय सर्वसत्वान् भगेश्वरी ऐं ब्लूं जं ब्लूं भे ब्लूं मों ब्लूं हें
ब्लूं ऐं क्लिन्ने सर्वाणि भगानि मे वशमानय स्त्रीं हर ब्लें ह्रीं रतिभगमालिनी नित्याकलायै न
मः॥२॥ ईं ऐं ह्रीं श्रीं ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा नित्यक्लिन्ना नित्याकलायै नमः॥३॥ ईं ऐं ह्रीं
श्रीं ॐ क्रों भ्रों क्रौं झ्रौं छ्रौं ज्रौं ह्रौं स्वाहा भेरुंडा नित्याकलायै नमः॥४॥ ॐ ईं ह्रीं वह्निवासिन्यै
नमः॥५॥ वह्निवासिन्यै नित्याकलायै नमः॥६॥ ॐ ईं ह्रीं फ्रें सः नित्यक्लिन्ने मदद्रवे स्वाहा
वज्रेश्वरी नित्याकलायै नमः॥७॥ ॐ ईं ह्रीं शिवदूत्यै नमः शिवदूती नित्याकलायै नमः॥७॥ ॐ
ईं ह्रीं हूं खेचछे क्षः स्त्रीं हूं क्षें ह्रीं फट् त्वरिता नित्याकलायै नमः॥८॥ ॐ ईं ऐं क्लीं सौः कुलसुंद
री नित्याकलायै नमः॥९॥ ॐ ईं ऐं क्लीं सौः हसकलरडैं हसकलड्रौं ह्रीं श्रीं क्लीं ब्लूं सः सौः क्लीं

ऐं नित्याकलायै नमः ॥१०॥ ऐं ३ ॐ ह्रीं फ्रें ह्रूं आं ह्रीं क्रों नित्यमदद्रवे ह्रं क्रों ह्रीं नीलपताकिनी नित्या
कलायै नमः ॥११॥ ऐं ३ भ्रों नमस्त्र्यं ॐ विजया नित्याकलायै नमः ॥१२॥ ॐ ३ स्वौं सर्वमंगला
नित्याकलायै नमः ॥१३॥ ॐ ३ ॐ नमो भगवति ज्वालामालिनि देवि सर्वभूतसंहारकारिके
जातवेदसि ज्वलंति ज्वल २ प्रज्वल २ ह्रूं ह्रूं ह्रूं रं रं रं ह्रूं फट् स्वाहा ज्वालामालिनि नित्याकलायै न
मः ॥१४॥ अं ३ च्रौं विचित्रा नित्याकलायै नमः ॥१५॥ अं ३ मूलविद्यामुच्चार्य महात्रिपुरसुं
दरी नित्यायै कलायै नमः ॥१६॥ यद्वा अं ३ कामेश्वरी नित्याकलायै नमः इत्यादि न्यसेत् ॥
इति षोडश नित्यान्यासः ॥ ॥ अस्मिन्काले वास्थितिन्यासः ॥ ॥ अथ प्रकटयो
गिनीन्यासः ॥ मूलाधारे ऐं ह्रीं श्रीं प्रकटयोगिनीभ्यो नमः ॥ स्वाधिष्ठाने ३ गुप्तयोगिनी
भ्यो नमः ॥ नाभौ ३ गुप्ततरयोगिनीभ्यो नमः ॥ हृदि ३ संप्रदाययोगिनीभ्यो नमः ॥ कंठे ३ कुल
कौलिनीयोगिनीभ्यो नमः ॥ भ्रूमध्ये ३ निगर्भयोगिनीभ्यो नमः ॥ नादे ३ रहस्ययोगिनी
भ्यो नमः ॥ नादांते ३ अतिरहस्ययोगिनीभ्यो नमः ॥ ब्रह्मरंध्रे ३ परमातिरहस्ययोगिनी

भ्यो नमः ॥ ॥ अथायुधन्यासः ॥ ॥ द्रां ह्रीं क्लीं ब्लूं सः ह्रां रां लां वां सां धं संमोहनाय का
मेश्वरधनुषे नमः ॥ द्रां ५ यां ५ धं मोहनाय कामेश्वरीधनुषे नमः ॥ एतद्वामाधोहस्ते ॥ द्रां ५
यां ५ जं जं जंभनेभ्यः कामेश्वरबाणेभ्यो नमः ॥ दक्षिणाधः करे यां ५ द्रां ५ जं जं जंभणेभ्यः कामे
श्वरीबाणेभ्यो नमः दक्षिणाधः करे ॥ द्रां ५ यां ५ आं वशीकरणाय कामेश्वरीबाणाय नमो
वामोर्ध्वे ॥ यां ५ द्रां ५ आं वशीकरणाय कामेश्वरीपाशाय नमो वामोर्ध्वे ॥ द्रां ५ यां ५ क्रों सर्वस्तं
भनकराय कामेश्वरांकुशाय नमः ॥ यां ५ द्रां ५ क्रों सर्वस्तंभनकराय कामेश्वर्यंकुशाय
नमः ॥ एतद्द्वयं दक्षोर्ध्वे ॥ ततो वक्ष्यमाणक्रमेण कामकलां ध्यात्वा न्यसेत् ॥ तथा च ॥ एवं का
र्यस कलान्यस्य देवतामयमात्मनः ॥ वपुर्विचिंत्य शिवयोरायुधन्यासमाचरेत् ॥ द्रां द्रीं
क्लीं ब्लूं सः इत्येते कामबाणाः प्रकीर्तिताः ॥ यां रां लां वां सां द्वामिदं कामेशीबाणपंचकं ॥ द्रांद्री
निपश्याद्यादीनि संमोहनराश्रितं ॥ इत्ता कामेश्वरधनुर्ज्ञनमोतं समुद्धरेत् ॥ अनेन
चस्य वामाधोहस्ते संधारयेद्धनुः ॥ यादिं द्रादीनि यं इतं संमोहनपदीपरि ॥ कामेश्वरी

धनुर्ईतं नमोंत मित्य धः करे ॥ वामे देव्यास्तथा मंत्री धारयेदेरूवंततः ॥ ह्रादियादी निर्जं जं
मनेभ्यः कामेश्वर पदांतिके ॥ बाणेभ्यो नम इत्येवं दक्षिणाधः करे लिखे ॥ शैवान्न प्रविन्यसे
द्बाणान्नूपौश्चान्द्र साधकसत्तमः ॥ यादिह्रादी निर्जं जं न नेभ्यः कामेश्वरी पदं ततः ॥ बाणेभ्यो
नम इत्येतान् दक्षिणाधः करे लिखे ॥ देव्याः प्रविन्यसे द्बाणान् नूपौश्चाद्यं च च साधकः ॥ ह्रादि
यादी निर्जं यो पिशुरवचत्तं स बिंदुकं ॥ स्याद्दरीकरणायेति कामेश्वर पदं ततः ॥ पाशाय न
म इत्येवं वामोर्द्ध विन्यसेत्करे ॥ यादिह्रादी निजगनं यह्रियानान्हिबिंदुमत् ॥ स्याद्दरीकरणा
येति ततः कामेश्वरीति च ॥ पाशाय नम इत्येवं वामोर्द्धे विन्यसेत्करे ॥ ह्रादियादी निक्रों सर्वस्तं
भनायपदं ततः ॥ कामेश्वरपदात्पश्चादंकुशायनमो लिखेत् ॥ दक्षिणोर्द्धक्रमेणैवं विन्य
सेदंकुशं ततः ॥ यादिह्रादी निक्रों सर्वस्तंभनाय ततः परं ॥ कामेश्वरी पदाद्ध्वनिकुशायन
मो लिखेत् ॥ दक्षिणोर्द्धकरे देव्या विन्यसेदंकुशं ततः ॥ ततो मूलेन व्यापकं कृत्वा नवमु
द्राः प्रदर्शयेत् ॥ तद्यथा ॥ द्रांसर्वसंक्षोभिणी द्रांसर्वविद्राविणी क्लींआकर्षिणी ब्लूंसर्वव

शिनी सः सर्वोन्मादिनी क्रों महांकुशा ह्स्खफ्रें खेचरी ह्सौः बीजमुद्रा ऐं योनिमुद्रा प्रासय
त्रास्त्र योगिनी हृदये ॥ प्रातःकाले च वा पूजासमये होमकर्मणि ॥ जपकाले च यापि ते मां वि
नियोगाः पृथक् पृथक् ॥ पूजाकाले समस्तं या कुर्यात् साधकसत्तमः ॥ ततो ध्यानं ॥ ततः
पद्मनिभां देवीं बालार्ककिरणोज्वलां ॥ जपाकुसुमसंकाशां दाडिमीकुसुमोपमां ॥ पद्मराग
प्रतीकाशां कुंकुमारुणसन्निभां ॥ स्फुरन्मुकुटमाणिक्यकिंकिणीजालमंडितां ॥ कालालिकु
लसंकाशा कुटिलालकपल्लवां ॥ प्रत्यग्रारुणसंकाशा वदनांभोजमंडलां ॥ किंचिदर्द्धेंदुकुटि
ललला टमृदुपट्टिकां ॥ पिनाकिधनुराकारभ्रूलतां परमेश्वरीं ॥ आनंदमुदितोल्लास
लीलांदोलितलोचनां ॥ स्फुरन्मयूखसंकाशा विलसद्धेमकुंडलां ॥ विम्बकर्मविनिर्माण
सूत्रसुस्पष्टनासिकां ॥ ताम्रविद्रुमबिंबाभप्रकोष्ठीमम्बतोपमां ॥ करांबुजनखमौतिबीजानी
तननस्वलां ॥ मुक्ताहारलतोपेतसमुन्नतपयोधरां ॥ त्रिवलीवलयायुक्तमध्यदेशसुशो
भितां ॥ अनर्घ्यरत्नघटितकांचीयुतनितंबिनीं ॥ नितंबबिंबद्विरदरोमराजिवरांकुशां

कदलीललितस्तंभसुकुमारोरुमीश्वरीं ॥ लावण्यकुसुमाकारजानुमंडलबंधुरां ॥ त्रिवली
वेतयामृदुमध्यदेशसुशोभितां ॥ लावण्यकदलीतुल्यजंघायुगलमंडितां ॥ गूढगुल्फप
दद्वंद्वप्रपदाजितकच्छपां ॥ तनुदीर्घांगुलिस्वच्छनखराजिविराजितां ॥ ब्रह्मविष्णुशिरोर
त्ननिघृष्टचरणांबुजां ॥ शीतांशुशतसंकाशां कांतिसंतानहासिनीं ॥ लौहित्यजितसिंदूरज
पादाडिमरागिणीं ॥ रक्तवस्त्रपरिधानां पाशांकुशकरोद्यतां ॥ रक्तपद्मनिविष्टांश्च रत्नाभ
रणभूषितां ॥ चतुर्भुजां त्रिनेत्रां तु पंचबाणधनुर्धरां ॥ कर्पूरसकलोन्मिश्रतांबूलपूरिता
ननां ॥ महामृगमदोद्दामकुंकुमारुणविग्रहां ॥ सर्वशृंगारवेषाढ्यां सर्वाभरणभूषितां
जगदाह्लादजननीं जगद्रंजनकारिणीं ॥ जगदाकर्षणकरीं जगत्कारणरूपिणीं ॥ सर्व
लक्ष्मीपरां नित्यां सर्वशास्त्रमयीं शिवां ॥ एवंरूपमात्मानं ध्यात्वा मानसैः संपूजयेत् ॥ तद्य
था ॥ हृत्पद्ममध्ये देवीं विनाथ्य कुंडलीपात्रसंस्थेन सहस्रारामृतेन पाद्यं देव्याश्चरणे
दद्यात् ॥ ततो मनश्चार्घ्यं दत्वा सहस्रदलपद्मशृंगारगलितपरमामृतद्रुतेनाचमनीयं

मुखे पंचविंशतितत्वेन गंधं च अहिंसा विज्ञानं दमां दयां मनो नवं समनो हं अमात्सर्यं अ
मायां अनहंकृतिं अरागं अद्वेषं इंद्रियाणि दश एतानि पुष्पाणि च प्रदापयेत् ॥ तेजोरू
पं दीपं ध्यायंश्च धूपं दद्यात् ॥ अंबरं चामरं स्वर्णदर्पणं चंद्रं च छत्रं पर्यंतुमेखलां आनंदं
हारमुज्ज्वलं ॥ अनाहतध्वनिमयीं घंटां निवेदयेत् ॥ ततः सुधारसां बुधिं मांसपर्वतं च
दत्वा मनोनर्तकं सतालललितं शृंगारादिरसैश्चवै ॥ नृत्यगीतेच्छया चैव घोषयेत्परमे
श्वरीं ॥ एवं संपूज्य नैवेद्येन जपः कार्यः ॥ ततो बहिः पूजामारभेत् ॥ तत्रार्घस्थापनं प्रथ
मं सामान्यार्घं तत्र क्रमः ॥ आदौ गंधेन चतुरस्रं विधाय तदंतर्वृत्तमालिखेत् ॥ मंडला
य नमः इति पुष्पैस्तमभ्यर्च्य तत्र साधारं पात्रं संस्थाप्य शुद्धजलेन तमापूर्य ऐं सर्वज्ञारा
ह्रीं श्रीं महात्रिपुरसुंदरी हृदयाय नमः इत्यादिक्रमेण षडंगानि संपूज्य तदुपरि मूलमं
त्रमष्टधा जपेत् ॥ ततो विशेषार्घस्थापनं तत्पात्रं तु तंत्रांतरे ॥ पात्रं कांचनकाचरूप्य
जनितं मृत्तकपालोद्भवं विभ्याप्तिमयं च कामदमिदं हैमं श्रियं स्फाटिकं ॥ ताम्रं प्रीतिद

मिष्टसिद्धिजनकं श्रीनारिकेलोद्भवं कापालं स्फटमंत्रसिद्धिजनकं भुक्तिप्रदं मौक्तिकं ॥ ९ ॥
तद्रूक्षं नवरत्ने ॥ नवपात्रं महादेवि विज्ञेयं चोत्तमोत्तमं ॥ नारिकेलात्रिधं देवि विज्ञेयं चात्त
मकल्पकं ॥ रत्नपात्रं च सुश्रोणि विज्ञेयं चोत्तममध्यमं ॥ मध्यमोत्तमकं बिल्वं ब्रह्मरूजमेव च
कल्पं स्यान्मध्यमं प्रोक्तं मृन्मयं कल्पसाधनं ॥ यत्र पाकर्पणकर्माणि हेमपात्रेण योजने ॥
शांतिके पौष्टिके चापि राजतं कारयेत्प्रिये ॥ लोहपात्रं विजानीयात् मारणोच्चाटने तथा
स्तंभने कार्येषु पाषाणं विद्धि वै लोहमृन्मयं ॥ सर्वकार्येषु कर्तव्यं बिल्वामित्रं च सुव्रते ॥ कु
लोच्छादनकार्येषु काचपात्रं विशिष्यते ॥ काष्ठपात्रं विजानीयात् मंत्राराधनकर्मणि ॥
नवपात्रं तु गृह्णीयात् भुक्तिमुक्तिप्रदायकं ॥ दशार्घपात्रं देवेशि ब्रह्माद्याः देवताः सदा ॥
नश्यंति सर्वयोगिन्यः प्रीताः सिद्धिं ददंत्यपि ॥ सामान्यविशेषार्घद्वयस्यापरपकल्पं ॥ तथा
च नवरत्नेश्वरे ॥ एकपात्रं न कर्तव्यं यदि साक्षान्महेश्वरः ॥ मंत्राः पराङ्मुखा यांति आ
पदस्य पदे पदे ॥ इहलोके दरिद्रः स्यान्मृते च पशुतां व्रजेत् ॥ आत्मश्रीचक्रयोर्मध्ये साम

न्यार्घजलेन त्रिकोणवृत्तषट्कोणचतुरस्रं मंडलं कृत्वा त्रिकोणमध्ये मूलविद्यया मध्यं सं
पूज्य त्रिकोणे प्रत्येककूटैः पूजयेत् ॥ अग्न्यादिक्रमेण ततः षट्कोणे मूलविद्यया हृदयादि सा
षडंगानि पूजयेत् ॥ ऐं अग्निमंडलाय दशकलात्मने ऽर्घपात्राधाराय नमः ॥ इत्याधारं सं
पूज्य तत्र वृत्ताकारेण वह्नेर्दशकलाः पूजयेत् ॥ तद्यथा ॥ ऐं ह्रीं श्रीं धूम्रार्चिषे नमः ॥ ऐयं ३ रं
नीलवर्णायै नमः ॥ ३ लं कपिलायै नमः ॥ ३ वं स्फुलिंगिन्यै नमः ॥ ३ शं ज्वालिन्यै नमः ॥ ३ षं हेम
वत्यै ॥ ३ सं हव्यवाहिन्यै ॥ ३ हं कव्यवाहिन्यै ॥ ३ ळं रात्र्यै ॥ ३ क्षं संकर्षिण्यै ॥ इति संपूज्य ॥ तदुप
रि पात्रं संस्थाप्य पूर्ववत्तत्र यंत्रमालिख्य संपूज्य च क्लीं सूर्यमंडलाय द्वादशकलात्मने ऽर्घ
पात्राय नमः इति संपूज्य वृत्ताकारेण सूर्यस्य द्वादशकलाः पूजयेत् ॥ यथा ऐं ह्रीं श्रीं कं भं
तपिन्यै नमः ॥ ३ खं बं तापिन्यै ॥ ३ गं फं धूम्रायै ॥ ३ घं पं विबुधायै ॥ ३ ङं नं बोधिन्यै ॥ ३ चं धं
कपालिन्यै ॥ ३ छं दं रुगोचिल्पै ॥ ३ जं थं वरेण्यायै ॥ ३ झं तं आकर्षिण्यै ॥ ञं णं मायायै ॥ ३ टं ठं वि
श्ववत्यै ॥ ३ ठं डं हेमप्रभायै ॥ इति संपूज्य सोमः सोममंडलाय षोडशकलात्मने नम

इतिमूलेनतत्वादिनाचापूर्यपूर्ववद्यंत्रमालिख्यत्रिकोणेतुअकथादित्रिरेखांहलक्षौचसंध्ये
चिंतयेत्॥ततःपूर्ववत्स्त्रोःसोममंडलायषोडशकलात्मनेऽमृतायनमः॥इतिसंपू
ज्यवृत्ताकारेणसोमस्यषोडशकलापूजयेत्॥यथाऐंह्रींश्रींअंअमृतायैनमः॥एवं३आंमान
दायैनमः॥३इंपुष्ट्यै॥३ईंतुष्ट्यै॥३उंप्रीत्यै॥३ऊंरत्यै॥३ऋंह्रियै॥३ॠंक्रियायै॥३लृंसुधायै॥३
ॡंरात्र्यै॥३एंज्योत्स्नायै॥३ऐंहैमवत्यै॥३ओंछायायै॥३औंपूर्णिमायै॥३अंविद्यायै॥३अःअमावा
स्यायै॥इतिसंपूज्यमध्येहंसआत्मनेनमः॥ततोहसक्षमलवरयूंआनंदभैरवायवषट्॥
हसक्षमलवरयींसुधादेव्यैवौषट्इतिसंपूज्यमत्स्यमुद्रयातज्जलमाछाद्यमूलविद्यामष्टधा
जपेत्॥ततोर्घ्यपात्रादीन्निवेद्यनवमुद्राःप्रदर्श्यअर्घ्यजलमयंतज्जलंकिंचित्पात्रांतरेनिक्षिप्यमूलेन
तज्जलेनात्मानंपूजाद्रव्याणिचत्रिःसंप्रोक्ष्यसर्वमर्घ्यजलमयंकुर्यात्॥पूजासमाप्तिर्यावत्तस्मात्॥ता
वदर्घ्यंनचालयेत्॥समयांकेसुंदरीविद्यायांअंगदेवतापूजनंतुअर्घ्यस्थापनानंतरं॥तथाच
आत्मानंयागवस्तूनिप्रोक्षयित्वायथाक्रमं॥चिन्मयंतत्समादायतत्त्वाचिंतयेन्मंत्रवित्तमः॥

तस्माच्चक्रचतुर्दिक्षुक्रमवरान्निर्मायचक्रंश्मनंस्थ्येहस्तिमुखंपरंस्मरहरंगोपालमेवंतथा
ध्यात्वावाहयचतान्ततोबहुविधैःपुष्पैश्चपाद्यादिभिर्गंधादिप्रसुगंधमोदकफलैरुक्तासये
त्तान्हृदि॥१॥ततोमहाचक्रेअमृतांभोनिधयेनमः॥एवंरत्नद्वीपायनानावृक्षमहोद्याना
यकल्पवृक्षवाटिकायैपुष्परागरत्नप्राकारायपद्मरागरत्नप्राकारायगोमेदरत्नप्राकारा
यइंद्रनीलरत्नप्राकारायवज्ररत्नप्राकारायवैडूर्यरत्नप्राकारायमाणिक्यमंडपायसह
स्रस्तंभमंडपायअमृतवापिकायैआनंदवापिकायैविमर्शवापिकायैबालातपोद्गारायचं
द्रिकोद्गारायमहाशृंगारपरिखायैमहापद्माटव्यैचिंतामणिगृहराजायपूर्वाम्नायपूर्वद्वारा
यदक्षिणाम्नायदक्षिणद्वारायपश्चिमाम्नायपश्चिमद्वारायउत्तराम्नायउत्तरद्वारायरत्नदीप
वलयायमहासिंहासनायब्रह्ममयैकमंचपादायविष्णुमयैकमंचपादायरुद्रमयैकमं
चपादायईश्वरमयैकमंचपादायसदाशिवमयमंचफलकायहंसतूलतल्पायहंस
तूलमहोपधानायकौसुंभास्तरणायमहावितानिकायैमहायमनिकायैसर्वत्रनमोंतेन

पूजयेत्॥ तदुपरि हसौः सदाशिवमहाप्रेतपद्मासनाय नमः॥ ततः पुनर्ध्यात्वा त्रिखंडमु
द्रां शिखरे मारकाय यंत्रे समानीय ह्रीं श्रीं सौः त्रिपुरसुंदरीमूर्त्तिं कल्पयामि। इति बिंदौ कल्पि
तमूर्त्तावावाहयेत्॥ हसरैं हसकलरैं हसरौः इत्युच्चार्य॥ महापद्मवनांतस्थे कारणानंद
विग्रहे॥ सर्वभूतहिते मातरेह्येहि परमेश्वरि॥ इति बैंदवचक्रे परब्रह्मणावाह्यावा
हनादिप्राणप्रतिष्ठांतं कर्मसमाप्य बाणकोदंडपाशांकुशादिमुद्राः प्रदर्शयेत्॥ ततो य
थोपचारैः संपूज्य त्रिधा संतर्पयेत्॥ तत्रायं क्रमः॥ वामहस्तांगुष्ठानामाभ्यां नखाग्रेण धृत
श्रीपात्रार्घ्यबिंदुनान्यहस्तादिना पुष्पाक्षतादिभिः श्रीमहात्रिपुरसुंदरीं तर्पयामीति त्रिस्त
र्पयेत्॥ तदुक्तं स्वतंत्रे॥ अंगुष्ठानामिकायोगात् वामहस्तस्य पार्वति॥ तर्पयेत्सुंदरीं देवीं
सम्यग्गंधसवाहनां॥ तर्पयामि मुखे देव्याः त्रिवारं मूलविद्यया॥ अंगुष्ठानामिकाभ्यां तु
नखे निर्दिष्टमुद्धृतं॥ श्रीपात्रस्थोदकं बिंदु तर्पयेत्कुलनायिकां॥ अंगुष्ठेनैव यो देवीमध्य
मां चंडिकाप्रिये॥ सव्येन हस्तयोगेन तर्पयेत्कुलेश्वरीं॥ विशेषस्तु॥ अंगुष्ठानामिका

भ्यां तु वश्यकर्मणि तर्पयेत्॥ अंगुष्ठमध्यमाभ्यां तु शांतिकर्मणि तर्पयेत्॥ तर्जन्यंगुष्ठयोगे
न तर्पयेदभिचारके॥ कनिष्ठांगुष्ठयोगेन स्तंभने तर्पयेत्प्रिये॥ ततो देव्यंगे षडंगानि पू
जयेत्॥ तद्यथा॥ अग्नीशासुरवायव्ये मध्यदिक्षु च ऐं सर्वज्ञाशक्ति श्रीमहात्रिपुरसुंदरीहृ
दयाय नमः॥ क्लीं नित्यतृप्ताशक्ति श्रीमहात्रिपुरसुंदरीशिरसे स्वाहा॥ सौः अनादिबो
धशक्ति श्रीमहात्रिपुरसुंदरी ~~शिरसे स्वाहा~~ शिखायै वषट्॥ ऐं स्वतंत्रशक्ति श्रीमहात्रि
पुरसुंदरी कवचाय हुं॥ क्लीं अलुप्तशक्ति श्रीमहात्रिपुरसुंदरीनेत्रत्रयाय वौषट्॥ सौः
अनंतशक्ति श्रीमहात्रिपुरसुंदरी अस्त्राय फट्॥ ततः स्वशरीरे कामकलां भावयेत्॥
तथाच॥ बिंदुसंकल्प्य वक्त्रं तु तदधस्तत्कुचद्वयं॥ तदधः सपरार्द्धं तु चिंतयेत्तदधोमुखं
ततस्तिथिनित्यां समर्चयेत्॥ महात्रिकोणावर्त्तेन अकारादि पंच एकारादि पंच बिंदौ
अमध्ये विसर्गांतेषु वामावर्त्तेन अं कूप द्वे कामेश्वर्यादि विचित्रांतं रूपद्वे विचित्रादि
कामेश्वर्यंतं पूजयेत्॥ तद्यथा॥ प्रतिपदि अकारे॥ ऐं ह्रीं श्रीं तत्तन्मंत्रमुच्चार्य कामेश्वरीनि

नित्याकलाश्रीपादुकां पूजयामि नमः॥ एवं आकारे द्वितीयायां भगमालिनीं॥ इकारे तृती
यायां नित्यक्लिन्नां॥ ईकारे चतुर्थ्यां भेरुंडां॥ उकारे पंचम्यां वह्निवासिनीं॥ ऊकारे षष्ठ्यां महा
विद्येश्वरीं॥ ऋकारे सप्तम्यां शिवदूतीं॥ ॠकारे अष्टम्यां त्वरितां॥ ऌकारे नवम्यां कुलसुंदरीं
ॡकारे दशम्यां नित्यां॥ एकारे एकादश्यां नीलपताकां॥ ऐकारे द्वादश्यां विजयां॥ ओकारे त्र
दश्यां सर्वमंगलां॥ औकारे चतुर्दश्यां ज्वालामालिनीं॥ अंकारे पौर्णमास्यां विचित्रां॥ अः वि
सर्गे त्रिपुरसुंदरीं पूजयेत्॥ कृष्णपक्षे विचित्रादिकामेश्वर्यंतं पूजयेत्॥ पूजामंत्रस्तु तंत्रां
तरे॥ श्रीपदं पूर्वमुच्चार्य पादुकापदमुद्धरेत्॥ पूजयामि नमः पश्चात् पूजयेदंगदेवताः॥
ततो मध्यभागेस्मिन्मध्ये गुरुपंक्तिं पूजयेत्॥ आनंदनाथशब्दांता विज्ञेया परमेश्वरी॥
अंबांतोऽगुरवः प्रोक्ता स्त्रीलिंगा वीरवंदिते॥ तद्यथा॥ ऐं ह्रीं श्रीं प्रकाशानंदनाथश्रीपादुकां
पूजयामि नमः॥ एवं परशिवं तथा परशक्त्यंबाश्रीपादु०॥ एवं कौलेश्वरं शुक्लदेवीपरेशा
नं कामेश्वर्यंता एते दिव्यौघाः॥ भोगं क्लीदं समयं वेदं एते सिद्धौघाः॥ गगनं विश्वं विमलं वि

मर्दनं भुवनं लीलं आत्मानं प्रियं एते मानवौघाः॥ ततो गुरुं परमगुरुं परापरगुरुं परमेष्ठि
गुरुं च स्वगुरुं वा॥ एते कामराजविद्यायास्तु दिता याश्च मरवः लोपायास्तु दिताया
श्च परमेष्ठीवं कामेश्वर्यंबिकादिव्यौघां महौघं सर्वानंदं प्रज्ञादेवीं प्रकाशं॥ एते दिव्यौघा
दिव्यं चित्रं कैवल्यं दिव्यं वां महोदयं॥ एते सिद्धौघाः चित् विश्वशक्ति ईश्वर कमल परमा
नंद मनोहर स्वात्मानंद प्रतिभान्॥ एते मानवौघाः पूजयेत्॥ तत्र पूर्ववत् कृत कल्पये एकं वा
पूजयेत्॥ अथवा सामान्य गुरुपंक्तिं पूजयेत्॥ तद्यथा॥ ऐं ह्रीं श्रीं गुरुभ्यो नमः॥ ३ गुरुपा
दुकाभ्यो नमः॥ ३ परमगुरुभ्यो नमः॥ ३ परमगुरुपादुकाभ्यो नमः॥ परापरगुरुभ्यो न
मः॥ ३ परापरगुरुपादुकाभ्यो नमः॥ ३ परमेष्ठिगुरुभ्यो नमः॥ ३ परमेष्ठिगुरुपादुकाभ्यो
नमः॥ ३ आचार्येभ्यो नमः॥ ३ आचार्यपादुकाभ्यो नमः॥ बीजानि च वक्ष्याम्यायाक्रमशानि
च॥ ततस्त्रैलोक्यमोहनादिस्थितिचक्रे॥ ३ हसरीं स ह्रीं श्रीं कुल ह्रीं पूर्वाम्नायउन्मनी दे
वीश्रीपादु०॥ स्थितिचक्रे ३ ऐं क्लिन्ने क्लीं मदद्रवे कुल ह्सौः दक्षिणाम्नाययोगिनी देवीश्री

ततः सर्वसौभाग्यादिसंहारात्मकत्रिचक्रे ऐं ह्रीं श्रीं हसखफ्रें हुं छ्रिके ह्स्रां ह्स्रीं ह्स्रूं अघो-
रे घोरमुखी चछ्रां चछ्रीं किलिकिलि विच्चे ॥ ततः पूर्वोक्तानि बीजानि पश्चिमाम्नाय कुब्जिका
श्रीपादु० ॥ सर्वचक्रे ३ हसखफ्रें महाचंडयोगेश्वरी उत्तराम्नाय कालिका देवी श्रीपादु०
३ ततो बैंदवे शैवदर्शनाय नमः ॥ तत्परितः शाक्तदर्शनाय नमः ॥ सूर्यबिंबे सौरदर्शनाय
नमः ॥ शिवस्य वामतो वैष्णवदर्शनाय नमः ॥ इति स्थितिचक्रे बौद्धदर्शनाय नमः ॥ ततो
ग्नीशासुरवायुमध्ये दिक्षु च मूलषडंगानि पूजयेत् ॥ तथा च ज्ञानार्णवे ॥ अथांगावरणं
कुर्यात् श्रीविद्यामन्त्रसंभवं ॥ अग्नीशासुरवायुमध्ये दिक्ष्वंगं पूजयेत् ॥ ततो बाह्यचतु-
रस्रपश्चिमादिद्वारचतुष्टये पश्चिमादिनिर्णयस्तु ॥ ज्ञानार्णवे ॥ यदा ज्ञानिमुखो गं श्रीत्रि-
पुरां परिपूजयेत् ॥ देवीपश्चात्तदा प्राची प्रतीची त्रिपुरा पुरः ॥ ३ अणिमासिद्धिश्रीपादुकां
पूजयामि नमः ॥ लघिमासिद्धिश्रीपादु० ॥ ३ महिमासिद्धिश्रीपादु० ॥ ३ ईशित्वासिद्धिश्रीपा-
दु० ॥ वाह्यादिकोणचतुष्टये तु च ॥ ३ वशित्वासिद्धिश्रीपादु० ॥ ३ प्राकाम्यासिद्धिश्रीपादु० ॥ ३ भु-

क्तिसिद्धिश्रीपादु० ॥ ३ इच्छासिद्धिश्रीपादु० ॥ अधः ३ प्राप्तिसिद्धिश्रीपादु० ॥ ऊर्ध्वे ३ सर्वकामसिद्धि-
श्रीपादु० ॥ मध्यचतुरस्रस्य पश्चिमादिद्वारचतुष्टयेषु ३ आं ब्रह्माणीश्रीपादु० ३ ईं माहेश्वरी-
श्रीपादु० ॥ ३ ऊं कामेश्वरीश्रीपादु० ॥ ३ ॠं वैष्णवीश्रीपादु० ॥ वाह्यादिकोणचतुष्टयेषु ३ लृं
वाराहीश्रीपादु० ॥ ३ ऐं इन्द्राणीश्रीपादु० ॥ ३ औं चामुण्डाश्रीपादु० ॥ अः महालक्ष्मीश्रीपादु० ॥ अभ्यं-
तरचतुरस्रपश्चिमादिद्वारचतुष्टयेषु ३ द्रां सर्वसंक्षोभिणीमुद्राश्रीपादु० ॥ ३ द्रीं सर्वविद्रा-
विणीमुद्राश्रीपादु० ॥ ३ क्लीं सर्वाकर्षिणीमुद्राश्रीपादु० ॥ ३ ब्लूं सर्ववशंकरीमुद्राश्रीपादु० ॥
वाह्यादिकोणचतुष्टयेषु ३ सः सर्वोन्मादकरीमुद्राश्रीपादु० ॥ ३ क्रों महांकुशामुद्राश्रीपा-
दु० ॥ ३ हसखफ्रें खेचरीमुद्राश्रीपादु० ॥ ३ ह्सौः सर्वबीजमुद्राश्रीपादु० ॥ ऊर्ध्वे ऐं क्लीं सौः त्रिखंडमु-
द्राश्रीपादु० ॥ चक्राग्रे संपूर्णचक्रे ३ त्रैलोक्यमोहनचतुरस्रचक्राय नमः ॥ ३ अं आं सौः त्रि-
पुराश्रीपादु० ॥ तस्य दक्षिणे ३ द्रां सर्वसंक्षोभिणीमुद्राश्रीपादु० ॥ देव्या वामे ३ अणिमासिद्धि-
श्रीपादु० ॥ चार्वाकदर्शनाय नमः ॥ अत्र त्रैलोक्यमोहनचतुरस्रचक्रे त्रिपुरा चक्रनायि-

काधिष्ठिते एताः अणिमाद्याः अष्टकर्मयोगिन्यः समुद्राः सायुधाः सवाहनाः सपरिवाराः स
र्वोपचारैः पूजितास्तर्पिताः संतुष्टास्त्वर्घजलेन मूलदेव्यै समर्पयेत्॥ द्रामिति सर्वसंक्षोभि
णीमुद्रां प्रदर्शयेत्॥ ऐं आत्मतत्त्वाय स्वाहा॥ क्लीं विद्यातत्त्वाय स्वाहा॥ सौः शिवतत्त्वाय
स्वाहा॥ इति त्रिवारमर्घोदकेन तर्पयेत्॥ षोडशदलेषु पश्चिमदलादारभ्य वामावर्तेन ३
अं कामाकर्षिणी नित्याकलाश्रीपादु०॥ ३ एवं सर्वत्र कलापदप्रयोगः॥ तथा च नवरत्ने
श्वरे॥ विलोमेन यजेदेताः क्रमान्नित्याकलाः पुनः॥ ३ आं बुद्ध्याकर्षिणी नित्याश्रीपादु०॥ ३ इं
अहंकाराकर्षिणी नित्याश्रीपादु०॥ ईं शब्दाकर्षिणी नित्याश्रीपादु०॥ उं स्पर्शाकर्षिणी श्रीपा
दु०॥ ऊं रूपाकर्षिणी नित्याश्रीपादु०॥ ऋं रसाकर्षिणी श्रीपादु०॥ ॠं गंधाकर्षिणी नित्याश्रीपा
दु०॥ ३ लृं चित्ताकर्षिणी नित्याश्री०॥ ॡं धैर्याकर्षिणी नित्याश्रीपादु०॥ एं स्मृत्याकर्षिणी नित्
श्रीपादु०॥ ऐं नामाकर्षिणी नित्याश्रीपादु०॥ ओं वीर्याकर्षिणी नित्याश्रीपादु०॥ औं आत्माकर्षि
णी नित्याश्रीपादु०॥ अं अमृताकर्षिणी नित्याश्रीपादु०॥ अः शरीराकर्षिणी नित्याश्रीपादु

सर्वत्र कलापदं दत्त्वा पूजयेत्॥ चक्राग्रे सर्वाशापरिपूरकषोडशदलचक्राय नमः॥ ऐं क्लीं
सौः त्रिपुरेश्वरी चक्रनायिका श्रीपादु०॥ एतस्माद्दक्षिणे॥ ३ द्रां सर्वविद्राविणीमुद्राश्री
पादु०॥ वामे ३ लघिमासिद्धिश्रीपादु०॥ षोडशदलनाय नमः॥ अत्र सर्वाशापरिपूरकषो
डशदलचक्रे त्रिपुरेशी चक्रनायिकाधिष्ठिते एताः कामाकर्षिण्याद्या गुप्तयोगिन्यः स
मुद्रा इत्यादि मूलदेव्यै समर्पयेत्॥ द्रामिति सर्वविद्राविणीमुद्रां प्रदर्श्य ऐं आत्मतत्त्वाय स्वा
हेत्यादि पूर्ववत्॥ अष्टदलचक्रे पूर्वादि तद्दलेषु वामावर्तेन ३ कं ५ अनंगकुसुमा देवी
श्रीपादु०॥ ३ चं ५ अनंगमेखला देवी श्रीपादु०॥ ३ टं ५ अनंगमदना देवी श्रीपादु०॥ ३ तं
४ अनंगमदना देवी श्रीपादु०॥ आग्नेयादि दलेषु ३ पं ५ अनंगरेखा देवी श्रीपादु०॥ ३ यं ५
अनंगवेगिनी देवी श्रीपादु०॥ ३ शं षं सं हं अनंगांकुशा देवी श्रीपादु०॥ ३ लं क्षं अनंगमा
लिनी देवी श्रीपादु०॥ चक्राग्रे सर्वसंक्षोभणाष्टदलचक्राय नमः॥ ३ ह्रीं क्लीं सौः त्रिपुरसुं
दरी चक्रनायिका श्रीपादु०॥ एतस्माद्दक्षिणे ३ क्लीं सर्वाकर्षिणीमुद्राश्रीपादु०॥ वामे ३ महि

मासिद्धिश्रीपादु०॥ ३ जिनेंतंदर्शनायनमः॥ अत्रसर्वसंक्षोभणाष्टदलचक्रे त्रिपुरसुंद
रीचक्रनायिकाधिष्ठिते एता अनंगकुसुमाद्यष्टमतरयोगिन्यः समुद्राइत्यादिमूलदेव्यै स
मर्पयेत्॥ क्लीमितिसर्वाकर्षिणीमुद्रां प्रदर्शयेत्॥ ऐं आत्मतत्वायस्वाहेत्यादिसमानं चतु
र्दशारचक्राग्रपश्चिमादिदक्षिणंयावत् ३ सर्वसंक्षोभिणीशक्तिश्रीपादु०॥ एवं ३ सर्ववि
विणी ३ सर्वाकर्षिणी ३ सर्वाह्लादिनी॥ ३ सर्वसंमोहनी॥ ३ सर्वस्तंभिनी॥ ३ सर्वसत्यवशंकर
३ सर्वरंजनी॥ ३ सर्वोन्मादिनी॥ ३ सर्वार्थसाधनी॥ ३ सर्वसंपत्तिपूरणी॥ ३ सर्वमंत्रमयी॥ ३
सर्वद्वंद्वक्षयंकरी॥ इतिसर्वत्र॥ चक्राग्रे ३ सर्वसौभाग्यदायकचतुर्दशारचक्रायनमः॥ है
हक्लीं हं स्त्रैः त्रिपुरवासिनी चक्रनायिकाश्रीपादु०॥ एतस्यादक्षिणे ह्रूं सर्ववशंकरीमुद्राश्रीपा
दु०॥ यामे ३ ई शित्वसिद्धिश्रीपादु०॥ सांख्यमिमांसान्यायदर्शनेभ्योनमः॥ अत्रसौभाग्यदाय
के चतुर्दशारचक्रे त्रिपुरवासिनीचक्रनायिकाधिष्ठिते एताः सर्वसंक्षोभिण्याद्याः शक्तयाः सं
प्रदाययोगिन्यसमुद्राइत्यादिमूलदेव्यैसमर्पयेत्॥ ह्रूं सर्ववशंकरीमुद्रांप्रदर्शयेत्॥ आ

त्मतत्वायस्वाहेतिसमानं॥ ४ बहिर्दशारचक्राग्रेसमारभ्यपश्चिमादक्षिणांतं॥ ३४ स व
सिद्धिप्रदा ४ ३ सर्वसंपत्प्रदा॥ ३ सर्वप्रियंकरी॥ ३ सर्वमंगलकारिणी॥ ३ सर्वकामप्रदा॥ ३ स
र्वदुःखविमोचनी॥ ३ सर्वमृत्युप्रशमनी॥ ३ सर्वविघ्ननिवारिणी॥ ३ सर्वांगसुंदरी॥ ३ सर्वसौ
भाग्यदायिनी॥ ३ देवीश्रीपादु०॥ सर्वत्र चक्राग्रे सर्वार्थसाधकबहिर्दशारचक्रायनमः॥
हसैं हसक्लीं हसौः त्रिपुराश्री चक्रनायिकाश्रीपादु०॥ तस्यादक्षिणे सः सर्वोन्मादिनीमुद्रा
श्रीपादु०॥ वशित्वासिद्धिश्रीपादु०॥ शैवएवैष्णवदर्शनाभ्यांनमः॥ अत्रसर्वार्थसाधके
बहिर्दशारचक्रे त्रिपुराश्रीचक्रनायिकाधिष्ठिते एता सर्वसिद्धिप्रदादिदश कुलकौलिय
गिन्यः समुद्रा इत्यादिमूलदेव्यैसमर्पयेत्॥ सः सर्वोन्मादिनीमुद्रांप्रदर्शयेत्॥ आत्मतत्व
यस्वाहेतिसमानं॥ अंतर्दशारचक्राग्रात्पश्चिमादक्षिणांतं ३ सर्वज्ञा सर्वशक्तिमयी॥ ३
सर्वैश्वर्यप्रदायिनी॥ ३ सर्वज्ञानमयी॥ ३ सर्वव्याधिविनाशिनी॥ ३ सर्वाधारस्वरूपिणी॥
३ सर्वपापहरा॥ ३ सर्वानंदमयी॥ ३ सर्वरक्षास्वरूपिणी॥ ३ सर्वेप्सितप्रदाश्रीपादु०॥ सव

त्रचक्राग्रे सर्वरक्षाकरान्तर्दशारचक्राय नमः ॥ ह्रीं क्लीं ब्लें त्रिपुरमालिनी श्री चक्रनायिका श्री
पादु० ॥ एतस्माद्दक्षिणे क्रों महांकुशमुद्रा श्री पादु० ॥ वामे ३ प्राकाम्यसिद्धि श्री पादु० ॥ ३ सौर
दर्शनाय नमः ॥ अत्र सर्वरक्षाकरे अन्तर्दशारे चक्रे त्रिपुरमालिनी चक्रनायिकाधिष्ठिते
एताः सर्वरक्षाधारे ऽनिगर्भयोगिन्यः समुद्राः इत्यादि मूलदेव्यै समर्पयेत् ॥ क्रों महांकुशां
मुद्रां ऐं आत्मतत्वाय स्वाहेति समाप्तं ॥ ६ ॥ ततो ऽष्टारचक्रेऽग्रं समारभ्य पश्चिमादि दक्षिणां
तं यावत् ॥ ३ अं १६ र ब्लूं वशिनी वाग्देवता श्री पादु० ॥ ३ कं ५ कलह्रीं कामेश्वरी वाग्देवता
श्री पादु० ॥ ३ चं ५ न्व्लीं मोदिनी वाग्देवता श्री पादु० ॥ ३ टं ५ य्लूं विमला वाग्देवता श्री पादु०
३ तं ५ ज्म्रीं अरुणा वाग्देवता श्री पादु० ॥ ३ पं ५ हसलवयूं जयिनी वाग्देवता श्री पादु०
३ यं ४ झमरयूं सर्वेश्वरी वाग्देवता श्री पादु० ॥ ३ शं ४ क्ष्मरीं कौलिनी वाग्देवता श्री पादु
चक्राग्रे ३ सर्वरोगहराष्टचक्राय नमः ॥ ह्रीं श्रीं सौः त्रिपुरसिद्धाम्बा श्री पादु० ॥ एतस्मा
द्दक्षिणे हसखफ्रें खेचरीमुद्रा श्री पादु० वामे ३ ह्रीं भुक्तिसिद्धि श्री पादु० ॥ वैष्णवदर्शना

य नमः ॥ अत्र सर्वरोगहरे अष्टारचक्रे त्रिपुरासिद्धि चक्रनायिकाधिष्ठिते एता वशिन्याद्या
योगिन्यः मूलदेव्यै समर्पयेत् ॥ हसखफ्रें खेचरीमुद्रां प्रदर्श्य ऐं आत्मतत्वाय स्वाहेति समा
प्तं ॥ ७ ॥ त्रिकोणबाह्ये ऽग्रतो वामावर्त्तेन पश्चिमादि दक्षिणांतं यावत् ॥ द्रां द्रीं क्लीं सः कामेश्व
री कामेश्वर जंभनबाणेभ्यो नमः ॥ ह्रीं ५ धं थं सर्वमोहनाय कामेश्वर कामेश्वरी धनुर्भ्येन
मः ॥ ह्रीं ५ आं ह्रीं वशीकरणाय कामेश्वर कामेश्वरी पाशाय नमः ॥ ह्रीं ५ क्रों सर्वस्तंभनाय
कामेश्वर कामेश्वरी अंकुशाय नमः ॥ तत्र त्रिकोणाग्रदक्षिणोत्तरेषु मूलयोन्यां चतुर्था
र्थ अग्निचक्रे कामगिर्यालये मित्रीशानाथात्मिके रुद्रात्मशक्ति कामेश्वरी श्री पादु० ॥ का
मराज मुख्यार्थ चक्रे पूर्णगिरिपीठे षष्ठीशानाथात्मिके विष्ण्वात्मशक्ति वज्रेश्वरी देवी नित्या
श्री पादु० ॥ शक्तिकूट मुख्यार्थ सोमचक्रे जालंधरपीठे उड्डीशानाथात्मिके ब्रह्मात्मशक्ति
कामेश्वरी श्री पादु० ॥ चक्राग्रे ३ सर्वसिद्धिप्रदाय चक्राय नमः ॥ हसरैं हसकलरीं हसरौः
त्रिपुरांबा नित्या श्री पादु० ॥ एतस्माद्दक्षिणे हसौः बीजमुद्रा श्री पादु० ॥ ३ इच्छासिद्धि श्री पादु०

शक्तिदर्शिकायनमः॥अत्रसर्वसर्वप्रदायचक्रेबाणचापपरिष्कृतांतरालेत्रिपुरांबाश्री
चक्रनायिकाधिष्ठितेएताःकामेश्वर्याद्याअतिरहस्ययोगिन्यःसमुद्राइत्यादिमूलदेव्यैस
मर्पयेत्॥ह्सौःबीजमुद्रांप्रदर्शयेत्॥आत्मतत्वायस्वाहेतिसमानं॥८॥ततोबैंदवचक्रेमूल
मुच्चार्यश्रीमहात्रिपुरसुंदरीनित्याश्रीपादु०॥इतित्रिःसंपूज्यचक्रोपरिसर्वानंदमयबैंदवच
क्रायनमः॥मूलमुच्चार्यश्रीमहात्रिपुरसुंदरीचक्रनायिकाश्रीपादु०॥एतस्यादक्षिणेऐंयो
निमुद्राश्रीपादु०॥वामे३आत्रिखंडामोदसिद्धिश्रीपादु०॥शैवदर्शनायनमः॥यद्वानवचक्रे
श्वरे॥बौद्धंब्राह्मंतथासौरंशैवंवैष्णवमेवच॥शाक्तंवह्नंतुविज्ञेयंचक्रंषड्दर्शनात्मकं॥
रुद्रयामले॥चक्रास्त्रंबौद्धमेदंब्राह्मंवैबोऽस्राष्टरं॥बैंदवंशैवमेदंचमनुस्त्रंसौरमुच्यते
वैष्णवंहृद्दशारंतुमध्यंशाक्तिसमाश्रितं॥इत्युक्तस्थानेतत्तद्दर्शनपूजा॥अत्रसर्वानंदमये
चक्रेबैंदवेब्रह्मस्वरूपिणि॥परापरशक्तिमहात्रिपुरसुंदरीसमस्तचक्रनायिकाधिष्ठि
तेत्रैलोक्यमोहनसर्वाशापरिपूरकसर्वसंक्षोभणकारकसर्वसौभाग्यदायकसर्वार्थसाध

कसर्वरक्षाकरसर्वरोगहरसर्वसिद्धिप्रदचक्रसमन्वाधिष्ठितसमस्तप्रकटगुप्तगुप्ततरसंप्र
दायकुलकौलिनिगर्भरहस्यातिरहस्यसमस्तयोगिनीपरिवृतत्रिपुरात्रिपुरेशीत्रिपुरसुं
दरीत्रिपुरवासिनीत्रिपुराश्रीत्रिपुरमालिनीत्रिपुरासिद्धात्रिपुरांबातच्चक्रनायिकावंदित
चरणकमलश्रीमहात्रिपुरसुंदरीनित्यादेवासर्वचक्रेश्वरीसर्वमंत्रेश्वरीसर्वविद्येश्व
रीसर्वपीठेश्वरीसर्वकामेश्वरीसर्वतत्वेश्वरीसर्ववीरेश्वरीत्रैलोक्यमोहनीजगदुत्पत्तिमा
तृकासर्वचक्रमयीतच्चक्रनायिकाःसहितासमुद्राःसर्वसिद्धयःसवाहनाःसपरिवाराः
सर्वोपचारैर्महात्रिपुरसुंदरीपरापरस्यासपर्ययासंपूजितास्तर्पिताःसंतु॥इतिविशे
षार्घ्योदकाक्तकुसुमैःप्रधानदेव्यावामहस्तेसमर्पयेत्॥ततोनवमुद्राःप्रदर्शयेत्॥आ
त्मतत्वायस्वाहा॥क्लींविद्यातत्वायस्वाहा॥सौःशिवतत्वायस्वाहा॥इतित्रिरर्घोदके
नतर्पयेत्॥ततोगंधपुष्पदूर्वाक्षतमाल्यादीनिदत्वाऐंघंटांवादयन्मूलमुच्चार्य॥व
नस्पतिरसोत्पन्नोगंधाढ्योगंधसंयुतः॥आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां॥

इति धूपं दद्यात्॥ मूलमुच्चार्य॥ स्वप्रकाशो महादीपः सर्वत्र तिमिरापहः॥ सबाह्याभ्यंतरं ज्यो-
तिः दीपोयं प्रतिगृह्यतां॥ इति दीपं दद्यात्॥ ततो मूलमुच्चार्य महात्रिपुरसुंदर्यै नैवेद्यं क-
ल्पयामि॥ नम इति नैवेद्यं॥ ततो नित्यहोमं कुर्यात्॥ तद्यथा॥ पदि विन्यस्ते मूलं प्राणाय
स्वाहा॥ अपानाय स्वाहा॥ समानाय स्वाहा॥ उदानाय स्वाहा॥ व्यानाय स्वाहा॥ अङ्गेनाम-
कृति षट्कं ततः स्ववामे त्रिकोणं सवृत्तं चतुरस्रं कृत्वा ऐं ह्रीं श्रीं व्यापकमंडलाय नमः॥ अक्ष-
तपूर्णसलिलं स्थापयेत् तत्र गोजनं॥ त्रिधा पञ्चकृत्वा वर्णमन्त्रं दद्यात् बलिं ततः॥ ॐ ह्रीं सर्व-
विघ्नकृद्भ्यः सर्वभूतेभ्यो हुं स्वाहा इति सामान्यार्घोदकेन दत्वा तत्त्वमुद्रां प्रदर्शयेत्॥ ततो
बटुकादिभ्यो बलिं दद्यात्॥ ईशानवायुनिरृतिवह्निकोणे वृत्तत्रिकोणं वृत्तमंडलानि कृत्वा
वं बटुकाय नमः॥ यां योगिनीभ्यो नमः॥ क्षां क्षेत्रपालाय नमः॥ गां गणपतये नमः॥ इ-
ति संपूज्य तेषु स्वस्वपूरितपात्राणि निक्षिप्य बलिं दद्यात्॥ एह्येहि देवीपुत्र बटुकनाथ कपि-
लजटाभासुर त्रिनेत्र ज्वालामुख सर्वविघ्नान् नाशय नाशय सर्वोपचारसहितं बलिं गृह्ण

स्वाहा॥ इत्यनेन मंत्रेण बटुकाय बलिं दत्वा वामांगुष्ठानामायोगेन मुद्रां प्रदर्शयेत्॥ ऊ-
र्ध्वं ब्रह्मांडतो वा दिवि गगनतले भूतले निष्कले वा पाताले वानले वा पवनसलिलयोर्य-
त्र कुत्र स्थिता वा॥ क्षेत्रे पीठोपपीठादिषु च कृतपदा धूपदीपादिकांसैः प्रीता देव्यः सदा नः
शुभविधिबलिना पांतु वीरेंद्रवंद्याः॥ यां योगिनीभ्यः स्वाहा॥ सर्वयोगिनीभ्यो हुं फट् स्वाहा॥
इत्यनेन बलिं हरेत्॥ वामहस्तांगुष्ठतर्जनीमध्यमानामानामिकाभ्यां न्याकारेण मुद्रां प्रदर्शये-
त्॥ क्षां क्षीं क्षूं क्षैं क्षौं क्षः स्थानक्षेत्रपाल धूपादिसहितं बलिं गृह्ण गृह्ण स्वाहा॥ इत्यनेन क्षे-
त्रपालबलिं हरेत्॥ वामांगुष्ठतर्जनीसरलां कृत्वा मुद्रां प्रदर्शयेत्॥ गां गीं गूं गैं गौं गः ग-
णपतये वरद वरद सर्वजनं मे वशमानय बलिं गृह्ण गृह्ण स्वाहा इत्यनेन गणपतये ब-
लिं हरेत्॥ वामांगुष्ठमध्यमांगुली दंडवत् कृत्वा मुद्रां प्रदर्शयेत्॥ शैववैष्णवाद्यैरेत-
द्बलिचतुष्टयं कर्मकर्तव्यं॥ सर्वांति सर्वभूतबलिं वा तत्रैव बलिमधिरूप्य अदत्त्वा बटुका-
दीनां यः पूजयति चंडिकां॥ पूजा च विफला तस्य देवीशापः प्रजायते॥ ततो देव्यै आचम

नीयादिकं दत्वा सुवासितबलिं दद्यात्॥ ततश्चारात्रिकं दद्यात्॥ यथा कांस्यादिभाजने कुंकुमादिना
बालायाश्चक्रं विलिख्य तत्र कर्पूरवर्त्याघृतपूरितान् नवयोनिषु अष्टप्रदीपान् निधाय मध्येपि
ष्टकादिरचितमस्तकोपरि महादीपं संस्थापयेत्॥ श्रीं ह्रीं ऐं क्लीं ग्लौं ह्रीं श्रीं इति मंत्रेण चाभ्य
र्च्यतस्मात्रमस्तकांतं समुद्धृत्य नवधारं नीराजयेत्॥ तथा च ज्ञानार्णवे॥ आरात्रिकमतः कु
र्यात् सर्वकामार्थसिद्धये॥ सौवर्णे राजते कांस्ये स्वर्णे वा परमेश्वरि॥ कुंकुमेन लिखेद्यंत्रं नव
कोणं मनोहरं॥ चंद्ररूपं चरुं कृत्वा तन्मध्ये मस्तकेप्यथ॥ दीपमेकं विनिक्षिप्य वसुकोणेषु दी
पकान्॥ यवगोधूममुद्गादिरचितान् शर्करायुतान्॥ चक्रकाहितशोभाभिः शोभितान् घृत
पूरितान्॥ अनिलं त्वमहेशानि रत्नेभ्यर्थात ततः परं॥ श्रीबीजं च पराबीजं संलिख्य वरवर्णि
नी॥ गसौ वमपलाः पश्चादिंदुस्थाः क्रमतः प्रिये॥ वामकर्णसमायुक्तो नादबिंदुसमन्वितः॥ बी
जपंचकमेतत्तु पंचतत्वानि सुंदरि॥ पूर्वबीजं विलोमेन तदन्ते गौरीयं नवधा हरेत्॥ ततो मूलमु
च्चार्य समस्तचक्रचक्रेशीम्भमेदेयीनवात्मिके॥ आरात्रिकमिदं देवि गृहाण मम सिद्धये॥

ततः चक्रमुद्रां प्रदर्शयेत्॥ आरात्रिकमहादेवि चक्रमुद्राश्चवस्थिता॥ ततो विसर्जनं तिक्रम
समापयेदिति श्रीविद्या॥ ॥इति श्रीविद्या॥ ॥अथ प्रचंडचंडिकां वक्ष्ये सर्वकामफ
लप्रदां॥ यस्याः प्रसादमात्रेण सदाशिवो भवेन्नरः॥ अपुत्रो लभते पुत्रं दरिद्रो धनमाप्नु
यात्॥ कवित्वं च सुपांडित्यं लभते नात्र संशयः॥ तद्यथा विश्वसारे॥ लक्ष्मीलज्जां ततो मा
यां मात्रां द्वादशीकामपि॥ वज्रवैरोचनीयमायेफ हूं स्वाहयायुतं॥ अत्र लज्जापदं काम
बीजपरं॥ तथा च॥ अत्र लज्जापदे देवी कामबीजं वितन्यते॥ महाकालमतं प्रोक्तं मंत्रोद्धा
रं श्रृणु वरे॥ पूर्वमायापदे कश्चित्कामबीजं च पठ्यते॥ इत्यत्र पूर्वमायापदेति पाठे मा
यायाः पूर्वपदं लज्जाबीजं तस्मिन्निति स्मर्थः॥ तथा च॥ कामाद्यां याद्यवविद्यां वा माययाद्यां
वा जपेत्सुधीः॥ लक्ष्मीबीजं जपेद्विद्यां चतुर्वर्गफलप्रदां॥ अन्येषां मुनीनां च मते सर्वत्र
मायापदं कूर्चपरं तत्रैव वांतं वह्निसमायुक्तं रतिबिंदुविभूषितं॥ लक्ष्मीबीजमिति प्रो
क्तं सर्वकामार्थसिद्धिदं॥ वामाक्षिवह्निसंयुक्तं बिंदुनादविभूषितं॥ क्रियबीजं महेश्वा

निर्लज्जाबीजमुदाहृतं॥ईशानमूर्धसपूरादिबीजं सबिंदुकं नादबिंदुविभूषितं च॥सर्वास
र्थपरितः प्रकल्प्य मायां वदंती हमनी विलासां॥द्वादशस्वरवर्णस्यात्‌ नादबिंदुविभूषि
तं॥योऽसवंबीजमित्युक्तं सर्वकामविसृद्धये॥इति मंत्रस्य चतुर्बीजव्याख्यानात्‌ सर्वत्राम
यापदं कूर्चपरं॥अयं पक्षः समीचीनः॥अस्य पूजाप्रयोगः॥प्रातः कृत्यादिकं कृत्वा मंत्रा
चमनं कुर्यात्‌॥तद्यथा॥लज्जामायाकूर्चबीजैः स्त्रिभिः पीतांबु साधकः॥वाग्भवेनोहि
संमृज्य मायया भ्यां च द्विरुन्मृजेत्‌॥कूर्चेन क्षालयेत्पाणिमेभिर्मंत्रैश्च विमृसेत्‌॥श्रीमाया
कूर्चवाग्भामन्त्रिपुरा भगवर्णकैः॥कामकलां कुशाभ्यां च चक्षुर्नासाद्विकर्णयोः॥न
भि हृन्मस्तकं चांशौ स्पृष्ट्वा रांबुजं विन्यसेत्‌ हृरुणात्‌॥आचम्यैवं छिन्नमस्तां वसरान्तां प्रपद्य पते
ततः प्राणायामांतं कर्म विधाय बीजन्यासं कुर्यात्‌॥मंत्रबीजं ततः कुर्यात्‌ त्रैलोक्यवश
कारिणी॥श्रीबालात्रिपुरायोनिः प्रासादः प्रणवस्तथा॥कालीवध्वं कुरी कामकलाक
र्षिका के क्रमात्‌॥षोडशी मन्त्रवर्णैश्च प्रथमा द्वादशाक्षरी॥एभिर्बीजैर्मातृकार्णन्न्यस्वे

३६५

स्थाने बुविन्यसेत्‌॥एवा ब्रह्मस्वरूपा हि बीजषोढा प्रकीर्तिता॥अस्यां विन्यसनात्‌ सर्वे यत्र
देहा भवंति हि॥सर्वैश्वर्ययुतास्ते हि जीवन्मुक्ता दशायतः॥ततः ऋष्यादिन्यासं कुर्यात्‌॥त
द्यथा॥शिरसि भैरवऋषये नमः॥मुखे सम्राट्‌छंदसे नमः॥हृदि प्रचंडचंडिकायै देव
तायै नमः॥गुह्ये हुं बीजाय नमः॥पादयोः स्वाहाशक्तये नमः॥ततः करांगन्यासौ॥आं
खड्गाय स्वाहेति कनीयसोः॥ईं सुखड्गाय शिरसे स्वाहा॥पवित्रांगुलयोः हुं श्री वज्राय
शिखायै स्वाहा मध्यमयोः॥ऐं पाशाय कवचाय स्वाहा तर्जन्योः॥ह्रीं अंकुशाय नेत्रत्रया
य स्वाहा अंगुष्ठयोः॥अः सुरक्षाय फट्‌ स्वाहा करतलपृष्ठयोः॥एवं हृदयादिषु॥तदुक्तं
भैरवतंत्रे॥ॐकारं स्वर्णमाकारं बिंदुलांछितमस्तकं॥खड्गाय हृदयायेति स्वाहा युक्तं
कनियसि॥ईकारं च ततो देवी चंद्रकोटिसमप्रभं॥सुखड्गाय ततो वाच्यं बिंदुलांछितम
स्तकं॥श्रीवज्राय ततो युक्तं शिखायै च ततः परं॥स्वाहांतं मध्यमायां च विन्यसेत्तदनंत
रं॥मात्रा द्वादशिकापाशं विन्यसेच्च ततः परं॥स्वाहांतं विन्यसेन्मंत्रं तर्जन्यां तदनंतरं

३६६

ईकारं च ततो देवीं चांकुशं तदनंतरं॥ बीजत्रयाय स्वाहांतमंगुष्ठे करयोर्द्वयोः॥ अनका
रं च विसर्गांतं स्वरद्वादशसंयुतं॥ अस्वरद्वाय संयुक्तं अस्त्राय इति ततः परं॥ षडंग
मायुक्तं विन्यसेत् करयोर्द्वयोः॥ हृदि मूर्ध्नि शिखायां तु कवचे नेत्रमंडले॥ यावदस्त्रं
च दिक्षु विदिक्षु च यथाक्रमं॥ ततो मूलेन मस्तकादिपादपर्यंतं पादादिमस्तकपर्यंतं
वारत्रयं न्यसेत्॥ ततो ध्यानं॥ स्वनाभौ नीरजं ध्यायेत् अर्कं विकसितं सितं॥ तत्पद्मको
शमध्ये तु मंडलं चंडरोचिषः॥ जवाकुसुमसंकाशं रक्तबंधूकसन्निभं॥ रजःसत्वतमोरे
खायोनिमंडलमंडितं॥ मध्ये तु तां महादेवीं सूर्यकोटिसमप्रभां॥ छिन्नमस्तां करे वामे
धारयंतीं स्वमस्तकं॥ प्रसारितमुखीं भीमां लेलिहानोग्रजिह्विकां॥ पिबंतीं रौधिरीं धारां
निजकंठविनिर्गतां॥ विकीर्णकेशपाशांश्च नानापुष्पसमन्वितां॥ दक्षिणे च करे क
र्त्रीं मुंडमालाविभूषितां॥ दिगंबरीं महाघोरां प्रत्यालीढपदस्थितां॥ अस्थिमालाधरां
देवीं नागयज्ञोपवीतिनीं॥ रतिकामोपविष्टां च सदा ध्यायंति मंत्रिणः॥ सदा षोडशवा

र्षीयां पीनोन्नतपयोधरां॥ विपरीतरतासक्तौ ध्यायेद्रतिमनोभवौ॥ डाकिनीवर्णिनीं
युक्तां वामदक्षिणयोगतः॥ देवीगलोच्छलद्रक्तधारापानं प्रकुर्वतीं॥ वर्णिनीं लोहिता
भास्यां मुक्तकेशीं दिगंबरां॥ कपालकर्तृकाहस्तां वामदक्षिणयोगतः॥ नागयज्ञोपवीता
ढ्यां ज्वलत्तेजोमयीमिव॥ प्रत्यालीढपदां दिव्यां मुक्तकेशीं दिगंबरां॥ सदा द्वादशवार्षिकीं
अस्थिमालाविभूषितां॥ डाकिनीं वामपार्श्वे तु कल्पसूर्यानलोपमां॥ विद्युज्जटां त्रिनयनां
दंतपंक्तिबलाकिनीं॥ दंष्ट्राकरालवदनां पीनोन्नतपयोधरां॥ महादेवीं महाघोरां मुक्त
केशीं दिगंबरां॥ लेलिहानमहाजिह्वां मुंडमालाविभूषितां॥ कपालकर्तृकाहस्तां वाम
दक्षिणयोगतः॥ देवीगलोच्छलद्रक्तधारापानं प्रकुर्वतीं॥ करस्थितकपालेन भीषणे
नातिभीषणां॥ आस्यां निधेयमानां तां ध्यायेद्देवीं विचक्षणः॥ पिबंतीमिति तेन मुखेने
रीषः॥ तथा च स्वमस्तकं सखर्परं रक्तधारा निपूरितं॥ जलजिह्वं महाभीमं धृतं वाम
भुजे तया॥ इति भैरवतंत्रे॥ एवं ध्यात्वा मानसैः संपूज्य तादिली वत्रां स्वस्थापनं कुर्यात्

अस्याः पूजायंत्रं ॥ त्रिकोणं बिंबस्य दादौ तन्मध्ये मंडलद्वयं ॥ तन्मध्ये विलिखेद्योनिद्वा र
त्रयसमन्वितं ॥ बहिरष्टदलं पद्मं मध्ये चियल्लिखेत्पुनः ॥ कूर्चबीजं लिखेन्मध्ये त्रिकोणे
षट्समन्वितं ॥ यद्वा ॥ एतद्ध्यानोक्तयंत्रं वा ततः पीठपूजा ॥ आधारशक्तये ॥ अनंताय ॥
पृं पृथिव्यै ॥ रत्नद्वीपाय ॥ कल्पवृक्षाय ॥ तदधः स्वर्णसिंहासनाय ॥ आनंदकंदाय ॥ संविन्ना
लाय ॥ सर्वतत्वात्मकपद्मासनाय ॥ सं सत्वाय ॥ रं रजसे ॥ तं तमसे ॥ आं आत्मने ॥ पं परमात्म
ने ॥ ह्रीं ज्ञानात्मने ॥ पद्ममध्ये रतिकामाभ्यां रतिकामोपरि स्थितायै वैरोचनीये देहि एहि एहि स्फुर स्फुर
मम सिद्धिं देहि मम शत्रून् मारय मारय करालिके हुं फट् स्वाहा ॥ इति पीठमंत्रः ॥ सर्वत्र प्रणवा
दिनमोंतेन पूजयेत् ॥ ततः पूर्ववद्ध्यात्वा मूलमंत्रेण कल्पितेन मूर्तावाहयेत् ॥ यथा सर्वसिद्धि
वर्णनीये सर्वसिद्धिदायिनीये वज्रवैरोचनीये इहावह २ पुनः [illegible] इह तिष्ठ २ इह
संनिधेहि २ इह सन्निरुध्यस्व इत्यनेनावाहयेत् ॥ आं ह्रीं क्रौं हंसः इत्यनेन प्राणप्रतिष्ठां कृत्वा आं
खड्गाय हृदयाय नमः ॥ इत्यादि षडंगानि बिंबस्य यथाशक्ति पूजां कृत्वा बलिं दद्यात् ॥ यथा

वैरोचनीये देहि एहि स्फुर स्फुर २ इमं बलिं मम सिद्धिं देहि कालिके हुं फट् स्वाहा ॥ इत्यनेन मंत्रेण
ततो देव्या दक्षिणे ॐ वर्णिन्यै नमः ॥ वामे ॐ डाकिन्यै नमः ॥ देव्यग्रे षडंगं संपूज्य दक्षिणे ॐ शं
खनिधये नमः ॥ वामे ॐ पद्मनिधये नमः ॥ पूर्वादिदिक्षु लक्ष्मीलक्ष्मीं वाणीं च पूजयेत् ॥ विदि
क्षु ब्रह्मा विष्णु रुद्र ईश्वरान् मध्ये सदाशिवं प्रणवादिनमोंतेन पूजयेत् ॥ ततः पंचपुष्पांज
लिं दत्वा आवरणपूजामारभेत् ॥ अग्नीशासुरवायव्यमध्ये दिक्षु च आं खड्गाय स्वाहा हृदया
य नमः ॥ इत्यादि षडंगानि संपूज्य अष्टपत्रेषु पूर्वादिक्रमेण ॐ कालिन्यै स्वाहा ॥ ॐ वर्णिन्यै स्वाहा ॥
ॐ डाकिन्यै स्वाहा ॥ ॐ महाभैरव्यै स्वाहा ॥ ॐ भैरव्यै स्वाहा ॥ ॐ इंद्राण्यै स्वाहा ॥ ॐ पिंगलाक्ष्यै स्वाहा ॥
ॐ संहारिण्यै स्वाहा ॥ मध्ये हूं हूं फट् नमः स्वाहा ॥ देव्या दक्षिणे ॐ समाहृष्टं दसे नमः ॥ देव्या उत्तरे
ॐ वर्णिन्यै नमः ॥ पुनर्दक्षिणे ॐ वीतरागिण्यै नमः ॥ पत्राग्रेषु पूर्वादिक्रमेण ब्राह्मी माहेश्वरी
कौमारी वैष्णवी इंद्राणी चामुंडा प्रणवादिनमोंतेन पूजयेत् ॥ ततश्चतुर्दिक्षु हूं करालाय नमः ॥
हूं विकरालाय नमः ॥ हूं अतिकरालाय नमः ॥ हूं महाकरालाय नमः ॥ ततो धूपादि विसर्जनांतं

कर्म्मसमापयेत्॥ अस्य पुरश्चरणं लक्षजपः॥ सिद्धविद्यात्वात्॥ मंत्रांतरं॥ भुवनेशी
कामबीजं च कूर्चबीजं च वाग्भवं॥ भुवनेश्वरी कूर्चबीजं वाग्भवं तदनंतरं॥ वज्रवैरो
चनीये हूं फट् स्वाहा च ततः परं॥ अस्य पूजा प्रातःकृत्यादि॥ न्यासपूजादिकं सर्वं षोड
शासुंदरीवद्बोध्यं॥ हृल्लेखा मारनं कूर्चं वाग्भवं कूर्चमेव च॥ मंत्रांतं छिन्नमस्ता या महा
विद्या प्रकीर्त्तिता॥ अस्यापि सदृशो विद्या ज्ञेय स्वप्नेव बुध्यते॥ बद्धुर्लोयं मनुःसाक्षान्मोक्षदो
नात्र संशयः॥ अस्या ध्यानमहं वक्ष्ये शृणुष्व कमलानने॥ प्रत्यालीढपदां सदैव दधतीं
छिन्नं शिरः कर्त्रिकां दिग्वस्त्रां स्वकबंधशोणितसुधाधारां पिबंतीं मुदा॥ नागाबद्धशिरो
मणिं त्रिनयनां हृद्युत्पलालंकृतां रत्यासक्तमनोभवोपरि दृढां ध्यायेज्जवासन्निभां॥१॥
दक्षे चातिसिता विमुक्तचिकुरा कर्त्रीं तथा खर्परं हस्ताभ्यां दधती रजोगुणभवा नाम्नापि
सा वर्णिनी॥ देव्याश्छिन्नकबंधतः पतदसृग्धारां पिबंती मुदा नागाबद्धशिरोमणिर्मनु
विदा ध्येया तथा सा सुरैः॥२॥ वामे कृष्णतनुस्तथैव दधती खड्गं तथा खर्परं प्रत्यालीढ

पदा कबंधविगलद्रक्तं पिबंती मुदा॥ शक्तिः सापि मुदा परा च गणवती नाम्ना परा डाकिनी
३॥ अस्याः पूजादिकं सर्वं षोडशीवद्बोध्यं॥ तारं लज्जाद्वयं वज्रवैरोचनीये हूं फट् स्वाहा॥
मंत्रांतरं॥ वियत्सत्रयुतं बिंदुनादयुक्तं तथा प्रिये॥ एकाक्षरी महाविद्या त्रैलोक्यक्षोभका
रिणी॥ स्वतंत्रे दीपिकाकारः॥ ठद्वंद्वे या महाविद्या त्रैलोक्यमोहकारिणी॥ तारायं तालयसेवा
चतुर्वर्गफलप्रदा॥ वज्रवैरोचनीये कूर्चयुग्मं सफट् ठठः॥ तारा द्येया महाविद्या सर्वत
नोपहारिणी॥ त्रैलोक्याकर्षिणी विद्या चतुर्वर्गफलप्रदा॥ एतेषां ध्यानपूजादिकं सर्वं षो
डशीवद्बोध्यं॥ इदानीं षोडशी विद्या प्रशंसामाह॥ तथा सर्वप्रयत्नेन सर्वोपास्या च षोड
शी॥ लक्ष्मीबीजादिका सैव सर्वैश्वर्यप्रदायिनी॥ लज्जाद्या स्वर्गभूनागयोषिदाकर्षिणी प
रा॥ कूर्चाद्या सर्वज्ञं दुर्नाम महापातकनाशिनी॥ वाग्भवाद्या यदा देवी वागीशत्वप्रदा
यिनी॥ एवं तु षोडशी विद्या वेद्या सप्तदशाक्षरी॥ श्रीबीजसंपुटिता सा च लक्ष्मीवृद्धिकरी
सदा॥ लज्जया संपुटिता विद्या त्रैलोक्याकर्षिणी परा॥ कूर्चेन संपुटिता विद्या सर्वपापापहारि

णी॥ वाग्बीजपुटिता चैषा कवित्वादिप्रदायिनी॥ चतुर्विंशतिविद्यैषा प्रिये सप्तदशाक्षरी
तारा द्या बोऽहशी चाप्यासन्नेसप्तदशाक्षरी॥ एषा विद्या महाविद्या भुक्तिमुक्तिकरी सदा॥
कमला भुवनेशानी कूर्चबीजं सरस्वती॥ वज्रवैरोचनीये च पूर्वबीजानि चोद्धरेत्॥ फ
ट्स्वाहांतु महाविद्या पंचविंशाक्षरी परा॥ तारा चैकोनविंशार्णा ब्रह्मविद्यास्वरूपिणी॥
एते विद्ये नमे देवि भुक्तिमुक्तिप्रदे मते॥ लज्जादि पुटिता पूर्वा रंभाचंद्राक्षरी भवेत्॥
चतुर्धा च महाविद्या चतुर्वर्गफलप्रदा॥ प्रणवाद्या यदा चैषा भोगमोक्षकरी सदा॥ वि
द्यांतरं प्रवक्ष्यामि सावधानावधारय॥ हृल्लेखा कूर्च वाग्बीजे वज्रवैरोचनीये हूं॥ भ
ल्लं स्वाहा महाविद्या चतुर्दशाक्षरी मता॥ सर्वैश्वर्यप्रदा चैषा सर्वमोहनकारिणी॥ भुवने
शीत्रितयं च वाग्बीजं प्रणवं ततः॥ वज्रवैरोचनीये च फट् स्वाहा च तथापरा॥ चतुर्द
शाक्षरी चैषा चतुर्वर्गफलप्रदा॥ एषा विद्या महाविद्या जन्ममृत्युविनाशिनी॥ रमा काम
स्तथा लज्जा वाग्भवं वज्रवैचैपदं॥ रोचनीये लज्जा हूं हमल्लं स्वाहासमन्वितं॥ इयं साबीऽ

शी प्री क्रा सर्वकामफलप्रदा॥ कथिता सकला विद्याः सारात्सारतराः शुभाः॥ आसां ऋषि
र्भैरवो हं मा भ्रान्त क्रोधभूपतिः॥ सम्राट्छंदो देवता च छिन्नमस्ता प्रकीर्तिता॥ बदूदीर्घ
भाजस्वरेणैव प्रणवाद्येन सुंदरि॥ खड्गेन च ठठांतानि षडंगानि प्रकल्पयेत्॥ नादिदोषा
दिकं चासां नाः सुसिद्धाः सुरासुरैः॥ सकलेषु च वर्णेषु सकलेष्वाश्रमेषु च॥ अंतिमेष
वर्णेषु भुक्तिमुक्तिप्रदायिनी॥ प्रणवाद्या स्वयं विद्याः शंकरादीन संमोहिता॥ अस्यां चैव
विशेषो यं यो विद्यां समुपासयेत्॥ डाकिनी सा भवत्येव डाकिनीतिः प्रजायते॥ पतिहीना
पुत्रहीना यथास्या सिद्धयोगिनी॥ इति ते कथितं तत्त्वं रहस्यमखिलं प्रिये॥ अतिस्नेह
रंगेन च भ्रान्ताऽसि स्मितेप्रिये॥ एतासां तु ध्यानपूजादिकं सर्वं षोडशाक्षरीवत्कार्यं॥ ॥
इति छिन्नमस्ता प्रकरणं॥ ॥ अथ श्यामाप्रकरणं॥ ॥ तत्र भैरवीतंत्रे॥ अथ वक्ष्ये
महाविद्याः कालिकायास्तु दुर्लभाः॥ यासां विज्ञानमात्रेण जीवन्मुक्तो भवेन्नरः॥ नात्र चिं
ता विशुद्धिः स्यान्नारिमित्रादि लक्षणं॥ न वा प्रयास बाहुल्यं समयासमयादिकं॥ विनाय

थाचवाक्स्तंभकायन्केशाकर्षणं तथा। यएनं चिंतयेन्मंत्रं सर्वकार्यसमृद्धिदं। तस्य हस्ते सदे
वास्ति सर्वसिद्धिर्नसंशयः। गद्यपद्यमयी वाणी सभायां तस्य जायते। तस्य दर्शनमा
त्रेण वादिनो निष्प्रभतां गताः। एतानोपि सदासत्वं जनं तेकिं पदिजनाः। दिवारात्रिप्र
स्पर्यं चैव शोकदुःखं न भवेत्। अंते च लभते देव्या गणत्वं दुर्लभं नरः। तत्र कालीतं
त्रे। कामत्रयं वह्निसंस्थं रतिबिंदुसमन्वितं। कूर्चयुग्मं तथा लज्जायुगलं तदनंतरं। द
क्षिणे कालिके चेति पूर्वबीजानि चोद्धरेत्। अंते वह्निवधूं दद्याद्विद्या राज्ञी प्रकीर्ति
ता। अस्याः पूजाप्रयोगः। तथाचमनं। कालिकाजिह्विनिः पीत्वा कालादित्रिरूप
स्पृशेत्। द्वाभ्यां ओष्ठौ द्विरुन्मृज्य चैकेन क्षालयेत्करं। मुखघ्राणे दृशः श्रोत्रनाभ्युरस्कं
भुजौ स्पृशेत्। आचम्यैवं नवेत्काली वसरात्तां प्रपश्यति। तद्यथा। क्रीं क्रीं क्रीं इति त्रि
राचामेत्। ॐ काल्यै नमः। ॐ कपालिन्यै नमः। इति द्विरुन्मृज्य। ॐ कुल्लायै नमः। इति क
रं क्षालयेत्। ॐ कुरुकुल्लायै नमः। इति मुखं। ॐ विरोधिन्यै नमः इति दक्षनासिकायां

ॐ विप्रचित्तायै नमः इति वामनासिकायां। ॐ उग्रायै नमः। ॐ उग्रप्रभायै नमः। इति ने
त्रयोः। ॐ दीप्तायै नमः। ॐ नीलायै नमः इति श्रोत्रयोः। ॐ घनायै नमः इति नाभौ। ॐ बलाका
यै नमः इति वक्षसि। ॐ विप्रचित्तायै नमः इति शिरसि। ॐ मुद्रायै नमः ॐ मितायै नमः अं
सयोः। इति मंत्राचमनं। ततः प्रातः कृत्यादिस्नानसंध्यांतं कर्म विधाय मायाबीजेन यथा
विधि प्राणायामं कुर्यात्। ततः ऋष्यादिन्यासः। अस्य मंत्रस्य भैरव ऋषिरुष्णिक्छं
दो दक्षिणकालीदेवता क्रीं बीजं हूं शक्तिः पुरुषार्थसिद्ध्यर्थे विनियोगः। तथा च निबंधे
भैरवोऽस्य ऋषिः प्रोक्त उष्णिक्छंद उदाहृतं। देवता कालिका प्रोक्ता लज्जाबीजं तु बीज
कं। शक्तिस्तु कूर्चबीजं स्यादनिरुद्धसरस्वती। कीलकं चाद्यबीजं स्याच्चतुर्वर्गफलप्र
दं। इति तद्यथा। शिरसि भैरवऋषये नमः। मुखे उष्णिक्छंदसे नमः। हृदि अनिरुद्ध
सरस्वत्यै दक्षिणकालिदेवतायै नमः। गुह्ये ह्रीं बीजाय नमः। पादयोः नमः। सर्वांगे
क्लीं कीलकाय नमः। ततः करांगन्यासौ। तदुक्तं कालीतंत्रे। अंगन्यासः करन्यासो यथा

वदन्निधीयते॥षड्दीर्घभाजाबीजेनप्रणवाद्येनकल्पयेत्॥तेनमायायाःषडंगन्यासः॥
वीरतंत्रे॥दीर्घषट्कयुताद्येनप्रणवाद्येनकल्पयेदितिवा॥तद्यथा॥ॐह्रांअंगुष्ठाभ्यांन
मः॥ॐह्रींतर्जनीभ्यांनमः॥इत्यादि॥ॐह्रांहृदयायनमः इत्यादि॥ॐक्रांअंगुष्ठाभ्यांनमः
ॐक्रींतर्जनीभ्यांस्वाहा॥इत्यादि॥ततोवर्णन्यासः॥अंआंइंईंउंऊंऋंॠंऌंॡंनमइतिहृ
दये॥एंऐंओंऔंअंअःकंखंगंघंङंनमइतिदक्षबाहौ॥चंछंजंझंञंटंठंडंढंनमोवामबाहौ
णंतंथंदंधंनंपंफंबंभंदक्षपादे॥मंयंरंलंवंशंषंसंहंळंक्षंनमोवामपादे॥विरूपाक्ष
मतेसबिंदुरेवन्यासः॥यथावीरतंत्रे॥अंआंइंईंउंऊंऋंॠंऌंॡंवैहृदयेन्यसेदिति
कालीतंत्रेपुनर्निर्बिंदुः॥अआइईउऊऋॠऌॡवैहृदयंस्पृशेदित्याद्यपि च॥अथ
षोढान्यासस्तंत्रांतरे॥विन्यसेन्मातृकांपूर्वंन्यासोयंप्रथमोमतः॥श्रियासंपु
टितंवर्णैर्वर्णैःसंपुटितांश्रियं॥एवंक्रमेणविन्यस्यद्वितीयोयंसमीरितः॥कामसंपुटि
तांवर्णांवर्णैःसंपुटितंचतं॥विन्यसेन्मातृकामार्गात्तृतीयोयंसमीरितः॥वर्णैर्या

पुटितांवर्णैः श्रियासंपुटितांह्रियं॥पूर्ववद्विन्यसेन्मंत्रीन्यासस्तुर्यउदाहृतः॥पुरस्वरं त
समारूढंलक्ष्माद्ध्रींइंदुनघोद्यं॥शारांकशाकलाबद्धंकामराक्रपदेस्थितं॥मूलसंपुटितंह
ल्लातत्तत्पुरंचमन्वंतथा॥विन्यसेद्व्युत्क्रमार्गेणन्यासोयंपंचमोभवेत्॥अनुलोमाभ्यांवि
पिस्थानेषुयोन्यसेत्॥मूलंविन्यस्यमेधावीमूलमष्टोत्तरंशतं॥मंत्रंजप्त्वाव्यापयेन्न्या
सः षष्ठोयंसमीरितइति॥ ॥अथषोढान्यासः॥ ॥तदुक्तंवीरतंत्रे॥केवलांमातृ
कांकृत्वामातृकांतारसंपुटां॥मातृकापुटितंतारंन्यसेत्साधकसत्तमः॥श्रीबीजपुटि
तांतांतुमातृकापुटितंतुतत्॥कामेनपुटितांदेवींशक्तिंतत्संपुटांन्यसेत्॥ह्रींहंसःपुनर्न्य
स्ताक्रूरूल्लल्हंचपूर्ववत्॥मूलेनपुटितांदेवींतत्पुटंमंत्रमेवच॥अनुलोमविलोमेन
न्यस्त्वामंत्रंयथाविधि॥मूलेनाष्टशतंकुर्यात्व्यापकंतदनंतरं॥तद्यथा॥श्रींअंश्रीं
एवंतथैवमातृकापुटितंमातृकांतत्पुटितंकामं॥एवंशक्तिपुटितांतत्पुटितांशक्तिं
न्यसेत्॥तथाह्रींहंसःपुटितांमातृकांमातृकापुटितंह्रींहंसः॥एवंरूंस्लंल्हंपुनरनु

लोमविलोमेनकेवलंमंत्रेणाद्रकास्थानेस्वस्वन्यूहोत्तरशतेनव्यापकंकुर्यात्॥ एतन्न्यास
स्ताराया अपिकार्यं॥ इतिगुह्येन दुर्गायाअंगषोढाप्रकीर्तिता॥ तारयोः कालिकायाश्च
न्युक्ताश्चतथापरा॥ एतस्मिन्न्यासवज्रेसर्वपापंप्रणश्यति॥ ततस्तत्त्वन्यासः॥ तद्यथा॥
मूलंत्रिखंडंविधायप्रथमखंडांते ॐ आत्मतत्त्वायस्वाहेति॥ पादादिनाभिपर्यंतं द्वितीय
खंडांते ॐ विद्यातत्त्वायस्वाहा इतिनाभ्यादिहृदयांतं॥ तृतीयखंडांते ॐ शिवतत्त्वायस्वाहा
इतिहृदयादिशिरःपर्यंतं॥ तदुक्तंस्वतंत्रे॥ मूलविद्यांत्रिखंडांते प्रणवाद्यैर्यथाविधि॥
आत्मविद्याशिवैस्तत्वैस्तत्वन्यासंसमाचरेत्॥ ॥अथबीजन्यासः॥ तद्यथा॥ आर
घबीजंब्रह्मरंध्रे द्वितीयंबीजंभ्रूमध्ये तृतीयंबीजंनाभौ चतुर्थंबीजंललाटे पंचमंबीजंगु
ह्ये षष्ठंबीजंवक्त्रे सप्तमंबीजंसर्वांगे॥ तदुक्तंकुमारीकल्पे॥ ब्रह्मरंध्रे भ्रुवोर्मध्ये ललाटेना
भिदेशके॥ गुह्ये वक्त्रे च सर्वांगे सप्तबीजंक्रमान्न्यसेत्॥ एतन्न्यासत्रयंकामंततोमूलेनस
प्तव्यापकंकृत्वायथाविधिमुद्रांप्रदर्श्यदेवींध्यायेत्॥ तद्यथाकालीतंत्रे॥ करालवदनां

380

घोरांमुक्तकेशींचतुर्भुजां॥ कालिकांदक्षिणांदिव्यांमुंडमालाविभूषितां॥ सद्यश्छिन्नशिरःखड्ग
वामोर्ध्वाधःकरांबुजां॥ अभयंवरदंचैवदक्षिणाधोर्ध्वपाणिकां॥ महामेघप्रभांश्यामांतथा
चैवदिगंबरां॥ कंठावसक्तमुंडालिगलद्रुधिरचर्चितां॥ कर्णावतंसतानीतशवयुग्मभ
यानकां॥ बालार्कमंडलाकारनेत्रत्रयविभूषितां॥ घोरदंष्ट्रांकरालास्यांपीनोन्नतपयो
धरां॥ शवानांकरसंघातैःकृतकांचींहसन्मुखीं॥ सृक्कद्वयगलद्रक्तधाराविस्फुरिताननां॥
घोररावांमहारौद्रींश्मशानालयवासिनीं॥ दंतांदक्षिणव्यापिमुक्तालंबितकचोच्चयां॥
शवरूपमहादेवहृदयोपरिसंस्थितां॥ शिवाभिर्घोररावाभिश्चतुर्दिक्षुसमन्वितां॥ सुख
प्रसन्नवदनांस्मेराननसरोरुहां॥ एवंसंचिंतयेत्कालींश्मशानालयवासिनीं॥ कुमारीक
ल्पे॥ एवंदेहमयेपीठेचिंतयेदिष्टदेवतां॥ घोरदंष्ट्रांकरालास्यांलज्जिकांचतुर्भुजामित्या
दि॥ शवयुग्मेति॥ घोरबालायतंसेतिप्रकर्णपूरेतिच॥ शाकुंतपक्षसंयुक्तेवामकर्णवि
भूषणामिति॥ विगतासुकिशोराभ्यांकृतकर्णावतंसिनीमिति॥ दर्शनातन्वयरूपमेव

381

ानं॥ इति ध्यात्वा मानसैः संपूज्य अर्घस्थापनं कुर्यात्॥ यथास्व। वामभूमौ कूं गर्भं विलिख्य
र्घपात्रं संस्थाप्य मूलेन मनुना कुंभजलादिना वारिणमापूर्य हृदयादि हृतादि निक्षिप्य॥ ॐ ह्रां हृद
ायनमः॥ ॐ ह्रीं शिरसे स्वाहा॥ ॐ ह्रूं शिखायै वौषट्॥ ॐ ह्रैं कवचाय हुमिति॥ अग्नीशा
सुरवायव्येषु अग्ने ॐ ह्रौं नेत्रत्रयाय वौषट्। चतुर्दिक्षु ॐ ह्रः अस्त्राय फट्॥ तदुपरि मत्स्यमु
द्राणाच्छाद्य तदुपरि मूलमंत्रं दशधा जप्त्वा धेनुमुद्रयामृतीकृत्य अस्त्रेण संरक्ष्य तिनायो
भिमुद्रैः प्रदर्श्य तज्जलं किंचित्प्रोक्षणीपात्रे निक्षिप्य मूलेन तेनोदकेनात्मानं पूजोपकरणं
आत्मसपीठपूजामारभेत्॥ अस्याः पूजायंत्रं॥ आदौ बीजं भुवनेश्वरी च विलिख्य तत
त्रिकोणं तद्बाह्ये त्रिकोणं चतुष्टयं यंत्रम् अष्टदलं चतुर्द्वारात्मकं भूगृहं॥ एवं यंत्रं विलिखेत्
याच॥ रूपामादहस्वे त्रिकोणं विलिखेदादौ त्रिकोणं तद्बहिर्न्यसेत्॥ ततस्त्रिकोणमालि
मनयकोणं ततो न्यसेत्॥ वह्निकोणं तं कुर्यात् नयकोणं ततः परं॥ ततो वृत्तं समालिख्याज
ेदष्टदलं ततः॥ पुनर्वृत्तं च तद्द्वारं चतुरस्रात्मकं गृहं॥ कुमारीकल्पे॥ पीठपूजां ततः कुर्या

दाधारशक्तिपूर्वकं॥ प्रकृतिं कमठं चैव शेषं पृथ्वीं तथैव च॥ सुधांबुधिं मणिद्वीपं चिंता
मणिगृहं तथा॥ श्मशानं पारिजातं च तन्मूले रत्नवेदिकां॥ तस्योपरि मणेः पीठं न्यसेत्साध
कसत्तमः॥ चतुर्दिक्षु महन्तं देवान् शिवांश्च शवरूपकान्॥ धर्मादिधाय्येत्यादि ह्रीं ज्ञाना
त्मने नमः॥ इत्यंतं संपूज्य केसरेषु पूर्वादितः इच्छाज्ञाना क्रिया कामिनी कामदायिनी रतिप्रि
या आनंदा मध्ये चैव मनोन्मनी॥ सर्वत्र प्रणवादि नमोंतेन पूजयेत्॥ तदुपरि ह्रीं सदा
शिवमहाप्रेतपद्मासनाय नमः॥ ततः पुनर्ध्यात्वा पुष्पांजलावानीय मूलमंत्रकल्पितमू
र्त्तावावाहयेत्॥ ॐ देवेशि भक्तिसुलभे परिवारसमन्विते। यावत्त्वां पूजयिष्यामि ताव
त्त्वं सुस्थिरा भव॥ ततो मूलमुच्चार्य अमुकी देवी इहावह इह तिष्ठ इह संनिधेहि इह
सन्निरुध्यस्व ततोकुमित्यवगुंठ्य अंगमंत्रैः सकलीकृत्य धेनुमुद्रयामृतीकृत्य परमीक
रणमुद्रया परमीकृत्य भूतिनी आकर्षिणी योनिमुद्राः प्रदर्श्य प्राणप्रतिष्ठां विधाय मूले
न पाद्यादिभिः पूजयेत्॥ मूलमुच्चार्य अमुकदेव्यै एतत्पाद्यं नमः॥ एवं हृदयं स्वाहा इदमा

चमनीयं स्वाहा एष चंदनगंधो नमः॥ एतानि पुष्पाणि वौषट् ततो मूलेन पंचपुष्पांजलिं द
त्वा धूपदीपौ दद्यात्॥ तद्यथा॥ ॐ वनस्पतीत्यादिमंत्रेण मूलं चोच्चार्य एष धूपो नमः॥ दीपमंत्र
स्तु॥ ॐ सुप्रकाशो महादीपः सर्वत्र तिमिरापहः॥ सबाह्याभ्यंतरं ज्योतिर्दीपोयं प्रतिगृह्यतां
मूलमुच्चार्य एष दीपो नमः॥ ततो घंटां पूजयेत्॥ ॐ जयध्वनिमंत्रमातः स्वाहेति घंटां वाद
यन् नीचैर्धूपं दत्वा दृष्टिपर्यंतं दीपं दद्यात्॥ ततो मूलेन पुष्पांजलित्रयं दत्वा यथोपपन्नं
नैवेद्यं दद्यात्॥ ततः आवरणपूजां कुर्यात्॥ श्री अमुकदेवी आवरणं ते पूजयामीति आ
ज्ञां गृहीत्वा केसरेषु आग्निकोणे ॐ ह्रां हृदयाय नमः॥ ईशाने ॐ ह्रीं शिरसे स्वाहा॥ नैरृते
ॐ ह्रूं शिखायै वषट्॥ वायव्ये ॐ ह्रैं कवचाय हुं॥ अग्रये ह्रौं नेत्रत्रयाय वौषट्॥ चतुर्दिक्षु ॐ
ह्रः अस्त्राय फट्॥ ततो बहिः षट्कोणे ॐ काल्यै नमः॥ एवं कपालिन्यै॥ कुल्लायै॥ कुरुकुल्ला
यै॥ विप्रचित्तायै॥ विरोधिन्यै॥ उग्रप्रभायै॥ दीप्तायै इत्यंतं न्यसेत्॥ नीलायै इत्यंतं न्यसेत्
बलाकायै द्वितीयत्र्यस्रे॥ मात्रायै मुद्रायै मितायै इति तृतीयत्र्यस्रे॥ सर्वाः श्यामा असिकरा मुं

डमालाविभूषणाः॥ तर्जनीं वामहस्तेन धारयंत्यः शुचिस्मिताः॥ दिगंबरा हसन्मुख्यः स्वस्व
भूषणभूषिताः॥ इति ध्यात्वा प्रणवादिनमोंतेन पूजयेत्॥ ततोष्टपत्रेषु पूर्वादिक्रमेण ॐ
ब्राह्म्यै नमः॥ ॐ नारायण्यै नमः॥ ॐ माहेश्वर्यै नमः॥ ॐ चामुंडायै नमः॥ ॐ कौमार्यै नमः॥ ॐ अ
पराजितायै नमः॥ ॐ वाराह्यै नमः॥ ॐ नारसिंह्यै नमः॥ एता गंधादिभिः पूजयेत्॥ मूलेन पुष्पां
जलिं दद्यात्॥ ततः पाद्यादिना महाकालं पूजयेत्॥ तथा च कुमारीकल्पे॥ देव्यास्तु दक्षिणे भा
गे महाकालं प्रपूजयेत्॥ ह्रूं ह्रीं यां रां लां वां क्रों महाकालभैरव सर्वविघ्नान्नाशय ह्रूं ॐ श्रीं
फट् स्वाहा॥ अनेन पाद्यादिभिराराध्य त्रिस्तर्पयित्वा मूलेन देवीं पंचोपचारैः पूजयेत्॥ तथा
च कालीकातंत्रे॥ महाकालं यजेद्यत्नात् पश्चाद्देवीं प्रपूजयेत्॥ ततो देवीं ध्यात्वा यथाशक्ति
जप्त्वा ॐ गुह्यातीत्यादिना देव्या वामहस्ते तेजोमयं जपं समर्पयेत्॥ ततः स्तुत्वा प्रदक्षिणीकृ
त्य साष्टांगप्रणामं कुर्यात्॥ श्रीजगन्मंगलं नाम कवचं पठेत्॥ ततः आवरणदेवता देव्यंगे
विलाप्य संहारमुद्रया अमुकी देवी क्षमस्वेति विसृज्य तत्तेजः पुष्पैः सार्द्धं हृद्यारोपयेत्॥ ततो

वेद्यं किंचित् ॐ उच्छिष्टचांडालिन्यै नमः ॥ इति एतस्मां दिशि दत्वा शेषं शिरसि दत्वा किंचित्स्वी
कृत्य पादोदकं पीत्वा निर्माल्यं विधृत्य यथेष्टं विहरेदिति ॥ ततो मूलेन अष्टोत्तरशतानि मंत्रि
तं पुष्पं चंदनं धृत्वा त्रैलोक्यं वशमानयेत् ॥ सर्वसिद्धीश्वरो भूत्वा भैरवो वशसाद्भवेत् ॥ अ
स्य पुरश्चरणं लक्षद्वयजपः ॥ तत्र क्रमः ॥ तथा च कालीतंत्रे ॥ लक्षमेकं जपेद्दिवा हविष्याशी
दिवा शुचिः ॥ रात्रौ तांबूलपूरास्यः शय्यायां लक्षमानतः ॥ अवस्थामाह स्वतंत्रे ॥ दिवा लक्षं
शुचिर्भूत्वा हविष्याशी जपेन्नरः ॥ ततस्तु तद्दशांशेन होमयेद्विबाप्रिये ॥ अत्रांगस्य का
लांतरमाह ॥ नीलसारस्वततंत्रे ॥ लक्षमेकं जपेन्मंत्री हविष्याशी दिवा शुचिः ॥ अशुचित्व
तथा रात्रौ लक्षमेकं तथैव च ॥ तद्दशांशं होमयेन्मंत्री तर्पयेदभिषेचयेत् ॥ इति सांप्रदायि
कः ॥ कुमारीकल्पे ॥ लक्षमेकं जपेद्दिवा हविष्याशी दिवा शुचिः ॥ रात्रौ तांबूलपूरास्यः श
य्यायां लक्षमानतः ॥ एवं लक्षद्वयं जप्त्वा तद्दशांशेन मंत्रवित् ॥ अयुतं होमयेद्विद्दिवारा
त्रिप्रभेदतः ॥ तेन दिवा लक्षं तद्दशांशं होमं कुर्यात् ॥ रात्रावेव तद्दशांशं होमं कुर्यादिति

रहस्यार्थः ॥ ॥ अथ मंत्रभेदाः ॥ ॥ तंत्रे ॥ वर्गाद्यं वह्निसंयुक्तं रतिबिंदुसमन्वितं ॥ एका
क्षरो महामंत्रः सर्वकामफलप्रदः ॥ त्रिगुणात्तु विशेषेण सर्वशास्त्रप्रबोधिका ॥ पूजादि
कं समुत्थाय प्रातः कृत्यादि प्राणायामांतं विधाय पूर्वोक्तऋष्यादिछंदोदेवतानि विन्यस्य व
र्णन्यासं कृत्वा करांगन्यासं कुर्यात् ॥ तथा च वीरतंत्रे ॥ दीर्घवह्नियुताद्येन प्रणवाद्येन कल्प
येत् ॥ षडंगानि मनोरस्य ज्ञातियुक्तेन देशिकः ॥ अन्यत्पूर्ववत् ॥ अनयोः पुरश्चरणं लक्ष
जपः ॥ तद्दशांशं विधानेन होमयेत्साधकोत्तमः ॥ मायाद्वयं कूर्चयुग्मं वैरांतं मादनत्रयं ॥ मा
याबिंदीश्वरयुतं दक्षिणे कालिके पदं ॥ संहारक्रमयोगेन बीजसंदोहमुद्धरेत् ॥ एकविंश
त्यक्षरो मंत्रसाराद्यः कीर्तिको मनुः ॥ अस्यार्थः ॥ इंदुस्य समापं लें कूं रेफ इत्यर्थः ॥ तेन प्रणवं
मायाद्वयं कूर्चद्वयं निजबीजत्रयं दक्षिणे कालिके निजबीजत्रयं कूर्चद्वयं मायाद्वयं माया
द्वयमित्येकविंशाक्षरः ॥ अस्य पूजादिकं दक्षिणावत् ॥ पुरश्चरणं तु लक्षजपः ॥ तंत्रोक्त्याद्
होमस्तु तद्दशांशतः ॥ विश्वसारे ॥ स्वाहांतश्च त्रयोविंशाक्षरीयं मंत्रराजकः ॥ स्वाहां विना

चैकविंशत्यक्षरः कामदो मनुः ॥ विंशत्यर्णमहाविद्या स्वाहाप्रणववर्जिता ॥ ध्यानपूजादि
कं सर्वं दक्षिणावद्भावयेत् ॥ तंत्रे ॥ प्रणवं पूर्वमुद्धृत्य हृल्लेखाबीजमुद्धरेत् ॥ रतिबीजं सम
द्धृत्य पंचमं च चं गान्वितं ॥ इदं ये न समायुक्ता विद्या राज्ञी प्रकीर्तिता ॥ रतिबीजं निजबीजं
तथा च यामुंड तंत्रे ॥ रत्नाद्या कालिका प्रोक्ता विंशत्यक्षररूपिणीति एवं च प्रतिपादितं ॥
तेन प्रणवो माया निजबीजं पंचमेकारयुक्तं वह्निवल्लभा ॥ अस्य पूजा ध्यानं तु स्याद्दक्षि
णायामंतं कर्म विधाय रुद्रादिन्यासं कुर्यात् ॥ अस्य मंत्रस्य भैरव ऋषिर्विराट् छंदः सि
द्धिकालि ब्रह्मरूपा भुवनेश्वरी देवता लां बीजं जं क्रीं बीजं रां शक्तिश्च वर्णन्यासं करांगन्यासौ
च कुर्यात् ॥ दक्षिणावत् ॥ ध्यानं तु ॥ खड्गोच्छिन्नेंद्रविवस्वायदमृतरसाप्लाविताङ्गी त्रिनेत्रा
सव्ये पाणौ कपाले गलदसृजमथो मुक्तकेशी पिबंती ॥ दिग्वस्त्रा बद्धकांचीमणिमयमुकु
टाद्यैर्युता दीप्तजिह्वा या नीलोत्पलाभा रविशशिविलसत्कुंडलालीढपादा ॥ १ ॥ एवं ध्या
त्वा पूजादिकं दक्षिणावत्कार्यं ॥ पुरश्चरणं तु एकविंशतिसहस्रजपः ॥ तदुक्तं कालीतंत्रे ॥

जपेद्विंशतिसाहस्रं सहस्रैकेन संयुतं ॥ होमयेत्तद्दशांशेन मधुपुष्पेण मंत्रवित् ॥ वि
श्वसारतंत्रे ॥ मूलबीजं ततो माया लक्ष्मीबीजं ततः परं ॥ महाविद्या महाकाली महाका
लेन भाषितं ॥ अथ पंचाक्षरी विद्यां शृणु पद्मकमलानने ॥ प्रजापतिं समुद्धृत्य वह्न्याकू
टं ततः प्रिये ॥ चतुर्थस्वरसंयुक्तं सर्वतंत्रसमन्वितं ॥ बीजत्रयं क्रमेणैव तदंते वह्निसुंद
री ॥ पंचाक्षरी महाविद्या कथिता पद्मयोनिना ॥ षडक्षरी महाकाली वक्ष्ये शृणु पार्वति
बीजत्रयं समुद्धृत्य अस्त्रवर्णं समुद्धरेत् ॥ वह्निजायावधिः प्रोक्तो विद्या त्रैलोक्यमोहिनी ॥
अष्टाक्षरी महाविद्या कथ्यते शृणु पार्वति ॥ बीजत्रयं क्रमेणैव पुनर्बीजत्रयं सुधीः ॥ स्वा
हांता कथिता विद्या चतुर्वर्गफलप्रदा ॥ एकादशाक्षरी विद्या कथ्यते शृणु पार्वति ॥ वाग्भ
वं हृदयं पश्चात् वह्न्याकूटं प्रजापतिं ॥ चतुर्थस्वरसंयुक्तं नादबिंदुविभूषितं ॥ द्विगुणं च
ततः कृत्वा ङेंतं च कालिकापदं ॥ स्वाहांता कथिता विद्या प्रिये एकादशाक्षरी ॥ ऋषिः स्याद्द
क्षिणामूर्तिः छंदः पंक्तिरुदाहृतः ॥ परात्परतरा शक्तिः कालिका देवता स्मृता ॥ एकादशाक्षि

रिविद्याकालिकायाःसुदुर्लभा॥लज्जाद्वयंजपेद्विद्यांपुरश्चरणकर्मणि॥अस्यास्तांवर्णलिखि
स्यात्कथितंपद्मयोनिना॥अस्याःध्यानं॥चतुर्भुजांकृष्णवर्णांमुंडमालाविभूषितां॥खड्गं
चदक्षिणेपाणौबिभ्रतींदीवरद्वयं॥कर्त्रींचखर्परंचैवक्रमाद्वामेनबिभ्रती॥द्यांलिखंती
जटामेकांबिभ्रतींशिरसाद्वयं॥मुंडमालाधरांशीर्षेग्रीवायामपिचापरां॥वक्षसानाग
हारंचबिभ्रतीरक्तलोचनां॥कृष्णवस्त्रधरांकट्यांव्याघ्राजिनसमन्वितां॥वामपादंश
वहृदिसंस्थाप्यदक्षिणंपदं॥विलाप्यसिंहपृष्ठेतुलेलिहानांशवंस्वयं॥साट्टहासामहा
घोराराववयुक्तांसुभीषणां॥अस्यसर्वंदक्षिणावत्॥पूर्वोक्तानांमंत्राणांचकृतादिकंदक्षि
णावद्बोध्यं॥मूलबीजंततोमायांलज्जाबीजंततःपरं॥दक्षिणेकालिकेचेतितदंतेवह्निसुं
दरी॥एकादशाक्षरीमहाविद्याचतुर्वर्गफलप्रदा॥कवचंमूलविद्यांचतदंतेभुवनेश्वरी
दक्षिणेकालिकेचेतिअस्त्रांतांभुवनेश्वरी॥अथापरांप्रवक्ष्यामिविद्यांविंशतिवर्णिकां॥
यस्याःप्रसादमात्रेणभवेद्भूमिपुरंदरः॥मूलबीजद्वयंवदेत्॥लज्जायुग्मंसमुद्धृत्यसंबोधनं

तंपदद्वयं॥पूर्ववत्कवचद्वंद्वंतथाबीजान्यंतेचवह्निसुंदरी॥ऋषिःस्याद्दक्षिणामूर्तिःपंक्तिश्छंदउदा
हृतं॥देवताकथितासद्भिःकालीदक्षिणपूर्विका॥अथापरांप्रवक्ष्यामिविद्यांत्रिभुवने
श्वरी॥निजबीजंसमुद्धृत्यतदंतेवह्निसुंदरी॥भैरवोस्यऋषिःप्रोक्तःसर्वतंत्रसमन्वितः॥
अष्टाक्षरीतथाप्रोक्तासर्वतंत्रेषुगोपिता॥निजबीजद्वयंकूर्चद्वयंलज्जाद्वयंततः॥स्वाहां
ताकथिताकालीसर्वकर्मफलप्रदा॥निजकूर्चंतथालज्जातदंतेवह्निसुंदरी॥पंचाक्षरी
महाविद्यापंचवक्त्रऋषिःस्मृतः॥नवाक्षरीमहाविद्याशृणुष्वकमलानने॥निजबीज
द्वयंकूर्चयुग्मलज्जायुग्मंततः॥स्वाहांताकथिताविद्यासर्वसंपत्करीमता॥ ॥अथा
परांप्रवक्ष्यामिविद्यांतांचनवाक्षरीं॥मूलबीजंसमुद्धृत्यसंबुध्यंतंपदद्वयं॥स्वाहांताकथिता
विद्यासर्वशत्रुक्षयंकरी॥अथवाष्टाक्षरीविद्यांशृणुष्वकमलानने॥निजबीजंततःकूर्चं
ततोमायांसमुद्धरेत्॥पुनस्तान्येवचोद्धार्यस्वाहांतामोक्षदायिनी॥अथापरांप्रवक्ष्यामि
दशाक्षरसमन्वितां॥मूलद्वयंकूर्चयुग्मंतथालज्जाद्वयंततः॥पुनस्तान्येवबीजानितदंते

वह्निसुंदरी॥ चतुर्दशाक्षरी विद्या चतुर्वर्गफलप्रदा॥ अनलात्रयं समुद्धृत्य रतिवह्निसमन्वितं
नादबिंदुसमायुक्तं लज्जा कूर्चद्वयं ततः॥ पुनः क्रमेण चोद्धृत्य वह्निजायावधिर्मनुः॥ षोड
शार्णं समाख्याता विद्या कल्पद्रुमोपमा॥ मायातंत्रे॥ हृदयं वाग्भवं देवी निजबीजयुगं त
तः॥ कालिकाये पदं चोक्त्वा तदंते वह्निसुंदरी॥ तंत्रांतरे॥ नमः पाशांकुशौ द्विधा फट् स्वाहा
कालि काली के॥ दीर्घतनुच्छदं काली मनुः पंचदशाक्षरः॥ एतासां पूजनं चैव दक्षिणावद्
सुरेश्वरी॥ नरः संख्यं जपं कुर्यात् पुरश्चरणसिद्धये॥ एतासां पूजायंत्रं कालिकातंत्रे॥ आ
दौ त्रिकोणं विन्यस्य त्रिकोणं तद्बहिर्न्यसेत्॥ ततो वै विलिखेन्मंत्री त्रिकोणत्रयमुत्तमं॥
ततो वृत्तं समालिख्य लिखेदष्टदलं ततः॥ वृत्तं विलिख्य विधिवल्लिखेद्भूपुरमेककं॥ कुमारी
तंत्रे॥ नध्येत्तु बैंदवं चक्रं वीतमायाविभूषितं॥ यंत्रनिर्माणपात्रं तु मुंडमालातंत्रे॥ ताम्रपा
त्रे कपाले वा श्मशाने काष्ठनिर्मिते॥ शनिभौमदिने वापि शरीरमृतसंभवे॥ स्वर्णे रौप्ये प्य
थो हि वा यंत्रं कार्यं विधानतः॥ ॥अथ गुह्यकाली॥ ॥विश्वसारे॥ अथ वक्ष्ये महे

शानि विद्यां सर्वफलप्रदां॥ चतुर्वर्गप्रदां साक्षान्महापातकनाशिनीं॥ सर्वसिद्धिप्रदां नि
त्यां भुक्तिमुक्तिप्रदायिनीं॥ गुह्यकाली महाविद्या त्रैलोक्ये चातिदुर्लभा॥ इंद्रादिकूटंय
र्गार्घं रतिबिंदुसमन्वितं॥ त्रिगुणं च तथा कृत्वा ईशानं च समुद्धरेत्॥ षष्ठस्वरसमायु
क्तं बिंदुनादकलात्मकं॥ द्विगुणं च ततः कृत्वा ईशाद्यं समुद्धरेत्॥ वामाक्षिवह्निसंयुक्तं
नादबिंदुविभूषितं॥ तद्गुह्यकालिके प्रोक्ता चाथवा दक्षिणे वदेत्॥ सप्तबीजं पुनः पूर्व
क्रमेण योजयेत्ततः॥ वह्निजायावधिः प्रोक्ता विद्या त्रैलोक्यमोहिनी॥ अथ चेति गुह्ये दक्षि
णे वा मंत्रः॥ कामबीजं तथा कूर्चं तदंते भुवनेश्वरी॥ गुह्ये च कालिके चापि तथा बीज
द्वयं वदेत्॥ स्वाहांता कथिता विद्या सर्वतंत्रेषु गोपिता॥ एषा तु षोडशी विद्या चतुर्व
र्गफलप्रदा॥ अस्यार्थः॥ आदौ निजबीजं ततः कूर्चं ततो मायां ततः संबोधनपदद्वयं॥
ततो निजबीजं कूर्चद्वयं मायाद्वयं वह्निवल्लभा॥ कामबीजद्वयं हित्वा नवैव विद्या चतुर्दशी
अस्य मंत्रस्येति शेषः॥ सप्तबीजं पुराप्रोक्तं गुह्ये च कालिके पुनः॥ स्वाहांता कथिता विद्या

सर्वतंत्रेषु गोपिता॥ एषापि चतुर्दशार्णा स्मृता तथा॥ अस्या नामादिपदं त्यक्त्वा दक्षिणे पदं चेत्त
दायं दशार्णा स्मृता॥ तथा कामबीजं परित्यज्य अथवा षोडशार्णा स्मृता॥ तेन षोडशाक्षरविद्यायाः
कामबीजेनान्विते पंचदशार्णा भवति॥ कामबीजं समुद्धृत्य स्वे बुध्यंते पदद्वयं॥ पुनः कामं तदं
ते च दद्यात् हृष्य सुंदरी॥ एषा नवाक्षरी विद्या गुह्यकाल्याः प्रकीर्तिता॥ दक्षिणे पदमाला
भ्यन्त वेदिद्यात् दशाक्षरी॥ एतासां पूजनं तु तत्रैव च पूर्ववत्॥ अस्यास्सर्वगस्य पूर्ववत् पूजये
च्छिवां॥ पूर्ववच्चैव पेद्वियां सर्वं पूर्ववदेव हि॥ बलिदानं तथा यंत्रं पूर्ववत् परिकल्पयेत्॥
बलिमंत्रस्तु॥ एह्येहि जगतां माता तर्जगतां जननि गृह्ण गृह्ण मम बलिं सिद्धिं देहि स्वाहा हृदयं
कुरु कुरु क्रूं फट् स्वं ॐ कालिकायै नमः फट् स्वाहा॥ यद्वा गुह्यकाल्यै अयं वा बलिसमंत्रः॥ ए
हि एहि गुह्यकालि गृह्ण गृह्ण मम मदीयामन्नादाय स्फुर स्फुर सिद्धिं देहि क्रूं स्वाहा॥ ॥अथ पंचा
सन मंत्रः॥ ॥ॐ क्रूं सदाशिव महाप्रेतपद्मासनाय गुह्यकाल्यै क्रूं नमः॥ मं
त्रकाल्या दयो विद्याः कथ्यंते शृणु सुंदरी॥ कामबीजादिकं बीजं सर्वे पूर्वं परे यजेत्॥ नर

काली तथा कृतां बीजमध्ये नियोजयेत्॥ स्वाहांता कथिता विद्या विंशद्वर्णात्मिका परा॥ चतु
र्वर्गप्रदा विद्या नरकाली सुरानने॥ सप्तबीजं समुद्धृत्य स्मशान कालिके तथा॥ पुनर्बी
जं क्रमेणैव स्वाहांता सर्वसिद्धिदा॥ विंशत्येकाधिका विद्या स्मशानकालिकामता॥ बीजा
नि चोच्चरेत् पूर्वं महाकाली पदं ततः॥ तदंते सप्तबीजानि स्वाहांता सर्वसिद्धिदा॥ विंशत्य
धिका विद्या महाकाली प्रकीर्तिता॥ एतासां जपपूजनं दक्षिणावत्॥ विशेषस्तु भूपुरे
इन्द्रादीन् वज्रादींश्च पूजयेत्॥ अग्रहस्य पूर्वादि द्वारेषु विघ्नं शिवं गणेशं च पूजयेत्॥
तत्रैव भूपुरे लोकपालास्त्वस्त्राणि च तत्र हि॥ भूपुरे च चतुर्दिक्षु पूजयेत् क्रमतः
सुधीः॥ विघ्नं शिवं तथा सूर्यं गणेशं पूजयेत्ततः॥ तथा यंत्रं तु॥ त्रिकोणं चैव षट्को
णं नवकोणं मनोहरं॥ त्रिवृत्तं साष्टपत्रं च स्वस्तिकं स्के समन्वितं॥ भूपुरत्रितया रूढं यो
निमंडलमंडितं॥ त्रिपंचारमिदं चक्रं सर्वतंत्रसमन्वितं॥ ध्यानं तु॥ महामेघप्रभां देवीं
कृष्णवस्त्रपिधायिनीं॥ ललजिह्वां घोरदंष्ट्रां कोटराक्षीं हसन्मुखीं॥ नागहारलतोपे

तांचं शार्दूलतरोस्वरां ॥ यां लिखंती जरामेकां लेलिहानां शवं स्वयं ॥ नागयज्ञोपवीतां जीना
गराज्यास्तनेंदुकां ॥ पंचाशन्मुंडसंयुक्तनरमालां महोदरीं ॥ सहस्रफणसंयुक्तमनंतशि
रसोपरि ॥ चतुर्दिक्षु नागफणावेष्टितां गुह्यकालिकां ॥ तक्षकसर्पराजेन वामकंकण
भूषितां ॥ अनंतनागराजेन कृतदक्षिणकंकणां ॥ नागेन च रसनाकारं कल्पितां रत्ननू
पुरां ॥ दक्षिणे शिवं चिंतयेद्देवीं नागयज्ञोपवीतिनीं ॥ नरदेहसमारब्धकुंडलश्रुतिमंडितां
प्रसन्नवदनां सौम्यां नवरत्नविभूषितां ॥ नारदाद्यैर्मुनिगणैः सेवितां शिवगेहिनीं ॥
अट्टहासां महाभीमां साधकाभिष्टदायिनीं ॥ जरामेकामिति धारयंतीमिति शेषः ॥ ॥
अनंतशिरसोपरि दधतीमिति शेषः ॥ ॥ अथ नेदानीं च सा नित्यादिरूपाः सर्वसिद्धि
दाः ॥ येषां विज्ञानमात्रेण जीवन्मुक्तस्तु साधकः ॥ कवितां लभते भूयो मनोजवविज्ञं जि
नां ॥ पांडित्यं सर्वशास्त्रेषु धनेन धनपतिर्भवेत् ॥ राजद्वारे सभायां च विवादे व्यवहार
के ॥ सर्वत्र जयमाप्नोति बृहस्पतिरिवापरः ॥ तथा च मरस्य सूक्ते ॥ सा पाशबीजं समुद्धरेत्

कारं वह्निसंयुतं ॥ मायाबिंदुश्वरयुतं द्वितीयं बीजमुद्धृतं ॥ कूर्चबीजं ततश्चैव तु फट्कारं
तदनंतरं ॥ संपूर्णसिद्धिमंत्रस्य अरश्मिपंचकसंयुतं ॥ रश्मिपंचकं प्रणवः ॥ जीवया
वाक्प्रदा चेति तेन नीलसरस्वती ॥ तारकत्वात्सदा तारा सुखमोक्षप्रदायिनी ॥ उग्रप
तारिणी यस्मादुग्रतारा प्रकीर्त्तिता ॥ तारार्णवे ॥ वसिष्ठाराधिता विद्या न त्वं शा प्रफलं
यतः ॥ अतस्तेनापि मुनिना शापो दत्तः सुदारुणः ॥ ततः प्रभृति विद्येयं फलंति नैव क
स्यचित् ॥ वंरुबीजं त्रयं तस्य बीजे परिनियोजितं ॥ ततः प्रभृति विद्येयं बधूरिवय
शस्विनी ॥ फलिनी सर्वविद्यानां जयिनी जयकांक्षिणां ॥ विघ्नक्षयकरी विद्या अस्मत्तत्व
प्रदायिनी ॥ मंत्रस्य ज्ञानमात्रेण विजयी भुवि जायते ॥ एकवीराकल्पे पि ॥ लज्जाबीजं व
धूबीजं कूर्चबीजं तथा हि फट् ॥ एवं पंचाक्षरी विद्या पंचमंत्रप्रकाशिनी ॥ कूर्चबीजं
हुंकारं ॥ तथा च विश्वसारे ॥ हूं बीजं च महेशानी वधूबीजं प्रकीर्त्तितमिति ॥ तथा वोऽ
शान्तं नं च वह्निवामाक्षिबिंदुसंयुतं ॥ इंदुबीजसमारूढं वधूबीजमिदं स्मृतं ॥ इंदुं स्त्रं का

र॥नीलतंत्रे॥ताराद्यापंचवर्णेयंश्रीमन्नीलसरस्वती॥सर्वनामाप्रयाकृष्टासर्वस्मा
च्चैर्नमस्कृता॥तानालविपि॥अन्येत्वेरंसमुद्धृत्यसापर्गोत्तरमतःपरं॥पवंचमनसायु
क्तंपंचरश्मिप्रकीर्तितं॥ॐवर्नीमध्यमापश्चात्एकारोतदनंतरं॥उग्रदर्पंततोद्या
रूढांदेवीप्रकाशितं॥एकाराद्यात्तेनसर्वत्रशापोद्धारः॥पंचाक्षरीमपिद्धूत्यतंत्रे॥
श्रीबीजाद्यायदाविद्यातदाश्रीःसर्वतोमुखी॥एषैवहिमहाविद्यामायाद्याःसकले
ष्टदा॥वाग्भवाद्यायदाविद्यावागीशत्वप्रदायिनी॥विनारैकजटायैवामहामुक्तिकरीस
तां॥तारास्वरहितास्याएवमहानीलसरस्वती॥कृत्स्नकेयंसमाख्यातासर्वतंत्रेषुगोपिता
एषाकैमगतास्माप्यामतनेदादनेकधा॥एषापंचाक्षरी॥तदेवाहपंचाक्षरी॥एकजटाता
राख्याश्रीमन्नीलसरस्वती॥उग्रातारायक्षरीमहानीलसरस्वती॥उग्रतारायक्षराह
रीमहानीलसरस्वती॥अस्यासांविद्यानांएकजटैवदेवताप्रकर्तत्वात्॥एतासांसाध
नस्थानंनीलतंत्रे॥एकलिंगेश्मशानेवाश्मशानागारेचतुष्पथे॥तत्रस्थःसाधयेद्योगी

विद्यांत्रिभुवनेश्वरी॥तत्रैव॥पंचक्रोशांतरेयत्रनलिंगांतरमीक्षते॥तदेकलिंगमाख्यातं
तत्रसिद्धिर[illegible]नुत्तमा॥अन्यत्रापि॥दुर्गेटपर्वतेवापिनिर्जनेवाचतुष्पथे॥देवागारेचवृक्ष
मूलेचनिर्जनेकांतरेवने॥वीरतंत्रेपि॥शून्यागारेश्मशानेयदितपतितरस्वैकलिंगे
तडागेगंगागर्भेगिरिगहनगुहायांवसनमतिःसर्वदाभक्तियुक्तः॥विद्यांश्रीनीलवाणीमनु
जपतिजनपतिःसर्वशास्त्रार्थवेत्ताद्देहांतेयोगिमुख्यःपरमसुखपदंब्रह्मनिर्वाणमेति॥१॥
अथताराचमनं॥भैरवतंत्रे॥ताराभ्येदेस्तिभिःपीत्वामायायाक्षालयेत्करं॥स्त्रींहूंत्रींह्रीं
द्विरुक्तस्वपहूंकारैःक्षालयेत्करं॥आस्यनासेकर्णश्रोत्रेनाभिवक्षःशिरोभुजान्॥वैरोच
नादिभिःस्पृष्ट्वासर्वपापैःप्रमुच्यते॥आचम्यभैरवोभूत्वावसतांपरपति॥तारादिनि
ता॥ताराउग्राएकजटावैरोचनः॥शंखपांडव॥पद्मनाभं०नामक०तारक०पांडव०असि
तां०पद्मांतक०यमांतक०विघ्नांतक०नरांतकाः॥सच्चतुर्थीप्रणवादिनमोंतिकाः॥अस्याप्रज्ञा
प्रातःकृत्यादिस्नानांतंकर्मसमाप्ययागस्थानंगत्वाॐवज्रोदकेहूंफट्स्वाहा॥इतिजलमंत्रे

एतल्लोपितल्लाय एतत्कलं पूजार्थं निधाय किंचिदन्यत्तले निक्षिप्य तेनैव वारिणा ॐ ह्रीं विशु
द्धधर्म गात्री सर्वपापानि शमयाशेषविकल्पमपनय हूं फट् स्वाहेति हस्तपादौ प्रक्षाल्य क
लकृशान्सुवर्णरत्नरूपान्यथा संख्येन हस्ते दत्वा ॐ ह्रीं स्वाहेति आचम्य वा ध्यं चिंतयेत्
कुलकृशास्तु॥ सुवर्णरजतं चैव तत्पपद्मादिकर्मसु॥ कुशाकार्यकरं प्रोक्तं नान्यत्स्यात् कुशाकृ
शा इति॥ तद्यथा॥ स्मशानांतर्वर्ति दं चिंत्यतत्र कल्पद्रुमं स्मरेत्॥ तन्मूले मणिपीठं नाना
मणिविभूषितं॥ नानालंकारभूषाढ्यं मुनिदेवैरभूषितं॥ शिवानिर्बद्धमांसास्थिमोदमा
नानिरंतरं॥ चतुर्दिक्षु शवमुंडचितांगाराणि भूषितं॥ तन्मध्ये ध्यायेद्देवीं यथोक्तध्यान
रूपतः॥ इति ध्यात्वा ॐ मणिधरि वज्रिणी सर्ववशंकरी महाप्रतिसरे हूं फट् स्वाहेति शिखा
बंधनं कुर्यात्॥ ॐ रक्ष रक्ष हूं फट् स्वाहा इति जलसेकाद्भूमिं शोधयेत्॥ ॐ सर्वविघ्नानुत्सार
य हूं फट् स्वाहेति नाराच मुद्रया हस्तप्रक्षेपेन दिग्भ्यो दिक्षु नीलान्विघ्नानुत्सारयेत्॥
ॐ पवित्रवज्रभूमे हूं फट् स्वाहा इति भूमिं निमंत्र्य तत्र कंबलकोमलविष्टराद्यासनानि

यथासाधनामास्तीर्य ॐ आः सुरेखे वज्ररेखे हूं फट् स्वाहेति गंधपुष्पादिना तमभ्य
र्च्य स्वस्तिकादिकं दत्त्वा तत्रोपविशेत्॥ तदुक्तं मत्स्यसूक्ते॥ मृदुकोमलमासीनो न्यस्ते चु
कोमले वृत्त॥ पंचवर्षाभ्यंतरं यावन्मृतं बालमचूडकं॥ वर्षाणां सार्धं तरं यावत् दश
मासाद्य पूर्वकं॥ गर्भच्युतं मृदं बालं गर्भहीनमपुरःसरं॥ एतत्कोमलमित्याहुर्विष्टरे वृक्
शे वृत्त॥ तथा नीलतंत्रे॥ अदत्तचूडकोबालो मृतोपनयनः पुमान्॥ यो मृतः पंचमे वर्षे
तमेव कोमलं विदुः॥ पंचमे वर्षे पंचमवर्षप्रूर्ले॥ एकहस्तं द्विहस्तं वा चतुरस्रं समंततः॥ वि
सृष्ट आसने कुर्यात्संस्कारं पूर्ववद्बुधः॥ कृष्णसारव्याघ्रचर्मापि आसनं॥ कृष्णसारव्या
घ्रचर्मभ्यं भुजंगमित्यादि॥ विष्टरे छिन्नादि विष्टरस्य शवप्रतिनिधिः कुशापत्रं रातेन चतु
र्निर्माय यशाबप्राणप्रतिष्ठां कुर्यात्॥ ॐ मणिधरि वज्रिणि महाप्रतिसरे रक्ष रक्ष मां हूं फ
ट् स्वाहा इति वस्त्रांतिके रक्षां ग्रंथिं बंधयेत्॥ ॐ सुपुष्पके तुराज्ञा हं तेन सूत्रायसम्यक्
संबंधाय ॐ पुष्पे पुष्पे महापुष्पे सुपुष्पे पुष्पसंभवे॥ पुष्पचयावकीर्णे हूं फट् स्वाहेति

पुष्पसंचयमभिमंत्रयेत्॥ ततः स्वर्णादिपीठे गोरोचनादिलिप्ते ॐ आः स्वरे रखे हूं फट् न
मः॥ इति मंत्रेणाधोमुखत्रिकोणगर्भाष्टदलपद्मं चतुरस्रं चतुर्द्वारयुक्तं यंत्रमुद्धरेत्॥
पद्मस्य पूर्वादिदले मंत्राक्षराणि लिखेत्॥ तथा च॥ सयोनि चंदनेनाष्टपत्रं वृत्तं लिखेत्
त॥ यद्वा सतं समासाद्य मायां पूर्वदले लिखेत्॥ मध्ये बीजं द्वितीये च फट् चोत्तरे पश्चिमे
ठं॥ मध्ये बीजं लिखेत्तारं मूलतत्त्वादिमथाचरेत्॥ द्वितीये दक्षिणे तारं हूंकारं तारा प्रणव
त्वात्॥ मध्ये षट्कोणं कृतमिति केचित्॥ तदुक्तं॥ षट्कोणं तद्गतं पद्मं बिंबदेतयं पुनः
चतुरस्रं चतुर्द्वारमेवं वा यंत्रमालिखेत्॥ बीजं लिखनं तु पूर्ववत्॥ नीलतंत्रे पि॥ सार
स्वतां विनां विशेषमाह॥ मोमें द्वौ रसनाणं कर्णिकमध्यां द्वंद्वेः स्फुरत्केसरं यगोष्टासि
तसुष्ठदं वसुमतिजे हिन संवेष्टितं॥ ताराधीश्वरवारिवर्णविलसद्धिकोणसंशोभितं
यंत्रं नीलतनोः परं निगदितं सर्वार्थसिद्धिप्रदं॥१॥ ताराधीश्वरोऽनुठकार॥ नंतजांग
लियुक्ता द्वौ दिग्लिपुरेण यत्तेनितिशारदावचनात्॥ एवं वा यंत्रं विलिख्यैतत्पीठं पुर

तोरक्तचंदनादिपीठे सिंहासनादीन्यानिधायपीठमर्चयेत्॥ तद्यथा॥ पीठस्य पूर्वद्वारे ॐ ह्रीं
गां गणपतये नमः॥ पीठस्य दक्षिणे ॐ ह्रीं वां बटुकाय नमः॥ पीठस्य पश्चिमे ॐ ह्रीं क्षेत्रपा
लाय नमः॥ पीठस्योत्तरे ॐ ह्रीं यां योगिनीभ्यो नमः॥ तथा च कुमारीकल्पे॥ ततोर्घपात्रं वि
न्यस्य द्वारपालान् समर्चयेत्॥ गांबीजाद्यं गणेशं तु वामाद्यं बटुकं तथा॥ क्षमाद्यं क्षेत्रपा
लं च यामाद्यं योगिनीं तथा॥ पूर्वे वामे दक्षिणे च क्रमेणैवं प्रपूजयेत् सुधीः॥ ते सर्वे प्रणवादिमा
याः राक्षीबीजपुरःसराः॥ इति॥ ततो मध्ये ॐ स्मशानाय नमः॥ एवं कल्पवृक्षाय तन्मूले मणि
पीठाय नानालंकारेभ्यः मुनिभ्यः देवेभ्यः बकुमांसास्थिमोदमानशिवाभ्यः चतुर्दिक्षु शव
मुंडचितांगारास्थिभ्यः सर्वत्र प्रणवादिनमोंतेन पूजयेत्॥ अष्टदलेषु मंगलादि ॐ जयस्यै
नमः॥ एवं सरस्वत्यै॥ रत्यै॥ कीर्त्यै॥ शांत्यै॥ तुष्ट्यै॥ तस्य मध्ये हसौः सदाशिवमहाप्रेतपद्मा
सनाय नमः॥ तदुक्तं सिद्धसारस्वते॥ जयाः सरस्वती चैव रतिप्रीतिस्तथैव च॥ कीर्तिः शां
तिश्च पुष्टिश्च तुष्टिरित्यष्टशक्तयः॥ दिव्या नीलसरस्वत्याः पीठशक्तय ईरिताः॥ वीरतंत्रे॥

नस्यापूजयेद्द्यावाहनं शावमेव च ॥ तत्र मूलमंत्रेण तत्राम्भृत्तिं संकल्प्य भूतशुद्धिं कु
र्यात् ॥ यथा स्वांके उत्तानौ करौ कृत्वा हंसइति मंत्रेण कुंडलिनीं जीवात्मानं चैतस्यैनच
तुर्विंशतितत्वानि सुषुम्णावर्त्मना परमतेजसि संयोज्य पूरकेन ह्रींकारं रक्तवर्णं नाभौ
ध्यात्वा तदुद्भूतेनाग्निना देहं संदह्य कुंभकेन स्रींकारं पीतवर्णं विचिंत्य तदुद्भूतेन वायुना
तस्य प्रोत्सार्य रेचकेन क्रुंकारं श्वेतवर्णं शिरसि विचिंत्य तदुद्भूतेनामृतेन तदस्थिज्ञावितं
कृत्वा समस्तमपगतकल्मषं शरीररूपं बिम्बमात्मानं चयेत् ॥ तथा च श्रुतिः ॥ वह्निं दात त्वानि
शरीरमिति ततः आत्मानमपगतकल्मषं निर्मलं देवतादेहेन ध्यायेत् ॥ यथा तस्मिन् शरीर
रूपबिम्बस्यापकेधारणिः आःकाराररूपं पंकजं ध्यात्वा तदुपरि ह्रींकारं श्वेतपंकजं बि
बिंबं तदुपरि लसन्निन्नं क्रुंकारं ध्यात्वा तदुपरि क्रींबीजभूषितां कर्णिकां ध्यायेत् ॥ तदुपरि आ
त्मानं तारिणीमयं आं ह्रीं क्रों स्वाहेति एकादशवारं जपन् प्राणान् प्रतिष्ठाप्य न्यासयेदिति
तदुक्तं फेत्कारीये ॥ मायां मातीरक्तवर्णं ध्यात्वा तज्ज्वलितवह्निना ॥ संशुष्कमात्मकं देहं दग्धं सं

चिंतयेत्ततः ॥ स्रींकारं हृदि वातानं तदुद्भूतेन वायुना ॥ तस्य प्रोत्सारितं कृत्वा ललाटे चिंत
येत्ततः ॥ कूर्चं तुषारधवलं तदुद्भूतामृतेन च ॥ तदस्थिज्ञावितं कृत्वा तदात्मानं विचिं
तयेत् ॥ तथा ॥ भूतशुद्धिं विधायैवं स्वस्वं बिम्बं विचिंतयेत् ॥ निर्लेपं निर्गुणं शुद्धमात्मा
नं देवतामयं ॥ अंतरीक्षे ततो ध्यायेत् आकारारक्तपंकजं ॥ भूयो स्यापरि ध्यायेत् तांका
लप्रत्नाजनं ॥ तस्योपरि पुनर्ध्यायेदात्मानं तारिणीमयमिति ॥ प्रत्यालीढपदां घोरां मुं
डमालाविभूषितां ॥ खर्वां लंबोदरीं भीमां व्याघ्रचर्मावृतां कटौ ॥ नवयौवनसंपन्नां पंचमु
द्राविभूषितां ॥ भैरवतंत्रे ॥ पंचमुद्राविभूषितामित्यत्र चाद्योनिश्च भूषितेति चैव बीज
द्यादेस्य ध्वनिनी जिजिह्वानेति संज्ञकाः पंचमुद्राः प्रकीर्तिताः ॥ आसां बीजानि तंत्रे वा ॥ यो
निर्माया धरा सेंदुरथः कूर्चं क्रमाद्विदुः ॥ बीजान्यासां जगदेतत् क्रमेण कथयाम्यहं ॥ यो
निमुद्रा प्रसिद्धा ॥ अथो मुखी निमां मुद्रां दर्शयेद्विज पूर्विकां ॥ अस्यास्तु देवीतत्त्वं यो नि
नात्पपृष्ठहस्तत ॥ संस्थाप्यांगुष्ठके मुद्रा सूत्रीनिपारिकीर्तिता ॥ परिवर्स्य करौ स्पष्टा यं गुष्ठ

तर्ज्जनीयुगं॥ अर्द्धचंद्राकृतिन्यायं युगपत्कारयेत्समं॥ अधः कनिष्ठया कृष्यमध्यमे
विनियोजयेत्॥ मुंडेभाकथिता देवी बीजाख्यानरूपिणी॥ परिवर्त्य करौ हस्ता कनिष्ठा
कृष्यमध्यमा॥ अनयोर्युगलं चाधस्तर्ज्जनीयुगलं पृथक्॥ अन्योन्यं विडंबयेत्। अंगुष्ठ
श्चानामिके॥ देवानां धूनके त्वाख्या मुंडेभाकथिता प्रिये॥ चतुर्भुजां लसज्जिह्वां महानी
लां वरप्रदां॥ कर्तृखड्गसमायुक्तं सव्येतरभुजद्वयं॥ कपालोत्पलसंयुक्तं सव्यपाणियुगा
न्वितां॥ पिंगोग्रैकजटां ध्यायेन्मौलावक्षोभ्यभूषितां॥ अक्षोभ्यो देवि मूर्धन्यास्त्रिमूर्तिर्नि
गरूपधृक्॥ त्रिमूर्तिर्ब्रह्मविष्णुशिवमूर्तिरिति स्मृतः॥ अक्षोभ्यं रुद्रकुजेति केचित्॥ पंच
मुद्राविभूषितामिति ललाटे॥ तिर्यग्योजितश्वेतास्थिपट्टिका चतुष्टयान्वितकपालपंच
तयान्वितामिति स्मृतः॥ श्रीशंकराचार्येणाप्युक्तं॥ विचित्रास्थिमालां ललाटे कपालपंचान्वि
तां धारयंतीमिति॥ ततः प्राणायामः॥ वामनासापुटे मूलं चतुर्वारं जप्त्वा वायुं पूरयेत्त
दनु नासापुटौ धृत्वा षोडशवारेण कुंभयेत्॥ तदनु दक्षिणनासापुटेन वाराष्टवर्त्तेन

रेचयेत्॥ पुनर्दक्षिणेनापूर्य वामेन रेचयेत्॥ पुनर्वामेनापूर्य दक्षिणेन रेचयेत्॥ इति प्राणा
यामत्रयं भवति॥ ततऋष्यादिन्यासः॥ तद्यथा॥ शिरसि अक्षोभ्यऋषये नमः॥ मुखे बृह
तीछंदसे नमः॥ हृदि श्रीदेवकजुरादिदेवतायै नमः॥ मूलाधारे हूं बीजाय नमः॥ कूट्राम्
ये नमः॥ रोघाणपहराणपुत्र्या यस्यवंगिकीलकाय नमः॥ फ्रवत्सकवित्वपांडित्यापानिलासि
तसिद्धये विनियोगः॥ तदुक्तं वीरतंत्रे॥ अक्षोभ्यो मुनिरेतस्या बृहतीछंद ईरितं॥ नीलास
रस्वती देवी त्रिषु लोकेषु गोपिता॥ हूं बीजं मस्तशक्तिः स्याच्छलवैजलप्रदा॥ ततः कालीतं
त्रोक्तमातृकान्यासः॥ तथा तथा मालारूपमातृकां न्यसेत्॥ तद्यथा॥ अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं
नमो हृदि॥ एं ऐं ओं औं अं अः कं खं गं घं ङं नमो दक्षभुजे॥ चं छं जं झं ञं टं ठं डं ढं नमो वामभुजे॥
णं तं थं दं धं नं पं फं बं भं नमो दक्षिणजंघायां॥ मं यं रं लं वं शं षं सं हं ळं क्षं नमो वामजंघायां॥
ततः करांगन्यासौ॥ ह्रां अखिलवाग्रूपिण्यै अंगुष्ठाभ्यां नमः॥ ह्रीं सर्वस्ववाग्रूपिण्यै तर्जनी
भ्यां स्वाहा॥ ह्रूं ब्रह्मवाग्रूपिण्यै मध्यमाभ्यां वषट्॥ ह्रैं विष्णुवाग्रूपिण्यै अनामिकाभ्यां हुं॥

ह्रौं रुद्रयाम्रपिल्यै कनिष्ठिकाभ्यां वौषट्॥ ह्रः सर्वयाम्रपिल्यै करतलपृष्ठाभ्यां फट्॥ ह्रां अखि
लयाम्रपिल्यै हृदयाय नमः॥ ह्रीं अखंडयाम्रपिल्यै शिरसे स्वाहा॥ ह्रूं ब्रह्मयाम्रपिल्यै शि
खायै वषट्॥ ह्रैं विष्णुयाम्रपिल्यै नेत्रत्रयाय वौषट्॥ ह्रः सर्वयाम्र× कवचाय हुं॥ ह्रौं रुद्रया
म्रपिल्यै ×पिल्यै अस्त्राय फट्॥ अंगुलीनियमस्त्वपूर्वं तु कः॥ अयं तु नीलसरस्वती पद्धतेस्तथा
चतामधिरूपासिद्धसारस्वते॥ अखिलयाम्रपिली प्रोक्ता हृदयाय नमो न्यसेत्॥ अखंडया
म्रपिली शिरसे च वह्निवल्लभा॥ ब्रह्मयाम्रपिली मुक्ता शिखायै च वषडपि॥ विष्णुयाम्रपि
ली प्रोक्ता कवचाय हुमुद्धरेत्॥ रुद्रयाम्रपिली नेत्रत्रयाय नमो न्यसेत्॥ अखंडयाम्रपि
लीमपि शिरसे वह्निवल्लभा॥ ब्रह्मयाम्रपिली मुक्ता शिखां तं च एं न्यसेत् अत्रैव पार्वति॥
शक्तिबीजं तथा देवी विन्यस्तव्यं प्रयत्नतः॥ यद्धबीजं तथा देवी विन्यस्तव्यं समाहितेः॥ य
मबीजं महेशानि न्यसनीयं ततः परं॥ अस्त्रबीजं तथान्यास्यसकलं तदनंतरं॥ उड्डीया
ढाद्यं चैतन्ता प्रकारं पंकथं चन॥ इत्थं च सिद्धिदा लोके तथा देयासुरेष्वपि॥ सर्वरूपं प्रमह

कार्यं न पूजानतपस्तथा॥ ॥इति श्रीरुद्रयामले उड्डीयपीठाकालीपीठायाकर्तव्या॥ ॥
ततो मूलमुच्चार्य शिरआदि पादांतं पादादिशिरांतं हृदयादि मुखमिति व्यापकत्रयं न्यसेत्
अथवा प्रणवपुटितमूलेन व्यापकं॥ तथा फेत्कारीये॥ ॐकारपुटितां कृत्वा मनुना व्याप
कं न्यसेत्॥ इति ततो र्घस्थापनं॥ तद्यथा॥ स्ववामे त्रिकोणं वृत्तं चतुरस्रमंडलं कृत्वा तत्राधा
धारं पात्रं निधाय मूलविद्यया अद्भिज्जलादिना पूर्य रक्तचंदनयत्नपुष्पबिल्वपत्रादि अक्ष
तादीन् निक्षिप्य अर्घस्थानीरास्वरवायुनमोदिक्षु च ह्रां अखिलयाम्रपिल्यै हृदयाय नम
इत्यादि॥ ह्रौं एकजटायै हृदयाय नम इत्यादिया षडंगानि विन्यस्य अर्घपात्रं मत्स्यमुद्रया
छाद्य मूलं दशधा जपेत्॥ दशकृत्वो जपेद्विधां देवतानां वरूद्धये॥ इति तेजोमयं तज्जलं
विज्ञाय तज्जलं किंचित् प्रोक्षणीपात्रे निक्षिप्य तेनोदकेनात्मानं पूजोपकरणं वा अभ्युक्ष
सर्वं तेजोमयं कृत्वा पूजामारभेत्॥ अतः अर्घ्यनंतरं वा तथा चक्रे॥ फेत्कारीये॥ अतः शुद्धिं
विधायैवं अर्घादिस्थापनं चरेत्॥ प्राणायामं ततः कृत्वा ऋष्यादिन्यासमाचरेत्॥ ततः पु

ध्यांते लिंबिरस्य चात्मान्ते देन देवीं ध्यायेत्॥ तद्यथा॥ प्रत्यालीढपदार्पितांघ्रिशवहृद्घोरा
ट्टहासापराखड्गेंदीवरकर्तृखर्परभुजा हूंकारबीजोद्भवा॥ खर्वानीलविशालपिंगलजटाजूटै
कनागैर्युता जाड्यं न्यस्य कपालके त्रिजगतां हंत्युग्रतारा स्वयं॥२॥ एवं विचिन्त्य करकलित
दूर्वाक्षतरक्तचंदनयज्ञपुष्पमिलितद्दिनकरकिरणारुणकुसुमांजलीमातृकायंत्रे ध्याला
हृदयाम्बुजमंत्रतेजोमयीं सुषुम्नाध्यानचैतन्यानंदमयीं तां प्रवहन्नासापुटांतु आवाहनीय
मूलेन कल्पितमूर्त्तावावाहयेत्॥ तंत्रांतरे॥ देवीं सुषुम्नामार्गेण चानीय ब्रह्मरंध्रकं॥
प्रवहन्नासापुटे ध्यात्वानियांतां स्वांजलिस्थितां॥ पुष्पमारोप्य तत्पुष्पं प्रतिमादौ निधा
पयेत्॥ देवेशि नक्तिस्थलन्ते परिवारसमन्विते॥ यावत्वां पूजयिष्यामि तावत्वं सुस्थिरा
भव॥ ततः पूर्वोक्तक्रमेणावाहनादिकं कृत्वा आं ह्रीं क्रों स्वाहेति प्राणप्रतिष्ठां कुर्यात्॥ ततो
मूलमुच्चार्य श्रीमदेकजटे यज्ञपुष्पं प्रतिच्छ हूं फट् स्वाहा इत्यनेन षोडशोपचारेण पूज
येत्॥ अस्याः प्रयोगस्तु मूलांतरेण तन्मंत्रमुच्चार्य इदं कृष्णं अमुकदेव्यै नमः॥ तथाच

पेत्कारिण्यां॥ श्रीमदेकजटे लुत्कावत्पुष्पं प्रतीछ च॥ तारादिवह्निजायांतमुद्दीपयजनं चरेदि
ति॥ मारकूर्चं तदादिकं फडित्यर्थः॥ स च वह्निजायांत इति॥ ततो योनिमुद्रां प्रदर्श्य देवीमाज्ञापय
भगवत्याः परिवारान्पूजयामीति प्रार्थ्य विरलं पूजयेत्॥ यथा केसरेषु अग्नीशासुरवायु
मध्ये दिक्षु च षडंगानि पूजयेत्॥ आग्नेय्यां ह्रां एकजटायै हृदयाय नमः॥ ऐशान्यां ह्रीं तारिण्यै
शिरसे स्वाहा॥ नैरृत्यां हूं वज्रोदके शिखायै वषट्॥ वायव्ये हैं उग्रजटे कवचाय हुं॥ मध्ये ह्रौं
महाप्रतिसरे नेत्रत्रयाय वौषट्॥ चतुर्दिक्षु ह्रः पिंगोग्रैकजटे अस्त्राय फट्॥ नीलसरस्वती
पहे च ह्रां अखिलयाम्रपिल्पि हृदयाय नमः इत्यादिना षडंगानि पूजयेत्॥ ततो देव्यामोक्षे
ओं ह्रौं अवक्त्रे पुष्पं प्रतीछ हूं फट् स्वाहा इति सर्वं पूजा॥ तदुक्तं फेत्कारीये॥ वज्रपुष्पं प्रतिछेति
हूं फट् स्वाहेति मंत्रतः॥ एतन्मंत्रेण ममात्र नित्यं चैव न संशयः॥ एतेन मनुना सर्वान्प
रिवारान्समर्चयेत्॥ सर्वत्रादौ प्रणवः॥ तदुक्तं तत्रैव॥ प्रणवं वह्निजायांतैर्वज्रपुष्पं वि
निक्षिपेत्॥ इति॥ पीठस्योत्तरे देव्या वायव्यादिशा पर्यंतं गुरुपंक्तिं पूजयेत्॥ ॐ उर्द्धकेशानंदना

पवनत्रपुष्पंप्रतिगृह्णंफट्स्वाहा॥एवंव्योमकेशानंदनाथनीलकंठानंदनाथवृषध्वजा
नंदनाथान्पूजयेत्॥एतेदिव्यौघाः॥वसिष्ठानंदनाथकूर्मानंदनाथमीनानंदनाथमहे
श्वरानंदनाथहरिनाथानंदनाथान्पूजयेत्॥एतेसिद्धौघाः॥एवंतारायःस्वबीजान्तमलं
मानुयांबाविघ्नांबा॥मयोर्दयस्वसुखानंदनाथपरमानंदनाथपारिजातानंदनाथकु
लेश्वरानंदनाथविरूपाक्षानंदनाथकेफरव्यंस्वइतिपूजयेत्॥एतेमानवौघाः॥अस्याक्ले
षेत्अहोम्भमात्रंपूजयेत्॥तथाचनीलचक्रगमले॥अथतारागुरून्वक्ष्ये दक्षा दक्षफल
प्रदान्॥ऊर्ध्वकेशोव्योमकेशोनीलकंठोवृषध्वजः॥दिव्यौघाःसिद्धिदायकाःसिद्धौघान्
शृणुतत्वतः॥आद्यःस्यात्कूर्मनाथश्चमीननाथोमहेश्वरः॥हरिनाथोमानवौघान्शृणु
यस्माच्सिद्धिरूपं॥ताराववतीचान्द्रमतीतपविद्यामहोदरी॥सुखानंदःपरानंदःपारिजा
तःकुलेश्वरः॥विरूपाक्षःस्फेरवीचकथितंतारिणाकुलं॥ततःपूर्वादिदिक्षत्रलैमहाक्ष
स्यपरूपणीउग्राक्षीमातथैवच॥घोराचभ्रामरीचैवमहारात्रिश्चसप्तमः॥अष्टमाचै

रवांशोकायोगिनीस्त्राःसप्रपूजयेत्॥ततःपूर्वादिचतुर्दलेष्वामावर्त्तेनवैरोचनशंखपां
डरपद्मनामानासितांगान्पूजयेत्॥अग्न्यादिकोणदलेषुनामकनामकपांडरतारका
न्पूजयेत्॥ततोवैरोचनशंखपांडरंपद्मनाभकं॥असितांगंयजेन्मंत्रीदिक्ष्वेवतत्पत्र
दले॥नामकंचैवपांडरंतारकंतथा॥वन्ह्यादिचतुष्कोणेषुमंत्रैःस्वैःस्वैःक्रमाद्यजेत्॥नी
लतंत्रे॥वामावर्त्तक्रमेणैवपूजयेदंगदेवताः॥द्वारिपूर्वादितःपश्चात्पाद्यांतकयमांत
कं॥विघ्नांतकंसमभ्यर्च्यपूजयेन्नरकांतकं॥पूर्वादिद्वारचतुष्टयेवामावर्त्तेनपद्मांत
कविघ्नांतकयमांतकान्वक्त्रेत्यादिनापूजयेत्॥ततोबलिंदद्यात्॥तदुक्तंफेत्कारिण्यां
पूतांतेनोक्तनादौचबलिमंत्रेणदापयेत्॥तत्रप्रकारः॥स्ववामेत्रिकोणवृत्तचतुर
स्रमंडलंकृत्वापूर्वोक्तमभ्यर्च्यतत्रविहितद्रव्यपूरितसाधारंपात्रंनिधायतद्वामां
गुष्ठानामिकाभ्यांस्पृष्ट्वा॥ॐह्रींएकजटेमहायक्षाधिपतयेममोपनीतबलिंगृह्णगृह्ण
ज्ञापयमममसर्वशांतिंकुरुकुरुटरछिंधिसर्वविघ्नान्गदरामानयह्रींस्वाहेतित्रिःपठि

त्याबलिंदद्यात्॥ नीलतंत्रे॥ प्रणवं पूर्वमुद्धृत्य हृल्लेखां च ततः परं॥ एकजटेपदांते च म
हाशब्दमुदीरयेत्॥ यक्षादिपदमाभाष्य पतये पदतो मया॥ उपनीतं पदं चोक्त्वा बलिंग
ह्णीति च द्विधा॥ गृह्णापय द्विधा चोक्त्वा मम सर्वपदं तथा॥ शांतिकुरु पदं चैव परविद्या
मनंतरं॥ द्विधा कृत्वेति च श्रूयात् त्रुटछिंधीति च द्विधा॥ सर्वादि च ततो जगद्वशमान
य शब्दतः॥ मायया स्वाहया युक्तो मंत्रो बलिविधौ स्मृतः॥ ततो ऽष्टोत्त मंत्रमष्टोत्तरश
तं जपेत्॥ स च श्रीं अं अं ह्रौं मायनमः॥ श्री ततो रुतस्य मालया निगदेनोपांशुनामा
नसं न वा ऽष्टोत्तरसहस्रं वा तं वा जपेत्॥ तथा च अष्टोत्तरशतं नापंयावली वितसं
ख्यया॥ सहस्रं वा जपेद्देवी नित्यपूजाविधौ पुनः॥ अष्टाकृष्टोद्विशतमष्टनं न जपेत्॥ त
था च॥ सहस्रं वाथ विशं वा जपेद्रहस्यमालया॥ तत्र जपरहस्यं यथा॥ मूलाधारास्वाधि
ष्ठानं मणिपूरकेषु यथासंख्यं बीजत्रयं व्याप्तं तडित्कोटिकरांगपरस्परानुस्यूतां विभाव्य
सर्वतेजोमयं परवत्कारं विश्रांतिरूपं ध्यात्वा तु चारयेत्॥ तथा च नीलतंत्रे॥ मंत्रध्यानं प्र

वक्ष्यामि जपात्सर्वहरादायकं॥ मंत्रध्यानमाम्नहेशानी शृण्वंते अलदोषतः॥ मूलमंत्रेषु हृल्ले
खां सूर्यकोटिसमप्रभां॥ स्वाधिष्ठाने पीतवर्णां हित्वा यं तु विभावयेत्॥ नाभौ नीलमूलसंकाशं
कूर्चबीजं महाप्रभं॥ अस्य बीजं हृदि ध्यायेत्कालाग्निसदृशप्रभं॥ मूलादिब्रह्मरंध्रांतसं
वीं विद्यां विभावयेत्॥ सूर्यकोटिप्रतीकाशां योगिनिर्दिष्टपूर्विकामिति॥ एवं यथाशक्ति
जप्त्वा जपं समर्पयेत्॥ ततो नित्यहोमं कुर्यात्॥ तदुक्तं सोमशंभुनागावल्यां॥ न तत्र सिद्धते
मंत्रो नाकृतश्च फलप्रदः॥ नानुहितो यष्ठते का मान्न तस्मात्रितयमर्चयेत्॥ पूजं या लन
ते पूजां जपात्सिद्धिर्न संशयः॥ विभूतिर्जाग्निको येन सर्वसिद्धिं च विंदति॥ नीलतंत्रेपि॥ नि
त्यहोमं प्रवक्ष्यामि सर्वार्थयेन विंदति॥ सपर्यां स्वस्य गोपाय बलिपूर्वं चरेद्विधिं॥ ततो
जपं तर्पणं च चरेत्साधकसत्तमः॥ बलिवैश्वदेवादिकं चैव आलस्यः समुपाचरेत्॥ विधि
वदग्निमानीय क्रव्यादिं मोननमस्तया॥ मूलमंत्रं समुच्चार्य कुंडे वा स्थंडिलेपि वा॥ कृतो
वा संस्कारे दग्धिं स्वाहति त्रितयेन तु॥ स्वाहांतेन त्रिधा कृत्वा षडंगहवनं ततः॥ ततो देवी

समावाह्य मूलेन षोडशाकृतिं ॥ तु कृत्स्नत्वा नमस्कृत्वा विसर्जयेद्बिंदुमंडले ॥ ततो विस
र्जनांतं कर्म समापयेत् ॥ अस्याः पुरश्चरणं लक्षजपः ॥ तथा च ॥ एवं कृत्वा हविष्याशी ज
पेल्लक्षमनन्यधीः ॥ तथा रहस्यमालयापि लक्षमेकं सदा जपेदिति ॥ रहस्यमाला यथा
अकस्माद्विहिता सिद्धिर्महाशंखाख्यमालया ॥ पंचाशन्मणिभिर्माला निर्मिता सर्वसि
द्धिदा ॥ तथा महाशंखाभावे पि स्फाटिकी कर्त्तव्या ॥ तथा च ॥ महाशंखेप्यशक्तश्चेत्स्फाटिकी
मालया जपेत् ॥ तारामंत्रेषु ॥ कुंकुमांकायाहानस्यावश्यकत्वं ॥ तथा च मत्स्यसूक्ते ॥ कुंकुमं
वन ज्ञात्वा ति महामंत्रं जपेन्नरः ॥ पंचत्वं जायते तस्य अथवा चानुलोमवेत् ॥ मायातंत्रे ॥
कुंकुमं धारयेच्छिर्षि लिखित्वा भूर्जपत्रके ॥ राजद्वारे सभायां च विजयी भवति ध्रुवं
एवमुक्तेन जप्त्वा तु तद्दशांशहोमं तद्दशांशतर्पणं तद्दशांशब्राह्मणभोजनं गुरुदक्षिणा
माचरेत् ॥ तदुक्तं सिद्धसारस्वते ॥ एवं जपं यथा कृत्वा दशांशं समिजोत्पलैः ॥ आज्याक्तैर्जु
हुयान्मंत्री तद्दशांशेन तर्पणं ॥ तत्रैव ॥ एवं तु जपं पुरा कृत्वा दशांशं मसितोत्पलैः ॥ आज्याक्तै

२७६

र्जुहुयान्मंत्री विध्यैवार्त्तिकृत्यानतः ॥ कालागुरुकर्बोपेतैर्निर्मलैर्गंधवारिभिः ॥ तर्पयेत्त्वप
रां देवीं तत्प्रकारमिहोच्यते ॥ जलेन वा लवित्विपयत्पाद्याद्यैरुदकात्मकैः ॥ संतर्प्य विधि
वद्देवीं परिवारान् सकृत् सकृत् ॥ अभिषेको यथा देवीमुख्यास्वमालामानं संपूज्य साधकोत्तमः
तारिणीं सिंचयामातिजलं मूर्ध्नि विनिक्षिपेत् ॥ ॥ अत्र मंत्रभेदाः ॥ एकवीराकल्पे ॥ लि
खेत् स्वं कूर्चसंयुक्तं रोहं त्रैगुण्यमेव च ॥ विधिवद्दिग्लुमहेशानां स्वरामात्मक्रमयोगतः ॥ एषा
मता महाविद्या सर्वसिद्धिप्रदा सतां ॥ रोहं प्रासादत्रैगुण्यं प्रणवं प्रणवविधिशक्तिरमा
बीजं शिवशक्तिर्भुवनेश्वरीबीजं ॥ ध्यानार्चनप्रयोगश्च तारिण्याः पूर्ववद्भवेत् ॥ प्रणवं
भुवनेश्वरी ह्रां कूर्चबीजं नमस्कारायै सकलदुस्तारं तारय प्रणवयुग्मं वह्निजाया मंत्रो
यं स्वरपादपः ॥ ध्यानं पूर्ववन्मुधा महदक्षिखा बीजमुद्धरेत् ॥ गगनं रोवसंयुक्तं बिंदुनादवि
भूषितं ॥ कूर्चबीजं च हृदयं ताराये च समुद्धरेत् ॥ सकलदुस्तरं तारयेति तथा पुनः तार
युग्मं वह्निजाया मंत्रोयं स्वरपादपः ॥ ध्यानपूजादिकं सर्वं पूर्ववत्समुपाचरेत् ॥ छिन्नस्यपु

२७७

रश्चरणं चतुर्लक्षं जपः ॥ तदुक्तं तत्रैव ॥ चतुर्लक्षं जपेन्नास्याः सिद्धयो हैनयंतिहि ॥ मायातं
त्रैलोक्ये जगवान्नुवाच ॥ तारा चोग्रा महोग्रा च वज्रा नीलासरस्वती ॥ कामेश्वरी भद्रकाली इ
त्यष्टौ तारिणी स्मृता ॥ उष्मवर्णगतो जीवो निगमस्वरसंयुतः ॥ नादबिंदुसमाक्रांतस्तत्व
रश्मिसमन्वितः ॥ कपिलं वामकर्णस्थं नादाख्यं बिंदुरीश्वरं ॥ पार्श्वालिं च तथानंतं रांतं प
रिकीर्त्तितं ॥ मध्यादिमायाकवचं द्वितीयं मंत्रमुध्धृतं ॥ विपरीतं त्रिधा ज्ञेयं कूर्चाद्यं चतु
रीयकं ॥ सापादिकवचांतं च पंचमं परिकीर्त्तितं ॥ मायामध्यगतं बहुं द्वितीयांतं च सप्तमं
अष्टमं कवचं मध्ये स्याद्देवं भेदाष्टकं भवेत् ॥ अस्यार्थः ॥ उष्मवर्णो हकारः आद्यो जीवो ॐकारः
निगमस्वर ऊकारः ॥ तत्वरश्मिर्वधूबीजं कपिलो हैंकारः रांतं तं फडंतं ॥ एतेन पंचाक्षरः
षडंतश्चेदेकाविद्या तेन पंचाक्षरः प्रकृतिः मध्यादीनिति नसापार्वधूफडूकूर्चं ॥ सा येति ति
नयधूसापार्फडूकूर्चं ॥ द्वितीयेति मायावधूकूर्चं फट् ॥ अष्टमेति यधूकूर्चसापार्फट् ॥ ऋषि
स्याद्दक्षकंठ छंदोऽनुष्टुप् देवता तथा ॥ श्रीं तु पत्नीं महेशानि चतुर्वर्गं विनियोजयेत् ॥ कालरुद्र

पिस्तंत्र त्रिनेत्र मुकुटेन यत्नना ॥ ध्यानपूजादिकं सर्वं पूर्ववत्समुपाचरेत् ॥ अष्टाक्षरस्यैव भेदोयं
फट्टीयत्र न तत्राष्टादशं तेयं न्यासे सर्वं प्रतिष्ठितं ॥ प्रणवं तारे तत तारेन नोबह्निवल्लभा ॥ त
दुक्तं गांधर्वे ॥ प्रणवं पूर्वमुध्धृत्य तारे तारे तथा तथा ॥ तथा स्वाहेति मंत्रोयं दशाक्षर उदाहृतः
अस्या ध्यानं स्वतंत्र तंत्रे ॥ श्यामवर्णां त्रिनयनां द्विभुजां वरपंकजे ॥ दधानां बकवर्णाभिर्वि
रूपांतिरावृतां ॥ शक्तिभिः स्मेरवदनां स्मेरमौक्तिकभूषणां ॥ रत्नपादुकयोर्न्यस्तपादद्वंद्वां
बुजयुगां स्मरेत् ॥ अस्य पूजादिकं सर्वं पूर्ववत् ॥ पुरश्चरणं तु दशाक्षरजपः ॥ तदुक्तं तत्रैव
वर्णलक्षं जपेद्धीमान्नियमेन तथाविधिः ॥ दशांशं जुहुयान्मंत्री घृताक्तैरक्तपुष्पकैः ॥ वा
ग्भवं भुवनेश्वरी प्रणवं वाग्भवं भुवनेश्वरी फट्स्वाहा ॥ तदुक्तं मातृकार्णवे ॥ वाग्भवं कमलदे
वी च तारकं वाग्भवं तथा ॥ हृल्लेखा चास्त्रमंत्रांते वह्निजायावधिर्मनुः ॥ अष्टाक्षरी मनुः प्रो
क्तो वेदमातुरनुत्तमः ॥ पंचांगान्यस्य मंत्रस्य पंचबीजैः प्रकल्पयेत् ॥ अष्टांशो वा स्वरैर्न्य
स्य कृतकृत्यो भवेन्नरः ॥ ध्यानपूजादिकं सर्वं पूर्ववच्च समाचरेत् ॥ मन्वस्य सूक्ते ॥ प्रणवं पूर्वमु

घस्लपत्नीयुग्मं तथैव च॥ महापद्मेपदं ब्रूयात् पद्मालयतीपदं ततः॥ मायेस्वाहेतिमंत्रोयंमंत्रः
सप्तदशाक्षरः॥ पूजांपूर्ववद्देवि अर्द्धरात्रेचतुष्पथे॥ तदा यमस्यास्वरे यस्तु सस्याकृतकवि
स्तथा॥ हंसः प्रणवंमायावधूबीजंकूर्चहंसः॥ पंचाक्षरीहंसाद्यं तामहोदया॥ तदुक्तंस्वछं
दसंग्रहे॥ शिवबीजंमहेशानीशक्तिबीजं ततःपरं॥ बिंदुसर्गसमायुक्तंवेदाद्यंतदधः
क्रमात्॥ मायास्त्रीयमर्मबीजांतेहंसबीजमुदाहृतं॥ एषा त्वक्षारीविद्याकथितानुविदु
र्लभा॥ पंचाक्षरीमहाविद्या हंसाद्यंतामहोदया॥ केवलंत्वत्रयत्नेनतवस्नेहात्प्रकीर्तिता
अनयोजपपूजादीन् पंचाक्षरीवदाचरेत्॥ ॥अथरहस्यपुरश्चरणं॥ ॥यथा॥ अ
थवान्यप्रकारेणपुरश्चरणमिष्यते॥ कृत्वैकाशनिवारेवानरमुंडंसमाहितं॥ पंचगव्येन
प्रक्षालितंचंदनाद्यैविशोधयेत्॥ निक्षिप्य भूमौ हस्तार्द्धमानतः कारनेचयेत्॥ तत्र तद्दिवसेरात्रौ
सहस्रंयदिमानतः॥ एकाकी प्रजपेन्मंत्रं सत्नवेत्कल्पपादपः॥ अथवान्यप्रकारेणपुरश्च
रणमिष्यते॥ शाकमानीतद्वादिति तिनैवपरिखस्यच॥ तद्दिनात्तद्दिनं यावत् तावद्दीनरं

शतं॥ सत्नवेत्सर्वसिद्धीशोनात्रकार्याविचारणा॥ अथवान्यप्रकारेणपुरश्चरणमिष्यते॥
अष्टम्यांचचतुर्दश्यांपक्षयोरुभयोरपि॥ सूर्योदयंसमारभ्याचस्तूर्योदयावधि॥ ताव
ज्जप्त्वानिरातंकः सर्वसिद्धीश्वरोभवेत्॥ अथवान्यप्रकारेणपुरश्चरणमीष्यते॥ शारदा
च चतुर्थ्यादि नवम्यंतं विशेषतः॥ नक्तितः कृतयित्वातुरात्रौतावसहस्रकं॥ उपदेशकी
वितनेकेवलं तिमिरालये॥ अष्टम्यादिनवम्यंतमुपवासपरोभवेत्॥ मुंडमालातंत्रे॥
कृष्णाष्टमींसमारभ्यावत्कृष्णाष्टमीं भवेत्॥ सहस्रसंख्याजप्ते तु पुरश्चरणमिष्यते॥ कृ
ष्णांचतुर्दशींप्राप्यनवम्यंतमहोत्सवे॥ अष्टमीनवमीरात्रौपूजांकुर्याद्विशेषतः॥ दशम्यां
पारणंकुर्यान्मत्स्यमांसादिभिर्युतः॥ षट्सहस्रंजपेन्नित्यं नक्तिनावपरायणः॥ चतु
र्दशींसमारभ्यावदन्याचतुर्दशी॥ तावज्जप्तातुईशानीपुरश्चरणमिष्यते॥ केवलंज
पमात्रेणमंत्राः सिद्धाभवंतिहि॥ ॥अथवीरसाधनं॥ ॥सूर्योदयंसमारभ्या
वदस्तूर्यास्तयोभवेत्॥ तावसंख्याजपेनास्यपुरश्चरणमिष्यते॥ तदुक्तंवीरतंत्रे॥ अ

दृष्ट्वां च चतुर्दशीं पक्षयोरुभयोरपि॥ कृष्णपक्षे विशेषेण साधयेद्वीरसाधनं॥ तस्माद्
प्रथमेयामे गते च सुरसुंदरी॥ शवं वापि चितां वापि नीत्वा गत्वा यथासुखं॥ साधयेत्स्थि
तमंत्री मंत्रध्यानपरः शुचिः॥ न यंत्रैव प्रकर्तव्यं हास्यं तत्र विवर्जयेत्॥ चतुर्दिशं निरी
तमंत्रमेव समभ्यसेत्॥ ॥अथ पूजाक्रमं॥ ॥सामिषान्नं गुडं छागं सुरापायससपिष्ट
नानाफलं च नैवेद्यं स्वस्वकल्पोक्तसाधितं॥ चितास्थानं समानीय सुहृद्भिः शस्त्रपाणिभिः
समानगुणसंपन्नैः साधकैर्वीतभीः स्वयं॥ योगिनीहृदये॥ बल्यर्थं सामिषान्नं च गुडं छागं
तथा मधु॥ पिष्टकं परमान्नं च पयो भूजं फलं तथा॥ समराशं बलिं कृत्वा चतुःपात्रं च तद्दि
शि॥ पात्रत्रयं सदा सम्यक्स्थापयेन्मनुनामुना॥ गुरुं वाप्यानतरं वापि ब्राह्मणं वापि सुव्र
तान्॥ अन्यानपि च रक्षार्थं क्षिप्रं दूरे निवेशयेत्॥ चितालक्षणं यथा॥ असंस्कृताचिता
चाण्डालानां संस्कारसंस्कृता॥ चांडालादिषु संप्रोक्ता केवलं शीघ्रसिद्धिदा॥ अत्राधिकारिल
क्षणं यथा॥ महाबलो महाबुद्धिर्महासाहसिकः शुचिः॥ महास्वच्छो दयावांश्च सर्वभूतहि

तेरतः॥ ततः सामान्यार्घ्यं विधाय स्वस्तिवाचनपूर्वकं संकल्पं कुर्यात्॥ ॐ अद्येत्यादि अमुकगो
त्रः श्री अमुकदेवशर्माहं श्मशानसाधनमहं करिष्ये॥ यस्माल्लंकारभूषाद्यैः भूषितः पूर्वसंमुख
आस्थाय तन्मूलमंत्रेण प्रोक्षणं यागभूमिषु॥ मूलमंत्रेण फट्कारेण तर्पणं॥ गुरुपाददत्तो वामे
गणेशं बटुकं तथा॥ योगिनीं नारदकं चैव वामपादपुरःसरं॥ अस्त्रमंत्रेण स्थानं रक्षय
थास्त्रमंत्रेण मंत्रज्ञो रक्षामालनिकारयेत्॥ ततः पुष्पांजलित्रयं क्षिपेत्॥ तद्रूपं वीरतं
त्रे॥ ये चात्र संस्थिता देव्या राक्षसाश्च भयानकाः॥ पिशाचाः सिद्धयो यक्षा गंधर्वाप्सरसा
गणाः॥ योगिन्यो मातरो भूताः सर्वाश्च खेचरा स्त्रियः॥ सिद्धिदास्तामवंतु तत्तथा च य
मरकाः॥ प्रणम्य मनुना तेन पुष्पांजलित्रयं क्षिपेत्॥ श्मशानाधिपतिं पश्चात्तत्रैव संपा
तभैरवं॥ तद्यथा॥ पूर्वे श्मशानाधिपतिं पंचोपचारैः संपूज्य अनेन मंत्रेण बलिं दद्या
त्॥ तद्यथा॥ ॐ ह्रूं श्मशानाधिपते इमं सामिषान्नं बलिं गृह्ण गृह्ण गृह्णापय गृह्णापय विघ्ननिवार
णं कुरु कुरु सिद्धिं मे प्रयच्छ स्वाहा॥ ततो दक्षिणस्यां दिशि भैरवं पूजयेत् संपूज्य॥ ॐ ह्रीं भै

रवक्त्रयानकइमं बलिमित्यादि॥ ततः पश्चिमे पूर्ववत्कालभैरवं पूर्ववत्संपूज्य॥ ॐ क्रूं कालभै
रवश्मशानाधिपइमं बलिमित्यादि॥ तथा च राद्बीजं ततः पश्चात् श्मशानाधिपस्तं तदं
इमं मंते स्वामिषान्नं बलिं गृह्ण ततः परं॥ गृह्ण गृह्ण पय हूं हूं विघ्ननिवारणं ततः॥ कुरु
सिद्धिं मे युतं मांतं प्रयच्छ स्वाहा इत्यावितं॥ प्रणवाद्येन मनुना प्रथमो बलिमाहितः॥ मायां
त्रलवरुस्य तैलेन मंत्रमालिख्य धारयेत्॥ कंठदेशे ततो मंत्रसिद्धस्यात्शंकरोदितं
इत्येवं कथितं सम्यक् केवलं तव भक्तितः॥ एकेन तु कृतार्थः स्यात् बहुभिः किमु सुव्रत॥
अथान्यं संप्रवक्ष्यामि मंत्रसिद्धेस्तु कारणं॥ मातृकापुटितं कृत्वा स्वमंत्रं प्रजपेत्सुधीः॥ क्र
मोत्क्रमशतात्तस्यानंदं ते केवलं मनुं॥ एवं तु प्रत्यहं कुर्यात् यावल्लक्षं समापयेत्॥ नि
श्चितं मंत्रसिद्धिः स्यादित्युक्तं तंत्रवेदिभिः॥ ॥अथ मंत्रसिद्धिलक्षणमुच्यते॥ ॥
मनोरथानामक्लेशसिद्धिरुत्तमलक्षणं॥ मृत्यूनां हरणं तद्वद्देवतादर्शनं तथा॥ प्रयो
गानामक्लेशसिद्धेर्लक्षणं परं॥ परकायप्रवेशश्च पुरप्रवेशनं तथा॥ उत्क्रमणमे
वं हि चराचरपुरे गतिः॥ खेचरीमेलनं चैव तत्कथाश्रवणादिकं॥ भूछिद्राणि प्रपश्ये
त तद्वद्भ्मस्य लक्षणं॥ ख्यातिर्भूषणवाहादिनामनः सुचिरविज्ञनं॥ नृपाणां तत्कुलानां
च वशीकरणमुत्तमं॥ सर्वत्र सर्वलोकेषु चमत्कारकरं सुखी॥ रोगापहरणं कुर्यात्
विषापहरणं तथा॥ पांडित्यं जनते मंत्री चतुर्विधमयत्नतः॥ वैराग्यं च मुमुक्षुत्वं स्यामि

तास्सर्ववरप्रता ॥ अष्टांगयोगाभ्यसनं भोगेच्छापरिवर्जनं ॥ सर्वभूतानुकंपा च सर्वत्रा
दिगुणेरथो ॥ इत्यादिगुणसंपत्तिर्मंत्रसिद्धस्य लक्षणं ॥ ख्यातिर्वाहनभूषादिलाभश्च
चिरजीवनं ॥ नृपाणां मंगलानां च वशत्वं लोकवश्यता ॥ समहैश्वर्यधनित्वं च पुत्रदारा
दिसंपदः ॥ अधमासिद्धयः प्रोक्ता मंत्रिणां प्रथमन्त्रमिका ॥ सिद्धमंत्रस्य यः साक्षाच्छिवो
नात्र संशयः ॥ बध्वा तु यो निबध्नातं संकोच्याधारपंकजं ॥ तद्धमन्नो मंत्रवर्णान्कुर्यात
च्छगतागतान् ॥ अलरंध्रावधिध्यात्वा वायुमापूर्य कुंभयेत् ॥ सहस्रं प्रजपेन्मंत्रं मंत्रदोषो
पशांतये ॥ तथा ॥ एवं दोषेषु प्राप्तेषु मायां कामं तथापि वा ॥ द्विस्वाचादौ श्रियं चैव तद्दूष
णविमुक्तये ॥ तथा ॥ तारासंपुटितो वापि दुष्टमंत्रोपि सिध्यति ॥ यस्य यत्र न वेशक्तिः सोपि
मंत्रोस्य सिध्यति ॥ तथा ॥ प्रणवो मातृका देवी हृल्लेखेस्यमृततत्रयं ॥ अमृतत्रयसंयोगाद्दु
ष्टमंत्रोपि सिध्यति ॥ ॥ अथ होमार्थकुंडनिर्णयः ॥ ॥ तत्रतावद्गृहनिर्णयः
गौतमीये ॥ भूमेः परिग्रहं कुर्यात्यावदायतनं भवेत् ॥ शुक्लमृत्स्नातु या भूमी ब्राह्मी सा

परिकीर्तिता ॥ क्षत्रिया रक्तमृद्भूमिर्नीला हि वैश्या प्रकीर्तिता ॥ कृष्णा भूमिर्भवेच्छूद्रा चतुर्धा हि
प्रकीर्तिता ॥ ब्राह्मी सर्वार्थसिद्धिः स्यात्क्षत्रिया राज्यदा मता ॥ धनधान्यकरी वैश्या शूद्रा तु नि
दिता भवेत् ॥ गणेशाविमर्धिष्ण्यां ॥ वासोः संगृह्य पर्वस्यां ऐशान्यामुत्तरेस्य वै ॥ दिशो संकल्प
येन्मंत्री मंडपं च विचक्षणः ॥ नवहस्तं प्रमाणं वा सप्तहस्तमथापि वा ॥ पंचहस्तप्रमाणं वा
चतुरस्रं समंततः ॥ पंचहस्तं तु एककुंडपक्षे ॥ तदुक्तं तंत्रे ॥ एककुंडमते नान्यत्पंच
हस्तं गृहं भवेत् ॥ तदेककुंडं स्यात् हस्तमुत्तरभागे प्रशस्तं ॥ यथा ॥ अथोत्तरे तथा कुंडमे
कं वेदस्त्रमुद्धरेत् ॥ जपहोमेतु तत्कुर्यान्निग्रहं मध्येन दूषणं ॥ तथा वसिष्ठसंहितायां ॥
धाम्नो रीशानभागे तु मंडपं रचयेत्सुधीः ॥ षड्ढादशाष्टत्रिहस्तैः षोडशैर्वा समंततः
चतुर्द्वारसमायुक्तं तोरणैश्च रलंकृतं ॥ तत्र त्रिभागमिते क्षेत्रे रत्निमात्रसमुन्नतां ॥ च
तुरस्रां ततो वेदीं मंडपाय प्रकल्पयेत् ॥ ॥ अथ प्रसंगात्नवकुंडानि ॥ ॥ त
त्र शारदायां ॥ प्राग्रूक्षे मंडपे विद्वान्वेदिकाया बहिस्त्रिधा ॥ चतुरस्रं योनिमर्द्धचंद्रं त्र्यस्र

त्तं सुवर्तुलं ॥ षडस्रं पंकजाकारं महास्त्राणि तानि नामतः ॥ आचार्यकुंडमध्ये स्याज्जौरी प्रति
महेंद्रयोः ॥ हस्तमात्रां मितां भूमिं पूर्ववत्परिसूत्रयेत् ॥ समंतात्कुंडमेतत्तु चतुरस्रं प्रना
यहेः ॥ चतुरस्रीकृतं क्षेत्रं पंचधा विभजेत्सुधीः ॥ अस्येस्तुरस्रात् एकांशं कोणार्द्धं च प्रमाण
तः ॥ भ्रामयेत्कोणमानेन तथा सदपि मंत्रवित् ॥ सूत्रयुग्मं ततो दद्यात् कुंडं योनिनिभं च
येत् ॥ चतुरस्रीकृतं क्षेत्रं दशधा विभजेत्सुधीः ॥ एकमेकं त्यजेद्दिक्षां मध्यत्र ध्यं च तंत्रवित्
मासूत्रं पातयेद्वृत्तमानाद्भ्रामयेत्ततः ॥ अर्धचंद्रनिभं कुंडं रमणीयमिदं भवेत् ॥ अ
ग्नेसंमुखे प्रदिक्षु सदाराकारधनुर्वत् ॥ इति न्हष्याख्यानात् ॥ तथा च मासूत्रं पातयेदग्ने
ग्नेराशावाकृतयोर्युतः ॥ चतुर्धा निर्दिते क्षेत्रे मसेहृत्य पार्श्वयोः ॥ एकैकमंशं तन्माना
द्दद्यात्तो लांछयेत्ततः ॥ सूत्रयुग्मं बुधः कुर्यात् त्र्यस्रं कुंडमुदाहृतं ॥ अष्टधा विभजेत्क्षेत्रं
मध्यसूत्रस्य पार्श्वयोः ॥ भागं न्यसेदेकमेकं मानेनानेन मध्यतः ॥ कुर्यात्स्पार्श्वयोर्मध्ये
चतुष्कं मंत्रवित्तमः ॥ सूत्रषट्कं ततो दद्यात् षडस्रं कुंडमुत्तमं ॥ चतुरस्रीकृतं क्षेत्रं विभजेत्सा

ष्टादशांशतः ॥ एकं भागं बहिर्न्यस्य भ्रामयेत्तेन वर्तुलं ॥ वृत्तानि कर्णिकादीनां बहिस्त्रीणि
प्रकल्पयेत् ॥ पद्मकुंडमिदं प्रोक्तं विलोचनमनोहरं ॥ बहिरिति मध्ये बहिः शाद्धो मध्यवाच
कः ॥ अव्ययानामनेकार्थत्वात् इति गुरवः ॥ कर्णिकादीनि वृत्तानि बहिर्बहिः कुर्यादिति
हः ॥ तथा च ॥ चतुरस्रे षड्भक्ते कुर्याद्वृत्तचतुष्टयं ॥ कर्णिका केसरयोर्द्वितीये पत्रका
स्यथा ॥ तदग्राणि चतुर्थेस्युर्दलान्येवं प्रकल्पयेदिति च ॥ पूर्वोक्तं विभजेत्क्षेत्रं चतुर्विंश
तिभागतः ॥ एकं भागं बहिर्न्यस्य चतुरस्रं प्रकल्पयेत् ॥ अंतस्थचतुरस्रस्य कोणार्द्धप्रमा
णतः ॥ बाह्यस्य चतुरस्रस्य कोणान्यां परिलांछयेत् ॥ दिक्षु प्रति यथान्यायमष्टौ सूत्राणि पा
तयेत् ॥ महास्त्रं कुंडमेतद्धि तंत्रविद्भिरुदीरितं ॥ कुंडानां यादृशं रूपं मेखलानां च तादृशं
एवं प्रोक्तानि कुंडानि कल्पतेस्युः कृस्रुचौ तथा ॥ प्रकल्पयेत्स्रुचौ यागे वसुमानेन वर्त्मना
श्रीपर्णिशिंसपाक्षीरद्रुमाखदिरविकंकतमंगुरुः ॥ गृहीत्वा विभजेद्धस्तमात्रं षड्विंशतां पुनः ॥
हस्तमात्रं व्याकृमात्रं ॥ तथा चागस्त्ये ॥ स्रुवं बाहुप्रमाणेन होमार्थं विदधीत वै ॥ विंशत्संख्यौ न

वेद्यंशो वेदिरस्त्रे रहस्तिर्निवेत् ॥ एकांशेन मितः कंठः समन्तात्परितं मुखं ॥ वेदित्र्यंशेन वि
स्तारः कंठस्य परिकीर्त्तितः ॥ अग्रकंठसमानं स्यात् मुखे मार्गं प्रकल्पयेत् ॥ कनिष्ठांगुलि
मानेन सर्पिषो निर्गमाय च ॥ वेदिमध्ये विधातव्या नागेनैकेन कर्णिका ॥ विदधीत बहि
स्तस्याः एकांशेनाग्निलोचरं ॥ तस्य नागं त्रिभिर्नागैर्वर्त्तनं दशांशतोद्धृतिः ॥ अंशेनैकेन परि
तो दलानि परिकल्पयेत् ॥ मेखलामुखरेखोः स्यात् परितो दशमानतः ॥ षड्विंशेंशैः पृष्ठ
भागो वेद्याः कूर्माकृतिर्निवेत् ॥ हंसस्य वा हस्तिनो वा योत्रिलोप्यामुखं लिखेत् ॥ मुखस्य पृ
ष्ठभागे स्यात् संप्रोक्तं लक्षणं स्रुवः ॥ स्रुचश्चतुर्विंशतिभिर्विभागैरेव येध्रुवं ॥ द्वाविंशत्यो
दंडमानसंदैर्घ्यं तस्य कीर्त्तितं ॥ चतुर्भिर्दिशो वीनाहः कर्षार्धं चाहितं बिलं ॥ अंशद्वयेन लि
खनेस्तं के मृगपदाकृतिः ॥ दंडमूलाग्रयोर्गडौ न चेत्कंकणभूषिता ॥ तयोरभावे तु वास्ति
पलाशपत्रैर्निछिद्रैरुधिरस्रुवस्रुचौ तथा ॥ विद्भाश्वत्थपत्रे संक्षिप्ते होमकर्मणि ॥ ॥
अथ कुंडानां विशेषफलानि ॥ ॥ तत्र निबंधे ॥ सर्वसिद्धिकरं पुंसां चतुरस्रमुदाहृतं ॥

पुत्रप्रदं योनिकुंडं मर्द्धेंदुजं भ्रमनप्रदं ॥ शत्रुक्षयकरं त्र्यस्रं वर्त्तुलं शांतिकर्मणि ॥ छेदमार
णयोः कुंडं षडस्रं पद्मसन्निभं ॥ विशिष्टं रोगशमनं कुंडमष्टास्रमादिशेत् ॥ ॥ अथ का
म्यहिमार्थं कुंडनियमः ॥ ॥ तद्रूपं सिद्धसारस्वते ॥ शांतौ दांतौ तथारोग्ये कुंडं च चतु
रस्रकं ॥ आकर्षणे त्रिकोणं स्यात् दुर्वावर्त्तुलं तथा ॥ पारणे च तथा योन्यं वर्त्तुलं मंत्रिभिः
सदा ॥ तंत्रांतरे ॥ उदीच्यां पौष्टिके कुंडं वारुणे शांतिकादिषु ॥ वैरिणां नाशनेर्द्धचंद्राख्यं स्मृ
तं त्र्यस्रमीरितं ॥ चतुरस्रं तु सर्वेषां केचिदिच्छंति तांत्रिकाः ॥ चतुरस्रे महेशानि सर्वक
र्माणि साधयेत् ॥ तथा ॥ सर्वाधिकारिकं कुंडं सर्वदं चतुरस्रकमिति ॥ गृहादिकरणे हस्त
विषयो ॥ यथागोतमीये ॥ रथादिरोणिकां चैव पीतं सकलमेव च ॥ मात्रांगुलसमायु
क्तं नान्येनापि कदाचन ॥ मुष्टिरत्निप्रमाणेन यत्किंचित्कथितानीह ॥ यजमानस्य कर्त्त
व्यं नान्यस्यापि कदाचन ॥ यथा मणिक्रियायामनुक्रमणि कर्तृदिमणिरूपयजमानस्या
द्विदुषमेयनिर्णयः ॥ चतुर्विंशत्यंगुलाद्य हस्तं तंत्रविदो विदुः ॥ कर्तुर्दाहिणहस्तस्य मध्य

मांगुलिपर्वणः॥मध्यस्य दैर्घ्यमानेन मात्रांगुलमुदाहृतं॥यवमानास्तन्निधोपुनः यवानांतं
डुलैरेकमंगुलं चाभिनिर्णयेत्॥अदीर्घयोतितैर्हस्तश्चतुर्विंशतिरंगुलैः॥यवयसोनुक्रमेव
पुनः॥अरत्निर्हस्तोर्नवेज्ञेयं दंमध्यमः सप्तत्रिर्यवैः॥कन्यसं यष्टिरुद्दिष्टमंगुलंमुनिसत्त
मः॥सहस्रेखलुहोतव्येकुर्यात्कुंडं करात्मकं॥द्विहस्तमयुते तच्च लक्षहोमे चतुःकरः॥
षट्करेवेदलक्षं चाष्टकरे दशलक्षकं॥दशहस्तं तु कोट्यां वै हस्तसंख्याव्यवस्थिता॥द
शहस्तात्परं कुंडं नास्तिहोमे महीतले॥शारदायां॥कोट्यामष्टकरं स्मृतमितिर्व्यस्यग
कत्वेनबोद्धव्यं॥तथा एकहस्तमितं कुंडं लक्षहोमे विधीयते॥अत्रापिअयुतहोमे जघन्
यकरवीरादिहोमे च बोद्धव्यं॥तथा॥मुष्टिमात्रमितं कुंडं शतार्द्धे च प्रचक्षते॥शतहोमे
रत्निमात्रं हस्तमात्रं सहस्रके॥द्विहस्तमयुते लक्षे चतुर्हस्तमुदाहृतं॥दशलक्षे तु षड्ढ
स्तं कोट्यामष्टकरं स्मृतं॥एकहस्तमितं कुंडे दशलक्षं विधीयते॥लक्षाणां दशकं यावत्
तावद्धस्तेन वर्धयेत्॥द्विहस्तादिकुंडमानं तु गौतमीये॥पूर्वपूर्वस्य कुंडस्य कोणसूत्रं तु

यद्भवेत्॥उत्तरोत्तरकुंडानां मानं च तदुदीरितं॥तथा कर्णसूत्रप्रमाणेन द्विहस्तं कुंडमु
द्धरेत्॥सर्वकुंडेषु सर्वत्र वर्द्धयेद्विधिनामुना॥कुंडकरणे विशेषमाह गौतमीये॥ततः
कुंडं खनेन्मंत्री यथाशास्त्रविधानतः॥तस्याप्यस्य गात्रं च शिरो देशं प्रमाणतः॥शि
रोघाते न वेन्मृत्युः पिंडेषु पिंडघातनं॥पृष्ठे तु दुःखसंभूतिः कोडे सर्वार्थसाधनं॥नाभि
शिरआदिनिर्णयो यथा॥वास्तुप्रमाणेन तु गात्रं केन वामेन शेते खलु नित्यकालं॥त्रि
त्रिस्त्रमासैः परिवृत्तभूमौ॥तं वास्तुनागं प्रवदंति सिद्धाः॥भाद्रादिके शावदिकुशिरास्या
त्समागादिकेषु त्रिषु यास्यमृद्दं॥प्रत्यक्शिरास्तात्खलु फाल्गुनादौ मेषादिको देवशि
राः सनागाः॥यावानकुंडस्य विस्तारः खननं तावदीरितं॥खातादिके तु नेकोगीरवा
तहीने धनक्षयः॥चक्रकुंडे तु संतापो मरणं छिन्नमस्तके॥मेखलारहिते शोको ह्यधि
के वित्तसंक्षयः॥नाभिविनाशकं कुंडं प्रोक्तं योन्याविनाकृतं॥अपत्यध्वंसनं प्रोक्तं कुं
यत्कंठवर्जितं॥सात्विकी मेखला पूर्वा द्वितीया राजसी स्मृता॥तृतीया तामसी प्रोक्ता मेख

खलानां तु निर्णयः॥ कुंडानां मेखलास्तिस्रो मुष्टिमात्रे तु ताः क्रमात्॥ उच्छ्रायायामतो ज्ञेया
श्चैकार्द्धांगुलसंमिताः॥ अरत्निमात्रकुंडेषु त्रिद्व्येकांगुलात्मिकाः॥ एकहस्तमिते कुंडे वेदाग्नि
नयनांगुलाः॥ कुंडे द्विहस्तिते ज्ञेया वसुवेदद्व्यंगुलाः॥ चतुर्हस्ते तु ता ज्ञेया वसुत
र्कयुगांगुलाः॥ कुंडे षट्स्वकरे तास्तु पंक्त्यष्टद्व्यंगुलक्रमात्॥ वसुहस्तमिते कुंडे भानुपंक्ति
द्व्येकांगुलाः॥ दशहस्तमिते कुंडे मनुभानुदशांगुलाः॥ विस्तारात्सर्वतो ज्ञेया मेखला
सर्वतो बुधैः॥ हित्वाग्रे योनिवासान्तु पर्यन्तं च पत्रवत्॥ मेखलानां न वेदं तः पद्दितो
नेमिरंगुलाः॥ एकहस्तस्य कुंडस्य वर्द्धयेत्तां क्रमात्सुधीः॥ दशहस्तांतमन्येषामर्द्धांगु
लवसात्पृथक्॥ एकहस्तस्य एकहस्तांतकस्य नाभियोन्योरेकमानस्य दृष्टत्वात्॥ गौतमीये
प्रथमे मेखले योनिकुंडे हि हित्वाग्रतः॥ कुर्यात्क्रमो ह्यवक्त्रां तु कुंडविस्तरलक्षणं॥ मुष्ट्य
रत्न्येकहस्तानां कुंडानां योनिरीरिता॥ षट्चतुर्द्व्यंगुलायामविस्तारोन्नतिशालिनी॥ एकां
गुलं तु योन्यग्रं कुर्यादीवरधोमुखं॥ एकैकांगुलतो योनिं कुंडे षड्बुवर्द्धयेत्॥ यवव

यप्रमाणेन योन्यग्रमपि वर्द्धयेत्॥ गणेशाविमविल्पं॥ मेखलानां बहिःस्थानां स्थलमिष्ट
विधीयते॥ चतुरस्रस्थलाराख्यं नालं मध्ये सरंध्रकं॥ स्थूलमूलं तु सूक्ष्माग्रं तत्वालं स्यात्
नोहरं॥ बाह्यस्थमेखलाबाह्यस्थलादारभ्य कारयेत्॥ तथा स्थलादारभ्य नालं स्याद्यो
न्यामध्ये सरंध्रकं॥ सरंध्रमिति तुन यत्र संबध्यते॥ तदुक्तं गौतमीये॥ स्थलादारभ्य नालं स्या
सरंध्रं योनिमध्यतः॥ सूक्ष्माग्रं स्थूलमूलं च सरंध्रं नालमिष्यते॥ योन्यामध्ये बिलं कुर्यात्
तदास्याद्दिसंततकं॥ मध्यतो मध्यपर्यंत इत्यर्थः॥ तद्यथा॥ ततो ध्यात्वा यथाविधि लेपहीनता
गजोष्ठेवत्सछिद्रामध्यमोन्नता॥ सरंध्रमिति मध्ये मेखलाया मितिशेषः॥ तथा च॥ नाग
मेखलयोर्मध्ये परिधेः स्थापनाय च॥ रंध्रं कुर्यात्त्रिधा विद्वान् द्वितीयमेखलोपरि॥ प
रिधिस्त्वामं त्राः विधयः रुक्मवः सत्यचोऽनामुष्ट्यरत्न्येकहस्तानां नाभिरुत्सेधतारतः
नेत्रवेदांगुलोपेता कुंडे ब्रह्मसु वर्द्धयेत्॥ नाभिस्तत्र त्रिधा कृत्वा मध्ये कुर्वीत कर्णिकां
बहिरंशाद्वये नाभेः पद्माणि परिकल्पयेत्॥ नवकुंडपक्षे योनिनियममाह सिद्धांतशे

खरे॥ ईशाग्नियमादिकुंडे योनिः सौम्यमुखी स्मृता॥ योनिः पूर्वमुखान्येषु रक्षश्चैशान्येतरा
स्मृता॥ हस्तमात्रं स्थंडिलं वा संहिते होमकर्मणि॥ अंगुलोच्छ्रयसंयुक्तं चतुरस्रं समंत
तः॥ आदाय दक्षिणे पाणौ स्रुवं त्रिमधुरं हविः॥ प्राङ्मुखो वह्निजायांतं जुहुयान्न स्रुपाणि
ना॥ नमोंतेन नमो दद्यात् स्वाहांते द्विठमेव च॥ पूजायामाहुतौ चापि सर्वत्रायं विधिः स्मृतः
नमोंतेति पौराणिकपरं॥ तथा च ब्रह्मपुराणे॥ ॐकारादिसमायुक्तं नमस्कारांतकीर्तितं॥
स्वनाम सर्वदेवानां मंत्रमित्यभिधीयते॥ यथा इदं पाद्यं ॐ आदित्याय नमः इदमर्घ्यं॥ ॐ
आदित्याय नम इत्यादि न तु ॐ आदित्याय नमः इदं पाद्यं॥ ॐ सूर्याय नमः इत्यादि॥ तांत्रिके
नायं नियमः॥ अर्घ्यादौ वैकल्पिकं स्यात् क्वचित् क्वचित् नमः॥ ॐ रं नमः इत्यत्र इत्यादेरुक्तेः स्या
त्॥ मंत्रेणोंकारपूतेन स्वाहांतेन विचक्षणः॥ स्वाहावसाने जुहुयात् ध्यात्वैव मंत्रदेवतां॥ ॐका
रपूतेनेति इदमपि वैदिकमंत्रपरं॥ अन्यथा मंत्रांतरप्रसंगात् तेन स्वाहांत मंत्रे स्वाहांत
रं न प्रवक्तव्यं॥ स्रुवस्य पंचांगुलं तच्चाग्रं स्ववृत्त्या धार्यं॥ तथा पंचांगुलं बहिस्तस्य स्था

धारयेच्छं स्ववृत्त्या॥ अत्र होमसंख्यानि नोक्ता॥ तत्र च संख्यानुक्तौ कृते शतं सहस्रं वा जपादि
षु॥ ॥अथ होमप्रयोगः॥ ॥आचार्योलंकृतो यागमंडपद्वारमागत्य सामान्यार्घ्यं
विधाय द्वारपूजां विधाय च गृहं प्रविश्य तत्र कल्पोक्तदेवतां ऐशान्यां दिशि हस्तप्रमाणां वे
दिकां विधाय तदुपरि घटं संस्थाप्य यथाशक्ति देवतां ऐशान्यां दिशि हस्तप्रमाणां वेदिकां वि
धाय तदुपरि घटं संस्थाप्य यथाशक्ति संपूज्य वीक्षणादिभिः कुंडं संस्कुर्यात्॥ तथा च ब्रह्म
संहितायां॥ होमकांडे॥ ऐशान्यां वेदिकां हस्तविस्तारोन्नतिशालिनीं॥ कृत्वास्मिन्स्थापये
त्कुंभं यथोक्तक्रमयोगतः॥ तत्र संपूजयेद्देवं यथाविभवोपचारकैः॥ ततो होमं प्रकुर्वीत
देवतासन्निधानतः॥ वीक्षणं मूलमंत्रेण शरेण ताडनं मतं॥ तेनैव प्रोक्षणं कार्यं ब्रह्मण
अभ्युक्षणं मतं॥ ततो मूलमुच्चार्य कुंडाय नमः॥ इति कुंडं संपूज्य तारादौ तत्तद्देवता नाममुच्चा
र्य कुंडाय नम इति वदेत्॥ कुंडमध्ये प्रागग्रा उदगग्राश्च तिस्रस्तिस्रो रेखाः कुर्यात्॥ प्राग
ग्रेषु मुकुंदेशपुरंदरान् प्रादक्षिण्येन संपूज्य उदगग्रेषु ब्रह्मवैवस्वतेंदून् पूजयेत्॥ सुंद

रीपद्धतौ सर्वत्र षड्दृतारी षड्दृतारी च ऐं ह्रीं श्रीं क्लीं ऐं क्लौं सौः अनलेन नमः ॥ ततः कुंडमध्ये
षट्कोणवृत्तं त्रिकोणं तद्बहिरष्टदलं पद्मं तद्बहिश्चतुरस्रं चतुर्द्वारसमेतं लिखित्वा तद्
परिमलेन पुष्पांजलिं दत्वा ॥ सुंदरीपद्धतौ ॥ यांजया ॥ ततः सर्वाणि प्रणवेनाभ्युक्ष्य योरा
गपीठमर्चयेत् ॥ तथा ॥ कर्णिकोपरि आधारशक्त्यादीन् संपूज्य अग्न्यादिकोणेषु ॐ धर्मा
य नमः ॥ ॐ ज्ञानाय नमः ॥ ॐ वैराग्याय नमः ॥ ॐ ऐश्वर्याय नमः ॥ पूर्वादिदिक्षु ॐ अधर्माय
नमः ॥ ॐ अज्ञानाय नमः ॥ ॐ अवैराग्याय नमः ॥ ॐ अनैश्वर्याय नमः ॥ ॐ अनंताय
नमः ॥ ॐ पद्माय नमः ॥ ॐ अर्कमंडलाय नमः ॥ ॐ द्वादशकलात्मने नमः ॥ ॐ सोममंड
लाय नमः ॥ षोडशकलात्मने नमः ॥ मं वह्निमंडलाय दशकलात्मने नमः ॥ ततः के
सरेषु पीता श्वेता अरुणा कृष्णा धूम्रा तीव्रा स्फुलिंगिनी रुचिरा ज्वालिनी एताः पूर्वादिषु म
ध्ये च पूजयेत् ॥ ततो वं पद्मासनाय नमः ॥ ततो वागीश्वरीमृतुस्नातां नीलेंदीवरसन्नि
भां ॥ वागीश्वरेण संयुक्तां निति ध्यात्वा ह्रीं वागीश्वराय नमः ॥ ह्रीं वागीश्वर्यै नमः ॥ इति

मंत्रेण पंचोपचारैः संपूज्य सूर्यकांतादिसंभूतं श्रोत्रियगेहजं वा वह्निमानयेत् ॥ सुंदरीप
द्धतौ कामेश्वरीकामेश्वरं च पूजयेत् ॥ गौतमीये ॥ पाषाणजं वा मणिजं च यद्दिवा यानसंभवं
श्रोत्रियाणां गेहजं च वनस्थं चाथवाहरेत् ॥ यदृच्छाजातसंप्राप्तो अयोग्यो यागकर्मणि
निरग्निब्राह्मणस्तब्धो यद्यज्ञानं करोति वेत् ॥ तत्र बंधोऽस्य तुर्यांशफलं दद्यात् कृतांश
नः ॥ वैरूप्यस्य शास्त्रविफलं ज्ञायते होमकर्मतः ॥ तस्मात्सर्वप्रयत्नेन वह्निमुक्तं समाचरेत् ॥
एवं वह्निपात्रे निधाय क्रव्यादांशं परित्यजेत् ॥ तंत्रे ॥ द्विजातिभवनाद्वापि वह्निमानीय
साधकः ॥ वौषडंतेन मूलेन मंत्रितं तं विलोकयेत् ॥ अग्निमावाहयेदस्य मंत्रेण तदनं
तरं ॥ हुंफडंतेन मूलेन क्रव्यादांशं परित्यजेत् ॥ ततोऽग्निं वीक्षणादिभिः संस्कृत्य औदार्य
बिंदुवाग्निस्थां नीमस्य वह्नेरैक्यं विभाव्य वं वह्निचैतन्यं कल्पयामीति ॥ पावकं चैतन्यं
विधाय ॐकारेण ईक्षितं रक्षातमग्निमंत्रं धेनुमुद्रया अमृतीकृत्य फडिति संरक्ष्य हुमिति
गुंठ्य वं वह्निमूर्तये नमः इति तमभ्यर्च्य कुंडस्योपरि प्रदक्षिणं त्रिः परिभ्राम्य प्रणवेना

रणपूर्वकंज्ञातस्यरूपमहीतलः॥शिवबीजधियात्मनोन्मिमुखंदेव्यायोनावेनंनिक्षिपे
त्॥ततोवागीश्वरीवागीश्वराभ्यांआचमनीयादिकंदत्वातयागर्भेधृतंध्यायेद्वह्निरू
पंदेवतां॥पश्चात्ॐर्नस्यरक्षार्थंप्रदद्यात्कर्त्तकंकलं॥चित्पिंगलहन२दह२पच२सर्वज्ञा
ज्ञापयस्वाहेतिमनुनावह्निंप्रज्वालयेत्॥ततोबद्धांजलिःसन्अग्निंप्रज्वलितंवंदेजातवे
दंकृशानं॥सुवर्णवर्णममलंसमिद्धंविश्वतोमुखं॥इत्यनेनवह्निमुपतिष्ठेत्॥ततः
स्वदेहेजिह्वान्यासंकुर्यात्॥तद्यथा॥लिंगेसरयूंहिरण्यायैनमः॥पायौसरयूंगगना
यैनमः॥मूर्ध्निसरयूंरक्तायैनमः॥वक्त्रेसरयूंकृष्णायैनमः॥घ्राणेलवयूंसुप्रभायैन
मः॥नेत्रेलवयूंबहुरूपायैनमः॥सर्वत्रलवयूंअतिरिक्तायैनमः॥एतासांविनियो
गकर्मसु॥काम्यकर्मसुपद्मरागास्वर्णप्रभालोहिताश्वेताधूमिनी॥एताराजस्यक्रूरक
र्मणि॥विश्वमूर्त्तिःस्फुलिंगिनीधूम्रवर्णामनोजवालोहिताकरालाकालीएतास्तामस्यः॥
न्यासस्तुबीजयोगेनपूर्ववत्कर्मणिदेसर्वत्रबोद्धव्यं॥वह्निरधीशसंयुक्तःसादिप्यांता

सबिंदुकः॥वह्निमंत्राःसमुद्दिष्टाःजिह्वानांसप्तदेशिके॥ततःकरांगन्यासौ॥सहस्रार्चिषे
अंगुष्ठाभ्यांनमः॥स्वस्तिपूर्णायतर्जनीभ्यांस्वाहा॥उत्तिष्ठपुरुषायमध्यमाभ्यांवषट्॥
धूमव्यापिनेअनामिकाभ्यांहुं॥सप्तजिह्वायकनिष्ठाभ्यांवौषट्॥धनुर्धरायकरतलपृष्ठाभ्यां
फट्॥सहस्रार्चिषेहृदयायनमइत्यादि॥ततोमूर्त्तिन्यासः॥मूर्ध्निॐअग्नयेजातवेदसेन
मः॥दक्षांसेॐअग्नयेसप्तजिह्वायनमः॥दक्षपार्श्वेॐअग्नयेहव्यवाहनायनमः॥दक्षक
टौॐअग्नयेअश्वोदरजायनमः॥लिंगेॐअग्नयेवैश्वानरायनमः॥वामकट्यांॐअग्न
येकौमारतेजसेनमः॥वामपार्श्वेॐअग्नयेविश्वमुखायनमः॥वामांसेॐअग्नयेदेव
मुखायनमः॥ततोवह्नेरासनंकल्पयित्वामूर्त्तिंतत्रविचिंतयेत्॥इष्टिंशक्तिंस्वस्तिका
भीतिमुच्चैर्दीर्घैर्दोर्भिर्धारयंतंजवाभं॥हेमाकल्पंपद्मसंस्थंत्रिनेत्रंध्यायेद्वह्निंबद्धमौलिं
जटाभिः॥ततोमेखलानामुपरिविष्टरेस्तीर्णैःपरिधिन्यसमस्मेखलायांगर्भन्यस्मे
रणेण्मूलाद्यन्त्रिपरिषिंचयेत्॥ततःप्राचीवर्गौदिक्षुपरिधीन्विनिक्षिप्यतत्रपाद

क्षिणेन ब्रह्मादिदेवताः संपूज्याः॥ मेखलायां रामां मेलां रौद्रीं अंबिकां च संपूजयेत्॥ पुन
र्वह्निं ध्यात्वा ततः पीठे आवाहनेन मंत्रेण गंधादिभिः पूजयेत्॥ ॐ वैश्वानर जातवेद
इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा॥ इदं पाद्यं वह्नये नमः इत्यादि मध्ये वह्निकोणे
षु सरयूं हिरण्यायै नमः॥ सरयूं गगनायै नमः॥ सरयूं रक्तायै नमः॥ सरयूं कृष्णायै
नमः॥ सरयूं सुप्रभायै नमः॥ सरयूं बहुरूपायै नमः॥ सरयूं अतिरिक्तायै नमः॥ वह्नाग
णेशाबिमविल्पां॥ हिरण्या तप्तहेमाभा नम्र जपा ऐ दिशि स्थिता॥ वैदूर्यवर्णकनकाप्राच्यां
दिशि समाश्रिता॥ तरुणादित्यसंकाशा नैरृत्यां दिशि संस्थिता॥ अतिरिक्तान्तरा नावाय
व्यां दिशि संस्थिता॥ बहुरूपा यथा पार्श्वाद् दक्षिणे तरलस्थिता॥ कर्मणि देवतास्वे सरयूं पद्म
रागायै नमः॥ इत्यादि॥ क्रूरे सरयूं विश्वमूर्तये नमः॥ इत्यादि॥ एतासामधिष्ठातृदेवता
स्तंत्रांतरे॥ अमरपितृगंधर्वयक्षनागपिशाचकाः॥ राक्षसाः सप्तजिह्वानामधिता
अधिदेवताः॥ केसरेषु अग्न्यादिकोणमध्ये दिक्षु च॥ ॐ सहस्रार्चिषे हृदयाय नमः॥ ॐ

स्वस्तिपूर्णाय शिरसे स्वाहा॥ उत्तिष्ठपुरुषाय शिखायै वषट्॥ ॐ धूमव्यापिने कवचाय हुं॥
ॐ सप्तजिह्वाय नेत्रत्रयाय वौषट्॥ ॐ धनुर्धराय अस्त्राय फट्॥ ततः पूर्वादिदलेषु ॐ जात
वेदसे नमः॥ ॐ अग्नये सप्तजिह्वाय नमः॥ ॐ अग्नये हव्यवाहनाय नमः॥ ॐ अग्नये अश्वो
दराय नमः॥ ॐ अग्नये वैश्वानराय नमः॥ ॐ अग्नये कौमारतेजसे नमः॥ ॐ अग्नये विश्व
मुखाय नमः॥ ॐ अग्नये देवमुखाय नमः॥ इति वह्निमूर्तिः शक्तिस्वस्तिकधारिणी संपूज्य
लोकपालान् स्वस्वदिक्षु पूजयेत्॥ ततो हस्ताभ्यां स्रुवस्रुचौ गृहीत्वा वह्नेस्त्रिवारं तैः प्रतप्य
दर्भास्तिनाययथाक्रमं तदग्रमूलमध्यानि शोधयित्वा दक्षिणेन तौ संस्थाप्य पुनः प्रतप्य नी
य अस्त्रेण तेन वारिणा तं सिक्त्वा तस्यामाज्यं विनिक्षिप्य वीक्षणादिभिः संस्कुर्यात्॥ ततो
वायव्ये अंगारमुद्धृत्य तेषु नमः इति मंत्रेण आज्यस्थालीं विनिवेशयेत्॥ ततो दर्भयुगलं सं
दीप्य आज्ये क्षित्वा नले क्षिपेत्॥ नमः इति मंत्रेण दीप्तेन दर्भयुग्मेनाज्यं निराज्य तद्दर्भयु
ग्ममग्नौ विसर्जयेत्॥ ततः फडिति मंत्रेण घृतेप्रक्षालितान् दर्भान् प्रदर्श्य तान् वह्नौ नि

हुपेत्॥ ततो घृतं गृहीत्वा पुनरंगारान्वह्नौ संयोज्य ज्वलंतं स्रुवं दक्षिणहस्तोपरिष्टात्वेमध्ये
मुखेन अंगुष्ठोपकनिष्ठाभ्यां प्रादेशसम्मितौ दर्भौ धृत्वा अग्रेण घृतं पवित्रोत्पवनम् इति
मंत्रेण तत्कुशाभ्यामात्मसंमुखं घृतसंप्लवनं कुर्यात्॥ ततः प्रादेशमात्रं साग्रं पिदर्भयुग्मं
घृतांतर्दहित्वा द्वौ भागौ कृत्वा ऋक्पदरूपपद्रौ स्मरेत्॥ वामे इडां दक्षिणे पिंगलां मध्ये
सुषुम्नां ध्यात्वा होमं कुर्यात्॥ तद्यथा नम इति मंत्रेण स्रुवेण दक्षिणभागादाज्यमादाय अग्ने
र्वामलोचने ॐ सोमाय स्वाहेति कृत्वा तत्र मध्यादाज्यमादाय अग्नेर्भालजलोचने ॐ अग्नी
षोमाभ्यां स्वाहा नम इति जुहुयात्॥ ततो नम इति मंत्रेण स्रुवेण दक्षिणभागादादाय
वह्निमुखे ॐ अग्नये स्विष्टकृते स्वाहा इति जुहुयात्॥ सर्वत्राहुतिसंपातः॥ ततो व्याहृतिहो
मः॥ ॐ भूः स्वाहा। ॐ भुवः स्वाहा। ॐ स्वः स्वाहा॥ ततो वैश्वानर जातवेद इहावह लोहिताक्ष सर्व
कर्माणि साधय स्वाहा॥ इति मंत्रेण त्रिवारं कृत्वा ॐ अग्निगर्भाधानादिक्रियाः संपादयेत्
तद्यथा॥ गर्भाधानं पुंसवनं अनवलोभनं सीमंतोन्नयनं जातकर्म नामकरणं निष्क्रमणं

अन्नप्राशनं चूडाकरणं उपनयनं महाव्रतं उपनिषद्स्नानं गोदानं उद्वाहकाख्यं॥ क्रूरक
र्मणि मरणं तं तथा चक्रुने स्युः विवाहांता मरणांताः क्रूरकर्मसु॥ तत्र क्रमः॥ ॐ अग्नेर्गर्भा
धानं कल्पयामि नम इति एकैकाचाहुतिर्देयात्॥ इति क्रमसूत्रे नामकरणे तु मूलदेवीस
म्रिधः पंचमनसा जुहुयात्॥ ततो वह्निः पूर्वोक्तजिह्वांगामूर्त्तिना मैकैकाहुतिं कृत्वा स्रुवेण
चतुरामन वृदाय स्रुचि निधाय स्रुवेण तां पिधाय उत्तिष्ठन् वैश्वानर जातवेद इहावह लो
हिताक्ष सर्वकर्माणि साधय स्वाहा॥ वौषडिन्तनेन जुहुयात्॥ ततो विघ्नेश्वर मंत्रेण दशाहु
तिर्जुहुयात्॥ तद्यथा॥ ॐ स्वाहा। ॐ श्रीं स्वाहा। ॐ ह्रीं श्रीं स्वाहा। ॐ श्रीं ह्रीं क्लीं स्वाहा। ॐ श्रीं ह्रीं क्लीं
ग्लौं स्वाहा। ॐ श्रीं ह्रीं क्लीं ग्लौं गं स्वाहा। ॐ श्रीं ह्रीं क्लीं ग्लौं गणपतये स्वाहा। ॐ श्रीं ह्रीं क्लीं गं गणप
तये वरद स्वाहा। ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं स्वाहा॥ पुनः सर्वज
नं मे वशमानय स्वाहा॥ तथा च प्रपंचसारे॥ ताराद्यैर्दशभिर्दीपकवर्णसमन्वितैः॥ म
नुनागाणपत्येन कुर्वीत पूर्वं दशाहुतिः॥ ततो देवतायाः पीठं वह्नौ सम्मुखं पूजयित्वा तां वि

विंशपंचोपचारादिभिः॥सुंदरीपद्धेवपासनमंत्रेण अंगमंत्रेण च संपूज्य ऐं ह्रीं श्रीं समस्त
प्रकटगुप्तगुप्ततरसंप्रदायकुलकुलोत्तीर्णनिगर्भरहस्यातिरहस्यपरमातिरहस्ययोगिनी
चक्रश्रीपादुकां पूजयामीति॥तारादौ तु ब्राह्म्यादिजम्भादिइंद्रादिवज्रादींश्च पूजयेदिति
विशेषः॥वह्निमुखे मूलमंत्रेण घृतेन पंचविंशत्याहुतीर्जुहुयात्॥ततो वह्निदेवतयो
रात्मना सह ऐक्यं विभाव्य मूलेनाज्येन एकाहुतीर्जुहुयात्॥ततस्तत्र देवताया घृतेनाव
रणदेवताया एकैकाहुतीर्जुहुयात्॥ततः संकल्पितं तत्कल्पोक्तविहितद्रव्यैर्होमं कुर्या
त्॥तद्यथा॥वकुरूपाप्सन्निकायां जुहुयात्सर्वकर्माणि॥ततः समस्तासिद्धिं नांसा विशेष
कुरूपि कीति॥यामले॥कुंडमध्ये हिरण्याचरूपा सर्वकर्माणि॥कनकाख्या स्तंभनादौ
रक्ताख्या द्वेषणे मता॥कृष्णाख्या मारणे शस्ता स्तुप्रनाशांतिकर्मणि॥उच्चाटने तिदिक्ता
ख्या वकुरूपा तु सिद्धिदा॥काम्यहोमे तु लिनियमस्मृतः॥तर्जन्यंगुष्ठयोगेनोत्पलपर्यंजुहु
यान्नरः॥दाहज्वरादिनिचारिना मध्यमांगुष्ठमुद्रया॥विद्विषोच्चाटने चैव मारणे च

प्रशस्यते॥प्रदेशिनीमध्यमाभ्यां क्षोभोपशमनं महत्॥वपुर्मेधा तथा शांतिर्नातिपुष्ट्यादि
के तथा॥आकर्षणानि सर्वाणि दूरादर्षगतानि च॥तर्जन्यनामिकायोगात्सद्य एव भवंति
हि॥मोहनं वशकामं च प्रीतिसंवर्द्धनं तथा॥प्रदेशिनीकनिष्ठाभ्यां सर्वं भवति सिध्यति
निहनाकर्षणं चैव क्षोभनोच्चाटनं तथा॥कनिष्ठामध्यमांगुष्ठसंयोगेन तु लभ्यायाद्धि
युक्तेन होमेन तथा द्रव्यान्नु योगतः॥सर्वे मंत्राः प्रसिध्यंति मुद्रामंत्रप्रयोगतः॥ततः ॐ
रग्नये पृथिव्ये महते स्वाहा॥ॐ भुवो वायवेंतरिक्षाय च॥दिवे महते च स्वाहा॥ॐ स्वश्चंद्रम
से दिग्भ्यो नक्षत्रेभ्यो महते स्वाहा॥ॐ भूर्भुवः स्वश्चंद्रमसे नक्षत्रेभ्यो दिग्भ्यो महतेभ्यो स्वाहा॥
ततो हितमुद्रया ऋणिक्रुवेण स्रुचि निधाय तेनाच्छाद्य तेनोनाञ्जौ संस्थाप्य इतः पूर्ववितिश्रादिमं
त्रेण मूलमंत्रेण च पूर्णाहुतिं दत्वा संहारमुद्रया देवतामात्मनि उद्वास्य पुनर्व्याहृतिभिर्हु
त्वा अग्नेर्जिह्वां गमूलमूर्त्तिनां एकैकाहुतिं दद्यात्॥ततः पूर्ववत् मेखलोपरि अद्भिः परि
षिच्य आत्मनि संहारमुद्रया पावकं योजयित्वा परिधीन् समविस्तरात् अग्नौ निक्षिपेत्॥वि

शेषस्य॥ नैमित्तिके कर्मणि एतान् दहेत् नित्ये कर्मणि न दहेत्॥ तथा च शारदायां॥ नैमित्ति-
के दहेन्मंत्री नित्ये तु न दहेदिमान्॥ ततो दक्षिणे॥ यदि दिक्सांगहोमः स्यात् तदा देवताय-
आवरणदेवताया होमानंतरं आज्यान्वितैस्तिलैः कल्पविहितैर्द्रव्यैर्वाऽष्टोत्तरसहस्रं श-
तं वा जुहुयात्॥ ततः सुधीर्नदंतांघ्रिशिष्यमस्तकांतं कुंडांतिकमानीय दिव्यदृष्ट्या तं विलोकयन्
चैतन्यं गुरुरात्मनि संयोज्य अध्वविशोधनं कुर्यात्॥ तद्यथा॥ कुशाग्रेण शिष्यपादां-
संस्पृश्य ॐ शोधयामि कलाध्वानं स्वाहेति आज्यान्वितैस्तिलैर्दशाहुतिर्जुहुयात्॥ अंघ्रि-
स्पृष्ट्वा शोधयामि॥ एवं नाभिं स्पृष्ट्वा शोधयामि भुवनाध्वानं स्वाहा॥ एवं हृदयं स्पृष्ट्वा ॐ शो-
धयामि वर्णाध्वानं स्वाहा॥ एवं कंठं स्पृष्ट्वा एवं शोधयामि पदाध्वानं स्वाहा॥ एवं मूर्धा-
नं स्पृष्ट्वा ॐ शोधयामि मंत्राध्वानं स्वाहा॥ सर्वत्र दशाहुतीर्जुहुयात्॥ एवं क्रमेण तं परम-
शिवे संकल्प्य पुनः सृष्टिवर्त्मना तद्दशाहुतीभिः क्रमेण जनयेत्॥ तद्यथा॥ मंत्राध्वानः
पदाध्वानो वर्णाध्वानो भुवनाध्वा भुवनाध्वनस्तत्त्वाध्वा तत्त्वाध्वनः कलाध्वा एवं क्रमेण

जनयेत्॥ ततो दिव्यदृष्ट्या तं शिष्यं विलोकयन् आत्मस्थितं चैतन्यं शिष्ये नियोजयेत्॥ ततः
स्रुवया पूर्णाहुतिदानादिकर्म सम्यक् पूर्वोक्तक्रमेण दीक्षां कारयेत्॥ ॥इति होमपद्धतिः
अथात्र होमद्रव्याणां प्रमाणं निर्णीयते॥ ॥कर्षमात्रं घृतं होमे शुक्तिमात्रं पयः स्मृतं॥
उक्तानि पंचगव्यानि तत्समानि मनीषिभिः॥ तत्समं तु दुग्धान्नमक्षमात्रमुदाहृतं॥ दधि
प्रसृतिमात्रं स्याल्लाजास्तु मुष्टिसंमिताः॥ पृथुकास्तत्प्रमाणाः स्युः सक्तवोपि तथोदिताः॥
गुडं पलार्द्धमानं स्याच्छर्करापि तथा स्मृता॥ ग्रासार्द्धं चरुमानं स्यात्तद्वद्यूपवां विधिः स्मृतः
एकैकं पत्रपुष्पाणि तथापूपानि कल्पयेत्॥ कदलीफलनारंगफलान्येकैकशो विदुः॥ मातु-
लुंगं चतुःखंडं पनसं दशधा कृतं॥ अक्षधान्नारिकेलानि खंडितानि विदुर्बुधाः॥ त्रिधा
कृतं फलं बैल्वं कपित्थं खंडितं द्विधा॥ फलान्यन्यानि खंडानि सन्निधाः स्युर्दशांगुलाः॥ दूर्वात्र-
यं समुद्दिष्टं गुडूचीचतुरंगुला॥ व्रीहयो मुष्टिमात्राः स्युः मुद्गमाषा यवा अपि॥ तंदुलास्तु
तदर्द्धं स्युः कोद्रवा मुष्टिसंमिताः॥ गोधूमाः कलफलमा विहिता मुष्टिमानतः॥ तिलाश्चुलु-

कमात्रास्तु सर्षपास्तत्प्रमाणकाः॥ शक्तिप्रमाणं लवणं मरीचान्यपि विंशतिः॥ पूर्वं यदर्
मानं स्यात्तदामर्दं तत्समं स्मृतं॥ चंदनागरुकर्पूरकस्तूरीकुंकुमानि च॥ तिंतिडीबीजमा
निसमुद्दिष्टानि देशिकैः॥ वैश्वानरं स्थितं ध्यायेत्समिद्धोमेषु देशिकः॥ शयानमाज्यहो
मेषु नीयान्नं रोपयन्स्तथा॥ आस्यांतर्जुहुयाद्वह्नेर्विपश्चित्सर्वकर्मसु॥ कर्णहोमे तु व्या
धिर्नेत्रे वंध्यत्वमुदीरितं॥ नासिकायां मनःपीडा मस्तके धनसंक्षयः॥ यत्र काष्ठं ततः
श्रोत्रं यत्र धूमोत्र नासिका॥ अल्पज्वलनं नेत्रं यत्रांगारस्ततः शिरः॥ यत्र प्रज्वलि
ताज्वाला जिह्वा सा जातवेदसः॥ स्वर्णसिंदूरबालार्ककुंकुमक्षौद्रसन्निभः॥ सुवर्णरे
तसो वर्णः शोभनः परिकीर्तितः॥ भेरीवारिदहस्तींद्रनिनदोग्नेः शुभावहः॥ नागचंप
कपुन्नागपाटलायूथिकानिभः॥ पद्मेंदीवरकह्लारसर्पिर्गुग्गुलसन्निभः॥ पावकस्य
शुभो गंधः इत्युक्तस्तंत्रवेदिभिः॥ प्रदक्षिणस्य लक्षं पाछ्छन्नाग्राः शिखिनः शिखाः॥ शुभदा
यजमानस्य राष्ट्रस्यापि विशेषतः॥ कुंदेंदुधवलो धूमो वह्नेः प्रीतः शुभावहः॥ रूक्ष

५५४

कृष्णगतेर्वर्णश्च यजमानं विनाशकृत्॥ श्वेतो राष्ट्रं हि हन्त्याशु वायसस्वरसन्निभः॥ खरस्व
रसमो वह्नेर्ध्वनिः सर्वविनाशकृत्॥ प्रतिगंधो कृतच्छिद्रो होतुर्दुःखप्रदो भवेत्॥ छिन्नाग
ताशिखा कुर्यान्मृत्युं धनपरिक्षयं॥ अल्पधूमनिभो धूमः पारावतसमप्रभः॥ हानिं तु
रगजातीनां गवां च कुरुते चिरात्॥ एवं विधेषु दोषेषु प्रायश्चित्तं यदेशिकः॥ मूलेना
ष्टशतं कुर्यात्पंचविंशतिमाहुतीः॥ ॥इति होमप्रकरणं समाप्तं॥ ॥शार
दायां॥ अथाभिधास्ये तंत्रेस्मिन्सम्यक्षट्कर्मलक्षणं॥ सर्वतंत्रानुसारेण प्रयो
गसर्वसिद्धिदं॥ शांतिवश्यस्तंभनानि विद्वेषोच्चाटने तथा॥ मारणांतानि शंसंति षट्क
र्माणि मनीषिणः॥ रोगकृत्याग्रहादीनां विनाशः शांतिरीरिता॥ वश्यं जनानां सर्वेषां वि
धेयत्वमुदीरितं॥ प्रवृत्तिरोधः सर्वेषां स्तंभनं तदुदाहृतं॥ स्निग्धानां द्वेषजननं मिथो
विद्वेषणं मतं॥ उच्चाटनं स्वदेशादेर्भ्रंशनं परिकीर्तितं॥ प्राणिनां च वधं प्राणिमारणं
तदुदाहृतं॥ स्वदेवतादिक्कालादीन्ज्ञात्वा कर्माणि साधयेत्॥ रतिर्वाणी रमा ज्येष्ठा दुर्गा

५५५

ली यथाक्रमात्॥ षट्कर्मदेवताः प्रोक्ताः कर्मादौ ताः प्रपूजयेत्॥ इंद्रचंद्रेंद्रनिरृतिवाय्व
ग्नीनां दिशी मताः॥ सूर्योदयं समारभ्य घटिकादशकक्रमात्॥ ऋतवः स्युर्वसंताद्याः अ
होरात्रं दिने दिने॥ वसंतग्रीष्मवर्षाख्यशरद्धेमंतशैशिराः॥ षट्॥ अर्द्धरात्रं शरत्कालो हे
मंतश्च प्रभातकं॥ पूर्वाह्णश्च वसंतः स्यात् मध्याह्नो ग्रीष्म एव च॥ प्रावृट् स्यादपराह्णः स्यात्प्र
दोषः शिशिरः स्मृतः॥ अथवा ऋतुयोगे च हेमंतः प्रभाते शिरसमागमः॥ प्रहरार्द्धे व
संतश्च ग्रीष्मो मध्यंदिनागमे॥ तुर्यायामे च वर्षाख्या शरद्दंतगते रवौ॥ हेमंतः शांतिके प्रो
क्तो वसंतो वश्यकर्मणि॥ शिशिरः स्तंभने ज्ञेयो विद्वेषे ग्रीष्म ईरितः॥ प्रावृडुच्चाटने ज्ञेयो
शरन्मारणकर्मणि॥ तिथिनियमस्तु॥ पंचमी च द्वितीया च तृतीया सप्तमी तथा॥ बुधे
ज्ञवारसंयुक्ता ज्ञेया विद्वेषकर्मणि॥ कृष्णा चतुर्दशी यावद्दशमीमंदवाहका॥ उच्चाटने तिथि
शस्ता प्रदोषे च विशेषतः॥ चतुर्दश्यष्टमी कृष्णा ह्यमावास्या तथैव च॥ मंदभौमदिनोपे
ताशस्ता मारणकर्मणि॥ बुधचंद्रदिनोपेता पंचमी दशमी तथा॥ पौर्णमासी च विशेया

५५६

तिथिः स्तंभनकर्मणि॥ शुभग्रहोदये कुर्याच्छिवं कुर्याच्छुभोदये॥ रौद्रकर्मणि रिक्ताके मृत्युयो
गे च मारणं॥ चामुंडाकल्पे॥ उपेत्य सर्वमुत्सवो वश्ये दक्षिणां चाभिचारके॥ पश्चिमे धनदं विंद्याद
उत्तरे शांतिकं न्यसेत्॥ तथा चादेयकार्ये च दक्षिणाश्रवणमहि॥ वसनं लोहितं प्रोक्तमुष्णीषं
लोहितं स्मृतं॥ भूषणं लोहद्रव्येण वामेन धृतवादिकं॥ नरस्नायुविशेषेण मारणे रज्जुरीरि
ता॥ मृतस्य मुद्गस्त्रस्य दंतेन गर्दभस्य वा॥ कृत्वा तु मालां जप्तव्यं शात्रूणां वधमिच्छता॥
नस्थिनिर्मितमणिनिर्मिदाकर्षकर्मणि॥ साधकेन स्वतंत्रप्रोक्ते स्मरं गदरानीं इ वै॥ अत
नालां समाप्तो क्वविद्वेषोच्चाटने ऽपि चेत्॥ पद्मास्वं स्वस्तिकं भद्रं योविकटं कुक्कुटं पुनः॥ वज्रेन
स्कमित्याकुरासनानि मनीषिणः॥ पद्मासनं तु संयोज्य महान्द्ये रितरेकरे॥ निवेश्य पत्रमो
संस्थाप्य प्रोमस्त्वं कुक्कुटासनं॥ अन्यानि वर्ण्यानि॥ षण्मुद्राः क्रमतो ज्ञेयाः पद्मपाशग
दाक्षयाः॥ मुखलाशानिखड्गाख्याः शांतिकादिषु कर्मसु॥ उक्तं शांतिविजौरासं यरोव
हूरीतिरितः॥ स्तंभने पृथिवीशस्ता विद्वेषे व्योम कीर्तितं॥ उच्चाटने स्मृतो वायुर्म्यो पि

५५८

मारणे मतः॥ तत्तद्रूपोदये सम्यक् तत्तन्मंडलसंयुतं॥ तत्तत्कर्मविधातव्यं मंत्रिणा निश्चि
तात्मना॥ शीतांशुसलिलाक्षौणीव्योमवायुहविर्भुजां॥ वर्णास्युर्मंत्रबीजानि षट्कर्मसु य
थाक्रमं॥ ग्रथनं च विदर्भश्च संपुटो रोधनं तथा॥ योगः पल्लव इत्येते विन्यासा षट्सु कर्म
सु॥ मंत्राणां तद्दितान्कृत्वा साध्यवर्णान्यथाविधि॥ ग्रथनं तद्विजानीयात् प्रशस्तं शां
तिकर्मणि॥ मंत्रार्णद्वयमध्यस्थं साध्यनामाक्षरं लिखेत्॥ विदर्भ एव विज्ञेयो मंत्रिभिर्वश्य
कर्मणि॥ आदावंते च मंत्रः स्यान्नाम्नासौ संपुटः स्मृतः॥ एतस्यास्तंभने शस्तः इत्युक्तो मं
त्रवेदिभिः॥ नाम्नो आद्यंतमध्येषु मंत्रः स्याद्रोधनं मतं॥ विद्वेषणविधाने तु प्रशस्तमिद
मुत्तमं॥ मंत्रस्यांते नयेन्नाम योगः प्रोच्चाटने मतः॥ अंते नाम्नो नयेन्मंत्रः पल्लवो मारणे म
तः॥ सितरक्तपीतमिश्राः कृष्णाधूम्राः प्रकीर्तिताः॥ वर्णतो मंत्रसंप्रोक्ताः देवताः षट्सु क
र्मसु॥ यंत्राणां लेखनं कुंकुमं चंदनं रोचनं निशा॥ ग्रहधूमश्चितांगारो मारणे हविशानि च॥
रोपनाग्निना नपिक्वानि धुस्तूरकरसः स्मृतः॥ ग्रहधूस्त्रिकटुकं विरिशाप्रकमुदीरितं॥

देवताः कालमृत्वादीन्सम्यक्ज्ञात्वा विचक्षणः॥ षट्कर्माणि प्रयुंजीत यथोक्तफलसिद्ध
ये॥ कूलार्णवे॥ उच्चाटने वषट् प्रोक्तो हुंफट् बंधने मारणे॥ स्तंभने च नमः प्रोक्तः स्वाहा शां
तिकपौष्टिके॥ होमतर्पणयोः स्वाहा मासपूजनयोर्नमः॥ मंत्रांते योजयेन्मंत्री जपकाले
यथास्थितं॥ अस्यार्थः॥ एतानि तत्कर्माणि जपकाले मंत्रांते योजयित्वा मंत्रं जपेत्॥ होमा
दिषु नायं नियमः॥ इत्याहुर्हि मिति इति केचित्॥ तन्न॥ अग्निकार्ये जपेत्स्वाहा नमः सर्व
त्र्यार्चने॥ शांतिपौष्टिरणद्वेषेस्तुच्चाटनमारणे॥ स्वधा स्वाहा वषट् हुं च वौषट् फट् इ
योजयेत्क्रमात्॥ तर्पणाकर्षणे संतापज्वरे स्वाहा प्रकीर्तयेत्॥ क्रोधोपशमने शांतौ प्रीतौ
योऽयं नमो बुधैः॥ वौषट् संमोहनोद्दीपपुष्टिमृत्युंजयेषु च॥ हुंकारं प्रतिनाशे च छेदने
मारणे तथा॥ उच्चाटने च विद्वेषे च षट्पंक्तीकृतौ वषट्॥ दंडे दीपनकार्ये च लोज्ञा
ज्ञाने वषट् स्मृतं॥ इति शिरोवचनात् हौमेष्वयं विधिः॥ शांतिकादौ पाठादि नियम
स्तत्रैव॥ शांतिके राजमंतान्नं जपत्रं च वर्षपके॥ सर्वकार्येषु सौवर्णं कूर्चे स्यात्स्नेतकंप

दं॥ त्रिगंधं शांतिके प्रोक्तं पंचगव्यं तु पद्मके॥ सर्वकार्येषु सुगंधं स्यात् क्रूरे व्याघ्रनिशानि च
शांतिके लेखिनी दूर्वा विरपादौ स्त्रि खिवुच्छिका॥ गृहेषु शांतिकर्म स्यात् नरये च चंडिकागृहे॥ दे
वालये च स्मशाने नेक्रूरकर्म च॥ ॥अथ भूतानामुदयः॥ ॥ दंडको वा गति
र्मनिषुदयोरुभयोरपि॥ तोयस्य पावकस्योर्द्ध गतिस्तिर्यङ् नभःस्वतः॥ गतिर्भौम्नोनयवम्
धेर्भूतानामुदयः स्मृतः॥ धारणे रुदये कुर्यात् स्तंभनं चैव रामात्मवित्॥ शांतिकं पौष्टिकं
कर्म तोयस्योदयेवसो॥ मारणादीनि मरुतो विपक्षोच्चाटनादिकं॥ द्वेषादि नाशानेरस्य
तुदये च विहायसः॥ भूतानां मंडलानि॥ दत्तं द्विवलल वज्रांकं द्रुलांछितं नातरिश्वनः॥ त्रिको
णं स्वस्तिकोपेतं वह्ने रर्द्धेंदु संयुतं॥ अंभोजं मंडलं सोमं नैश्वतुरस्रं सवज्रकं॥ तत्तद्रूप
समानानि मंडलानि विदुर्बुधाः॥ वर्णैस्वैरंचितान्याहुः स्वस्वनामायुतान्यपि॥ स्वच्छं वि
यन्मात्रूलरक्तो निर्विषदं तथा॥ धातानामिदित्यादि प्रयोगानंतरं कुलादिवि॥ एकजहृं ज
पेन्मंत्रं ध्यानन्याससमन्वितः॥ प्रयोगदेवशांसर्पमात्मरक्षार्थकारणं॥ नचेत्फलं च ना

शोति देवताशापमाप्नुयात्॥ यत्नु॥ नरस्तां मारणं कर्मकुर्याच्चेद्युतं जपेत्॥ यतु प्रायश्चित्त
वरं॥ ॥अथस्तवकवचानि निरूप्यंते॥ ॥अथ भुवनेश्वरीकवचं॥ ॥श्रीदेव्यु
वाच॥ भुवनेश्वर्यभिदेवेशा या या विद्याः प्रकाशिताः॥ श्रुताश्चताश्चाधिगताः सर्वाः श्रोतु
मिच्छामि सांप्रतं॥ त्रैलोक्यमंगलं नाम कवचं यत्पुरोदितं॥ ॥ईश्वर उवाच॥ ॥पार्वतिश्रृ
णु वक्ष्यामि सावधानावधारय॥ त्रैलोक्यमंगलं नाम कवचं मंत्रविग्रहं॥ सिद्धविद्यामयं
सर्वैश्वर्यसिद्धिप्रदायकं॥ पाठनाद्धारणान्मर्त्यस्त्रैलोक्यैश्वर्यभाग्भवेत्॥ त्रैलोक्यमंगलस्या
पि कवचस्य ऋषिः शिवः॥ छंदो विराट् जगद्धात्री देवता भुवनेश्वरी॥ धर्मार्थकाममोक्षे
षु विनियोगः प्रकीर्तितः॥ ह्रीं बीजं मे शिरः पातु भुवनेशी ललाटकं॥ ऐं पातु दक्षनेत्रं
ह्रीं पातु वामलोचनं॥ श्रीं पातु दक्षकर्णं मे त्रिवर्णात्मा महेश्वरी॥ वामकर्णं सदा पातु ऐं घ्रा
णं पातु मे सदा॥ ह्रीं पातु वदनं देवी ऐं पातु रसनां मम॥ वाक् पातु त्रिवर्णात्मा कंठं पातु
परांबिका॥ श्रीं स्कंधौ पातु नियतं ह्रीं भुजौ पातु सर्वदा॥ क्लीं करौ त्रिपुरेशानि त्रिपुरैश्व

र्यदायिनी॥ श्रीं पातु हृदयं ह्रीं मे मध्यदेशं सदावतु॥ क्लीं पातु नाभिदेशं सा भद्रकाली भु
नेश्वरी॥ सर्वबीजप्रदा प्रह्रं पातु सर्ववशंकरी॥ ह्रीं पातु गुह्यदेशं मे नमो भगवती कटिं
माहेश्वरी सदा पातु सलिनीजानुयुग्मकं॥ अन्नपूर्णे सदा पातु स्वाहा पातु पदद्वयं॥ स
प्तदशाक्षरी पायादन्नपूर्णाखिलं वपुः॥ तारं माया रमा कामषोडशार्णास्ततः परं॥ शि
रस्था सर्वतः पातु विंशार्णान्नदांबिका॥ तारं दुर्गेयुगं रक्षिस्वाहेति दशाक्षरी॥ जयदु
र्गाघनश्यामा पातु मां सर्वतो मुदा॥ मायाबीजादिका चैषा दशार्णा च तथा परा॥ उत्तप्तकां
चनाभासा जयदुर्गाननेवतु॥ तारं ह्रीं दुर्गायै नमोऽष्टवर्णा च तथा परा॥ शंखचक्रधनु
र्बाणधरा मां दक्षिणेवतु॥ महिषमर्दिनी स्वाहा वसुवर्णात्मिका परा॥ नैरृत्यां च सदा पा
तु महिषासुरनाशिनी॥ माया पद्मावती स्वाहा सप्तार्णा परिकीर्त्तिता॥ पद्मावती पद्मसं
स्था पश्चिमे मां सदावतु॥ पाशांकुशपुरा माया माये हि परमेश्वरी॥ त्रयोदशार्णा तारा
द्या अश्वारूढानिलेवतु॥ सरस्वती पंचशरी नित्यक्लिन्ने मदद्रवे॥ स्वाहा रस्याक्षरी नित

मामुत्तरे सदावतु॥ तारं माया च कवचं खे चछे हूततोवतु॥ हूं हे ह्रीं फट् महाविद्याद
शार्णाखिलप्रदा॥ त्वरिता ह्यहिनिः पायाच्छिवकोणे सदा च मां॥ ऐं क्लीं सौः सततं बाला मा
मूर्ध्वदेशतोवतु॥ बिंद्वंता भैरवी बाला भूमौ मां सर्वदावतु॥ इति ते कवचं पुण्यं त्रैलोक्यमंग
लं परं॥ सारात्सारतरं पुण्यं महाविघ्नौघनाशनं॥ अस्यापि पठनात्सद्यः कुबेरोपि ध
नेश्वरः॥ इंद्राद्याः सकला देवा धारणात्पठनाद्यतः॥ सर्वसिद्धीश्वराः संतः सर्वैश्वर्यम
वाप्नुयुः॥ पुष्पांजल्यष्टकं दद्यान्मूलेनैव यदा पृथक्॥ संवत्सरकृतायास्तु पूजायाः
फलमाप्नुयुः॥ प्रीतिमन्योन्यतः कृत्वा कमला निश्चला गृहे॥ वाणी च निवसेद्वक्त्रे सत्यं
सत्यं न संशयः॥ यो धारयति पुण्यात्मा त्रैलोक्यमंगलाभिधं॥ कवचं परमं पुण्यं सोपि पु
ण्यवतां वरः॥ सर्वैश्वर्ययुतो भूत्वा त्रैलोक्यविजयी भवेत्॥ पुरुषो दक्षिणे बाहौ नारी वा
मभुजे तथा॥ बहुपुत्रवती भूत्वा वंध्यापि लभते सुतं॥ ब्रह्मास्त्रादीनि शस्त्राणि नैव कृंतं
ति तं जनं॥ एतत्कवचमज्ञात्वा यो जपेद्भुवनेश्वरीं॥ दारिद्र्यं परमं प्राप्य सोचिरान्मृत्यु

मान्नुयात्॥ ॥इति श्रीरुद्रयामले देवीश्वरसंवादे त्रैलोक्यमंगलं नाम कवचं समाप्तं॥ ॥
अथानंदमयीं साक्षाच्छब्दब्रह्मस्वरूपिणीं॥ ईडे सकलसंपत्त्यै जगत्कारणमंबिकां॥ आद्या
मशेषजननीमरविंदयोनेर्विष्णोः शिवस्य च वपुः प्रतिपादयित्रीं॥ सृष्टिस्थितिक्षयकरीं
जगतां त्रयाणां स्तुत्वा गिरं विमलयाम्यहमंबिके त्वां॥ १॥ पृथ्व्या जलेन शिखिना मरुतांब
रेण होत्रेंदुना दिनकरेण च मूर्त्तिभाजः॥ देवस्य मन्मथरिपोरपि शक्तिमत्ता हेतुस्त्व
मेव खलु पर्वतराजपुत्रि॥ २॥ त्रिस्रोतसः सकललोकसमर्चितायाः वैशिष्ट्यकारणम
वैमि तदेव मातः॥ त्वत्पादपंकजपरागपवित्रितासु शंभोर्जटासु सततं परिवर्त्तनं य
त्॥ ३॥ आनंदयेत्कुमुदिनीमधिपः कलानां नान्यामिनः कमलिनीमथ नेतरां वा॥ एक
स्य मोदनविधौ परमेकमीष्टे त्वं तु प्रपंचमभिनंदयसि स्वदृष्ट्या॥ ४॥ आद्याप्यशेषजग
तां नवयौवनासि शैलाधिराजतनयाप्यतिकोमलासि॥ त्रय्याः प्रसूरपि तया न समी
क्षितासि ध्येयापि गौरि मनसो न पथि स्थितासि॥ ५॥ आसाद्य जन्म मनुजेषु चिराद्दुरा

पं तत्रापि पाटवमवाप्य निजेंद्रियाणां॥ नाभ्यर्चयंति जगतां जनयित्रि ये त्वां निःश्रेणिकाग्र
मधिरुह्य पुनः पतंति॥ ६॥ कर्पूरपूरहिमवारिविलोडितेन ये चंदनेन कुसुमैश्च सुजात
गंधैः॥ आराधयंति हि भवानि समुत्सुकास्त्वां ते खल्वशेषभुवनेषु धीयः प्रपंते॥ ७॥ आ
विश्य मध्यपदवीं प्रथमे सरोजे सुप्ताहिराजसदृशीं विरचय्य विश्वं॥ विद्युल्लतावलय
विभ्रममुद्वहंती पद्मानि पंच विदलय्य समश्नुवानाः॥ ८॥ तन्निर्गतामृतरसैरभिषि
च्य गात्रं मार्गेण तेन विलयं पुनरप्यवाप्ता॥ येषां हृदि स्फुरसि जातु न ते भवेयुर्मातर्महे
श्वरकुटुंबिनि गर्भभाजः॥ ९॥ आलंबिकुंतलभरामभिरामवक्त्रामापीवरस्तनतटीं त
नुवृत्तमध्यां॥ चिंताक्षसूत्रकलशालिखिताढ्यहस्तामावर्त्तयामि मनसा तव गौरि मूर्त्तिं॥
१०॥ आस्थाय योगमवजित्य च वैरिषट्कमावध्य चेंद्रियगणं मनसि प्रसन्ने॥ पाशांकुशा
भयवराद्यकरां सुवक्त्रामालोकयंति भुवनेश्वरि योगिनस्त्वां॥ ११॥ उत्तप्तहाटकनिभा
करिभिश्चतुर्भिरावर्जितामृतघटैरभिषिच्यमाना॥ हस्तद्वयेन नलिने रुचिरे वहंतिप

मापिलान्नयकरोन्नवसित्वमेव॥१२॥अष्टान्निरूढविविधायुधबाहिनान्निर्दर्वदन्तरान्निर
घिरूढमृगाधिराजं॥दूर्वादलद्युतिरमर्त्यविपक्षघातं व्याकुर्वती त्वमसि देवि जवानि दुर्गा
॥१३॥आविर्निदाघजलशीकरशोभिवक्त्रां गुंजागणेन परिकल्पितहारयष्टिं॥पत्राम्बु
कामसितकांतिमनंगतंत्रां माघांगलीं दतरुणीं असकृत्स्मरामि॥१४॥हंसैर्गतिक्वणित
न्नूपुरदूरकृहैर्मृत्तैर्दिवाश्चचनैरनुगम्यमानो॥पद्माविद्योर्द्धमुखकूठस्वजातनानो
श्रीकंठआत्मशिरसोद्धतेनयांम्भ॥१५॥हाम्यांसमीहितुमदन्तिमतेवदत्यामुत्स
यन्नोश्चनयनंव्ययकेतनेन॥सांद्रानुरागतरलेन निरीक्ष्यमाणे जंघेउभेअपिभवानि तवा
नवानतोस्मि॥१६॥ऊरुस्मरामि जितहस्तिकरावलेपो स्थौल्येन मार्दवतया परिभूत
रंभौ॥श्रोणीनवस्य सहनौ बिकस्य दंतौ स्तंभो दिवाच्यवयसा तव मध्यमेन॥१७॥श्रो
णीस्तनोच्चयुगपत्नपपिम्मतोभिर्वाल्यात्परेणवयसा परिकूल्पसारा॥रोमावलिवि
लसितेन विनास्यमूर्त्तिमध्यस्तवस्फुरतुमेहृदयस्य मध्ये॥१८॥सख्यास्मरस्य हरनेत्र

कृताग्नी शेर्लयविर्पयादिनवितंनवयोवनेन॥आपाघदत्तेमिवपल्लवमप्रधृष्यं नाभिक
दापितवदेविनविस्मरेयं॥१९॥ईर्षोपमृहृपिम्हनं चसितं दधाने काश्मीरकर्दममनुस्म
नपंकजेते॥स्नातोत्थितस्य करिणः जहृषुफेलौ सिंदूरितौ स्मरयतः समदस्य कुंभौ॥२०॥
कंठातिरिक्तगताल दुज्वलकांतिधारशोभौ भुजौ निजरिपोर्मकरध्वजेन॥कंठग्रहाय र
चितौ किल दीर्घपाशौ मातर्मम स्मृतिपथं न विलंघयेतां॥२१॥नात्मायतं रचिकंबुविलास
चौर्यं भूषाभरेण विविधेन विराजमानं॥कंठं मनोहरगुणं गिरिराजकन्ये संचिंत्यत
त्तिमुपयामि कदापि नाहं॥२२॥अत्यायताक्षमभिजातललाटपट्टं मंदस्मितेन दरफुल्ल
कपोलबिंबं॥बिंबाधरं वदनमुन्नतदीर्घनासं पश्येत्स्मरत्यसकृदयस एवजातः॥अरव
आविस्तृतारकरलेखनमनन्यमंधापृष्ठोपरिन्ममदलिव्रजनिर्विरोधं॥यश्चेतसा
कलपतेतवकेशपाशं तस्य स्वयं गलति देवि पुराणपाशः॥२४॥श्रुतिस्तुचरितपाक
धीमतां स्तोत्रमेतत्पठति य इह मर्त्यो नित्यमार्द्रांतरात्मा॥सत्र्यवतिपदमुच्चैः संपदां पाद

नमुक्तितियमुकुटजलनीलहृणानांचिराय॥२५॥ ॥इतित्रिभुवनेश्वरीस्तोत्रं॥ ॥अ
थान्नपूर्णाकवचं॥ ॥श्रीदेव्युवाच॥कथितास्त्वान्नपूर्णायायायाविद्यासुदुर्लभाः॥कृपया
कथिताःसर्वाश्रुताश्चाधिगतामया॥सांप्रतंश्रोतुमिच्छामिकवचंमंत्रविग्रहं॥ईश्वरउवाच
शृणुपार्वतिवक्ष्यामिसावधानावधारय॥ब्रह्मविद्यास्वरूपंचमहदैश्वर्यदायकं॥पठना
द्धारणान्मर्त्यःत्रैलोक्यैश्वर्यभाग्भवेत्॥त्रैलोक्यरक्षणस्यास्यकवचस्यब्रह्माऋषिः॥छं
दोविराडन्नपूर्णादेवतासर्वसिद्धिदा॥धर्मार्थकाममोक्षेषुविनियोगःप्रकीर्तितः॥ह्रींन
मोभगवत्यंतेमाहेश्वरीपदंततः॥अन्नपूर्णेततःस्वाहाचैषासप्तदशाक्षरी॥पात्वन्नपू
र्णासर्वांगंरत्नकुंभान्नपात्रदा॥श्रीबीजाद्यातथाचैषाद्विरंध्राणंतथामुखं॥प्रणवाद्या
भ्रुवौपातुकंठंवाग्बीजपूर्विका॥कामबीजादिकाचैषाहृदयंतुमहेश्वरी॥तारंह्रींश्रींनमो
तेयभगवतीपदंततः॥माहेश्वरीपदंचान्नपूर्णेस्वाहेतुपातुमे॥नाभिंकोणेषुविंशार्णा
पायान्माहेश्वरीसदा॥तारंमायारमाकामषोडशार्णास्ततःपरं॥शिरस्थासर्वदापातुविं

शत्यर्णात्मिकाचया॥अन्नपूर्णामहाविद्याह्रींपातुभुवनेश्वरी॥शिवाश्रींह्रींतथाक्लींचत्रिपुरा
पातुमेगुदं॥षड्दीर्घभाजाबीजेनषडंगानिपुनंतुमां॥इंद्रोमांपातुपूर्वेचवह्निकोणेनले
वतु॥यमोमांदक्षिणेपातुनैरृत्यांनिरृतिश्चमां॥पश्चिमेवरुणःपातुवायव्यांपवनोव
तु॥कुबेरश्चोत्तरेपातुमामैशान्येशिवोवतु॥ऊर्ध्वाधःसततंपातुब्रह्मानंतोयथाक्रमात्
वज्राद्याश्चायुधाःपांतुदशदिक्षुयथाक्रमात्॥इतितेकथितंपुण्यंत्रैलोक्यकारणंपरं॥
यद्धृत्वापठनाद्देवाःसर्वैश्वर्यमवाप्नुयुः॥ब्रह्माविष्णुश्चरुद्रश्चपठनाद्धरणाद्यतः॥स्व
गेत्स्ववतिहंतिचकृत्येकृत्येपपकृपपक॥पुष्पांजल्यष्टकंदेव्यैमूलेनैवपठेत्ततः॥युगा
युतकृतायास्तपूजायाःफलमाप्नुयात्॥वाणीवक्त्रेवसेत्तस्यसत्यंसत्यंनसंशयः॥अष्टो
त्तरशतंचास्यपुरश्चर्याविधिःस्मृतः॥भूर्जेवाविलिख्यगुलिकांस्वर्णस्थांधारयेद्यदि॥कंठे
वादक्षिणेबाहौसोपिसर्वतपोमयः॥ब्रह्मास्त्रादीनिशस्त्राणितज्ञात्रंप्राप्यपार्वति॥माल्या
दिकुसुमान्येयत्नवत्स्वेवनसंशयः॥ ॥इतिश्रीभैरवीतंत्रेअन्नपूर्णाकवचं॥ ॥अ

पान्नपूर्णास्तोत्रं॥ ॥नमःकल्याणदेवीनमःशंकरवल्लभे॥नमोभक्तप्रियेदेविअन्नपू
र्णेनमोस्तुते॥१॥नमोमायागृहीतांगीनमःशंकरवल्लभे॥चंद्रचूडेमहादेविअन्नपूर्णे
नमोस्तुते॥२॥विचित्रवसनेदेवीअन्नदाननिरतेनघे॥शिवनृत्यकृतामोदेअन्नपूर्णेनमो
स्तुते॥३॥साधकाभीष्टदेदेवीनवदुःखविनाशिनी॥कुचभारनतेदेवीअन्नपूर्णेन
मोस्तुते॥४॥षट्कोणमध्यसंस्थेचषडंगयुवतीमये॥ब्राह्मण्यादिस्वरूपेचअन्नपूर्णे
नमोस्तुते॥५॥देविचंद्रकृतापीडेसर्वसाम्राज्यदायिनी॥सर्वानंदकरेदेविअन्नपूर्णेनमो
स्तुते॥६॥ईशाद्यंचितपादाब्जेरुद्रादिरूपधारिणी॥सर्वसंपत्प्रदेदेविअन्नपूर्णेनमो
स्तुते॥७॥प्रभातकालेपठेद्यस्तुमंत्रजापपुरःसरं॥तस्यगृहेस्थिरालक्ष्मीर्जायतेनात्रसं
शयः॥८॥प्रातःकालेपठेद्यस्तुस्तोत्रमेतत्समाहितः॥तस्यान्नस्यसमृद्धिःस्याद्वर्धमाना
दिनेदिने॥९॥यस्मैकस्मैनदातव्यंनप्रकाश्यंकदाचन॥प्रकाशात्कार्यहानिःस्यात्तस्मा
द्यत्नेनगोपयेत्॥१०॥ ॥इतिअन्नपूर्णास्तोत्रं॥ ॥अथत्रिपुराकवचं॥ ॥

श्रीदेव्युवाच॥ ॥भगवन्सर्वधर्मज्ञसर्वशास्त्रार्थपारग॥त्रिशक्तिरूपलक्ष्म्याश्चकव
चंयत्प्रकाशितं॥सर्वार्थसाधनंनाममत्रैलोक्येचातिदुर्लभं॥सर्वसिद्धिमयेदेविसर्वैश्व
र्यप्रदायकं॥पठनाद्धारणान्मर्त्यस्त्रैलोक्यैश्वर्यभाग्भवेत्॥सर्वार्थसाधनस्यास्यकव
चस्यऋषिःशिवः॥छंदोविराट्त्रिशक्तिश्चजगद्धात्रीचदेवता॥धर्मार्थकाममोक्षेषु
विनियोगःप्रकीर्तितः॥श्रींबीजंचशिरःपातुलक्ष्मीरूपाललाटकं॥ह्रींपातुदक्षनेत्रं
चवामनेत्रंसुरेश्वरी॥क्लींपातुदक्षकर्णंचवामंकामेश्वरीतथा॥लक्ष्मीघ्राणंसदापा
तुवदनंपातुकेशवः॥गौरीतुरसनांपातुकंठंपातुमहेश्वरः॥स्कंधदेशंरतिःपा
तुभुजौतुमकरध्वजः॥शंखनिधिःकरौपातुवक्षःपद्मनिधिःसदा॥ब्राह्मीमध्यंसदा
पातुनाभिंपातुमहेश्वरी॥कौमारीपृष्ठदेशंमेगुह्यंरक्षतुवैष्णवी॥वाराहीसक्थिनी
पातुऐंद्रीपातुपदद्वयं॥भार्यांरक्षतुचामुंडालक्ष्मीरक्षतुपुत्रकान्॥इंद्रःपूर्वेसदा
पातुआग्नेय्यामग्निदेवता॥याम्येयमःसदापातुनैरृत्यांनिरृतिश्चमां॥पश्चिमेवरु

एः पातु वायव्यां वायुदेवता॥ सोमः सदोत्तरे पातु ऐशान्यामीश्वरो विभुः॥ ऊर्द्ध्वं प्रजा
पतिः पातु अधश्चावतु देवता॥ राजद्वारे श्मशाने च अरण्ये प्रांतरे तथा॥ जले स्थले वा
नदितीरे शत्रूणां संग्रहे तथा॥ एतानिः सहिता देवी त्रिबीजा त्वां महेश्वरी॥ त्रिशक्तिश्च
महालक्ष्मीः सर्वत्र मां सदावतु॥ इति ते कथितं देवि सारात्सारतरं श्रुतं॥ सर्वार्थसाधनं
नाम कवचं परमाद्भुतं॥ अस्यापि पठनात्सद्यः कुबेरोपि धनेश्वरः॥ इंद्राद्याः सकलादे
वाः धारणात्पठनाद्यतः॥ सर्वसिद्धीश्वराः संतः सर्वैश्वर्यमवाप्नुयुः॥ पुष्पांजल्यष्टकं
दत्वा मूलेनैव पठेत्सकृत्॥ संवत्सरकृतायास्तु पूजायाः फलमाप्नुयात्॥ ॥इति श्री
रुद्रयामले त्रिशक्त्याः सर्वार्थसाधनं नाम कवचं समाप्तं॥ ॥अथ त्रिपुरास्तवः॥ ॥
वराभीतिहस्तां द्विबाहुं प्रसन्नां सदा श्वेतभावे स्वराक्षोपरिष्टं॥ प्रसन्नास्य बिम्बं स्वप्रका
शस्वरूपं शिरःपद्ममध्ये गुरुं पूजयामि॥१॥ नरं बाहुसंस्थे त्रिमूर्त्तीप्रगृह्यं रसांकेन
युक्तं तवाद्यं स्वबीजं॥ सुवर्णप्रभं येन पंतित्रिशाके श्रियं सोजगत्यं जनं नेत बाला॥२॥

नमो वायुमित्रं ततो वामनेत्रं सुधाधामबिंबं नियोज्यैकरूपं॥ द्वितीयं स्वबीजं सुरश्रेणि
वंद्यं त्वदीयं विना श्रियं प्राप्नुवंति॥३॥ विरंचिर्हि तिस्थं ततो वामनेत्रं विधुं नादयु
क्तं दिनेशानबीजं॥ विनाप्येवसंमोहयंति त्रिलोकीं जपादीश्वरत्वं लभंते नरेंद्राः॥४॥
तृतीयं स्वनियोगस्मरादि प्रियेथे त्रिसंध्यं जपंति त्वदंगं विनाप्य॥ न ते षां वपुर्याकुप्रयो
गं करोति स्मरास्त्रैंगनानां गृहेभ्रीस्कृते षां॥५॥ मुखेनारनीराद्यपद्यप्रबंधानहिंसंति
हिंस्रः सुरास्तान्नमंति॥ तदंघ्रिद्वयं रूपमालां मूर्ध्नि राकांकरेसिद्धयो द्रुमहास्तास्त्यजंति॥६॥
वने पारिजातद्रुमाणां पृथिव्यां सुवर्णप्रभां त्वां मणिब्रह्मगेहे॥ स्मरेद्वेदिकायां लसद्रू
रूसिंहासने पद्ममध्यारकं संविविंत्य॥७॥ स्फुरत्कर्णिकायां परं योनियुग्मं तदंतर्गतां
सुतहेमप्रभां त्वां॥ लसत्कुंडलाभिर्द्दवक्रां त्रिनेत्रां स्फुरत्कंबुकंठीं स्ववक्षोजनम्रां॥८॥
नहारं मेवक्षोभसद्वाकुजंदेः सुपद्मद्वयं पाशकंकामुकं च॥ सुवर्णांकुरां पुष्पबाणं द
धानां वहन्नंजयांसुमध्यां सुकांचीं॥९॥ तुलाकोटिरम्यस्फुरत्पादपद्मां किरीटाधलंका

रथुक्तां प्रसन्नां।।सितेचामरे देवमूलांतलारंदंसमुद्रंसकर्पूरपूर्णंध्रतानि।।१०।।त्रिलोकी
विधात्रींजगत्तापहत्रींजगत्रक्षणेन कर्त्रींजगल्लोकपूज्यां।।सदानंदपूर्णांमहाकाराइवंशीं
त्रिबिंदुस्वरूपांत्रिशक्तीनमामि।।११।।चिरंचिंतयित्वातदेतस्वरूपांपुरोयंत्रमध्येसम
याम्यंतत्पा।।स्वयंकृत्स्नमादिनिःपूजयित्वाचतुर्वर्गसिद्धिंजनेन्नामरोपि।।१२।।श्रियं
श्रीपतिंपार्वतीमात्म्यरंचरतिंकामदेवंषडंगेनसार्द्धं।।स्वयोनौतथामंत्रमुक्तानवा
नीकमापूजयित्वानरेंद्रोनयेसः।।१३।।निधीक्षौचपार्श्वद्वयेसंविलोक्यप्रपूज्यामहि
प्रसन्नतोलोकपाला।।तदस्त्रांणितत्तन्कणेत्रेप्रपूज्यनयस्मात्सिद्धिंजनेन्नानवोपि।
।।१४।।स्थितिस्त्वंविधातात्जगत्सृष्टिकर्त्रीत्वमापोपिविष्णुर्जगत्पालिकाच।।त्वमग्निस्व
रूपेजगत्रक्षणेनकर्त्रीत्वमेश्वर्ययुक्ताजगद्वायुरूपा।।१५।।त्वमाद्यादिदेवेशंसुक्तांतेचार
एवेजगद्भालरंध्रेसदारंत्वमाति।।निराधारगम्यान्तयस्मैकपुष्पात्वमाकारशकत्यानवानी
प्रसीद।।१६।।नवींनोधिमध्येनिपात्यैवसर्वंमुनीनांचयमंस्थिरत्वंकरोषि।।ज्ञातस्त्वांन

तानेचिदानंदरूपेप्रकाशस्वरूपेभवानीप्रसीद।।१७।।जपित्वानवत्यांजलोमंदचेतान
पत्येकजह्नुंकवित्वंकरोति।।विचिंत्यस्वरूपंत्वदीयंत्रिलोक्यांजनेदुर्लभत्वंभवानीप्रसी
द।।१८।।त्वमाधारशक्तिस्त्वमाधेयरूपाजगव्द्यापिकात्वंजगव्द्याप्यरूपा।।अनायस्त्वमे
काग्गुणातीतरूपात्वमेवासिनावोभवानीप्रसीद।।१९।।अनंतस्त्वंविष्णुस्त्वंत्वमेवासिवि
श्वंस्तुतिःकानयत्पाजगत्पांविनासि।।तथापित्वदीयाग्गुणांदिशांतिस्तुतिंकर्तुमेवं
भवानीप्रसीद।।२०।।इदंस्तोत्रमत्यंतगुह्यंनरायेपठंतित्रिसंध्यंकलांतेजपित्वा।।नते
वामसाध्यंत्रिलोक्यांजनानांलभंतेस्वरूपंभवानीप्रसीद।।२१।। ।।इतित्रिपुरा
स्तवःसमाप्तः।। ।।अथदुर्गाकवचं।। ।।ईश्वरउवाच।। ।।शृणुदेविप्रवक्ष्या
मिकवचंसर्वसिद्धिदं।।पठित्वापाठयित्वाचनरोमुच्येतसंकटात्।।अज्ञात्वाकवचंदेवि
दुर्गामंत्रंचयोजपेत्।।सनाप्नोतिफलंतस्याःपरंचनरकंव्रजेत्।।उमादेविशिरःपातु
ललाटंशूलधारिणी।।चक्षुषीखेचरीपातुकर्णौचनरवासिनी।।सुगंधानासिकंपा

तुवदनं सर्वसाधनी॥ जिह्वां च चंडिकादेवी ग्रीवां सौभद्रिका तथा॥ अशोकवासिनि
चेतो द्वौ बाहू वज्रधारिणी॥ हृदयं ललितादेवी ज्ञानुनी विंध्यवासिनी॥ महाबला तु जंघे
द्वे पादौ भूतलवासिनी॥ एवं स्थितासि देवी त्वं त्रैलोक्यरक्षणात्मिके॥ रक्ष मां सर्वगात्रे
षु दुर्गे देवी नमोस्तु ते॥ ॥इति श्रीकुब्जिकातंत्रे दुर्गाकवचं समाप्तं॥ ॥अथ
दुर्गाष्टोत्तरशतनाम॥ ॥ईश्वर उवाच॥ ॥शतनाम प्रवक्ष्यामि शृणुष्व कमलानने॥ य
स्याः प्रसादमात्रेण दुर्गा प्रीता भवेत्सती॥ ॐ सती साध्वी भवप्रीता भवानी भवमोचनी
आर्या दुर्गा जया आद्या त्रिनेत्रा शूलधारिणी॥ पिनाकधारिणी चित्रा चंडघंटा महात
पा॥ मनो बुद्धिरहंकारा चित्तरूपा चिता चितिः॥ सर्वमंत्रमयी सत्या सत्यानंदस्वरूपिणी
अनंता भाविनी भाव्या भव्याऽभव्या सदागतिः॥ शांभवी देवमाता च चिंता रत्नप्रिया स
दा॥ सर्वविद्या दक्षकन्या दक्षयज्ञविनाशिनी॥ अपर्णानेकवर्णा च पाटला पाटलावती॥
पट्टांबरपरीधाना कलमंजीररंजिनी॥ अमेयविक्रमा क्रूरा सुंदरी सुरसुंदरी॥ वनदु

र्गा मातंगी मतंगमुनिपूजिता॥ ब्राह्मी माहेश्वरी चैंद्री कौमारी वैष्णवी तथा॥ चामुं
डा चैव वाराही लक्ष्मीश्च पुरुषाकृतिः॥ विमलोत्कर्षिणी ज्ञाना क्रिया सत्या च बुद्धिदा॥ ब
हुला बहुलप्रेमा सर्ववाहनवाहना॥ निशुंभशुंभहननी महिषासुरमर्दिनी॥ मधुकै
टभहंत्री च चंडमुंडविनाशिनी॥ सर्वासुरविनाशा च सर्वदानवघातिनी॥ सर्वशा
स्त्रमयी सत्या सर्वास्त्रधारिणी तथा॥ अनेकशस्त्रहस्ता च अनेकास्त्रस्य धारिणी॥ कुमा
री चैव कन्या च कैशोरी युवतिः यतिः॥ अप्रौढा च यतिः दृढा वृद्धमाता बलप्रदा॥ य इ
दं प्रपठेन्नित्यं दुर्गानामशताष्टकं॥ नासाध्यं विद्यते देवि त्रिषु लोकेषु पार्वति॥ धनं धा
न्यं सुतं जायां हयं हस्तिनमेव च॥ चतुर्वर्गं तथा चांते लभेन्मुक्तिं च शाश्वतीं॥ कुमारीं पू
जयित्वा च ध्यात्वा देवीं सुरेश्वरीं॥ पूजयेत्परया भक्त्या पठेन्नामशताष्टकं॥ तस्य सिद्धि
र्भवेद्देवि सर्वैः सुरवरैरपि॥ राजानो दासतां यांति राज्यश्रियमवाप्नुयात्॥ गोरोचना
लक्तककुंकुमेन सिंदूरकर्पूरमधुत्रयेण॥ विलिख्य यंत्रं विधिना विधिज्ञो भवेत्सदा धा

दयतेषुरादि॥ सोमावास्यानिशाभागे चंद्रेशातश्च वांगते॥ विलिख्य प्रपठन् स्तोत्रं सत्यं वे
त्सुसंपदांपदं॥ ॥इति श्रीविश्वसारतंत्रे दुर्गानामशतकं समाप्तं॥ ॥अथ महि
षमर्दिन्याः कवचं॥ ॥ईश्वर उवाच॥ अथ वक्ष्ये महादेवि कवचं सर्वकामदं॥ यस्य प्रसा
दमासाद्य त्वयेसाक्षात् सदाशिवः॥ ॐकारं पूर्वमुच्चार्य मंत्री मंत्रस्य सिद्धये॥ पठेत्कवचं नि
त्यं मंत्रवर्णस्य सिद्धये॥ महिषमर्दिन्याः कवचस्य भगवान् महाकाल ऋषिः अनुष्टुप् छं
दः॥ आद्याशक्तिर्देवता चतुर्वर्गफलप्राप्तये विनियोगः॥ ॐ पातु मस्तके देवी मानिनी काम
दायिनी॥ मकारे पातु मां देवी चक्षुर्युग्मं महेश्वरी॥ हिकारे पातु वदने हिंगुलास्वरनायि
का॥ षकारे पातु मां श्वेता जिह्वायां चापराजिता॥ मकारे पातु मां देवी मर्दिनी सुरनायिका॥
र्दिकारे पातु मां देवी सावित्री कालनाशिनी॥ निकारे पातु मां देवी हृदये वामपार्श्वयोः॥
नाभौ लिंगे गुदे कंठे कर्णयोः पार्श्वयोस्तथा॥ शिखायां कवचे पादे मुखे नेत्रद्वये तथा॥
सर्वांगे पातु मां स्वाहा सर्वांगे पातु मर्दिनी॥ मर्दिनी पातु सततं मर्दिनी रक्षये सदा॥ भ्रा

पातु महेशानी कनका पातु सर्वदा॥ शाकिन्यः पातु सततं सिद्धाः पातु सदा मम॥ सर्वत्र
सर्वदा पातु देवी महिषमर्दिनी॥ इति ते कथितं दिव्यं कवचं सर्वकामदं॥ यत्र तत्र न वक्त
व्यं गोपितव्यं प्रयत्नतः॥ गोपितं सर्वतंत्रेषु विश्वसारे प्रकाशितं॥ सर्वत्र सुलभा वि
द्या कवचं दुर्लभं महत्॥ शाठ्यं न क्रियते नाथ निंदकाय महेश्वरी॥ कृतांगे भक्तिरिक्ते
गे क्रूरे मिथ्याभिमानिशालिनि॥ न स्तवं दर्शये दिव्यं कवचं सुरदुर्लभं॥ यत्र तत्र न वक्तव्यं
शंकरेण च भाषितं॥ दत्वा ते सोमहेशानि न च प्राप्नोति सिद्धयः क्रमात्॥ मंत्राः शास्त्रं स्वायंभु
तिशापं दत्वा सुदारुणं॥ भक्तिनं च न वे तस्य तस्मात् यत्नेन गोपयेत्॥ गोरोचना कुंकुमे
न भूर्जपत्रे महेश्वरी॥ लिखित्वा भक्तियोगेन बध्नीयात् धृते तथा॥ आयुष्मान् सिद्धयो
गेश्वरेवा कौलके पिवा॥ वणिक्स्त्रवण्यां चरेद्वस्यां वा पुनर्वसौ॥ उत्तरात्रय योगेषु
तथा पूर्वात्रयेषु च॥ अश्विन्यां वा रोहिण्यां वा ततो यानवमी तिथौ॥ अष्टम्यां वा चतुर्दश्यां
षष्ठ्यां वा पंचमी तिथौ॥ कृष्णां वा पूर्णिमायां वा निशायां प्रांतरे पथा॥ एकलिंगे श्मशाने

चक्रस्यागारे शिवालये॥ गुरूणां वै स्वयं वा पि स्वयं कुसुमैस्तथा॥ मृगनाभिरक्तकुसुमैश्चंद
नेरकसंयुते॥ राजागारे स्थिता वस्त्रे लिखित्वा धारयेत्तु नः॥ तस्य सर्वार्थसिद्धिः स्यात्स्वयं शं
करेण च भाषितं॥ कुमारीं पूजयित्वा च देवीसूक्तं तथैव च॥ पठित्वा भोजयेद्विद्वान् ब्राह्मणा
न्वेदपारगान्॥ आश्विने कृष्णपाख्यानं कुमार्यैर्दिनत्रयं॥ नरो धरेन्महारक्षां कवचे स
र्वकामदं॥ आधयो व्याधयस्तस्य दुःखशोकं न यं कचित्॥ वादी मूको भवेत्तस्य राजा च
सेवकायते॥ मासमेकं पठेद्यस्तु प्रत्यहं नियतः शुचिः॥ दिवा नक्तं विरूपाक्षी रात्रौ रात्रि
परायणः॥ षट्सहस्रप्रमाणेन प्रत्यहं प्रजपेत्सदा॥ षण्मासे वा त्रिभिर्मासैः खेचरो भ
वति ध्रुवं॥ अपुत्रो लभते पुत्रं अधनो धनवान्भवेत्॥ अरोगी बलवांश्चैव राज्ञां च वश
तामियात्॥ रक्तेषुनांचगे निर्मलं जपेद्ध्यानविधानतः॥ य एवं कुरुते धीमान्स एव श्रीसदा
शिवः॥ ॥इति श्रीविश्वसारतंत्रे महिषमर्दिन्याः कवचं समाप्तं॥ ॥अथ महि
षमर्दिनीस्तोत्रं॥ ॥ईश्वर उवाच॥ नमस्ते वरचंडिचूर्णितदुराचारप्रचंडासुरेश्चैं

रंदारयमद्रिदुर्दरदरक्रोहोर्मिनिमर्मापदः॥ तेनायं निरुपकृतो निरुपमश्रीपादपद्माद्धवी
श्रीतानंतरसार्णवे मममनो हंसश्चिरं नंदतु॥२॥ हित्वा चंडि हिरण्यदारणपटु प्रोद्दामह
स्तांगुलिस्फायत्कामसुमेरुसोदरसरारोपं च सिंहस्वरा॥ मातास्तम्भोपायणपटुश्रीपा
दसंसेविनं सेवंते करिवेरिणं क्रिमविनिर्नीतिर्न यैः सेविनः॥२॥ चंडि त्वद्दियांतरस्सुरपदं
श्रोत्रांतरं चेतुतं तत्र त्वं पुरुषप्ररूपभ्रुगतं ब्रह्मादिभिर्गीयते॥ तस्माद्देविसमस्तदैवतस्तु
धामस्फुरच्छ्रीमत्पादपयोजचुंबनपरं मामद्य संभावय॥३॥ मच्चित्तेदायदि वास्फुतनलप
त्पाचाराद्ध्यं मास्तु वा कीर्तिः केशवकौशिवार्चनचरीनैवास्तुमासंनिधिः॥ मातर्मेहलहरि
स्मरारिकृतनुरेत्यादि सेवास्पदश्रीमत्पादपयोजचुंबनविधौ चित्तं सदैवास्तु नः॥४॥ नि
र्दिष्टा स्त्रियदित्वरीयपदयुग्मपूर्वपरिच्छिन्नावनेनिर्दिष्टस्त तदा यमास्तु विधनं क्रियास्तु स
द्धास्यदं॥ तस्माद्देवि कृपान्नवांचिततरं श्रीपादपद्मद्वयं मच्चित्ते रुतसंपदं प्रसदतु हे मंद
रि स्मेरतो॥५॥ आम्लानं परिरंभकृतपति रस्कृन्नमादमास्मादितः स्फारं जीवनरक्षणेसय

कृतानैवान्नविघ्नस्त्वमनु॥ देवाद्धिश्रुतचंद्रचंदनघनप्रागल्भगर्वस्तममाध्वीपूर्णनिवस
देकमलामोदेनमास्वादितः॥६॥ हाहामातरनादिमोहतनयधियाहारविकाखिलब्र
ह्मानंदरसानिविकेविरसस्वांतोदरेमादहाः॥ युष्माकंस्फुरचंदनिर्णयमनस्तापाग्निमत
तमम्नीमद्भक्तिरसातिदुर्दिनपरीवाहः सदासर्वतु॥७॥ त्वत्पादस्फुरदंबुजालसज्जरावं
गंप्रकोटिस्वबलत्वध्यांनस्वांतविसारनिर्मलचिरानंदत्रयंदेवतं॥ सर्गसंस्थजनेस्विति
वितनुतेसहिंपुनर्लुप्तेप्राह्निलांजननीजनीरदमहश्चित्तेसदेवास्तनः॥८॥ पादाम्ब
म्हाघ्रछलत्स्फुरनिजकज्जद्विधावदस्वबलत्वयक्तातः प्रसरतमस्तमस्तिरोदेसंसमा
लंचते॥ सादुर्गामपदुर्गतिदुरालंबांतरत्रासिनीरपदेवतवैरिदारणपटुर्जीयान्नयाका
हिनी॥९॥ नस्पत्स्वेरकचामरोचलचलम्नकोघुरवर्यरवस्त्रायस्सैन्यहिलामुखोत्त्वलनं
दनस्यजितलतांतानिधी॥ कुंकुरीरणविस्वपिंनत्तितद्विरः सारोपदुलांबरस्त्रदुद्गात्स्वंदविरव
डितारिवलरोकंतरुत्पिपासोस्खले॥१०॥ चंचत्कनकविराममकालतीश्रास्फालसंपादकोमार

धन्नहिषतिर्यगानतविनः प्रगांतरालस्खले॥ वश्चर्यैविस्पुपत्रमधकलितेबध्वांकृतिमात्
नि: सेव्योवारुरुणांगणेरणमुदाघूर्णयमानांस्मरेत्॥११॥ ऊर्ध्वधःक्रमसव्यवामकरयो
श्चक्रंदरंकर्तृकांखेटंबाणधनुस्त्रिशूलमयहस्तमुरांदधानांशिवां॥ श्यामांनीलघनोच्चकं
तलचयच्छोनुरुप्रयंस्वलद्धीरास्फालनसत्कराजवदनांघोराट्टहासोद्धुरां॥१२॥ एवंयेत
वदेविमूर्तिमनघांध्यायेतिदुर्गादिनिःश्चाकोयेरनिपूजितांपरपुरक्षोभादिकंकुर्वते॥ रा
संरान्त्रजयः सद्वधिबलाकाप्याम्नतादर्शनस्तंभोच्चाटनमारणादिकृतानांतेषांस्वयं
जायते॥१३॥ स्तोत्रंतेचरणारविंदयुगलध्यानावधानान्नघान्मंत्रोद्धारकुलोपचारच
रितंगूढोपदिष्टंयदि॥ येत्रएवंतिपठंतिदेविनयस्ताश्रीमोरुकामादयस्तेभांहस्तागतानवं
॥इतिश्रीमहिषमर्दिन्यास्तोत्रं॥ ॥अथवस्त्रीर
तिजगतांमातर्नमस्तेजय॥१४॥
कवचं॥ ॥ईश्वरउवाच॥ अथवक्ष्येमहेशानिकवचंसर्वकामदं॥ यस्यविज्ञानमा
त्रेणनवेत्स्यतास्तुसदाशिवः॥ नार्चनंतस्यदेवेशिमंत्रजापंजपेन्नच॥ सजनेत्सर्वतापुत्रः

सर्वशास्त्रपुरस्कृतः॥ निधारतार्थिनासे मा चिरोषेव्यह्रियत्रेना॥ अस्याश्चतुरक्षरीविष्णुव
नितायाः कवचस्य श्रीशिवः ऋषिरनुष्टुप् छंदो वाग्भवी देवी देवता वाग्भवबीजं लज्जाशक्ती
रमाकीलकं कामबीजात्मकं कवचं मम सुकवित्वपांडित्यसर्वसिद्धिसमृद्धये विनियोगः॥
ऐंकारो मस्तके पातु वाग्भवी सर्वसिद्धिदा॥ ह्रीं पातु चक्षुषोर्मध्ये चक्षुर्युग्मे च शांकरी॥ जि
ह्वायां मुखे नेत्रे च कर्णयोर्दंतयोर्नसि॥ ओष्ठाधरे दंतपंक्तौ तालुमूले हनौ पुनः॥ पातु मां
विष्णुवनिता लक्ष्मीः श्रीवर्णरूपिणी॥ कर्णयुग्मे भुजद्वंद्वे स्तनद्वंद्वे च पार्वती॥ हृदये मणि
बंधे च ग्रीवायां पार्श्वयोः पुनः॥ पृष्ठदेशे तथा गुह्ये वामे च दक्षिणे तथा॥ उपस्थे च नितंबे
च नाभौ जंघायां पुनः॥ जानुचक्रे पदद्वंद्वे घुंटिकेंगुलिमूलके॥ सा पातु प्राणशक्त्या मा
सीमन्यां मस्तके पुनः॥ सर्वांगे पातु कामेशी महादेवी समुन्नतिः॥ पुष्टिः पातु महामाया
उत्कृष्टिः सर्वदावतु॥ ऋद्धिः पातु सदा देवी सर्वत्र शंभुवल्लभा॥ वाग्भवी सर्वदा पातु पातु
मां हरगेहिनी॥ रमा पातु सदा देवी पातु माया स्वराट् स्वयं॥ सर्वांगे पातु मां लक्ष्मीर्विष्णुमा

यासुरेश्वरी॥ विजया पातु भवने जया पातु सदा मम॥ शिवदूती सदा पातु सुंदरी पातु स
र्वदा॥ भैरवी पातु सर्वत्र भेरुंडा सर्वदावतु॥ त्वरिता पातु मां नित्यं कालरात्रिः सदाव
तु॥ नवदुर्गाः सदा पातु कुमारी पातु सदा मम॥ मात्राः पातु सदा देव्यः चक्रस्था योगिनीग
णाः॥ सर्वत्र सर्वकार्येषु सर्वकर्मसु सर्वदा॥ पातु मां देवदेवी च लक्ष्मीः सर्वसमृद्धिदा॥ इ
ति ते कथितं दिव्यं कवचं सर्वसिद्धये॥ यत्र तत्र न वक्तव्यं मदिच्छेदात्मनो हितं॥ शाठ
यभक्तिहीनाय निंदकाय महेश्वरि॥ न्यूनांगे अतिरिक्तांगे दर्शयेन्न कदाचन॥ न स्तवं
दर्शयेद्दिव्यं संदर्शे शिवहा भवेत्॥ कुलीनाय महोत्साय दुर्गाभक्तिपराय च॥ दद्यात्
कवचमित्युक्तं सर्वतंत्रसमन्वितं॥ शनौ मंगलवारे च रक्तचंदनकैस्तथा॥ यावकेन
लिखेद्यंत्रं सर्वतंत्रसमन्वितं॥ विलिखेत्कवचं दिव्यं स्वयंभूकुसुमैः शुभैः॥ स्वशुक्रैः प
रशुक्रैश्च नानागंधसमन्वितैः॥ गोरोचनाकुंकुमेन रक्तचंदनकेन वा॥ सुतिथौ शुभ न
योगे वा श्रवणायां रवेर्दिने॥ अश्विन्यां कृत्तिकायां वा फाल्गुन्यां च मघासु वा॥ पूर्वाभाद्र

पदायोगे स्यात्सां मंगलवासरे॥ विलिख्य पठित्वा स्तोत्रं श्रवणयोगे सुरालये॥ आयुष्मान्प्री
तियोगे च ब्रह्मयोगे विशेषतः॥ इंद्रयोगे श्रवणयोगे मूलयोगे तथैव च॥ कौलवे बाल
वे चैव गणिते चैव सत्तमः॥ श्मशानागारे श्मशाने वा विजने च विशेषतः॥ कुमारीं पूजयि
त्वा च यजेद्देवीं सनातनीं॥ मत्स्यैर्मांसैः शाकमूलैः पूजयेत्परदेवतां॥ घृताद्यैः सोपक
रणैः पुष्पधूपैर्विशेषतः॥ ब्राह्मणान्भोजयित्वा च पूजयेत्परमेश्वरीं॥ आखेटकमुपा
ख्यानं तत्र कुर्याद्दिनत्रयं॥ तदाधरेन्महारक्षां सर्वां कुर्देणप्रचापितं॥ मारणं द्वेषणादीनि
लभंते नात्र संशयः॥ स भवेत्पार्वतीपुत्रः सर्वशास्त्रपुरस्कृतः॥ गुरुर्देवो हरः साक्षा
त्पत्नी तस्य हरप्रिया॥ अनेन यजेद्यस्तु तस्य सिद्धिरदूरतः॥ पठति य इह मर्त्यो नि
त्यमार्द्रांतरात्मा जयफलमनुनेयं लभ्यते पविधेयं॥ स भवति पदमुच्चैः संपदां पाद
नम्राः क्षितिपमुकुटलक्ष्मीलक्षणानां चिराय॥ ॥इति श्रीविश्वसारतंत्रे त्रैलोक
यचंवसमाप्तं॥ ॥अथ सरस्वतीस्तोत्रं॥ ॥ह्रीं ह्रीं विद्यैकबीजे शशिरुचिकमला

कल्पविस्पष्टशोभे भव्ये भव्यानुकूले कुमतिवनदवे विश्ववंद्यांघ्रिपद्मे॥ पद्मे पद्मोपविष्टे प्र
णतजनमनोमोदसंपादयित्रि प्रोत्फुल्लज्ञानकूटे हरिनिजदयिते देवि संसारसारे॥१॥
ऐं ऐं ऐं इष्टमंत्रे कमलभवमुखांभोजभूते स्वरूपे रूपारूपप्रकाशे सकलगुणमये नि
र्गुणे निर्विकारे॥ न स्थूले नापि सूक्ष्मे प्यविदितविभवे नापि विज्ञाततत्वे विश्वे विश्वांत
राले सुरवरनमिते निष्कले नित्यशुद्धे॥२॥ ह्रीं ह्रीं ह्रीं जाप्यतुष्टे हिमरुचिमुकुटे वल्लकी
व्यग्रहस्ते मातर्मातर्नमस्ते दह दह जडतां देहि बुद्धिं प्रशस्तां॥ विद्ये वेदांतगीते श्रुति
परिपठिते मोक्षदे मुक्तिमार्गे मार्गातीतप्रभावे भव मम वरदा शारदे शुभ्रहारे॥३॥ धीं
धीं धीं धारणाख्ये धृतिमतिनुतिभिर्नामभिः कीर्तनीये नित्येऽनित्ये निमित्ते मुनिगणनमि
ते नूतने वै पुराणे॥ पुण्ये पुण्यप्रवाहे हरिहरनमिते नित्यशुद्धे सुवर्णे मातर्मात्रार्द्धत
त्वे मतिमतिमतिदे माधवप्रीतिदाने॥४॥ ह्रीं ह्रौं धीं ह्रूं स्वस्वरूपे दह दह दुरितं पुस्तकव्य
ग्रहस्ते संतुष्टाकारचित्ते स्मितमुखि सुभगे जृंभिणि स्तंभविद्ये॥ मोहे मुग्धप्रवाहे कु

रुममविमतिध्वांतविध्वंसमीडेगीर्गीर्भिर्मद्भारती त्वंकविर्वक्वसुमासिद्धिदासिद्धिसाध्या
॥५॥स्तौमित्वांत्वांचवंदेभजममवदनेमाकदाचित्त्यजेथामामेबुद्धिर्विरुद्धाभवतुनच
मनोदेविमेयातुपापं॥मामेदुःखंकदाचित्क्वचिदपिविषयेप्यस्तुमेनाकुलत्वं॥शास्त्रे
वादेकवित्वेप्रसरतुममधीर्मास्तुकुंठाकदाचित्॥६॥इत्येतैःश्लोकमुख्यैःप्रतिदिन
मुषसिस्तौतियोभक्तिनम्रोवाणीवाचस्पतेरविमतिविदितोवाक्पतिर्नष्टपंकः॥स
स्यादिष्टार्थलाभीसुतमिवसततंपातितंसाचदेवीसौभाग्यंतस्यलोकेप्रसरतिकवितावि‍घ्न
मस्तंप्रयाति॥७॥ब्रह्मचारीव्रतीमौनीत्रयोदश्यांनिरामिषः॥सारस्वतोजनःपाठा
त्सस्यादिष्टार्थलाभवान्॥८॥पक्षद्वयेपियोभक्त्यात्रयोदश्येकविंशतिं॥अविछेदंपठेद्
धीमान्ध्यात्वादेवींसरस्वतीं॥९॥शुक्लांबरधरांदेवींशुक्लाभरणभूषितां॥वांछितंफल
माप्नोतिसलोकेनात्रसंशयः॥१०॥ ॥इतिबृहस्पतिविरचितंसरस्वतीस्तोत्रं॥ ॥
अथगणेशस्तोत्रं॥ ॥ॐकारमाद्यंप्रवदंतिसंतोवाचःश्रुतीनामपियंगृणंति॥ग

जाननंदेवगणानतांघ्रिंभजेहमर्द्धेंदुकृतावतंसं॥१॥पादारविंदार्चनतत्पराणांसंसार
दावानलभंगदक्षं॥निरंतरंनिर्गतदानतोयैस्तंनौमिविघ्नेश्वरमंबुदाभं॥२॥कृतांगरा
गंनवकुंकुमेनमत्तालिजालंमदपंकमग्नं॥निवारयंतंनिजकर्णतालैःकोविस्मरेत्पु
त्रमनंगशत्रोः॥३॥शंभोर्जटाजूटनिवासिगंगाजलंसमानीयकरांबुजेन॥लीलोत्सु
कान्निःशिवमर्चयंतंगजाननंभक्तियुताभजंति॥४॥कुरावयुक्तौस्तनरात्महेतोःपयो
धरौपर्वतराजपुत्र्याः॥प्रक्षालयंतंकरसीकरेणमौग्ध्येनकृत्वागमुखंभजामि॥५॥त
यास्वमूर्ध्नगजास्यहस्तंयेशीकराःपुष्करंध्रमुक्ताः॥येमांगणेतेविचरंतितारा:कला
स्तनामौक्तिकतुल्यभावः॥६॥क्रीडारतेवारिनिधौगजास्येवेलामतिक्रामतिवारिपूरे॥
कल्पावसानंपरिचिंत्यदेवाःकैलासनाथंश्रुतिभिस्तुवंति॥७॥नागाननेनागकृतोत्तरी
येक्रीडारतेदेवकुमारसंघे॥त्वयीदृशंकालगतिंविहायतौप्रापतुःकंदुकतामिनेंदू॥८॥
हृन्मदोत्रसेत्यंचमुखेरजस्त्रमध्यापयंतंसकलागमार्थान्॥देवान्ऋषीन्भक्तजनैक

मित्रंहेरंबमरुणंकरुणमाश्रयामि॥९॥पाशांबुजाभयमपिद्यामनाभ्यांरुतार्थयंतंरूपयाध
रित्री॥अकारणंकारणमाप्तवाचांतन्नागवक्त्रंनजहातिचेतः॥१०॥येनार्चितंसत्यवती
सुतायपुराणमालेख्यविषाणकोट्या॥तंचंद्रमौलेस्तनयंतपोभिराराध्यमानंसततं
नतोस्मि॥११॥पदंश्रुतीनामपदंस्तुतीनांलीलावतारंपरमात्ममूर्त्तेः॥नागात्मकोवापुरु
षात्मकोवेत्यज्ञेयमाद्यंभजविघ्नराजं॥१२॥पाशांकुशोभस्वरदंतपाणीहस्तैर्दधानंकर
रंध्रमुक्तैः॥मुक्ताफलाभैःपृथुकरोधैःसिंचितमंगंद्वियमोनजामि॥१३॥अनेकमेकंग
जदंतमेकंचेतस्वरूपंजगदादिबीजं॥अतीतियंभजविदोवदंतितंशांभवंसूनुमसंगुणंन
मामि॥१४॥स्वांकेस्थितायानिजवल्लभायामुखांबुजालोकनलोलनेत्रं॥स्मेराननाब्जं
मदवैभवेनरुद्धंभजेविश्वविमोहयंतं॥१५॥येपूर्वमाराध्यगजाननत्वांसर्वाणिशास्त्रा
णिनवंतितेषां॥त्वत्तोनचान्यत्प्रतिपाद्यमस्तितदस्तिचेत्सत्यमसत्यकल्पं॥१६॥हिरण्य
वर्णंजगदीशितारंकविंपुराणंरविमंडलस्थं॥गजाननंयन्महसाजनानांविघ्नांधकारोवि

लयंप्रयाति॥१७॥शंभोःसमालोक्यजटाकलापेशशांकखंडंनिजपुष्करेण॥स्वभग्नदंतंप्रवि
चिंत्यमौग्ध्यादाक्रष्टुकामःश्रियमातनोतु॥१८॥विघ्नाकुलानांविनिपातनार्थंयमारिके
लैःकदलीफलाद्यैः॥प्रमाणयंतीमदवारणास्यंप्रभुंसदाविघ्नहरंभजेतं॥१९॥यज्ञैरनेकै
र्बहुभिस्तपोभिराराध्यमाद्यंगजराजवक्त्रं॥स्तुत्वानयायेविधिनास्तुवंतितेसर्वलक्ष्मीनि
लयाभवंति॥२०॥ ॥इतिगणेशस्तवराजः॥ ॥अथहरिद्रागणपतिकवचं॥ ॥
ईश्वरउवाच॥ ॥शृणुदेविप्रवक्ष्यामिकवचंसर्वसिद्धिदं॥पठित्वाधारयित्वाचमुच्यतेस
र्वसंकटात्॥अज्ञात्वाकवचंदेविगणेशस्यमनुंजपेत्॥सिद्धिर्नजायतेतस्यकल्पकोटिश
तैरपि॥ॐआमोदश्चशिरःपातुप्रमोदश्चशिखोपरि॥जिह्वायांसुमुखःपातुग्रीवायांदुर्मु
खःसदा॥विघ्नेशोहृदयेपातुविघ्ननाथश्चवक्षसि॥गणानांनायकःपातुबाहुयुग्मेसदा
मम॥विघ्नकर्त्ताचउदरेविघ्नहर्त्ताचलिंगके॥गजवक्त्रःकटिंपातुएकदंतोनितंबके॥
लंबोदरःसदापातुगुह्यदेशेममारुणः॥व्यालयज्ञोपवीतीमांपातुपादयुगेतथा॥जाप

कः सर्वदा पातु जानुजंघे गणाधिपः॥ हारिद्रः सर्वदा पातु सर्वांगे गणनायकः॥ य इदं प
ठेन्नित्यं गणेशस्य महेश्वरि॥ कवचं सर्वसिद्धाख्यं सर्वविघ्नविनाशनं॥ सर्वसंपत्प्र
दं साक्षात् सर्वशत्रुक्षयंकरं॥ ग्रहपीडाज्वरा रोगा ये चान्ये गुह्यकादयः॥ पठनाच्छ्रवणा
देव नाशमायांति तत्क्षणात्॥ धनधान्यकरं देवि कवचं सुरपूजितं॥ समो नास्ति मह
शानि कवचस्यास्य भूतले॥ किमन्यैर्वसदालापैः यत्रायुर्व्यर्थतां नियात्॥ ॥इति
विश्वसारतंत्रे हरिद्रागणपतिकवचं॥ ॥अथ सूर्यकवचं॥ ॥श्रीसूर्य उवाच॥
शृणु सांब महाबाहो शृणु मे कवचं शुभं॥ त्रैलोक्यमंगलं नाम कवचं परमाद्भुतं॥ यत्ज्ञा
त्वा मंत्रवित् सम्यक् फलमाप्नोति निश्चितं॥ यद्धृत्वा च महादेवो गणानामधिपोऽभवत्॥
पठनाद्धारणाद्विष्णुः सर्वेषां पालकः सदा॥ एवमिंद्रादयः सर्वे सर्वैश्वर्यमवाप्नुयुः॥
कवचस्य ऋषिर्ब्रह्मा छंदोऽनुष्टुप् उदाहृतं॥ श्रीसूर्यो देवता चात्र सर्वदेवनमस्कृतः॥ यशआ
रोग्यमोक्षेषु विनियोगः प्रकीर्तितः॥ प्रणवो मे शिरः पातु घृणिर्मे पातु भालकं॥ सूर्योनि

नयनद्वंद्वमादित्यः कर्णयुग्मकं॥ अष्टाक्षरो महामंत्रः सर्वाभीष्टप्रदायकः॥ ह्रीं बीजं मे मु
खं पातु हृदयं भुवनेश्वरी॥ चंद्रबिंबं विसर्गाद्यं पातु मे गुह्यदेशकं॥ अक्षरोऽसौ महामं
त्रः सर्वतंत्रेषु गोपितः॥ शिवो वह्निसमायुक्तो वामाक्षिबिंदुभूषितः॥ एकाक्षरो महामं
त्रः श्रीसूर्यस्य प्रकीर्तितः॥ गुह्याद्गुह्यतरो मंत्रो वांछाचिंतामणिः स्मृतः॥ शीर्षादिपादप
र्यंतं सदा पातु मनूत्तमः॥ इति ते कथितं दिव्यं त्रिषु लोकेषु दुर्लभं॥ श्रीप्रदं कांतिदं नित्यं
धनारोग्यविवर्द्धनं॥ कुष्ठादिरोगशमनं महाव्याधिविनाशनं॥ त्रिसंध्यं यः पठेन्नित्यं
अरोगी बलवान् भवेत्॥ बहुनात्र किमुक्तेन यद्यन्मनसि वर्तते॥ तत्तत्सर्वं भवेत्तस्य क
वचस्य प्रसादतः॥ भूतप्रेतपिशाचाश्च यक्षगंधर्वराक्षसाः॥ ब्रह्मराक्षसवेताला
नैवं द्रष्टुमपि क्षमाः॥ दूरादेव पलायंते तस्य संकीर्तनादपि॥ भूर्जपत्रे समालिख्य रो
चनागुरुकुंकुमैः॥ रविवारे च संक्रांत्यां सप्तम्यां च विशेषतः॥ धारयेत्साधकश्रेष्ठ त्रै
लोक्यविजयी भवेत्॥ त्रिलोहमध्यगं कृत्वा धारयेद्दक्षिणे भुजे॥ शिखायामथवा कंठे

सोपिस्यात्सर्वसंशयः॥ इतिते कथितं सांबत्रैलोक्यमंगलाभिधं॥ कवचं दुर्लभं लोके तव स्ने
हात्प्रकीर्त्तितं॥ अज्ञात्वा कवचं दिव्यं जपेत्सूर्यमनुत्तमं॥ सिद्धिर्न जायते तस्य कल्पकोटि
शतैरपि॥ ॥इति श्री ब्रह्मयामले त्रैलोक्यमंगलं नाम सूर्यकवचं॥ ॥अथ ना
रायणकवचं॥ ॥राजोवाच॥ यया गुप्तः सहस्राक्षः सवाहान्रिपुसैनिकान्॥ क्रीडन्नि
व विनिर्जित्य त्रैलोक्यां बुभुजे श्रियं॥ यथाततायिनः शत्रून्येन गुप्तोजयन्मृधे॥ श्रीबाद
रायणिरुवाच॥ ॥वृतः पुरोहितस्त्वाष्ट्रो महेंद्रायानुपृच्छते॥ नारायणाख्यं वर्माह तदिहै
कमनाः शृणु॥ विश्वरूप उवाच॥ ॥धौतांघ्रिपाणिराचम्य सपवित्र उदङ्मुखः॥ कृतस्वां
गकरन्यासो मंत्राभ्यां वाग्यतः शुचिः॥ नारायणपरं वर्म संनह्येद्भय आगते॥ पादयोर्जा
न्वोरूर्वोरुदरे हृद्यथोरसि॥ मुखे शिरस्यानुपूर्व्यादोंकारादीनि विन्यसेत्॥ ॐ नमो ना
रायणायेति विपर्ययमथापि वा॥ करन्यासं ततः कुर्याद्द्वादशाक्षरविद्यया॥ प्रणवादियका
रांतमंगुल्यंगुष्ठपर्वसु॥ न्यसेद्धृदय ॐकारं विकारमनु मूर्द्धनि॥ षकारं तु भ्रुवोर्म

ध्येणकारं शिखया न्यसेत्॥ वेकारं नेत्रयोर्युंज्यान्नकारं सर्वसंधिषु॥ मकारमस्त्र
मुद्दिश्य मंत्रमूर्त्तिर्भवेद्बुधः॥ सविसर्गं फडंतं तं सर्वदिक्षु विन्यसेत्॥ ॐ विष्णवे नम
इति॥ आत्मानं परमं ध्यायेद्ध्येयं षट्छक्तिभिर्युतं॥ विद्यातेजस्तपोमूर्त्तिमिमं मंत्र
मुदाहरेत्॥ ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्तांघ्रिपद्मः पतगेंद्रपृष्ठे॥ दरारिचर्मासि
गदेषुचापपाशान्दधानोष्टगुणोष्टबाहुः॥ जलेषु मां रक्षतु मत्स्यमूर्त्तिर्यादोगणेभ्यो
वरुणस्य पाशात्॥ स्थलेषु मायावटुवामनोव्यात्त्रिविक्रमः खेवतु विश्वरूपः॥ दुर्गे
ष्वटव्याजिमुखादिषु प्रभुः पायान्नृसिंहोसुरयूथपारिः॥ विमुंचतो यस्य महाट्टहासं
विनेदुर्न्यपतंश्च गर्भाः॥ रक्षत्वसौ माध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः॥ रा
मोद्रिकूटेष्वथ विप्रवासे सलक्ष्मणोव्याद्भरताग्रजोमां॥ मामुग्रधर्मादखिलात्प्रमादा
न्नारायणः पातु नरश्च हासात्॥ दत्तस्त्वयोगादथ योगनाथः पायाद्गुणेशः कपिलः क
र्मबंधात्॥ सनत्कुमारोवतु कामदेवाद्धयशीर्षा मां पथि देवहेलनात्॥ देवर्षिवर्यः

पुरुषार्चनांतरात्कूर्मो हरिर्मां निरयादशेषात्॥धन्वंतरिर्भगवान्पात्वपथ्याद्द्वंद्वा
द्भयादृषभो निर्जितात्मा॥यज्ञश्च लोकादवताज्जनांताद्बलो गणात्क्रोधवशादहींद्रः
द्वैपायनो भगवानप्रबोधाद्बुद्धस्तु पाखंडगणप्रमादात्॥कल्किः कलेः कालमलात्प्र
पातु धर्मावनायोरुकृतावतारः॥मां केशवो गदया प्रातरव्याद्गोविंद आसंगव
आत्तवेणुः॥नारायणः प्राह्ण उदात्तशक्तिर्मध्यंदिने विष्णुररींद्रपाणिः॥देवोऽपराह्णे
मधुहोग्रधन्वा सायं त्रिधामावतु माधवो मां॥दोषे हृषीकेश उतार्धरात्रे निशीथ एक
ओऽवतु पद्मनाभः॥श्रीवत्सधामापररात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्दनः॥दामो
दरोऽव्यादनुसंध्यं प्रभाते विश्वेश्वरो भगवान्कालमूर्तिः॥चक्रं युगांतानलतिग्मनेमि
भ्रमत्समंताद्भगवत्प्रयुक्तं॥दंदग्धि दंदग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो हुताशः॥
गदेऽशनिस्पर्शनविस्फुलिंगे निष्पिंढि निष्पिंढ्यजितप्रियासि॥कूष्मांडवैनायकयक्ष
रक्षोभूतग्रहांश्चूर्णय चूर्णयारीन्॥त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्रग्र

हघोरदृष्टीन्॥दरेंद्र विद्रावय कृष्णपूरितो भीमस्वनोऽरेर्हृदयानि कंपयन्॥त्वं तिग्मधा
रासिवरारिसैन्यमीशप्रयुक्तो मम छिंधि छिंधि॥चक्षूंषि चर्मन्शतचंद्र छादय द्विषा
मघोनां हर पापचक्षुषां॥यन्नो भयं ग्रहेभ्योऽभूत्केतुभ्यो नृभ्य एव च॥सरीसृपेभ्यो
दंष्ट्रिभ्यो भूतेभ्योंऽहोभ्य एव च॥सर्वाण्येतानि भगवन्नामरूपास्त्रकीर्तनात्॥प्रयांतु सं
क्षयं सद्यो ये नः श्रेयःप्रतीपकाः॥गरुडो भगवान्स्तोत्रस्तोभश्छंदोमयः प्रभुः॥रक्षत्वशे
षकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः॥सर्वापद्भ्यो हरेर्नामरूपयानायुधानि नः॥बुद्धींद्रिय
मनःप्राणान्पांतु पार्षदभूषणाः॥यथा हि भगवानेव वस्तुतः सदसच्च यत्॥सत्येनानेन
नः सर्वे यांतु नाशमुपद्रवाः॥यथैकात्म्यानुभावानां विकल्परहितः स्वयं॥भूषणायु
धलिंगाख्या धत्ते शक्तीः स्वमायया॥तेनैव सत्यमानेन सर्वज्ञो भगवान्हरिः॥पातु सर्वैः
स्वरूपैर्नः सदा सर्वत्र सर्वगः॥विदिक्षु दिक्षूर्ध्वमधः समंतादंतर्बहिर्भगवान्नार
सिंहः॥प्रहापयँल्लोकभयं स्वनेन स्वतेजसा ग्रस्तसमस्ततेजाः॥मघवन्निदमाख्यातं

वर्मनारायणात्मकं॥विजेष्यस्यंजसायेनदंशितोसुरयूथपान्॥एतद्धारयमाणस्तुयं
यंपश्यतिचक्षुषा॥पदावासंस्पृशेत्सद्यःसाध्वसात्सविमुच्यते॥नकुतश्चिद्भयंतस्यवि
द्यांधारयतोभवेत्॥राजदस्युग्रहादिभ्योव्याघ्रादिभ्यश्चकर्हिचित्॥इमांविद्यांपुराकश्चि
त्कौशिकोधारयन्द्विजः॥योगधारणयास्वांगंजहौसमरुधन्वनि॥तस्योपरिविमा
नेनगंधर्वपतिरेकदा॥ययौचित्ररथःस्त्रीभिर्वृतोयत्रद्विजक्षयः॥गगनात्पतितस्तस्य
सविमानोह्यवाक्शिराः॥सवालिखिल्यवचनादस्थीन्यादायविस्मितः॥प्रास्यप्राचीस
रस्वत्यांस्नात्वाधामस्वमन्वगात्॥श्रीशुकउवाच॥ ॥यइदंशृणुयात्कालेयोधारयति
चादृतः॥तंनमस्यंतिभूतानिमुच्यतेसर्वतोभयात्॥ ॥इतिश्रीभागवतेमहापुराणे
षष्ठस्कंधेनारायणवर्मोपदेशोनामाष्टमोध्यायः॥ ॥अथनृसिंहकवचं॥ ॥
नारदउवाच॥इंद्रादिदेववृंदेशतातेश्वरजगत्पते॥महाविष्णोर्नृसिंहस्यकवचंब्रूहि
मेप्रभो॥यस्यप्रपठनाद्विद्वांस्त्रैलोक्येविजयीभवेत्॥ब्रह्मोवाच॥ ॥शृणुनारद

वक्ष्यामिपुत्रश्रेष्ठतपोधन॥कवचंनरसिंहस्यत्रैलोक्यविजयाभिधं॥यस्यप्रपठनाद्वाग्मी
त्रैलोक्यविजयीभवेत्॥स्रष्टाहंजगतांवत्सबभूवश्चदिगीश्वरः॥ब्रह्ममंत्रमयंवक्ष्येभूता
दिविनिवारकं॥यस्यप्रसादाद्दुर्वासास्त्रैलोक्यविजयीमुनिः॥पठनाद्धारणाद्यस्यशास्ताच
क्रोधभैरवः॥त्रैलोक्यविजयस्यापिकवचस्यप्रजापतिः॥ऋषिश्छंदश्चगायत्रीनृसिंहोदे
वताविभुः॥क्ष्रौंबीजंमेशिरःपातुचंद्रवर्णोमहामनुः॥उग्रंवीरंमहाविष्णुंज्वलंतंसर्वतो
मुखं॥नृसिंहंभीषणंभद्रंमृत्युमृत्युंनमाम्यहं॥द्वात्रिंशदक्षरोमंत्रोमंत्रराजःसुरद्रुमः॥कं
ठंपातुध्रुवंक्ष्रौंहृद्भगवतेचक्षुषीमम॥नृसिंहायचज्वालामालिनेपातुकर्णकं॥दीप्तदंष्ट्रा
यतथाग्निनेत्रायचनासिकां॥सर्वरक्षोघ्नायसर्वभूतविनाशायच॥सर्वज्वरविनाशाय
दहदहपचद्वयं॥रक्षरक्षवर्ममंत्रःस्वाहापातुमुखंमम॥तारादिरामचंद्रायनमःपा
तुहृदयंमम॥क्लींपायात्पार्श्वयुग्मंचतारोनमःपदंततः॥नारायणायपार्श्वंचआं
ह्रींक्रौंक्ष्रौंचहुंफट्कटिंपातुषडक्षरः॥ॐनमोभगवतेपदंवासुदेवायचपृष्ठं॥क्लींकृ

मायसदापातु नृसिंहो नमीचमनुत्तमः॥ क्ष्रौं ग्लौं ह्रीं श्यामलायननमपायात्सहृदयं॥ क्ष्रौं नृसिंहाय
क्ष्रौं च सर्वांगं मे सदावतु॥ इति ते कथितं वत्स सर्वमंत्रौघविग्रहं॥ तव स्नेहान्मयाख्यातं प्रवक्त
व्यं न कस्यचित्॥ गुरुपूजां विधायाथ गृह्णीयात्कवचं ततः॥ सर्वपुण्ययुतो भूत्वा सर्वसिद्धियु
तो भवेत्॥ शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः॥ हवनादीन्दशांशेन कृत्वा तत्साध
कोत्तमः॥ ततस्तु सिद्धिकवचं पुण्यात्मा मदनोपमः॥ स्पर्द्धामिद्धन्न वने लक्ष्मीर्वाणी वसेत्त
तः॥ पुष्पांजल्यष्टकं दत्वा मूलेनैव पठेत्सकृत्॥ अपि वर्षसहस्राणां पूजायाः फलमाप्नुया
त्॥ भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि॥ कंठे वा दक्षिणे बाहौ नरसिंहो भवेत्स्वयं॥ यो
षिद्वामभुजे चैव पुरुषो दक्षिणे करे॥ बिभृयात्कवचं दिव्यं सर्वसिद्धियुतो भवेत्॥ काक
वंध्या च या नारी मृतवत्सा च या भवेत्॥ जन्मवंध्या नष्टपुत्रा बहुपुत्रवती भवेत्॥ कवच
स्य प्रसादेन जीवन्मुक्तो नरः क्षितौ॥ त्रैलोक्यं क्षोभयत्येव त्रैलोक्यविजयी भवेत्॥ भूतप्रेत
पिशाचाश्च राक्षसा दानवाः॥ तं दृष्ट्वा च पलायंते देशाद्देशांतरं ध्रुवं॥ यस्मिन्गेहे च कवचं

ग्रामे वा यदि तिष्ठति॥ तं देशं तु परित्यज्य प्रयांति चातिदूरतः॥ ॥इति ब्रह्मसंहितायां त्रै
लोक्यविजयं नाम कवचं समाप्तं॥ ॥एतां विद्यामधिगतो विश्वरूपाच्छतक्रतुः॥ त्रैलो
क्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेसुरान्॥ ॥अथ विष्णुस्तोत्रं॥ ॥आदाय वेदाः सकला
समुद्रान्निहत्य शंखं रिपुमत्युदग्रं॥ दत्ताः पुरा येन पितामहाय विष्णुं तमाद्यं भज मत्स्यरूपं॥१॥
दिव्यामृतार्थं मथिते महाब्धौ देवासुरैर्वासुकिमंदराद्यैः॥ भूमेर्महावेगविघूर्णितायां तं कूर्म
माधारगतं नमामि॥२॥ समुद्रकांचीसरिदुत्तरीया वसुंधरा मेरुकिरीटधारा॥ दंताग्रतोये
न समुद्धृता भूस्तमादिकोलं शरणं प्रपद्ये॥३॥ भक्तार्तिभंगं गरुमयोधियाय स्तंभांतराज्जा
तः सहसा नृसिंहः॥ रिपुं सुराणां निशितैर्नखाग्रैर्विदारयंतं न च विस्मरामि॥४॥ चतुःसमुद्र
न्तरणा धरित्री न्यासाय नालं चरणस्य यस्य॥ एकस्य नान्यस्य पदं सुराणां त्रिविक्रमं सर्वगं
तं नमामि॥५॥ त्रिःसप्तवारं नृपतीन्निहत्य यस्तर्पणं रक्तमयं पितृभ्यः॥ चकार दोर्दंडबले
न सम्यक् तमादिशूरं प्रणमामि विष्णुं॥६॥ कूले बबंधां समवाप्य जन्मा विधाय सेतुं जलधे

र्जितः॥ लंकेश्वरं यः रामयां चकार सीतापतिं तं प्रणमामि नित्यं॥७॥ हत्वेन सर्वान्निस्वरान्नि
कुम्भ चकार चूर्णं कुराज्य महारैः॥ यः कुम्भमासाद्य बलं बलीयान् नक्तान्नजेतं वजनं कराम
॥८॥ सुरासुराणामसुराधिजेतुं संनावयन्नं चीवरचिह्नयेषं॥ चकार यः रास्तमनो बकुलं
तं मूलभक्तं प्रणतोस्मि कुर्वं॥९॥ कृत्वा वसानेनिखिलैः सुराद्यैः संघट्टयामास निमेषमात्रात्
यस्तेजसा निर्दहतातिनामो विश्वात्मकं तं तुरगं नजाम॥१०॥ शंखं च सुचक्रं सुगदं सरोजं
दोर्भिर्दधानं गरुडाधिरूढं॥ श्रीवत्सचिह्नं जगदादिमूलं तमालनीलं हृदि विष्णुमीडे॥११॥
हीरांबुधौ शेषविशेषकल्पे शयानमंतस्मितशोभिवक्त्रं॥ उत्फुल्लनेत्रांबुदनाभ्यंभ्या
यं कृतीनामसकृत्स्मरामि॥१२॥ प्रीणाति येन यास्कृत्या जगन्नाथं जगन्मयं॥ धर्मार्थकाममो
क्षाणां मानयेपुरुषोत्तमं॥१३॥ ॥इति विष्णुस्तोत्रं समाप्तं॥ ॥अथ रामकवचं॥ ॥
ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनं॥ जानकीलक्ष्मणोपेतं जटामुकुटमंडितं॥ सासि
तूणधनुर्बाणपाणिनक्तंचरांतकं॥ स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुं॥ रामरक्षां प

ठेत्प्राज्ञः पापघ्नीं सर्वकामदां॥ अस्य श्रीरामकवचस्य बेदव्यास ऋषिर्गायत्री छंदः श्रीरामचं
द्रो देवता श्रीरामप्रीत्यर्थे जपे विनियोगः॥ ॐ शिरो मे राघवः पातु भालं दशरथात्मजः॥
कौशल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती॥ घ्राणं पातु मखत्राता मुखं सौमित्रिवत्स
लः॥ जिह्वां विद्यानिधिः पातु कंठं भरतवंदितः॥ स्कंधौ दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः॥
करौ सीतापतिः पातु हृदयं जामदग्न्यजित्॥ वक्षः पातु कबंधारिः स्तनौ गीर्वाणवंदितः॥
पार्श्वौ कुलपतिः पातु कुक्षिमिक्ष्वाकुनंदनः॥ मध्यं पातु खरध्वंसी नाभिं जांबवदाश्रयः॥
गुह्यं जितेंद्रियः पातु पृष्ठं पातु रघूद्वहः॥ सुग्रीवेशः कटिं पातु सक्थिनी हनुमत्प्रभुः॥
ऊरू रघूत्तमः पातु रक्षःकुलविनाशकृत्॥ जानुनी सेतुकृत्पातु जंघे दशमुखांतकः॥ पा
दौ विभीषणश्रीदः पातु रामोखिलं वपुः॥ एतां रामबलोपेतां रक्षां यः सुकृती पठेत्॥ स चि
रायुः सुखी पुत्री विजयी विनयी भवेत्॥ पातालभूतलव्योमचारिणश्छद्मचारिणः॥
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः॥ रामेति रामभद्रेति रामचंद्रेति वा स्मरन्॥ नरो न

लिप्यते पापैर्भुक्तिं मुक्तिं च विंदति॥ जगज्जैत्रैकमंत्रेण रामनाम्नाभिरक्षितं॥ यः पठेद्धा
रयेत्तस्य करस्थाः सर्वसिद्धयः॥ भूर्ज पत्रे लिखित्वा विद्यां गंधचंदनचर्चितं॥ कृत्वा वै धार
येद्यस्तु सोऽनीहं फलमाप्नुयात्॥ काकवंध्या च या नारी मृतापत्या च या भवेत्॥ बहुपत्या
जीववत्सा सा भवेन्नात्र संशयः॥ वज्रपंजरनामेदं यो रामकवचं पठेत्॥ अव्याहताज्ञः
सर्वत्र लभते जयमंगलं॥ आदिष्टवान्यथा स्वप्ने रामरक्षामिमां हरिः॥ तथा लिखित
वान्प्रातः प्रबुद्धो बुधकौशिकः॥ धन्विनौ बद्धनिस्त्रिंशौ काकपक्षधरोत्तमौ॥ वीरौ मां
पथि रक्षेतां तावुभौ रामलक्ष्मणौ॥ तरुणौ रूपसंपन्नौ सुकुमारौ महाबलौ॥ पुंडरीकवि
शालाक्षौ चीरकृष्णाजिनांबरौ॥ फलमूलाशिनौ दांतौ तापसौ ब्रह्मचारिणौ॥ पुत्रौ दशर
थस्यैतौ भ्रातरौ रामलक्ष्मणौ॥ शरण्यौ सर्वसत्वानां श्रेष्ठौ सर्वधनुष्मतां॥ रक्षःकुलनि
हंतारौ त्रायेतां नो रघूत्तमौ॥ आत्तसज्यधनुषाविषुस्पृशावक्षयाशुगनिषंगसंगिनौ॥
रक्षणाय मम रामलक्ष्मणावग्रतः पथि सदैव गच्छतां॥ सन्नद्धः कवची खड्गी चापबाण

धरो युवा॥ गच्छन्मनोरथं चास्माद्रामः पातु सलक्ष्मणः॥ अग्रतस्तु नसिंहो मे पृष्टतो ग
रुडध्वजः॥ पार्श्वयोस्तु धनुष्मंतौ सशरौ रामलक्ष्मणौ॥ रामो दाशरथिः शूरो लक्ष्मणानु
चरो बली॥ काकुत्स्थः पुरुषः पूर्णः कौशल्येयो रघूत्तमः॥ वेदांतवेद्यो यज्ञेशः पुराणपुरु
षोत्तमः॥ जानकीवल्लभः श्रीमानप्रमेयपराक्रमः॥ दक्षिणे लक्ष्मणो धन्वी वामे च जान
की शुभा॥ पुरतो मारुतिर्यस्य तं नमामि रघूत्तमं॥ एतानि मम नामानि मद्भक्तो यः सदा
पठेत्॥ अश्वमेधायुतं पुण्यं संप्राप्नोति न संशयः॥ आपदामपहर्त्तारं दातारं सर्वसंप
दां॥ गुणाभिरामं श्रीरामं भूयो भूयो नमाम्यहं॥ ॥इति श्रीपद्मपुराणे वेदव्यास
कृतौ भगवदुपदिष्ट कौशिकप्रणीतं वज्रपंजरनामाख्यं श्रीरामकवचं समाप्तं॥ ॥
अथ मंत्रराजात्मकस्तोत्रं॥ ॥श्रीहनुमानुवाच॥ ॥तिरश्चामपि राजेति समवायं
समीयुषां॥ यथा सुग्रीवमुख्यानां यस्तमुग्रं नमाम्यहं॥ यो महान्पूजितो व्यापि महाक
करुणामृतः॥ स्तुतं येन जरामोरुं महाविष्णुं नमाम्यहं॥ तेजसा आपिता यस्य ज्वलंति ज्व

त्वनाद्य:॥प्रकाशाते स्वतंत्रो यस्तं स्वजं तं नमाम्यहं॥सर्वतोमुखतायेन लीलया दर्शि
तारणे॥राद्दसेश्वरयोधानां तं वंदे सर्वतोमुखं॥नत्नानां तु प्रपन्नानां हि नास्ति च तथा
नु॥सिंह:सन्नेरिरिशेऽरूदस्तं नृसिंहं नमाम्यहं॥यस्मात् विभ्यति यातके, चक्षनेऽशा:स
त्ववं॥नियं तनोति पापानां भीषणं तं नमाम्यहं॥परस्य योग्यतापेक्षा रहितो नित्यमं
लं॥दशात्मिवं निजे दीर्घाभिस्तं नदं नमाम्यहं॥योमृत्युं निजदासानां मारयत्यां स्वले
द॥तन्नो दाहत यो वन्योमृत्युं मृत्युं नमाम्यहं॥यत्पादपद्मप्रणतो न बध्नाति मपूरुष:॥न
मार्हां सर्वदेवानां नमनीयं नमाम्यहं॥आत्मानो वं समृद्धिप्रदास्येनेव रघहं॥नहि
हं प्रत्यहं रामं सस्मा तं सहजं स्मरणं॥निखंश्री रामचन्द्रस्य किंकरायाम किंकरा:॥शिव
मर्यैदिदास्तस्य सिद्धयस्तस्य दासिका:॥इयं हनुमता प्रोक्तं मंत्रराजात्मकं स्तवं॥पठे
नुदिनं यस्तु स रामे भक्तिमान् भवेत्॥ ॥इति श्री हनुमत्कल्पे मंत्रराजात्मकस्तव
समाप्त:॥ ॥वेदव्यास उवाच॥ ॥श्रृणु गांगेय वक्ष्यामि रामास्याद्भुत कर्मण:॥

नामाद्भुतं कपुण्यं त्रिषु लोकेषु विश्रुतं॥नातःपरतरं गुह्यं त्रिषु लोकेषु विद्यते॥कैलाश
शिखरे रम्ये नानारत्नविचित्रिते॥एकाग्रप्रयतो भूत्वा विष्णुनाराधनतत्पर:॥
उपविष्टस्ततो भोक्तुं पार्वतीं शंकरोब्रवीत्॥पार्वत्यापि मयासार्द्धं भोक्तुं भुवनवंदि
ते॥तमाह पार्वती देवी जप्यानामसहस्रकं॥ततो भोक्ष्याम्यहं देव भोमतां जयतां प्रभो
ततस्तां पार्वतीं प्राह प्रहसन् परमेश्वर:॥धन्यासि कृतपुण्यासि विष्णुभक्तासि पार्वति
दुर्लभा येन यौ भक्तिर्नामधेये धुनेश्वरि॥रकारादीनि नामानि श्रृण्वतो मम पार्वति॥
मन:प्रसन्नतामेति रामनामाभिशंकया॥रमंते योगिनो नंते सत्यानंदे चिदात्मनि॥
इति रामपदेनासौ परं ब्रह्माभिधीयते॥राम रामेति रामेति रमे रामे मनोरमे॥सह
स्रनाम तत्तुल्यं रामनाम वरानने॥रामेत्युक्त्वा महादेवि भुंक्ष्व सार्द्धं मया धुना॥ततो
रामेति नामश्लोकास हर्षं स्वच पार्वति॥ततो भुक्त्वा महादेवी पतिना सह संस्थिता॥प
प्रच्छ श्रीमहादेवं प्रीतिप्रसन्नमानसा॥सहस्रनामतत्तुल्यं रामनाम त्वयोदितं॥त

स्मात्वयाप्यपिनामानिसंतिचेछ्रावयद्विज॥कथ्यतांममदेवेशतत्रमेप्रीतिरुत्तमा॥
श्रीशंकरउवाच॥ ॥लौकिकाःवैदिकाःशब्दाःयेकेचित्संतिपार्वति॥नामानिराम
कृष्णसहस्रंतेषुचाधिकं॥तस्माच्चाप्यनंतमुख्यंहिनाम्नामष्टोत्तरंशतं॥जपतःसर्ववेदा
श्चसर्वमंत्राश्चपार्वति॥तस्मात्कोटिगुणंपुण्यंरामनाम्नैवलभ्यते॥अस्यश्रीरामचंद्र
देवताश्रीरामचंद्रप्रीत्यर्थेविनियोगः॥श्रीरामोरामभद्रश्चरामचंद्रश्चशाश्वतः॥राजी
वलोचनःश्रीमान्राजेंद्रोरघुपुंगवः॥जानकीवल्लभोजैत्रोजितमित्रोजनार्दनः॥वि
श्वामित्रप्रियोदांतःशरण्यत्राणतत्परः॥वालिप्रमथनोवाग्मीसत्यवाक्सत्यविक्रमः॥
सत्यव्रतोव्रतधरःसदाहनुमदाश्रयः॥कौशलेयःखरध्वंसीविराधवधपंडितः॥विभी
षणपरित्राताशग्रीवशिरोहरः॥सप्ततालप्रभेत्ताचहरकोदंडखंडनः॥जामदग्न्य
महादर्पदहनस्ताडकांतकः॥वेदांतसारोमेयात्मापुण्यचारित्रकीर्तनः॥त्रिलोकीर
क्षकोधन्वीदंडकारण्यपुण्यकृत्॥अहल्यापावनश्चैवपितृभक्तोवरप्रदः॥जितेंद्रियो

जितक्रोधोजितामित्रोजगद्गुरुः॥ऋक्षवानरसंघातीचित्रकूटसमाश्रयः॥जयंतत्राणव
रदःसुमित्रापुत्रसेवितः॥सर्वदेवाधिदेवश्चमृतवानरजीवनः॥मायामारीचहंता
चमहाभागोमहाभुजः॥सर्वदेवस्तुतःसौम्योब्रह्मण्योमुनिसंस्तुतः॥महायोगीमहोदा
रःसुग्रीवेप्सितराज्यदः॥सर्वपुण्याधिकफलःस्मृतसर्वाघनाशनः॥आदिपुरुषोमहापु
रुषःपरमःपुरुषस्तथा॥पुण्योदयोदयासारःपुराणःपुरुषोत्तमः॥स्मितवक्त्रोमित
भाषीपूर्वभाषीचराघवः॥अनंतगुणगंभीरोधीरोदात्तगुणोत्तरः॥मायामानुषचारि
त्रोमहादेवाभिपूजितः॥सेतुकृज्जितवारीशःसर्वतीर्थमयोहरिः॥श्यामांगःसुंदरःशू
रःपीतवासाधनुर्धरः॥सर्वयज्ञाधिपोयज्ञोजरामरणवर्जितः॥परमात्मापरंब्रह्म
सच्चिदानंदविग्रहः॥परंज्योतिःपरंधामपराकाशपरात्परः॥परेशःपारगःपारःसर्वदे
वात्मकःशिवः॥इतिश्रीरामचंद्रनाम्नामष्टोत्तरंशतं॥गुह्याद्गुह्यतरंदेवि
तवप्रीत्याप्रकीर्तितं॥यःपठेच्छृणुयाद्वापिनित्ययुक्तेनचेतसा॥ससर्वैर्मुच्यतेपापैःम

स्यकोटिशतोद्भवैः॥ तत्क्षणान्निस्त्वलं तां यांति शात्रवो यांति मित्रतां॥ राजानो दासतां यांति व
ह्नयो यांति सौम्यतां॥ आनुकूल्यं च भूतानि स्थैर्यं यांति चराश्रयाः॥ अनुग्रहं ग्रहा यांति शां
तिमायांति उपद्रवाः॥ पठतो भक्तिभावेन जलस्यापि दिने दिने॥ यः पठेत्सर्वयात्रा तस्य
करपंकजगं ध्रुवं॥ यद्यत्कामयते चित्ते तत्तदाप्नोति कीर्तनात्॥ यः पठेद्रामचंद्रस्य नाममा
होत्तरं शतं॥ ज्ञानेनापि च कुर्वाणिमम पापे न लिप्यते॥ सर्ववेदेषु तीर्थेषु दानेषु च तप
सु च॥ तत्फलं कोटिगुणितं स्तवेनानेन लभ्यते॥ अन्यकल्पेषु सर्वेषु पठनान्मंत्रमश्नु
ते॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च॥ वैकुंठवासमाप्नोति दशपूर्वैर्दशापरैः
रामं दूर्वादलश्यामं पद्माक्षं पीतवाससं॥ स्तुवंति नामभिर्दिव्यैः न ते संसारिणो नराः
रामाय रामभद्राय रामचंद्राय वेधसे॥ रघुनाथाय नाथाय सीतायाः पतये नमः॥ इ
मं मंत्रं महादेवी जपन्नेव दिवानिशं॥ सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात्॥ इ
ति तत् श्रीरामचंद्रस्य माहात्म्यं मम सम्मतं॥ कथितं तव गांगेय यतस्त्वं चेसवो मम॥ ततना

नमहेशानिहरकोदंडखंडनं॥ जानकीहृदयानंदं वंदे तं रघुनंदनं॥ ॥इति श्रीप
द्मपुराणे ईश्वरपार्वतीसंवादे श्रीरामचंद्रस्तवः॥ ॥अथ श्रीकृष्णस्तोत्रं॥ ॥प्र
सीद जगन्नाथ मज्ञानात्कुंठितात्मने॥ तवांघ्रिपंकजरजोरागिणीं भक्तिमुत्तमां॥ अज
प्रसाद जगदुत्सितधुतिपंजर॥ अप्रमेय प्रसीदस्मद्दुःखहन्पुरुषोत्तम॥ स्वसंवे
द्यप्रसीदास्मदानंदात्मन्ननामय॥ अचिंत्यसारविश्वात्मन् प्रसीद परमेश्वर॥ प्रसीद
तुंगतुंगीनां प्रसीद शिवशोभन॥ प्रसीद सुद्युगंभीर गंभीराणां महाद्युते॥ प्रसीद रक्ष
विस्तीर्ण विस्तीर्णानामगोचर॥ प्रसीदार्जवर्जानां प्रसीदांतांतयापिनां॥ गरीगरी
यः सर्वेशा प्रसीदानंतदेहिनां॥ जय माधव मायात्मन् जय शाश्वतशंखधृक्॥ जय शंख
धरः श्रीमान् जय नंदकनंदन॥ जय चक्रगदापाणे जय देव जनार्दन॥ जय रत्नकरा
बद्धकिरीटाक्रांतमस्तक॥ जय पक्षिपतिच्छायानिरुद्धार्ककरारुण॥ नमस्ते नरकारा
ते नमस्ते मधुसूदन॥ नमस्ते ललितापांग नमस्ते नरकांतक॥ नमः पापहराराज्ञ

नमः सर्वज्ञयापह॥नमः संभृतसर्वात्मन्नमः संभृतकौस्तुभ॥नमस्तेनयनातीत
नमस्तेनयहारक॥नमोविच्छिन्नदेहाय नमः स्मृतिपथातिग॥नमस्त्रिमूर्त्तिभेदेनस
र्गस्थित्यंतहेतवे॥विष्णवेत्रिदशारातिविष्णवेपरमात्मने॥चक्रभिन्नारिचक्रायचक्रि
णेशार्ङ्गधारिणे॥विष्णवेविष्वगंधायविष्वस्तालयवर्त्तिने॥नमोस्तुयोगध्येयात्मन्न
मोस्त्वध्यात्मरूपिणे॥भक्तिप्रदायभक्तानांनमस्तेमुक्तिदायिने॥स्तवमंहवनंचेशध्या
नपूजानमस्क्रिया॥देवेशकर्मसर्वस्मिन्नवेदाराधनंतव॥इतीहवर्णजपाध्यानेदत्तो
विष्णुपूजानियतहृदयकर्मास्मिन्मंत्रीचिराय॥सखलुसकलकामान्प्राप्यकृष्णांतरा
त्माजननमृतिविमुक्तःप्राप्नुतमामुक्तिमेति॥गोगोपगोपिकावीतंगोपालंगोपुगोप्रदं॥
गोगैवीत्संद्रगोसहस्रौमिगोकुलनायकं॥ ॥इतिश्रीकृष्णस्तोत्रं॥ ॥अ
थगोपालस्तोत्रं॥ ॥नवीननीरदश्यामंनीलेंदीवरलोचनं॥वल्लवीनंदनंवंदे
कृष्णंगोपालनंदनं॥स्फुरद्बर्हदलोद्बद्धनीलकुंचितमूर्द्धजं॥कदंबकुसुमोद्बद्ध

वनमालाविभूषितं॥गंडमंडलसंसर्गिचलत्कांचनकुंडलं॥स्थूलमुक्ताफलोदारहारो
द्योतितवक्षसं॥हेमांगदतुलाकोटिकिरीटोज्वलविग्रहं॥मंदमारुतसंक्षोभवंदितांब
रसंचयं॥रुचिरोष्ठपुटन्यस्तवंशीमधुरनिस्वनैः॥लसद्गोपालिकाचेतोमोहयंतंमु
हुर्मुहुः॥वल्लवीवदनांभोजमधुपानमधुव्रतं॥क्षोभयंतंमनस्तासांसस्मेरापांगवी
क्षणैः॥यौवनोद्भिन्नदेहाभिःसंसक्ताभिःपरस्परं॥विचित्रांबरभूषाभिःगोपनारीभि
रावृतं॥प्रभिन्नांजनकालिंदीजलकेलिकलोत्सुकं॥योधयंतंक्वचिद्गोपान्व्याहरंतंगवां
गणं॥कालिंदीजलसंसर्गिशीतलानिलकंपिते॥कदंबपादपछायेस्थितंवृंदावनेक्वचि
त्॥रत्नभूधरसंलग्नरत्नासनपरिग्रहं॥कल्पपादपमध्यस्थहेममंडपिकागतं॥व
संतकुसुमामोदसुरभीकृतदिङ्मुखे॥गोवर्द्धनगिरौरम्येस्थितंरासरसोत्सुकं॥सव्य
हस्ताब्जलग्नस्तागिरिवयतपत्रकं॥खंडिताखंडलोन्मुक्तमुक्ताहारघनाघनं॥वेणु
वाद्यमहोल्लासकृतंहुंकारनिःस्वनैः॥सवत्सैरुन्मुखैःशश्वद्गोकुलैरभिवीक्षितं॥स

त्वमेवानुगायद्भिस्तत्रैव वशवर्त्तिनि ॥ दंडपाणेश्च तत्र कृष्णो गोपालैरुपशोभितं ॥ नारदा
द्यैर्मुनिश्रेष्ठैर्वेदवेदांगपारगैः ॥ प्रीतिस्निग्धया वाचा स्तूयमानं परात्परं ॥ य एवं चिं
तयेद्देवं भक्त्या संस्तौति मानवः ॥ त्रिसंध्यं तस्य तुष्टोसौ ददाति वरमीप्सितं ॥ राजवल्लभ
तामेति भवेत्सर्वजनप्रियः ॥ अचलां श्रियमाप्नोति सवाग्मी जायते ध्रुवं ॥ ॥इ
ति श्रीगौतमीयतंत्रे गोपालस्तोत्रं समाप्तं ॥ ॥अथ श्रीकृष्णकवचं ॥ ॥पुल
स्त्य उवाच ॥ भगवन् सर्वधर्मज्ञ कवचं यत्प्रकाशितं ॥ त्रैलोक्यमंगलं नाम कृपया क
थय प्रभो ॥ सनत्कुमार उवाच ॥ ॥शृणु वक्ष्यामि राजेंद्र कवचं परमाद्भुतं ॥ नाराय
णेन कथितं कृपया ब्रह्मणे पुरा ॥ ब्रह्मणा कथितं मह्यं परं स्नेहाद्वदामि ते ॥ अतिगुह्यतरं
तत्त्वं ब्रह्ममंत्रौघविग्रहं ॥ यद्धृत्वा पठनाद्ब्रह्मा सृष्टिं वितनुते ध्रुवं ॥ यद्धृत्वा पठनात्पाति
महालक्ष्मीर्जगत्त्रयं ॥ पठनाद्धारणाच्छंभुः संहर्त्ता सर्वतत्त्ववित् ॥ त्रैलोक्यजननी दुर्गा म
हिषादिमहासुरान् ॥ वरदृप्तान् जघानैव पठनाद्धारणाद्यतः ॥ एवमिंद्रादयः सर्वे स

र्वैश्वर्यमवाप्नुयुः ॥ शिष्याय विष्णुभक्ताय साधकाय प्रकाशयेत् ॥ शठाय परशिष्याय दत्वा
च मृत्युमवाप्नुयात् ॥ त्रैलोक्यमंगलस्यास्य कवचस्य प्रजापतिः ॥ ऋषिश्छंदश्च गायत्री देवो
नारायणः स्वयं ॥ धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः ॥ प्रणवो मे शिरः पातु न
मो नारायणाय च ॥ भालं पायान्नेत्रयुग्मं अष्टार्णो भुक्तिमुक्तिदः ॥ क्लीं पायाच्छ्रोत्रयुग्मं च
एकाक्षरः सर्वमोहनः ॥ क्लीं कृष्णाय सदा घ्राणं गोविंदायेति जिह्विकां ॥ गोपीजनप
वल्लभाय स्वाहाननं मम ॥ अष्टादशाक्षरो मंत्रः कंठं पातु दशाक्षरः ॥ गोपीजनव
ल्लभाय स्वाहा पातु भुजद्वयं ॥ ॐ ह्रीं श्रीं श्यामलांगाय नमः स्कंधौ दशाक्षरः ॥ क्लीं कृष्ण क्लीं
करौ पायात् क्लीं कृष्णायांगजोऽवतु ॥ हृदयं श्रीभुवनेशानी क्लीं कृष्णाय क्लीं स्तनौ मम ॥ गो
पालायाग्निजायायै कुक्षियुग्मं सदावतु ॥ क्लीं कृष्णाय सदा पातु पार्श्वयुग्ममनुत्तमं ॥ कृ
ष्णगोविंदकौ पातु स्मराद्यौ ङेयुतौ मनू ॥ अष्टाक्षरः पातु नाभिं कृष्णेति द्व्यक्षरोऽवतु ॥ पृ
ष्ठं क्लीं कृष्णकं कालं क्लीं कृष्णाय द्विठांतकः ॥ सक्थिनी सततं पातु श्रीं ह्रीं क्लीं कृष्ण ठद्वयं

उरुस्थलाद्धरः पायात्त्र्यषो दशाक्षरोवतु॥ श्रीं ह्रीं क्लीं पदतो गोपीजनवल्लभपदं ततः॥ ज
यस्वाहेति पायुं मे क्लीं ह्रीं श्रीं सदशार्णकः॥ जानुनी च सदा पातु ह्रीं श्रीं क्लीं च दशाक्षरः॥ पातु
जंघे चक्रायुधायुधः॥ अष्टादशाक्षरो ह्रीं श्रीं पूर्वको विंशवर्णकः॥ सर्वांगं मे सदा पातु द्वार
कानायको बली॥ नमो भगवते पश्चात् वासुदेवाय तत्परं॥ ताराद्यो द्वादशार्णोयं प्राच्यां मां
सर्वदावतु॥ ह्रीं ह्रीं क्लीं दशार्णस्तु क्लीं क्लीं श्रीं वोऽष्टाक्षरः॥ गदाद्युदायुधो विष्णुर्मामग्नेर्दि
शि रक्षतु॥ ह्रीं श्रीं दशाक्षरो मंत्रो दक्षिणे मां सदावतु॥ तारो नमो भगवते रुक्मिणीवल्लभ
य च॥ स्वाहेति षोडशार्णोयं नैरृत्यां दिशि रक्षतु॥ क्लीं हृषीकेशपदं तायनमो मां वारुणेव
तु॥ अष्टादशार्णः कामांतो वायव्ये मां सदावतु॥ श्रीं मायाकामकृष्णाय गोविंदाय द्विठो म
नुः॥ द्वादशार्णात्मको विष्णुरुत्तरे मां सदावतु॥ वाग्भवं कामकृष्णाय ह्रीं गोविंदाय तत्प
रं॥ श्रीं गोपीजनवल्लभाय स्वाहा स्तोत्स्ततः परं॥ द्वाविंशत्यक्षरो मंत्रो मामैशान्ये सदा
वतु॥ कालीयस्य फणामध्ये दिव्यं नृत्यं करोति तं॥ नमामि देवकीपुत्रं नृत्यराजानमच्युतं

द्वात्रिंशदक्षरो मंत्रोप्यधो मां सर्वदावतु॥ कामदेवाय विद्महे पुष्पबाणाय धीमहि॥ तन्नो
नंगः प्रचोदयात् एष मां पातु चोर्द्धतः॥ इति ते कथितं विप्र ब्रह्ममंत्रौघविग्रहं॥ त्रैलोक्य
मंगलं नाम कवचं प्रपठेन्नरः॥ सकृद्द्वित्रिर्यथाज्ञानं सोपि सर्वतपोमयः॥ मंत्रेषु सक
लेष्वेव देशिको नात्र संशयः॥ शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः॥ हवनादीन्
दशांशेन कृत्वा तत्साधयेद्ध्रुवं॥ यदि स्यात्सिद्धकवचो विष्णुरेव भवेत्स्वयं॥ मंत्रसिद्धि
र्भवेत्तस्य पुरश्चर्यां विना ततः॥ स्पर्द्धामुद्धूय सततं लक्ष्मीर्वाणी वसेत्ततः॥ पुष्पांजल्यष्टकं
दत्वा मूलेनैव पठेत्सकृत्॥ दशवर्षसहस्राणां पूजायाः फलमाप्नुयात्॥ भूर्जे विलिख्य
गुटिकां स्वर्णस्थां धारयेद्यदि॥ कंठे वा दक्षिणे बाहौ सोपि विष्णुर्न संशयः॥ अश्वमेधस
हस्राणि वाजपेयशतानि च॥ महादानानि यान्येव प्रादक्षिण्यं भुवस्तथा॥ कलां नार्हंति
तान्येव सकृदुच्चारणात्ततः॥ कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नरः॥ पुत्रपौत्रैः सं
माप्नुकस्तो लोकविजयी भवेत्॥ इदं कवचमज्ञात्वा भजेद्यः पुरुषोत्तमं॥ शतलक्षप्रज

तोपिनमंत्रः सिद्धिदायकः॥ ॥इतिश्रीसनत्कुमारतंत्रे त्रैलोक्यमंगलंनामकवचं
समाप्तं॥ ॥अथशिवस्तोत्रं॥ ॥धरायोग्निमरुद्व्योमसखेंदुर्यज्वमूर्तये॥सर्वभू
तांतरस्थायशंकरायनमोनमः॥१॥क्लृप्तंतदृतयासायक्लृतयेक्लृतजन्मने॥अतींद्रि
यायमहसेशाश्वतायनमोनमः॥२॥स्थूलसूक्ष्मविनाशास्पमनिर्देश्यायशांतये॥लवाय
नवच्छिन्नायदुःखहंत्रेनमोस्तुते॥३॥तर्कमार्गानिवृत्तायतपसांफलदायिने॥चतुर्व
र्गवदान्यायसर्वज्ञायनमोनमः॥४॥आदिमध्यांतशून्यायनिरस्ताशेषभीतये॥योगिध्ये
यायमहतेनिर्गुणायनमोनमः॥५॥विश्वात्मनेविचिंत्यायविलसच्चंद्रमौलये॥कंदर्पद
र्पनाशायकालहंत्रेनमोनमः॥६॥विशदाननायविरहद्वच्छंभमुपेयुषे॥सदिशामस
मारस्त्रोकपर्दायनमोनमः॥७॥शुद्धायशुद्धभावायशुद्धात्मानंतरात्मने॥निर्वासपेनि
राशायविश्वेशास्त्रेनमोनमः॥८॥तुष्टायनिजभक्तानांभुक्तिमुक्तिप्रदायिने॥निर्वासपे
निराशायविश्वशास्त्रेनमोनमः॥९॥त्रिमूर्तेमूलभूतायत्रिनेत्रायादिशांनये॥त्रिधा

म्नाधामरूपायजगत्प्राप्तायनमोनमः॥१०॥देवासुरशिरोरत्नकिरणारुणितांघ्रये॥कां
तायनिजकांतायैदत्तार्धायनमोनमः॥११॥स्तोत्रेणानेनपूज्योयांप्रीणयेज्जगतःपतिं॥
भुक्तिमुक्तिप्रदंनत्वासर्वज्ञंपरमेश्वरं॥१२॥ ॥इतिशिवस्तोत्रं॥ ॥अथशिव
कवचं॥ ॥भगवन्देवदेवेशसर्वाम्नायप्रपूजित॥सर्वंमेकथितंदेवयदस्तिहि
तिमांप्रति॥श्रीभगवानुवाच॥ ॥प्रासादमंत्रकवचस्यवामदेवऋषिःपंक्तिछंदः
सदाशिवोदेवतासाधकाभिष्टफलप्राप्तयेविनियोगः॥शिरोमेसर्वदापातुप्रासादा
ख्यःसदाशिवः॥षडक्षरस्वरूपोमेवदनंतुमहेश्वरः॥पंचाक्षरात्माभगवान्भुजौ
मेपरिरक्षतु॥मृत्युंजयस्त्रिबीजात्माआयुरक्षतुमेसदा॥वटमूलसमासीनोदक्षिणा
मूर्तिरव्ययः॥सदामांसर्वदापातुषट्त्रिंशार्णस्वरूपधृक्॥द्वाविंशार्णात्मकोरुद्रःकु
क्षिमेपरिरक्षतु॥त्रिवर्णात्मानीलकंठःकंठंरक्षतुसर्वदा॥चिंतामणिबीजरूपोअर्द्ध
नारीश्वरोहरः॥सदारक्षतुमेगुह्यंसर्वसंपत्प्रदायकः॥एकाक्षरःस्वरूपात्माकूट

पायमहेश्वरः॥मार्तंडभैरवोनित्यंपादौमेपरिरक्षतु॥वाराहाख्योमहाबीजस्वरूपस्त्रि
पुरांतकः॥सदामांरणभूमौतुरक्षतुत्रिदशाधिपः॥ऊर्द्ध्वमूर्द्धनिमीशानोममरक्षतुसर्व
दा॥तद्दक्षिणस्यांतत्पुरुषोऽव्यान्मेगिरिनायकः॥अघोराख्योमहादेवःपूर्वस्यांपरि
रक्षतु॥वामदेवःपश्चिमस्यांसदामेपरिरक्षतु॥उत्तरस्यांसदापातुसद्योजातस्वरूप
धृक्॥इत्थंरक्षाकरंदेविकवचंदेवदुर्लभं॥प्रातःकालेपठेद्यस्तुसोभीष्टफलमाप्नुया
त्॥पूजाकालेपठेद्यस्तुकवचंसाधकोत्तमः॥कीर्त्तिःश्रीकांतिमेधायुर्विहितोभवतिध्रुवं
कंठेयोधारयेदेतत्कवचंमत्स्वरूपकं॥युद्धेजयमवाप्नोतिद्यूतेवादेचसाधकः॥
कवचंधारयेद्यस्तुसाधकोदक्षिणेभुजे॥देवामनुष्यागंधर्वावश्यास्तस्यनसंशयः
कवचंशिरसायस्तुधारयेद्यतमानसः॥करस्थास्तस्यदेवेशिअणिमाद्यष्टसिद्धयः
भूर्जपत्रेलिमांविद्यांक्षौमपट्टेनवेष्टितां॥रजतोदरसंविष्टांकृत्वाचधारयेत्सुधीः॥
संप्राप्यमहतींलक्ष्मींअंतेमद्देहरूपधृक्॥यस्मैकस्मैनदातव्यंनप्रकाश्यंकदाचन॥

शिष्यायभक्तियुक्तायसाधकायप्रकाशयेत्॥अन्यथासिद्धिहानिःस्यात्सत्यमेतन्नसं
शयः॥तवस्नेहान्मयादेविकथितंकवचंशुभं॥नदेयंकस्यचिद्भद्रेयदिछेदात्मनोहितं
योर्चयेद्धूपदीपाद्यैःकवचंमन्मयोदितं॥तेनार्चितामहादेविसर्वेदेवानसंशयः॥
॥ ॥इतिश्रीभैरवीतंत्रेसदाशिवकवचं॥ ॥अथभैरवीस्तोत्रं॥ ॥ब्रह्माद
यस्स्तुतिशतैरपिसूक्ष्मरूपांजानंतिनैवजगदादिमनादिमूर्त्तिं॥तस्माद्वयंकुचनतांन
वकुंकुमाभांस्थूलांस्तुमःसकलवाङ्मयमातृभूतां॥१॥सद्यःसमुद्यतसहस्रदिवाकरा
भांविद्याक्षसूत्रवरदाभयचिह्नहस्तां॥नेत्रोत्पलैस्त्रिभिरलंकृतवक्त्रपद्मांत्वांतारहार
रुचिरांत्रिपुरेभजंति॥२॥सिंदूरपुंजरुचिरांकुचभारनम्रांजन्मांतरेषुकृतपुण्यफलै
कगम्यां॥अन्योन्यभेदकलहाकुलमानसास्तेजानंतिकिंजडधियःतवरूपमेव॥३॥
स्थूलांवदंतिमुनयःश्रुतयोगृणंतिसूक्ष्मांवदंतिवचसामधिवासमन्ये॥त्वांमूलमा
हुरपरेजगतांभवानिमन्यामहेवयमपाररूपांबुराशिं॥४॥चंद्रावतंसकलितांशर

दिंदुप्रभां पंचदशाक्षरमयीं हृदि भावयामि॥ त्वां पुस्तकं जपवटीममृताढ्यकुंभं व्याख्यां
च हस्तकमलैर्दधतीं त्रिनेत्रां॥५॥ शंभुस्त्वमद्रितनयाकलितार्द्धभागो विष्णुस्त्वमंब कम
लापरिबद्धदेहः॥ पद्मोद्भवस्त्वमसि वागनिवासभूमिस्तेषां क्रियाश्च जगति त्रिपुरे त्वमेव
॥६॥ आश्रित्य वाग्भवभवांश्चतुरः परादीन्भावान्पदेषु विहितान्समुदीरयंति॥ कूटा
दिनिश्चकरणैः परदेवतां त्वां संविन्मयीं हृदि कदापि न विस्मरामि॥७॥ आकुंच्य वायुमव
जित्य च वैरिषट्कमालोक्य निश्चलधिया निजनासिकाग्रं॥ ध्यायंति मूर्ध्नि कलितेंदुकलाव
तंसं तद्रूपमंब कृतिनस्तरुणार्कमित्रं॥ संप्राप्य मन्मथरिपोर्वपुरर्द्धभागं सृष्टिं करोसि जगता
मिति वेदवादः॥८॥ सत्यं तदद्रितनये जगदेकमातर्नोचेदशेषजगतः स्थितिरेव न स्या
त्॥ पूजां विधाय कुसुमैः सुरपादपानां पीठे तवांब कनकाचलगह्वरेषु॥९॥ गायंति सि
द्धवनिताः सह किन्नरीभिरास्वादितासवरसारुणनेत्रपद्माः॥ विद्युद्विलासवपुषः श्रिय
मुद्वहंती यातिस्वसा च वनाम्बिरराजधानी॥१०॥ लोलस्फुरन्मणिवतंसकमलानि विस्मारायं

तिदिव्यां नजो हृदि परामृतसिक्तगात्रीं॥ आनंदजन्मजनयनं नयनं श्रुतीनां चेतन्ममात्र तनु
मंब तवाश्रयामि॥११॥ अलेशादिविष्णुनिरुपासितपादपद्मां लोनाम्पजन्मवसती त्रिपुरे
यथावत्॥ राहार्थनाविनयनं स्त्रजती द्रूपायात द्विजन्निपुनरकतन्द्रः स्वरास्या॥१२॥
वल्लाखिकाहरति निवसकलंयुगां नेतां शारदां मनसिजातु न विस्मरामि॥ नारायणीति
नरकार्णवतारिणीति गौरीति खेदशमनीति सरस्वतीति॥१३॥ ज्ञानप्रदेति नयनत्र
यशालिनीति त्वामद्रिराजतनये बहुधा जपंति॥१४॥ ये स्तुवंति जगन्मातः श्लोकैर्द्वादशभिः
क्रमात्॥ त्वामंब प्राप्य वाक्सिद्धिं प्राप्नुयुस्ते परां गतिं॥१५॥ ॥इति भैरवीस्तव
राजः समाप्तः॥ ॥अथ भैरवीकवचं॥ ॥देव्युवाच॥ भैरव्याः सकला विद्याः
श्रुताश्चाधिगता मया॥ सांप्रतं श्रोतुमिच्छामि कवचं यत्पुरोदितं॥ त्रैलोक्यमंगलं नामश
स्त्रास्त्रविनिवारणं॥ त्वत्तः परतरं नाथ कः कृपां कर्तुमर्हति॥ ईश्वर उवाच॥ शृणु पार्व
ति वक्ष्यामि सुंदरि प्राणवल्लभे॥ त्रैलोक्यविजयं नाम कवचं मंत्रविग्रहं॥ पठित्वा धार

पिठेदं त्रैलोक्यविजयाभिधं ॥ जघान सकलान्दैत्यान्यद्धृत्वा मधुसूदनः ॥ ब्रह्मा सृष्टिं
वितनुते यद्धृत्सिद्धिदायकः ॥ धनाधिपः कुबेरोपि वासवस्त्रिदशेश्वरः ॥ यस्य प्रसादा
दीशोहं त्रैलोक्यविजयी विभुः ॥ न देयं परशिष्येभ्यो साधकेभ्यः कदाचन ॥ पुत्रेभ्यः किम
प्यन्येभ्यो दत्वा मृत्युमवाप्नुयात् ॥ भैरव्याः कवचस्यापि दक्षिणामूर्त्तिरीश्वरः ॥ विराट् छंदो
जगद्धात्री देवता बालभैरवी ॥ धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः ॥ अधरे बिं
दुमानाद्यः कामशक्तिरशीयुतः ॥ भृगुर्मनुस्वरयुतः सर्गी बीजत्रयात्मिका ॥ बालैषा मे
शिरः पातु बिंदुनादयुतापि सा ॥ भालं पातु कुमारी सा सर्गहीना कुमारिका ॥ दृशौ पातु च
वाग्बीजं कर्णयुग्मं सदावतु ॥ सरस्वतीप्रदा बाला जिह्वां पातु शुचिप्रभा ॥ हस्रैः कंठं हसक
लरीस्कंधौ पातु हस्रौं हस्रौः ॥ पंचमी भैरवी पातु कर्णौ हस्रैः सदावतु ॥ हृदयं सकलह्रीं व
हः पातु हस्रौस्तनौ ॥ पातु सा भैरवी देवी चैतन्यरूपिणी मम ॥ हस्रैं पातु सदा पार्श्वे प्राण
युग्मं हसकलरी सदा ॥ कुक्षिं पातु हस्रौं मध्ये भैरवी दुर्जना ॥ ऐं ईं लुं ॐ मिम ध्यदेशं बीज

६२८

हस्रैं हृदं हसकलरीं सदा ॥ पातु हस्रौः सर्वदेहं वटुकदा
विद्या सदावतु ॥ हस्रैं पृष्ठं सदा पातु नाभिं हृदं हसकलरीं सदा ॥ पातु हस्रौ सर्वदेहं भैरवी सर्व
भैरवी मम ॥ संपत्प्रदा सदा पातु हैं जंघे हसकलरी पदं ॥ पातु हस्रौं दक्षिणे पातु भैरवी चक्रसंस्थि
दावतु ॥ हस्रैं मामवतु प्राच्यां हसकलरी पावकेवतु ॥ हस्रैं कलरी हसरौ पश्चिमे पातु भैरवी ॥ क्लीं
ता ॥ ह्रीं क्लीं क्लं मां सदा पातु नैरृत्यां चक्रभैरवी ॥ ह्रीं ह्रीं सदैशान्येवतु दक्षिणे कालिकेवतु ॥ ऊर्ध्वमा
क्लौं क्लौं पातु वायव्ये क्रूं क्रूं पातु सदोत्तरे ॥ दिग्विदिक्षु स्वाहा पातु कालिका खड्गधारिणी ॥ ह्रूं ह्रीं स्त्री
गुरुबीजानि रक्षंतु मामधस्थले ॥ संग्रामे कानने दुर्गे तोये तरंगदुस्तरे ॥ स्वर्णाकर्षे जसासो
हूं फट् स्वाहा तारा सर्वत्र मां सदावतु ॥ इति ते कथितं देवि सारात्सारतरं महत् ॥ त्रैलोक्यविजयं नाम क
वचं परमाद्भुतं ॥ यः पठेत्प्रयतो भक्त्या पूजायाः फलमाप्नुयात् ॥ स्पर्द्धामिद्धूय भवने लक्ष्मीं
यासदा मां परिरक्षतु ॥ वाणीं वसेत्ततः ॥ यः शत्रुभीतो रणकातरो वा भीतो रणे वा सलिले जलेवा ॥ वादे सभायां
प्रतिवादिनो वा रक्षः प्रकोपाद्ग्रहसंकुला वा ॥ प्रचंडदंडाक्षजनाद भीतो गुरोः प्रकोपा

६२९

रपिकुलसाध्यात्॥ अमन्दिवीप्रपठेत्रिसंध्यंसस्यान्महेशप्रतियंतुपिच॥ त्रैलोक्यविज
यंनामकवचंमन्मुखोदितं॥ विलिख्यभूर्जेगुटिकांस्वर्णस्थांधारयेयदि॥ कंठेवादक्षिणेबा
हौत्रैलोक्यविजयीभवेत्॥ तस्यात्रंप्राप्यशस्त्राणिन्नयंतिकुसुमानिच॥ लक्ष्मीःसरस्वतीत
स्यनिवसेद्वदनेसुखे॥ एतत्कवचमज्ञात्वायोजपेत्परमेश्वरीं॥ बालांवाप्रजपेद्विद्वान्दा
रिद्र्यमुपनाप्नुयात्॥ ॥इतिश्रीरुद्रयामलेदेवीश्वरसंवादेत्रैलोक्यविजयंनामभैर
वीकवचं॥ ॥अथश्रीविद्यास्तोत्रं॥ ॥कल्याणवृष्टिभिरिवामृतपूरिताभिर्लक्ष्मी
स्वयंवरणमंगलदीपिकाभिः॥ सेवाभिरंबतवपादसरोजमूलेनाएतावदेवजननीस्पृहणी
यमास्ते॥१॥ लब्धंदतेषुसलजनाकादिकिंमनसिजन्मिमनोज्ञलिखसरोजनेत्रे॥ सान्निध्यमु
परुणांबुजसोदरस्यत्वद्विग्रहस्यसुधयापरयाप्लुतस्य॥२॥ ईशस्त्वनाथकत्वथाकतिनाम
संतिब्रह्मादयःप्रतिदिनंप्रलयाभिभूता॥ एकःसएवजननिस्थिरसिद्धिरास्तेयःपादयोस्त
वसकृत्प्रणतिंकरोति॥३॥ लब्ध्वासकृत्त्रिपुरसुंदरीतावकीनंकारुण्यकंदलितकांतिभुवं

कटाक्षंकंदर्पकोटिसुभगास्त्वयिभाजयंतिसंमोहयंतितरुणीर्भुवनत्रयेपि॥४॥ ह्रींकार
मेवतवनामगृणंतिवेद्यमातस्त्रिकोणनिलयेत्रिपुरेत्रिनेत्रे॥ त्वत्संस्मृतौयमभटाभिभ
वंविहायदीव्यंतिनंदनवनेसहलोकपालैः॥५॥ हंतुःपुरामधिगलंपरिपूर्यमानःक्रू
रःकथंनभवितागरलस्यवेगः॥ नाश्वासनाययदिमातरिदंतवार्धंदेहस्यशश्वदमृ
तप्लुतशीकरस्य॥६॥ सर्वज्ञतांसदसिवाक्पटुतांप्रसूतेदेवित्वदंघ्रिसरसिरुहयोः
प्रणमः॥ किंचित्स्फुरन्मुकुटमुज्ज्वलमातपत्रंद्वेचामरेचमहतींवसुधांददात्री॥७॥
कल्पद्रुमैरभिमतप्रतिपादनेषुकारुण्यवारिनिधिरंबभवत्कटाक्षैः॥ आलोकयत्रिपुरसुं
दरीमामनाथंत्वय्येवभक्तिभरितंत्वयिबद्धदृष्टिं॥८॥ हंतेतरेष्वपिमनांसिनिधायचा
न्येनकिंचिदहंतुखिलयापरदेवतेषु॥ त्वामेवदेविमनसाहमनुस्मरामित्वामेवनौमिशिर
रणंतनित्वमेव॥९॥ लक्ष्मीषुसत्स्वपितवाक्षितिलोचनानामालोकयत्रिपुरसुंदरिमांक
थंचित्॥ नूनंमयाचसदृशीकरुणैकपात्रंजातोजनिष्यतिजनोनचजायतेवा॥१०॥ ह्रींह्रीं

मिति प्रतिदिनं जपतां तवाख्यां किं नाम दुर्लभमिह त्रिपुराधिवासे ॥ मालाकिरीटमदवार
णमाननीयां स्तान्नुलेवतेस धूमतीस्वयमेव लक्ष्मी ॥ ११ ॥ संपत्कराणि सकलेंद्रियनंदना
नि साम्राज्यदानकुशलानि सरोरुहाक्षि ॥ त्वद्वंदनानि दुरितोहरणोद्यतानि मामेव मात
रनिशं कलयंतु नान्यं ॥ १२ ॥ कल्पोपसंहारणकल्पितताण्डवस्य देवस्य खण्डपरशोः पर
भैरवस्य ॥ पाशांकुशैक्षवशरासनपुष्पबाणसा साक्षिणी विजयते तव मूर्त्तिरेका ॥
१३ ॥ लग्नं सदा भवतु मातरिदं त्वदीयं तेजः परं बहुलकुंकुमपंकशोणं ॥ भास्वत्किरीटम
मृतांशुकलावतंसं तरूपमंग कृतिनस्तरुणार्कमित्रं ॥ १४ ॥ ह्रींकारत्रयसंपुटेन महता
मंत्रेण संदीपितं स्तोत्रं यः प्रतिवासरं तव पुरो मातर्जपेन्मंत्रवित् ॥ तस्य क्षोणिभुजो भव
ति वशगा लक्ष्मीश्चिरस्थायिनी ॥ १५ ॥ वाणी निर्मलसूक्तिभावनविता जागर्त्ति दीर्घं वयः
१५ ॥ ॥ इति श्री ब्रह्मविरचितं कल्याणीस्तोत्रं ॥ ॥ अथ किंकिणीस्तोत्रं ॥ ॥ किं
किंदुःखं सकलजननिस्तीयते न स्मृतायां का का कीर्त्तिः कुलकमलिनि प्राप्यते नार्चितायां

कं कं योगं त्वयि विनिहते चित्तमालंबितायां ॥ १ ॥ स्मृत जनवनभयध्वंसि पूजिताविघ्ननं कदि
स्तुता त्वं वांछितं देवि ददासि करुणाकरे ॥ २ ॥ परमानंदबोधाचिद्रूपे तेजःस्वरूपिणि ॥ रवि
यंदविरोरत्ननिघृष्टचरणांबुजे ॥ ३ ॥ चेद्विजातिमहामंत्रो मात्रेमोत्रेन मोस्कृते ॥ सृष्टिस्थि
त्युपसंहारहेतुभूते सनातनी ॥ ४ ॥ जडणत्रयात्मिकासि त्वं जगतः कारणेछया ॥ नमस्त्र
हायनक्लानां ग्रहीतदिव्यविग्रहे ॥ ५ ॥ न कस्मे निस्पृजायायुक्तस्य परमेश्वरि ॥ एहिका
मुष्मिकीं सिद्धिं देहि त्रिदशावंदिते ॥ ६ ॥ तापत्रयपरिज्ञाननाशनं त्राहि मां शिवे ॥ नास्मेव
दामिनस्मणोमिन चिंतयामि नास्पं स्मरामि न न जामि तवाश्रयामि ॥ सस्कालदीयचर
णांबुजमाददेण त्राहि प्रभूतरूपया मयि देहि सिद्धिं ॥ ७ ॥ अज्ञानाद्वा प्रमादाद्वा वैक
ल्यात्साधनस्य वा ॥ यन्न्यूनमतिरिक्तं वा तत्सर्वं हन्तुमर्हसि ॥ ८ ॥ इत्यहीनं क्रियाहीनं श्रद्धा
मंत्रविवर्जितं ॥ — तत्सर्वं कृपया देवि क्षमस्व त्वं दयानिधे ॥ ९ ॥ यन्मया क्रियते कर्म तन्म
हस्वस्मनेवबा ॥ तत्सर्वं च जगद्धात्री दंत मम मम मंगलि ॥ १० ॥ ॥ इति किंकिणीस्तो

त्रं॥ ॥अथश्रीकवचं॥ ॥देव्युवाच॥देवदेवमहादेवभक्तानांप्रीतिवर्द्धन॥सू
चितंयन्मयादेव्याःकवचंकथयस्वमे॥महादेवउवाच॥ ॥शृणुदेविप्रवक्ष्यामिकव
चंदेवदुर्लभं॥अप्रकाश्यंपरंगुह्यंसाधकानांहिसिद्धिदं॥कवचस्यऋषिर्देविदक्षिणा
मूर्त्तिरव्ययः॥छंदःपंक्तिःसमुद्दिष्टंदेवीत्रिपुरसुंदरी॥धर्मार्थकाममोक्षेषुविनियोग
स्तुसाधने॥वाग्भवःकामराजश्चशक्तीबीजंमहेश्वरी॥ऐंवाग्भवःपातुशीर्षेमांक्लींकाम
राजस्तथाहृदि॥सौःशक्तिबीजंसदापातुनाभौगुह्येचपादयोः॥ऐंक्लींसौःवदनेपातुवा
लायांसर्वसिद्धये॥हसौःहसक्लींहसौःसदापातुभैरवीकंठदेशतः॥सुंदरीनाभि
देशेव्याच्छीर्षेकामकलासदा॥भ्रूनासयोरंतरालेमहात्रिपुरसुंदरी॥ललाटेसुभगापा
तुभगमांकंठदेशतः॥भगोदयातुहृदयेउदरेभगसर्पिणी॥भगमालानाभिदेशेलिं
गेपातुमनोभवा॥गुह्येपातुमहादेविराजराजेश्वरीशिवा॥चैतन्यरूपिणीपातुपा
दयोर्जगदंबिका॥नारायणीसर्वगात्रेसर्वकार्येशुभंकरी॥ब्रह्माणीपातुमांपूर्वेद

क्षिणेवैष्णवीतथा॥पश्चिमेपातुवाराहीउत्तरेतुमहेश्वरी॥आग्नेय्यांपातुकौमारीमहा
लक्ष्मीश्चनैरृते॥वायव्यांपातुचामुंडाइंद्राणीपातुईशके॥नाभेजलेमहामायापृथिव्यां
सर्वमंगला॥आकाशेपातुवरदासर्वत्रभुवनेश्वरी॥इदंतुकवचंदेव्यादेवानाम
पिदुर्लभं॥पठेत्प्रातःसमुत्थायशुचिःप्रयतमानसः॥आधयोव्याधयस्तस्यनभ
यंचक्वचिद्भवेत्॥नचमारीभयंतस्यपातकानांभयंतथा॥नदारिद्र्यवशंगच्छेत्तिष्ठे
न्मृत्युवशेनच॥गच्छेच्छिवपुरंदेविसत्यंसत्यंवदाम्यहं॥इदंकवचमज्ञात्वाश्रीविद्यां
योजपेत्प्रिये॥सनाप्नोतिफलंतस्यप्राप्नुयाच्छस्त्रघातनं॥ ॥इतिसिद्धयामले
श्रीमत्त्रिपुरसुंदरीकवचंसमाप्तं॥ ॥अथमहात्रिपुरसुंदरीकवचं॥ ॥देव्यु
वाच॥भगवन्देवदेवेशलोकानुग्रहकारक॥त्वत्प्रसादान्महादेवश्रुतामंत्रास्त्वने
कधा॥साधनंविविधंदेवकीलकोद्धरणंतथा॥शापादिदूषणोद्धारःश्रुतस्त्वत्तोयथा
प्रभो॥राजराजेश्वरीदेव्याःकवचंसूचितंमयि॥श्रोतुमिच्छामित्वत्तस्तत्कथयस्वमयि

प्रश्नो॥ईश्वर उवाच॥ ॥जन्मवारसहस्राणि वारितासि पुनः पुनः॥लीलया नाप्युन
र्द्विषितासि त्वं मयि प्रिये॥अत्यंतगुह्यं कवचं सर्वकामफलप्रदं॥प्रीतये तव देवेशि
कथयामि शृणुष्व तत्॥अस्य राजराजेश्वरी श्रीमन्महात्रिपुरसुंदरी षोडशी विद्या
कवचस्य महादेव ऋषिः प्रस्तावः पंक्तिछंदो राजराजेश्वरी श्रीमन्महात्रिपुरसुंदरी
देवता धर्मार्थकामने विनियोगः॥पूर्वे मां भैरवी पातु महात्रिपुरसुंदरी॥अधस्तात्
तु देवेशी पातालतलवासिनी॥आधारे वाग्भवः पातु कामराजस्तथा हृदि॥डामरः
पातु मां नित्यं मस्तके सर्वकामदः॥ब्रह्मरंध्रे सर्वगात्रे छिद्रस्थाने च सर्वदा॥महावि
द्या भगवति पातु मां परमेश्वरी॥ऐं ललाटे मां पायात् ह्रीं पायात् च चक्षुनेत्रयोः॥कल
ह्रीं क्लीं स्त्रीं गुह्यदेशे सकह्रीं पातु पादयोः॥सहं मां सर्वदा पातु सकलह्रीं पातु संधिषु॥ज
ले स्थले तथाकाशे दिक्षु राजगृहे तथा॥क्षं क्षे मां त्वरिता पातु सह्रीं सकलं मनोन्मना॥
हंसमाया महादेवि परं निष्कल देवता॥विजया मंगला दूती कल्याणी भगमालिनी॥

ज्वाला च मालिनी नित्या सर्वदा पातु मां शिवा॥इत्येवं कवचं देवि देवानामपि दुर्लभं॥तव
श्रीत्वा मया ख्यातं गोपनीयं प्रयत्नतः॥इदं रहस्यं परमं गुह्याद्गुह्यतरं प्रिये॥धन्यं यश
स्यमायुष्यं भोगमोक्षप्रदं शुभं॥दुःस्वप्ननाशनं पुण्यं नरनारीवशीकरं॥आकर्षणक
रं देवि स्तंभोच्चाटकरं शिवे॥इदं कवचमज्ञात्वा राजराजेश्वरीं शिवां॥यो जपेद्योगिनी
वृंदैः स भक्ष्यो नात्र संशयः॥न तस्य मंत्रसिद्धिः स्यात्कदाचिदपि शांकरि॥इह लोके च दा
रिद्र्यं रोगदुःखलयानि च॥परत्र नरकं गत्वा पश्चाद्योनिमवाप्नुयात्॥तस्मादेतत्सदा
...महाकविनिर्गतं इदं कवचं सुपुण्यं प्रज्ञाविधेयप्रकृतोऽधिना
न ह्यधीकारी नयेन तः॥ ...पदं व्रजति तत्क्षणं तत्काले॥ ॥
घः॥लोकाग्य लोग ललिता निष्कलानि स्कादेव्याः पदं व्रजति तत्क्षणं॥ ॥अथ प्रचंड चंडिका स्तोत्रं
इति कुलानंदसंहितायां श्रीमहात्रिपुरसुंदरीकवचं॥
॥नानौघ सरोजरक्तविजसद्धूकपुष्पारुणं भास्वत्भास्करमंडलं तदुदरे तद्यो
निचक्रं महत्॥तन्मध्ये विपरीतमप्युनरतप्रद्युम्नतत्कालिनी पृष्ठस्थां तरुणार्ककोटि

विलसत्तेजस्वरूपांशिवां॥१॥वामेछिन्नशिरोधरांतदितरेपाणौमहाकर्तृकांप्रत्याली
ढपदांदिगंतवसनामुन्मुक्तकेशव्रजां॥छिन्नात्मीयशिरःसमुच्छलदसृक्धारांपि
बंतींपरांबालादित्यसमप्रकाशविलसन्नेत्रत्रयोद्भासिनीं॥२॥वामादन्यत्रनालंब
हुबहलगलद्रक्तधाराभिरुच्चैःपायंतीमस्थिभूषांकरकमललसत्कर्तृकामुग्ररूपां
रक्तामारक्तकेशीमपगतनयनांवर्णिनीमात्मशक्तिंप्रत्यालीढोरुपादामरुणितन
यनांयोगिनीयोगनिद्रां॥३॥दिग्वस्त्रांमुक्तकेशींप्रलयघनघटाघोररूपांप्रचंडांदंष्ट्रा
दुःप्रेक्ष्यवक्त्रोदरविवरविलसल्लोलजिह्वाग्रभासां॥विद्युल्लोलाक्षियुग्मांहृदयतटलस
द्भोगिनींभीममूर्तिंसद्यश्छिन्नात्मकंठप्रगलितरुधिरैर्डाकिनींवर्धयंतीं॥४॥ब्रह्मे
शानाच्युताद्यैःशिरसिविनिहितामंदपादारविंदैरात्मज्ञैर्योगिमुख्यैःप्रतिदिनमनिशं
चिंतितांचित्स्वरूपां॥संसारेसारभूतांत्रिभुवनजननींछिन्नमस्तांप्रशस्तामिष्टांतामि
ष्टदात्रींकलिकलुषहरांचेतसाचिंतयामि॥५॥उत्पत्तिस्थितिसंहृतिर्घटयितुंधत्तेत्रि

रूपांतनुंत्रैगुण्याज्जगतोयदीयविकृतिर्ब्रह्माच्युतःशूलभृत्॥तामाद्यांप्रकृतिंस्मरामिम
नसासर्वार्थसंसिद्धयेयस्याःस्मेरपदारविंदयुगलेलाभंभजंतेनराः॥६॥अभिलषि
तपरस्त्रीयोगपूजापरोहंबहुविधजनभावारंभसंभावितेषु॥पशुजनविरतोहं
भैरवीसंस्थितोहंगुरुचरणपरोहंभैरवोहंशिवोहं॥७॥इदंस्तोत्रंमहापुण्यंब्रह्मणा
भाषितंपुरा॥सर्वसिद्धिप्रदंसाक्षान्महापातकनाशनं॥८॥यःपठेत्प्रातरुत्थायदेव्याः
संनिहितेप्रिया॥तस्यसिद्धिर्भवेद्देविवांछितार्थप्रदायिनी॥९॥धनंधान्यंसुतांजायां
हयंहस्तिनमेवच॥वसुंधरांमहाविद्यामष्टौसिद्धिर्लभेद्ध्रुवं॥१०॥वैयाघ्राजिनलांछित
स्वजघनेरम्येप्रलंबोदरेखर्वानिर्वचनीयपर्वसुभगेमुंडावलीमंडितेकर्तृकुंदरु
चिंविचित्रवनितांज्ञानेदधानेपदेमातर्भक्तजनानुकंपिनिमहामायेस्तुतुभ्यंनमः
॥११॥ ॥इतिश्रीचंडिकास्तोत्रं॥ ॥अथप्रचंडचंडिकाकवचं॥ ॥श्रीदेव्यु
वाच॥ ॥कथिताश्छिन्नमस्तायायायाविद्याःसुगोपिताः॥त्वयानाम्नेनदेवेशाश्रुता

ध्याधिगतामया॥इदानीं श्रोतुमिच्छामि कवचं पूर्वसूचितं॥त्रैलोक्यविजयं नाम कवचं
सर्वमोहनं॥सर्वविद्यामयं साक्षात्सुरासुरजयप्रदं॥आधारणात्पठनाद्धारात्त्रैलोक्यवि
जयी विभुः॥ब्रह्मा नारायणो रुद्रो धारणात्पठनाद्यतः॥कर्त्ता पाता च संहर्त्ता भुवनानां
सुरेश्वरी॥न देयं परशिष्येभ्योऽभक्तेभ्योऽपि विशेषतः॥देयं शिष्याय भक्ताय प्राणेभ्यो
प्यधिकाय च॥देव्याश्च छिन्नमस्तायाः कवचस्य च भैरव॥ऋषिर्विराट् छंदश्च देव
ता छिन्नमस्तका॥त्रैलोक्यविजये मुक्तौ विनियोगः प्रकीर्त्तितः॥हूंकारो मे शिरः पातु छिन्न
मस्ता बलप्रदा॥ह्रीं ह्रूं ऐं त्र्यक्षरा पातु भालं वक्त्रं दिगंबरा॥श्रीं ह्रीं ह्रूं ऐं दृशौ पातु मुंडकर्त्त्रि
धरापि सा॥सा विद्या प्रणवाद्यंता श्रुतियुग्मं सदावतु॥वज्रवैरोचनीये हूं फट् स्वाहा
च ध्रुवादिका॥घ्राणं पातु छिन्नमस्ता मुंडकर्त्त्रिविधारिणी॥श्रीमायाकूर्च्चवाग्बीजैर्वज्र
वैरोचनीये हूं फट् स्वाहा ह्येषं महाविद्या षोडशी ब्रह्मरूपिणी॥स्वपार्श्ववर्णिकाभ्यामसृग्धा
रां पाययंती मुदा॥वदनं सर्वतः पातु छिन्नमस्ता स्वशक्तिका॥मुंडकर्त्त्रिधरा रक्ता साधका

नी सदाचिता॥वर्णिनी डाकिनी युक्ता सापि मामभितोऽवतु॥रमाद्या पातु जिह्वां च लज्जाद्या
पातु कंठकं॥रमया पुटिता विद्या पार्श्वौ पातु सुरेश्वरी॥मायया पुटिता पातु नाभिदेशं
दिगंबरी॥कूर्च्चेन पुटिता देवी पृष्ठदेशं सदावतु॥वाग्बीजपुटिता चैषा मध्यं पातु सश
क्तिका॥ईश्वरी कूर्च्चवाग्बीजैर्वज्रवैरोचनीये हूं॥फट् स्वाहेति महाविद्या कोटिसूर्यस
मप्रभा॥छिन्नमस्ता सदा पायादूरुयुग्मं सशक्तिकं॥ह्रीं ह्रूं वर्णिनी जानुं श्रीं ह्रीं च डाकिनी प
दे॥सर्वविद्यास्थिता नित्या सर्वांगं मे सदावतु॥प्राच्यां पायादेकलिंगा योगिनी पावके
ऽवतु॥डाकिनी दक्षिणे पातु श्रीमहाभैरवी च मां॥नैरृत्यां सततं पातु भैरवी पश्चिमेऽवतु॥
इंद्राक्षी पातु वायव्येऽसितांगी पातु चोत्तरे॥संहारिणी सदा पातु शिवकोणे सकर्त्रिका॥
इत्यष्टशक्तयः पांतु दिग्विदिक्षु च सर्वदा॥क्रीं क्रीं क्रीं सा पातु पूर्वे ह्रूं ह्रूं पातु पावके॥ह्रीं ह्रीं
मां दक्षिणे पातु दक्षिणकालिकावतु॥क्रीं क्रीं क्रीं चैव नैरृत्यां ह्रूं ह्रूं मां पश्चिमेऽवतु॥ह्रीं ह्रीं
पातु मरुत्कोणे स्वाहा पातु सदोत्तरे॥महाकाली खड्गहस्ता शिवकोणे सदावतु॥तारो

मायावधूकूर्चंफट्हूंकारोयंमहामनुः॥खड्गंकर्तृंभरागाराचोद्दरेरोसदायवतु॥ह्रींस्त्रींहूंफट्
पातालेपातुनीलसेतुसरस्वती॥इतितेकथितंदेव्याःकवचंमंत्रविग्रहं॥यद्धृत्वापठनाद्ब्र
ह्मःक्रोधाम्भोनिरयःप्रभुः॥सुरासुरमुनीन्द्राणांकर्ताहर्तानिवेश्वयं॥यस्मात्त्यामधुमती
यातिस्मासाधकांतिकं॥स्तुतिभ्याद्यान्वयन्हिल्पोऽडाकिन्याधान्वरस्येचरा॥भ्रामांगल्लंतितास्ता
स्यकवचस्यप्रसादतः॥एतद्देयपरंब्रह्मकवचंमन्मुखोदितं॥देवीमभ्यर्च्यगंधाद्यैःमू
लेनैवपठेत्सकृत्॥संवत्सरकृतायास्तुपूजायाःफलमाप्नुयात्॥भूर्जेविलिखितंचैतत्
गुटिकांकांचनस्थितां॥धारयेद्दक्षिणेबाहौकंठेवायदिवाग्पतः॥सर्वैश्वर्ययुतोभूत्वा
त्रैलोक्यंवशमानयेत्॥तस्यगेहेवसेत्लक्ष्मीर्वाणीचवदनांबुजे॥ब्रह्मास्त्रादीनिशस्त्रा
णितद्गात्रेयांतिसौम्यतां॥इदंकवचमज्ञात्वायोजपेच्छिन्नमस्तकां॥सोपिशस्त्रप्रहारेण
मृत्युमाप्नोतिसत्वरं॥ ॥इतिश्रीभैरवीतंत्रेभैरवभैरवीसंवादेछिन्नमस्ताकवचं
समाप्तं॥ ॥अथपरणामास्तोत्रं॥ ॥कर्पूरंमध्यमांत्यस्वरपररहितंसेंदुवामाक्षियु

कं बीजंतेमातरेतत्त्रिपुरहरवधूःत्रिःकृतंयेजपंति॥तेषांगद्यानिपद्यानिचमुखकुह
राद्दुल्लसंत्येववाचःस्वछंदंध्वांतधाराधररुचिरुचिरेसर्वसिद्धिंगतानां॥१॥ईशानःसेंदु
वामःश्रवणपरिगतोबीजमन्यन्महेशिद्वंद्वंतेमंदचेतायदिजपतिजनोवारमेकंकदा
चित्॥जित्वावाचामधीशंधनदमपिचिरंमोहयन्नंबुजाक्षीवृंदंचंद्रार्धचूडेप्रभवतिस
महाघोररावावतंसे॥२॥ईशोवैश्वानरस्थःशशधरविलसद्वामनेत्रेणयुक्तोबीजंते
द्वंद्वमन्यद्विगलितचिकुरेकालिकेयेजपंति॥द्वेष्टारंतेनिहंतित्रिभुवनमनितोवश्यप
भावंनयंतिसृक्कद्वंद्वास्रधाराद्वयधरवदनेदक्षिणेकालिकेति॥३॥ऊर्ध्वंवामेकृपाणंकरक
मलतलेछिन्नमुंडंदधानेसव्येचाभीर्वरंचत्रिजगदघहरेदक्षिणेकालिकेति॥जप्त्वैत
न्नामयेवातवमनुविभवंभावयंतेतदंबेतेषामष्टौकरस्थाःप्रकटितवदनेसिद्धयस्त्र्यं
बकस्य॥४॥वर्गाद्यंवह्निसंस्थंविधुरतिविलितंतत्त्रयंकूर्चयुग्मंलज्जाद्वंद्वंचपश्चात्
स्मितमुखितदधष्ठद्वयंयोजयित्वा॥मातर्येवाजपंतिस्मरहरमहिलेभावयंतःस्वरूपंतेल

स्त्रीलास्यलीलाकमलदलदृशः कामरूपा भवंति॥५॥प्रत्येकं चात्रयं वा द्वयमपि च परं बीजम
त्यंगमुत्तं त्वन्नामान्यायोजपित्वा सकलमपि सदा भावयंतो जपंति।तेषां नेत्रारविंदे विहरति कम
ला वक्त्ररूपांबुजबिंबे वाग्देवि देवि मुंडस्रगतिविलसत्कंठि पीनस्तनाढ्ये॥६॥गतासूनां बाहु
प्रकरकृतकांचिपरिलसन्नितंबां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनां।श्मशानस्थे तल्पे
बहदिमहाकालसुरतप्रयुक्तां त्वां ध्यायन्जननि जडचेताऽपि कविः॥७॥शिवाभिर्घोराभिः
शवनिवहमुंडास्थिनिकरैः परं संकीर्णायां प्रकटितचितायां हरवधूं॥प्रविष्टां संतुष्टामुप
रिसुरतेनातियुवतीं सदा त्वां ध्यायंति क्वचिदपि न तेषां परिभवः॥८॥वदामस्ते किं वा जननि
वयमुच्चैर्जडधियो न धाता नापीशो हरिरपि न ते वेत्ति परमं।तथापि त्वद्भक्तिर्मुखरयति
चास्माकमसिते तदेतत्क्षंतव्यं न खलु पशुरोषः समुचितः॥९॥समंतादापीनस्तनजघन
धृग्यौवनवती रतासक्तो नक्तं यदि जपति भक्तस्तव मनुं॥विवासास्त्वां ध्यायन्विगलितचिकु
रस्तस्य वशगाः समस्ताः सिद्धौघा भुवि चिरतरं जीवति कविः॥१०॥समां सुस्थीभूतां जपति विप

रितां यदि सदा विचिंत्य त्वां ध्यायन्नतिचरा महाकालसुरतां॥तदा तस्य क्षोणीविहरमानस्य वि
दुषः करांभोजे वश्या हरवधु महासिद्धिनिवहा॥११॥प्रसूते संसारं जननि जगतीं पालयति वा स
मस्तं क्षित्यादि प्रलयसमये संहरति च।अतस्त्वं धातापि त्रिभुवनपतिः श्रीपतिरपि महेशो
ऽपि प्रायः सकलमपि किं स्तौमि भवतीं॥१२॥अनेके सेवंते भवदधिकगीर्वाणनिवहान्विमू
ढास्ते मातः किमपि न हि जानंति परमं॥समाराध्यामाद्यां हरिहरविरिंच्यादिविबुधैः प्रपन्नोऽस्मि
स्वैरं रतिरसमहानंदनिरतां॥१३॥धरित्री कीलालं शुचिरपि समीरोऽपि गगनं त्वमेका कल्या
णी गिरिशरमणी कालि सकलं॥स्तुतिः का ते मातस्तव करुणया मामगतिकं प्रसन्ना त्वं भू
यात्वं भवमनु न भूयात्मम जनुः॥१४॥श्मशानस्थः सुस्थो विगलितचिकुरो दिक्पटधरः स
हस्रं त्वर्काणां निजगलितवीर्येण कुसुमं॥जपंस्तत्प्रत्येकं मनुमपि तव ध्याननिरतो महाका
लि स्वैरं स भवति धरित्रीपरिवृढः॥१५॥गृहे सम्मार्जन्या परिगलितबीजं हि चिकुरं समू
लं मध्याह्ने वितरति चितायां कुजदिने॥समुच्चार्य प्रेम्णा मनुमपि सकृत्कालि सततं गजारू

ठोध्याति हृतिपरिवृढः सत्कविवरः ॥१६॥ स्वपुष्पैराकीर्णं कुसुमधनुषो मंदिरमहो पुरो ध्यायन्
ध्यायन् यदि जपति भक्तस्तव मनुं ॥ सगंधर्वश्रेणीपतिरपि कवित्वामृतनदीनः पर्यंतिपरम
पदलीनः प्रभवति ॥१७॥ त्रिपंचारे पीठे शवशिवहृदिस्मेरवदनां महाकालेनोच्चैर्मदनरस
लावण्यनिरतां ॥ समासक्तो नक्तं स्वयमपि रतोजनो यो ध्यायेत्त्वामपि जननि स स्यात्स्मरहरः
॥१८॥ सलोमास्थि स्वैरं पललमपि मार्जारमसिते परं चौष्ट्रं मेषं नरमहिषयोश्छागमपि वा
नरतां मर्त्यवसतां सतां सिद्धिः सर्वा प्रतिपदमपूर्वा प्रभवति ॥१९॥ वशी लक्षं मंत्रं प्रजपति
हविष्याशी नरतो दिवा मातर्युष्मच्चरणयुगलध्याननिरतः ॥ परं नक्तं नग्नो निधुवनविनो
देन मनुं जपेल्लक्षं सम्यक् स्मरहरसमानः क्षितितले ॥२०॥ इदं स्तोत्रं मातस्तव मनुसमु
द्धारणजपः स्वरूपाख्यं पादांबुजयुगलपूजाविधियुतं ॥ निशार्द्धे वा पूजासमयमथवा यस्तु
पठति प्रलापस्तस्यापि प्रसरति कवित्वामृतरसः ॥२१॥ कुरंगाक्षीवृंदं तमनुसरति प्रेमतर
लं वशस्तस्य क्षोणीपतिरपि कुबेरप्रतिनिधिः ॥ रिपुः कारागारं कलयति च तं केलिकल

या चिरंजीवन्मुक्तः प्रभवति स भक्तः प्रतिजनुः ॥२२॥ ॥ इति श्रीश्यामास्तोत्रं ॥ ॥ अथ
श्यामाकवचं ॥ ॥ भैरव्युवाच ॥ कालीपूजाश्रुता नाथ भावाश्च विविधाः प्रभो ॥ इदानीं
श्रोतुमिच्छामि कवचं पूर्वसूचितं ॥ त्वमेव शरणं नाथ त्राहि मां दुःखसंकट ॥ भैरव उवाच
रहस्यं शृणु वक्ष्यामि सुंदरि प्राणवल्लभे ॥ श्रीजगन्मंगलं नाम कवचं मंत्रविग्रहं ॥ पठि
त्वा धारयित्वा च त्रैलोक्यं मोहयेत्क्षणात् ॥ नारायणोपि यद्धृत्वा नारी भूत्वा महेश्वरं ॥ यो
गेशं क्षोभमनयत् यद्धृत्वा च रघूद्वहः ॥ वरदृप्तान् जघानैव रावणादिनिशाचरान् ॥ यस्य
प्रसादादीशोपि त्रैलोक्यविजयी विभुः ॥ धनाधिपः कुबेरोपि सुरेशोभूच्छचीपतिः ॥ एवं
हि सकला देवाः सर्वसिद्धीश्वरा प्रिये ॥ श्रीजगन्मंगलस्यास्य कवचस्य ऋषिः शिवः ॥ छंदो
नुष्टुब् देवता च कालिका दक्षिणेरिता ॥ जगतां मोहने दुष्टविजये भुक्तिमुक्तिषु ॥ योषिदा
कर्षणे चैव विनियोगः प्रकीर्तितः ॥ शिरो मे कालिका पातु क्रींकारैकाक्षरी परा ॥ क्रीं क्रीं क्रीं
मे ललाटं च कालिका खड्गधारिणी ॥ हूं हूं पातु नेत्रयुग्मं ह्रीं ह्रीं पातु श्रुती मम ॥ दक्षिणे कालि

लिके पातु घ्राणयुग्मं महेश्वरी॥ क्रीं क्रीं क्रीं रसनां पातु हूं हूं पातु कपोलकं॥ वदनं सकलं पातु ह्रीं
ह्रीं स्वाहास्वरूपिणी॥ द्वाविंशत्यक्षरी स्कंधौ महाविद्यासुखप्रदा॥ खड्गमुंडधरा काली सर्वांगम
भितोवतु॥ क्रीं हूं ह्रीं त्र्यक्षरी पातु चामुंडा हृदयं मम॥ ऐं हूं ॐ ऐं स्तनद्वंद्वं ह्रीं फट् स्वाहा ककुत्स्थ
लं॥ अष्टाक्षरी महाविद्या भुजौ पातु सकर्तृका॥ क्रीं क्रीं हूं हूं ह्रीं ह्रीं करौ पातु षडक्षरी मम॥
क्रीं नाभौ मध्यदेशं च दक्षिणे कालिकेवतु॥ क्रीं स्वाहा पातु पृष्ठं तु कालिका सा दशाक्षरी॥
हूं ह्रीं दक्षिणे कालिके हूं ह्रीं पातु कटिद्वयं॥ काली दशाक्षरी विद्या स्वाहा मम ऊरुयुग्मकं॥ ॐ ह्रीं
क्रीं मे स्वाहा पातु कालिका जानुनी सदा॥ कालिहृन्नामविद्येयं चतुर्वर्गफलप्रदा॥ क्रीं ह्रीं ह्रीं पा
तु सा गुल्फं दक्षिणे कालिकेपि च॥ क्रीं ह्रीं हूं स्वाहा पातु चतुर्दशाक्षरी मम॥ खड्गमुंडधरा का
ली वरदाभयधारिणी॥ विद्याभिः सकलाभिः सा सर्वांगमभितोवतु॥ काली कपालिनी
कुल्ला कुरुकुल्ला विरोधिनी॥ विप्रचित्ता तथा चोग्रप्रभा दीप्ता घनत्विषः॥ नीला घना बला
का च मात्रा मुद्रा सिता च मां॥ एताः सर्वाः खड्गकरा मुंडमालाविभूषणाः॥ रक्षंतु दिग्विदिक्षु

मां ब्राह्मी नारायणी तथा॥ माहेश्वरी च चामुंडा कौमारी चापराजिता॥ वाराही नारसिं
ही च सर्वाश्चामितभूषणाः॥ रक्षंतु स्वायुधैर्दिक्षु सर्वतो मां यथा तथा॥ इति ते कथितं दिव्यं
कवचं परमाद्भुतं॥ श्रीजगन्मंगलं नाम महाविद्यौघविग्रहं॥ त्रैलोक्याकर्षणं ब्रह्मन् कव
चं मन्मुखोदितं॥ गुरुपूजां विधायाथ विधिवत्प्रपठेत्ततः॥ कवचं त्रिःसकृद्वापि यावज्जी
वं वा पुनः॥ एतच्छतार्द्धमावृत्य त्रैलोक्यविजयी भवेत्॥ त्रैलोक्यं क्षोभयत्येव कवच
स्य प्रसादतः॥ महाकविर्भवेन्मासात्सर्वसिद्धीश्वरो भवेत्॥ पुष्पांजलीन् कालिकायै मू
लेनैव पठेत्सकृत्॥ शतवर्षसहस्राणां पूजायाः फलमाप्नुयात्॥ भूर्जे विलिखितं चैत
त्स्वर्णस्थं धारयेद्यदि॥ त्रैलोक्यं मोहयेत्क्रोधात्त्रैलोक्यं चूर्णयेत्क्षणात्॥ पुत्रवान् ध
नवान् श्रीमान्नानाविद्यानिधिर्भवेत्॥ ब्रह्मादीनि चास्त्राणि तद्गात्रस्पर्शनात्ततः॥ नाश
मायांति या नारी वंध्या वा मृतपुत्रिणी॥ कंठे वा वामबाहौ वा कवचस्य च धारणात्॥ बह्व
पत्या जीववत्सा भवत्येव न संशयः॥ न देयं परशिष्येभ्यो ह्यभक्तेभ्यो विशेषतः॥ शिष्ये

शोभक्तियुक्तैः सः श्रीमपमृत्युमाप्नुयात्॥ सर्वसिद्धिर्हि कमला वाग्देवी मंदिरे मुखे॥ पौ
त्रां तस्यैर्यमाख्या यानि वसत्येव निश्चितं॥ इदं कवचमज्ञात्वा यो जपेत्कालिदक्षिणां॥ शत
लक्षप्रजप्तापि तस्य विद्या न सिध्यति॥ स शस्त्रघातमाप्नोति सोचिरान्मृत्युमाप्नुयात्॥ ॥
इति श्रीभैरवीतंत्रे भैरवभैरवीसंवादे श्यामाकवचं॥ ॥ अथ तारास्तवः॥ ॥
मातर्नीलसरस्वती प्रणमतां सौभाग्यसंपत्प्रदे प्रत्यालीढपदस्थिते शववहृदि स्मेराननां
भोरुहे॥ फुल्लेंदीवरलोचनत्रययुते कर्तीकपालोत्पले खड्गं चादधती त्वमेव शरणं
त्वामीश्वरीमाश्रये॥ १॥ वाचामीश्वरि भक्तकल्पलतिके सर्वार्थसिद्धीश्वरि गद्यप्राकृतप
द्यजातवचनां सर्वार्थसिद्धिप्रदे॥ नीलेंदीवरलोचनत्रययुते कारुण्यवारान्निधे सौभा
ग्यामृतवर्षणेन कृपया सिंच त्वमस्मादृशं॥ २॥ खर्वे गर्वसमूहपूरिततनोः सर्पादिवे
षोज्ज्वले व्याघ्रत्वक्परिवीतसुंदरकटिव्याधूतघंटांकिते॥ सद्यः कृत्तगलद्रजःपरिमिल
न्मुंडद्वयीमूर्द्धजग्रंथिश्रेणिनृमुंडदामललिते भीमे भयं नाशय॥ ३॥ मायानंगविकार

रूपललनाबिंद्वर्द्धचंद्रात्मिके हुंफट्कारमयी त्वमेव शरणं मंत्रात्मिके मादृशः॥ मूर्त्ति
स्ते जननि त्रिधामघटिता स्थूलातिसूक्ष्मा परा वेदानां नहि गोचरा कथमपि प्राज्ञैर्नुतामा
श्रये॥ ४॥ त्वत्पादांबुजसेवया सुकृतिनो गच्छंति सायुज्यतां तस्याः श्रीपरमेश्वरस्य हरिह
रब्रह्मादिसामान्यतः॥ संसारांबुधिमज्जने पटुतनून्देवेंद्रमुख्यान्सुरान्मातस्त्वत्पद
सेवने हि विमुखान्को मंदधीः सेवते॥ ५॥ मातस्त्वत्पदपंकजद्वयरजोमुद्रांककोटीरि
णस्ते देवासुरसंगरे विजयिनो निःशंकमंके गताः॥ देवोहं भुवने न मे सम इति स्पर्द्धां व
हंतः परे तत्तुल्यां नियतं यथा शशिरविनाशं व्रजंति स्वयं॥ ६॥ त्वन्नामस्मरणात्पलायन
पराद्द्रष्टुं च शक्ता न ते भूतप्रेतपिशाचराक्षसगणा यक्षाश्च नागाधिपाः॥ दैत्या दानवपुंग
वाश्च खचरा व्याघ्रादिका जंतवो डाकिन्यः कुपितांतकाश्च मनुजा मातः क्षणं भूतले॥ ७॥ ल
क्ष्मीः सिद्धिगणश्च पादुकमुखाः सिद्धास्तथा वारिणां स्तंभश्चापि रणांगणे गजघटास्तंभस्त
थामोहनं॥ मातस्त्वत्पदसेवया खलु नृणां सिध्यंति ते गुणाः कांतिः कांतमनोभवस्य भव

तिष्ठत्योपि वाचस्पतिः॥८॥ ताराहं कविदं रम्यं न किमान्यः पुठेन्नरः॥ प्रातर्मध्याह्नकाले च
सायाह्ने नियतः शुचिः॥९॥ जन्नते कवितां दिव्यां सर्वशास्त्रार्थविद्भवेत्॥ लक्ष्मीमचलतां प्राप्य
भुक्त्वा भोगान्यथेप्सितान्॥१०॥ कीर्त्तिं कांतिं च नैरुज्यं सर्वेषां प्रियतां नयेत्॥ विख्यातिं चापि लो
केषु प्राप्यं ते मोक्षमाप्नुयात्॥११॥ ॥इति श्रीनीलतंत्रे तारास्तोत्रं॥ ॥अथ ताराक
वचं॥ ॥ईश्वर उवाच॥ कोटितंत्रेषु गोप्या हि विद्यातिभयमोचनी॥ दिव्यं हि कवचं तस्याः
शृणुष्व सर्वकामदं॥ ताराकवचस्य अक्षोभ्य ऋषिस्त्रिष्टुप्छंदो भगवती तारा देवता सर्वमंत्र
सिद्धिसमृद्धये विनियोगः॥ प्रणवो मे शिरः पातु ब्रह्मरूपा महेश्वरी॥ हूंकारः पातु हृदये भ
वानी शक्तिरूपधृक्॥ ह्रींकारः पातु ललाटे बीजरूपा महेश्वरी॥ फट्कारः पातु सर्वांगे स
र्वसिद्धिफलप्रदा॥ खर्वा मां पातु देवेशी गंडयुग्मे भयापहा॥ निम्नोदरी सदा स्कंधयुग्मे पातु
महेश्वरी॥ व्याघ्रचर्मावृतकटी पातु देवी शिवप्रिया॥ पीनोन्नतस्तनी पातु पार्श्वयुग्मे म
हेश्वरी॥ रक्तवर्त्तुलनेत्रा च कटिदेशे सदावतु॥ ललजिह्वा सदा पातु नाभौ मां भुवनेश्वरी॥

६७०

करालास्या सदा पातु लिंगे पातु हरप्रिया॥ पिंगोग्रैकजटा पातु जंघायां विघ्ननाशिनी॥
प्रेतखर्परधरा देवी जानुचक्रे महेश्वरी॥ नीलवर्णा सदा पातु जानुनी सर्वदा मम॥ ना
गकुंडलधरा देवी पातु पादयुगे ततः॥ नागहारधरा देवी सर्वांगं पातु सर्वदा॥ नाग
कंकणधरा देवी पातु मां तरदेशतः॥ चतुर्भुजा सदा पातु गमने शत्रुनाशिनी॥ खड्गह
स्ता महादेवी पातु मां विजयप्रदा॥ नीलांबरधरा देवी पातु मां विघ्ननाशिनी॥ कर्त्रीहस्ता स
दा पातु देवी मां विजयप्रदा॥ ब्रह्मरूपा जधरा देवी संग्रामे पातु सर्वदा॥ नागकन्याध
रा देवी भोजने पातु सर्वदा॥ शवकर्णा महादेवी शयने पातु सर्वदा॥ वीरासनधरा दे
वी निद्रायां पातु सर्वदा॥ धनुर्बाणधरा देवी मां पातु विघ्नसंकुले॥ नागांचितकटी पातु
देवी मां सर्वकर्मसु॥ छिन्नमुंडधरा देवी कानने पातु मां सदा॥ चितामध्यस्थिता देवी मा
रणे पातु मां सदा॥ द्वीपिचर्मधरा देवी पुत्रदारधनादिषु॥ अलंकारान्विता देवी पातु मां ह
रवल्लभा॥ रक्षरक्ष नदीकुंजे ह्रूंह्रूं फट् सुसमन्विता॥ बीजरूपा महादेवी पर्वते पातु मां स

६७२

दा॥ मणिधारिवज्रिणी देवी महाप्रतिसरे तथा॥ रक्षतु सदा ह्रूं ॐ ह्रूं स्वाहा पातु मां सदा॥ ॐ ह्रीं
वज्रपुष्पं हूं फट् प्रांतरे सर्वकामदा॥ ॐ पुष्पे पुष्पे महापुष्पे पातु पुत्रान्महेश्वरी॥ ह्रूं स्वाहा
शक्तिसंयुक्ता मेदोयान्तरं तु सर्वदा॥ ॐ आं ह्रूं फट् स्वाहा महेशानि पातु द्यूते हरप्रिया॥ ॐ ह्रीं
सर्वविघ्नोत्सारिणी देवी विघ्नान्मां सर्वदा रक्षतु॥ ॐ पवित्रवज्रभूमे हुं फट् स्वाहा समन्वि
ता॥ पूरिका पातु मां देवी सर्वविघ्नविनाशिनी॥ ॐ आः सुरेखे वज्ररेखे हुं फट् स्वाहा समन्विता
पाताले पातु मां देवी शाकिनीनामसंज्ञिता॥ ह्रीं कारी पातु मां पूर्वे शक्तिरूपा महेश्वरी॥ स्त्रीं
कारी पातु देवेशी वधूरूपा महेश्वरी॥ हूं स्वरूपा महादेवी पातु मां क्रोधरूपिणी॥ फट् स्वरूपा
महामाया उत्तरे पातु सर्वदा॥ पश्चिमे पातु मां देवी हूं स्वरूपा हरिप्रिया॥ मध्ये मां पातु दे
वेशी ह्रूं स्वरूपा नगात्मजा॥ नीलवर्णा सदा पातु सर्वत्र वाग्भवं सदा॥ भवानी पातु भवने
सर्वैश्वर्यप्रदायिनी॥ विद्यादानरता देवी पातु वक्त्रे सरस्वती॥ शास्त्रे वादे च संग्रामे जले
च विषमे गिरौ॥ भीमरूपा सदा पातु श्मशाने भयनाशिनी॥ भूतप्रेतालये घोरे दुर्गमां

नीयरक्षतु॥ पातु नित्यं महेशानी सर्वत्र शिवदूतिका॥ कवचस्य तु माहात्म्यं नाहं वर्षशतै
रपि॥ शक्नोमि कथितुं देवि तत्त्वे तस्य फलं च यत्॥ पुत्रदारादिबंधूनां सर्वदेशे च सर्वदा॥
न विद्यते भयं तस्य नृपपूज्यो न वेश्मसः॥ शुचिर्भूत्वा शुचिर्वापि कवचं सर्वकामदं॥ अप
ठत्वा तस्य रत्नमन्त्रोद्धः खवशीकृतविवर्जितः॥ सर्वशास्त्रे महेशानि कविराड् भवति ध्रुवं
सर्वयोगीश्वरो मर्त्यो लोके कामः सदा सुखी॥ गुरोः प्रसादमासाद्य विद्यां प्राप्य सुगोपि
तां॥ तत्रापि कवचं देवि दुर्लभं भुवनत्रये॥ गुरुर्देवो हरः साक्षात् पत्नी तस्य हरप्रिया॥
अन्ते देवयजेद्यस्तु तस्य सिद्धिरदूरतः॥ मंत्राचारो महेशानि कथिता पूर्वतः प्रिये॥ ना
भौ ज्योतिस्तथा रक्तं हृदयोपरि चिंतयेत्॥ ऐश्वर्यं सुकवित्वं च महावागीश्वरो नरः॥ नि
त्यं तस्य महेशानि महिलासंगमं चरेत्॥ पंचाचाररतो मर्त्यः सिद्धो भवति नान्यथा॥ शक्ति
युक्तो भवेन्मर्त्यः सिद्धो भवति नान्यथा॥ ब्रह्मा विष्णुश्च रुद्रश्च ये देवासुरसत्तमाः॥ तं दृष्ट्वा
साधकं देवि विस्मिता युक्ता भवन्ति ते॥ स्वर्गे मर्त्ये च पाताले ये देवाः सिद्धिदायकाः॥ प्रशंसं

तिसदा देवी तं दृष्ट्वा साधकोत्तमं॥ इतित्ते कवचं देवि मया सम्यक् प्रकीर्त्तितं॥ भुक्तिमुक्ति
करं साक्षात्कल्पवृक्षस्वरूपकं॥ आसाद्य यद्गुरुं प्रसाद्य य इमं कल्पक्रमावलंबनं॥ मोहे
नापि मदेनयापि रहितो जाड्येन वाह्यसखो॥ सिद्धोसौ भुवि सर्वदुःखविपदां पारं प्रयात्यंते
कोमित्रं तस्य नृपाश्च देवि विपदो नश्यंति तस्याशु च॥ लिखित्वा धारयेद्यस्तु कंठे वा मस्त
केभुजे॥ तस्य सर्वार्थसिद्धिः स्याद्यद्यन्मनसि वर्त्तते॥ गोरोचना कुंकुमेन रक्तचंदनकेन
वा॥ यावकैर्वा महेशानि लिखेद्यंत्रं समाहितः॥ अष्टम्यां मंगलदिने चतुर्दश्यामथापि वा
संध्यायां देवदेवेशि लिखेन्मंत्रं समाहितः॥ मघायां श्रवणायां वा रेवत्यां वा विशेषतः॥
सिंहराशौ गते चंद्रे कर्कटस्थे दिवाकरे॥ मीनराशौ गुरौ याते वृश्चिकस्थे शनैश्चरे॥ लिखि
त्वा धारयेद्यस्तु उत्तराभिमुखो नरः॥ स्मशाने प्रांतरे वापि शून्यागारे विशेषतः॥ निशा
यां च लिखेन्मंत्रं तस्य सिद्धिरचंचला॥ भूर्जपत्रे लिखेन्मंत्रं गुरुणा च महेश्वरि॥ ध्यानधा
रणयोगेन धारयेद्यस्तु भक्तितः॥ अचिरात्तस्य सिद्धिः स्यान्नात्र कार्या विचारणा॥ ॥

॥ इति रुद्रयामले उग्रतारा कवचं॥ ॥ देव्युवाच॥ नानारामप्रसंगानाथ विद्याश्च सर्व
श्रुताः॥ सांप्रतं श्रोतुमिच्छामि कवचं मंत्रविग्रहं॥ त्रैलोक्यमोहनं नाम सर्वापद्विनिवा
रणं॥ कृपैवसूचितं नाथ कृपया मे प्रकाशय॥ भैरव उवाच॥ ॥ देवदानवविद्याधकुर
ज्जितप्राणवल्लभे॥ त्रैलोक्यमोहनं नाम कवचं शृणु तत्परं॥ सर्वविद्यामयं देवि सर्वमं
त्रमयं ध्रुवं॥ सर्वरक्षाकरं सर्वसिद्धिविद्याप्रदायकं॥ यद्दत्त्वा सोपि यद्धृत्वा सर्वज्ञः पठना
द्यतः॥ यद्धृत्वा पठनाद्वीरः त्रैलोक्यविजयी प्रभुः॥ धनाधिपः कुबेरोपि देवाधीशः श
चीपतिः॥ पठनाद्धारणात्सम्यं यतः सर्वे दिगीश्वराः॥ सर्वैश्वर्ययुताः संतः सर्वसिद्धिम
वाप्नुयात्॥ अस्य कवचस्य ऋषिः शिवः छंदो विराड् देवता च सोग्रतारा प्रकीर्त्तिता॥ चतु
र्वर्गेषु विद्यायां विनियोगः प्रकीर्त्तितः॥ ॐ ह्रूं स्त्रीं मे शिरः पातु हूं फट् पातु ललाटकं॥ सा
पंचाक्षरी तारा पायान्नेत्रयुगं मम॥ ॐ ह्रीं स्त्रीं हूं च फट् हृदयं दंतं जिह्वां पायान्महेश्वरी॥ ॐ ह्री
स्त्रीं हूं च गलं पातु सा पिनाक सरस्वती॥ स्त्रीं स्त्रं पोपातु नियतं तारैकाक्षररूपिणी॥ ऐं

ह्रीं स्त्रीं हूं च फट् हूं पायाद्भ्राकुलतारा मे भुजद्वयं॥ श्रीं ह्रीं स्त्रीं हूं च फट् हूं पायान्नीलावामे स्तनद्वयं॥ ह्रीं ऐं
स्त्रीं हूं च फट् हूं पायात्तारा च हृदयं मम॥ हूं ह्रीं स्त्रीं हूं च फट् हूं बीजतारापदं सदावतु॥ क्लीं स्त्रीं हूं च
फट् हूं पायात्पार्श्वौ कामस्वरूपिणी॥ ॐ ह्रीं श्रीं हूं नमः पायाद्वै कटिं महाघडाहरी॥ महाविद्या ब्रह्म
सा तात्त्वसा तात्त्व ब्रह्मस्वरूपिणी॥ रवं हूं हौं ॐ ऐं श्रीं ह्रीं सांगुल्यदेशं सदावतु॥ समाहरी चोग्रतारा
मूलविद्यास्वरूपिणी॥ ॐ ह्रीं हां हूं नमस्तारायै सकलं पदं ततः॥ दुस्तरं तारय पदं तारा चाग्रप
दद्वयं॥ स्वाहेति च महाविद्या जानुनी सर्वदावतु॥ ऐं सौः ॐ ऐं क्लीं फट् हूं स्वाहा जंघे पातु परा
त्मिका॥ ॐ ह्रीं स्त्रीं हूं च फट् हूं तारा हंसा घंतान्नखाहरी॥ महोग्रतारा पादौ मे पातु नित्यं महेश्वरी॥
ऐं ह्रीं श्रीं हौं स्हौः यदर्वाग्वादिनीति च॥ कामबीजत्रयं नीलसरस्वतीस्वरूपकं॥ ऐं ऐं क्लीं हि क
लरी स्वाहेति पार्वति॥ चतुस्त्रिंशल्लिपिमयि पातु तारा खिलं वपुः॥ इं नो वामादि युक्तप
च्छी सरस्वत्यनलप्रिया॥ कूर्चाद्यं तापातु चोर्द्धं मूलविद्या दराहरी॥ तारा माया नधः कूर्चं क्ला
ली कामकलात ततः॥ उग्रतारा नगः कामपरा लक्ष्मीः शिवांकुरो॥ सा महायोऽरी प्रोक्ता तारा

देवी मयाधुना॥ विधिवत्प्रहरणं स्याद्भूमं स्तुपर्यं नयेत्॥ एषा विद्या मया गुप्ता तंत्रादौ
यामलेषु च॥ सांप्रतं कथितं तुभ्यं कवचं गोगतं या प्रिये॥ इति ते कथितं देवि गुह्याद्गुह्यत
रं परं॥ त्रैलोक्यमोहनं नाम कवचं मंत्रविग्रहं॥ ब्रह्मविद्यामयं चैव केवलं ब्रह्मरूपिणं॥
मंत्रविद्यामयं चैतत्कवचं मन्मुखोदितं॥ गुरुमभ्यर्च्य विधिवत्कवचं प्रपठेद्यदि॥
त्रिः सकृद्वा यथाज्ञानं सैरवसाहूणाद्भवेत्॥ सर्वपापविनिर्मुक्तः कुलकोटिः समुद्धरेत्
गुरुः स्यात्सर्वविद्यासु अधिकारि जपादिषु॥ शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः
शतमष्टोत्तरं जप्त्वा न वैरूपि पुरंदरः॥ त्रैलोक्यं विजयेद्धीरो गणनाथोपमो गृहे॥ ग
द्यपद्यमयी वाणी नवेऽगाप्रवाहवत्॥ पुष्पांजल्यष्टकं दत्वा मूलेनैव पठेत्सकृत्॥ पंच
वर्षसहस्राणां पूजायाः फलमाप्नुयात्॥ भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि॥ पु
रुषो दक्षिणे बाहौ योषिद्वामभुजे तथा॥ तत्रान्नं प्राप्य शस्त्राणि ब्रह्मास्त्रादीनि निजैर्दवि॥
मान्मानि कुसुमान्येव जनयंति सुखदानि च॥ तस्य गेहे चिरं लक्ष्मीर्वाणी वक्त्रे वसेद्ध्रुवं॥ इदं

कवचमज्ञात्वा तारां यो जपेतेधमः॥ अल्पायुर्निर्धनो मूर्खो भवत्येव न संशयः॥ ॥इति
रुद्रयामले भैरवभैरवीसंवादे ताराकल्पे त्रैलोक्यमोहनं नाम ताराकवचं॥ ॥अथ गुह्यपी-
ठं॥ ॥श्रृणु देवि प्रवक्ष्यामि गुह्यपीठाद्वयं प्रिये॥ न प्रकाश्यमिदं क्वापि तारायाः कायरक्ष-
णे॥ तारं तु नादकावर्णमुदितं नादकास्थले॥ तेनैव मुदितं वर्णं भ्रमते त्रैव पार्वति॥ शक्तिबीजं
तथा देवि विन्यस्ते यं प्रयत्नतः॥ वधूबीजं तथा देवि विन्यस्य संसमाहितैः॥ वर्मबीजं महेश्वा-
नि न्यस्याग्रे तदनंतरं॥ अस्त्रबीजं तथा न्यस्य सकलं तदनंतरं॥ गुह्यपीठाद्वयं देवि न प्रका-
श्यं कदाचन॥ इदं च सिद्धिदं लोके तथा देवासुरेषु च॥ अवश्यं परमं गुह्यं कार्यं न प्रकाशनं त-
थास्तथा॥ इति ते कथितं किंचिद्रहस्यं सुरसुंदरि॥ न प्रकाश्यं तथा केन देवेषु च यथा त्व-
यि॥ ॥इति रुद्रयामले गुह्यपीठं॥ ॥अथ बगलास्तोत्रं॥ ॥चलत्कनक-
कुंडलोल्लसितचारुगंडस्थलीं लसत्कनकचंपकद्युतिमदिंदुबिंबाननां॥ गदाहतविपक्ष-
कां कलितलोलजिह्वांचलां स्मरामि बगलामुखीं विमुखवाङ्मनस्स्तंभिनीं॥१॥ पीयूषोदधि

मध्यचारुविलसद्रक्तोत्पले मंडपे सत्सिंहासनमौलिपातितरिपुं प्रेतासनाध्यासिनीं॥ स्वर्णा-
भां करपीडितारिरसनां भ्राम्यद्गदां विभ्रमां इत्थं ध्यायति यांति तस्य सहसा सद्योथ सर्वापद
॥२॥ देवि त्वच्चरणांबुजार्चनकृते यः पीतपुष्पांजलिं भक्त्या वामकरे निधाय च मनुं मंत्री मनो-
ज्ञाक्षरं॥ पीठध्यानपरोथ कुंभकवशाद्बीजं स्मरेत्पार्थिवं तस्यामित्रमुखस्य वाचि हृदये
जाड्यं भवेत्तत्क्षणात्॥३॥ वादी मूकति रंकति क्षितिपतिर्वैश्वानरः शीतति क्रोधी शा-
म्यति दुर्जनः सुजनति क्षिप्रानुगः खंजति॥ गर्वी खर्वति सर्वविच्च जडति त्वन्मंत्रिणा यंत्रित
श्रीनित्ये बगलामुखी प्रतिदिनं कल्याणि तुभ्यं नमः॥४॥ मंत्रस्तावदलं विपक्षदलने स्तो-
त्रं पवित्रं च ते यंत्रं वादिनियंत्रणं त्रिजगतां जैत्रं च चित्रं न ते॥ मातः श्रीबगलेति नाम
ललितं यस्यास्ति जंतोर्मुखे त्वन्नामग्रहणेन संसदि मुखस्तंभो भवेद्वादिनां॥५॥ दुष्टस्तं-
भनमुग्रविघ्नशमनं दारिद्र्यविद्रोनाशनं कांतिश्रीणिकरं तलक्ष्मणदशांशादिसमाकर्षणं
॥ सौभाग्यैकनिकेतनं समदृशः कारुण्यपूर्णेक्षणं मृत्योर्मारणमाविरस्तु पुरतो मातस्त्व

दीयंवपुः॥६॥मातर्न्नृत्यमहिषस्यवदनंजिह्वांचलांकोलयन्ब्रालौमुद्यदेवदेवविधिवल्लं
मुक्तागतिंस्तंनय॥शत्रून्नचूर्णयचामुंदेनीगदयागौरांगीपीतांबरे।विघ्नौघंबगळेह
रप्रणमतांकारुण्यपूर्णेक्षणे॥७॥मातर्भैरवीनद्रकालीविजयेवाराहिविश्वाश्रयेश्रीवि
द्येसमयेमहेशिबगलेकामेशिवामेरमे॥मातंगित्रिपुरेपरात्परतरेस्वर्गापवर्गप्रदे
दासोहंशरणागतःकरुणयाविश्वेश्वरीत्राहिमां॥८॥संरंभेचौरसंघेप्रहरणसमयेबंध
नेव्याधिमध्येविद्यावादेविवादेप्रकृतनृपतौदिव्यकालेनिशायां॥वश्येवास्तंभनेवारिपु
वधसमयेनिर्जनेवास्मरेनागच्छंस्तिष्ठंस्त्रिकालंयदिपठतिशिवंप्राप्नुयादाशुधीरः॥९॥
त्वंविद्यापरमात्रिलोकजननीविघ्नौघसंछेदिनीयोषाकर्षणकारिणीजनमनःसंमोहसं
दायिनी॥स्तंभोच्चाटनकारिणीपशुजनमनःसंदोहसंदायिनीजिह्वाकीलनभैरवीविजयतेब्र
ह्मादिमंत्रोयथा॥१०॥विद्यांलक्ष्मींसर्वसौभाग्यमायुःपुत्रैःपौत्रैःसार्वसाम्राज्यसिद्धिं॥मानं
भोगोवश्यमारोग्यसौख्यंप्राप्तंतत्तद्भूतलेस्मिन्नरेण॥११॥त्वत्कृतंजपसन्नाहंगदितंपरमेश्व

रि॥दुष्टानांनिग्रहार्थायतंग्रहाणनमोस्तुते॥१२॥ ॥इतिश्रीरुद्रयामलेबगलामुखी
स्तोत्रं॥ ॥अथप्रसंगा॥त्तचतुःषष्ठ्युपचाराद्यानिरूप्यंते॥ ॥अथचतुःषष्ठ्युपचा
रा॥सर्वेपिचारमंत्राश्रितावापूर्वाःकल्प्यामिद्दमइत्यंता॥कार्याणिदूं।श्रीपादुकंकल्पयामिन
मः॥एवंदुग्ध्यर्घंकल्पयामिनमः॥एवंक्रमेणआसनारोहणंसुगंधतैलाभ्यंगमज्जनशाला
प्रवेशनंमज्जनमंडपमणिपीठोपवेशनं॥दिव्यस्नानीयमुद्वर्त्तनंउष्णोदकस्नानंकनककलशाभि
षेकंधौतवस्त्रपरिमार्जनंअरुणदुकूलपरिधानंअरुणदुकूलोत्तरीयंआलेपमंडपप्रवे
शनं॥आलेपमणिपीठोपवेशनंचंदनागरुकर्पूरमृगमदकर्पूरकस्तूरीगोरोचनादिदिव्य
गंधसर्वांगीनविलेपनंकेशभारस्यकालागुरुधूपमल्लिकामालतीजातीचंपकाशोकशत
पत्रपूगकुहरीपुन्नागकल्हारयूथसर्वर्तुकुसुममालाभूषणमणिपीठोपवेशनंनवमणि
मुकुटंचंद्रसकलंसीमंतसिंदूरंतिलकरत्नंकालांजनंपालीयुगलंनासाभरणंअधरयाव
कंग्रथनभूषणंकनकचित्रपदकंमहापदकंमुक्तावलिंएकावलिंकेयूरयुगलचतुष्टयंवल

यावलिंकांचिदामकदिस्कत्रंशोनोरत्नानरणं कामेश्वरपर्यंकोपवेशनां मृतासनाचमनी
यं कर्पूरवटिकां आनंदोल्लासविलासहासं मंगलारात्रिकं श्वेतछत्रं चामरयुगलं दर्पणं
तालवृंतं गंधं पुष्पं धूपं नैवेद्यं कल्पयेत्॥ एतेषामुपचाराणामन्त्रा वै एते मंत्रात्मकाः॥ न
वरत्नेश्वरे॥ चतुःषष्ठ्युपचाराणां मंत्रा ये तन्मंत्रान्पूजयेत्॥ तत्र देवपूजां विंध्यात् साधकः
स्थिरमानसः॥ ॥अथाष्टादशोपचाराः॥ ॥आसनं स्वागतं चार्घ्यं पाद्यमाचमनं ततः
स्नानं वासोपवीतं च भूषणानां च सर्वशः॥ गंधं पुष्पं तथा धूपं दीपमन्नं च दर्पणं॥ माल्यानु
लेपनं चैव नमस्कारविसर्जनं॥ अष्टादशोपचारैस्तु मंत्री पूजां समाचरेत्॥ ॥अथषो
डशोपचाराः॥ ॥पाद्यार्घ्याचमनीयकं स्नानं वसनभूषणं गंधपुष्पधूपदीपनैवेद्याच
मनं ततः॥ तांबूलमर्चनं स्तोत्रं तर्पणं च नमस्क्रिया॥ प्रयोजयेत्प्रपूजायामुपचारास्तु षोडश
॥अथदशोपचाराः॥ ॥पाद्यमर्घ्यं तथाचामं मधुपर्काचमनं तथा॥ गंधादयो नैवेद्यांतानुप
चाराद्दशक्रमात्॥ अथपंचोपचाराः॥ ॥गंधं पुष्पं तथा धूपं दीपं नैवेद्यमेव च॥ अखंडप

लमासाद्यकेवल्वं लनतेध्रुवं॥ अथसुंदर्याःषोडशोपचाराः॥ ॥तस्यमंत्राः यथा॥ उद्य
च्चंदनकुंकुमारुणपयोधाराभिराप्लावितां नानानर्घमणिप्रवालघटितां दत्तां गृहाणांबि
के॥ आमृष्टां सुरसुंदरीभिरनिशं हस्तांबुजैर्भक्तितो मातः सुंदरि भक्तकल्पलतिके श्रीपा
दुकामादरात्॥१॥ देवेंद्रादिभिरर्चितं सुरगणैरादाय सिंहासनं चंचत्कांचनसंचयाभिर
चितं चारु महाभास्वरं॥ एतच्चंपककेतकीपरिमलं तैलं महानिर्मलं गंधोद्वर्तनमादरेण
तरुणीदत्तं गृहाणांबिके॥२॥ पश्चाद्देवि गृहाण शंभुगृहिणि श्रीसुंदरि प्रायशो गंधद्रव्यस
मूहनिर्भरतरं धात्रीफलं निर्मलं॥ तत्केशान्परिशोध्य कंकतिकया मंदाकिनीस्रोतसि स्नात्वामो
दनगंधिकं भवतु ते श्रीसुंदरि त्वन्मुदे॥३॥ सुराधिपतिकामिनीकरसरोजनालीधृतां सचं
दनसकुंकुमागुरुभरेण विभ्राजितां॥ महापरिमलोज्ज्वलां सरसशुद्धकस्तूरिकां गृहाण वर
दायिनि त्रिपुरसुंदरि श्रीप्रदे॥४॥ गंधर्वामरकिन्नरप्रियतमासंतानहस्तांबुजप्रस्तावै
र्ध्रियमानमुत्तमतरं काश्मीरजापिंजरं॥ मातर्भास्करभानुमंडललसत्कांतिप्रदानोज्ज

चेलं निर्मलमात्मजोत्तरमिदं श्रीसुंदरी त्वन्मुदे ॥५॥ स्वर्णाकल्पितकुंडले श्रुतियुगे हस्तांबुजेमु
द्रिका मध्ये सारसना नितंबफलके मंजीरमंघ्रिद्वये ॥ हारो वक्षसि कंकणौ क्वणरणत्कारौ क
रद्वंद्वके विन्यस्तं मुकुटं शिरस्यनुदिनं दत्तोन्मदं स्तूयतां ॥६॥ ग्रीवायां धृतकांतिकांतपटलं
ग्रैवेयकं सुंदरं सिंदूरं विलसल्ललाटफलके सौंदर्यमुद्राधरं ॥ राजत्कज्जलमुज्ज्वलोत्पल
दलश्रीलोचने लोचने तद्दिव्यौषधिनिर्मितं रचयति श्रीशांभवि श्रीप्रदे ॥७॥ अमंदतरमं
दरोन्मथितदुग्धसिंधूद्भवं निशाकरकरोपमं त्रिपुरसुंदरि श्रीप्रदे ॥ गृहाण मुखमीक्षितुं
मुकुरबिंबमाविद्रुमैर्विनिर्मितमघच्छिदे रतिकरांबुजस्थायिनी ॥८॥ कस्तूरीद्रवचंदना
गुरुसुधाधाराभिराप्लावितं चंचच्चंपकपाटलादिसुरभिद्रव्यैः सुगंधीकृतं ॥ देवस्त्री
गणमस्तकस्थितमहारत्नादिकुंभव्रजैरंभः शांभवि संभ्रमेण विमलं दत्तं गृहाणांबि
के ॥९॥ कह्लारोत्पलनागकेसरसरोजाख्यावलीमालतीमल्लीकैरवकेतकादिकुसुमै र
क्ताश्वमारादिभिः ॥ पुष्पैर्माल्यभरेण वै सुरभिभिर्नानारसस्रोतसा ताम्रांभोजनिवासिनीं भ

गवतीं श्रीसुंदरीं पूजये ॥१०॥ मांसीगुग्गुलुचंदनागुरुरजः कर्पूरशैलेयजैर्माध्वीकैः स
ह कुंकुमैः सुरभितैः सर्पिर्भिरामिश्रितैः ॥ सौरभ्यस्थितिमंडपे मणिमये पात्रे भवत्प्रीत
ये धूपोयं सुरकामिनीविरचितः श्रीसुंदरि त्वन्मुदे ॥११॥ घृतद्रवपरिस्फुरद्रुचिररत्न
यष्ट्यान्वितो महातिमिरनाशनः सुरनितंबिनीनिर्मितः ॥ सुवर्णचषकस्थितः सघनसा
रवर्त्यान्वितः स्तव त्रिपुरसुंदरि स्फुरति देवि दीपो मुदे ॥१२॥ जातिसौरभनिर्भरं रुचिकरं
शाल्योदनं निर्मलं युक्तं हिंगुमरीचजीरसुरभिद्रव्यान्वितैर्व्यंजनैः ॥ पक्वान्नेन सपायसे
न मधुना दध्याज्यसंमिश्रितं नैवेद्यं सुरकामिनीविरचितं श्रीसुंदरी त्वन्मुदे ॥१३॥ लवं
गकलिकोज्ज्वलं बहलनागवल्लीदलं सजातिफलकोमलं सघनसारपूगीफलं ॥ सुधा
मधुरिमाकुलं रुचिररत्नपात्रेस्थितं गृहाण मुखपंकजे स्फुरितमच्युत तांबूलकं ॥१४॥
हारस्रजं नवचंद्रमास्फुरितचंद्रिकासुंदरं दलत्सुरतरंगिणीललितमौक्तिकाडंबरं ॥ गृहाण
नवकंचनप्रभवदंडखंडोज्ज्वलं महात्रिपुरसुंदरी प्रकटमातपत्रं महा ॥१५॥ मातस्त्वन्मुद

मातनोतुसुचगस्त्रीभिः समेतोदेजितंमृणंचामरनिंदुकुंदसदृशांप्रस्वेददुःखावहं ॥ स
घोगस्त्ववशिहनारदमुकव्यासादियाल्मिकीभिः स्वोचितंक्रियमाणएवकुरुजोंशर्म
णिवेदध्वनिः ॥२६॥ स्वर्गंगानमंगलवेणुशंखझेरीभिर्निनादैरुपगीयमानां ॥ कोला
हलैराकुलितानत्यास्त्रविद्याधरीनृत्यकलासुखाय ॥२७॥ देविनक्तिरसभावितवृत्ते
प्रीयतांयदिकृतोपिलभ्यते ॥ तत्रलौल्यमपिसत्फलमेकंजन्मकोटिभिरपीहनलभ्यं ॥
॥२८॥ एतैःषोडशभिःपाद्यैरुपचारोपकल्पितैः ॥ यःपरांदेवतांस्तौतिसतेषांफलमाप्नुया
त् ॥२९॥ ॥अथरुद्राक्षमाहात्म्यं॥ ॥शिखायांहस्तयोःकंठेकर्णयोश्चापियोन
रः ॥ रुद्राक्षंधारयेद्भक्त्यासशैवंलोकमाप्नुयात् ॥ नववक्त्रंतुरुद्राक्षंधारयेद्वामबाहुना
चतुर्दशमुखंचैवशिखायांधारयेद्बुधः ॥ एकवक्त्रःशिवःसाक्षाद्ब्रह्महत्यांव्यपोहति ॥
अवध्यत्वंप्रतिष्ठांचतीव्रशक्तिंकरोतिच ॥ द्विवक्त्रोहरगौरीस्यात्गोवधाद्यघनाशकृत् ॥
त्रिवक्त्रोनित्यमग्निश्चपापराशिंप्रणाशयेत् ॥ चतुर्वक्त्रःस्वयंब्रह्मानरहत्यांव्यपोहति

पंचवक्त्रस्तुकालाग्निरगम्यागमपापनुत् ॥ षड्वक्त्रस्तुगुहःसाक्षाद्ब्रह्महत्यांव्यपोहति ॥
सप्तवक्त्रस्त्वनंतःस्यात्स्वर्णस्तेयाघनुत्सदा ॥ विनायकोऽष्टवक्त्रःसर्वविघ्नविनाशकृत्
भैरवोनववक्त्रस्तुशिवसायुज्यकारकः ॥ दशवक्त्रःस्मृतोविष्णुर्भूतप्रेतपिशाचहा ॥ एका
दशमुखोरुद्रोनानायज्ञफलप्रदः ॥ द्वादशास्योऽर्कवेदर्कःसर्वक्रतुफलप्रदः ॥ त्रयोद
शमुखःकामःसर्वकामफलप्रदः ॥ चतुर्दशास्यःश्रीकंठोवंशोद्धारकरःपरः ॥ निष्ठिश
श्चसुपक्षाल्यरुद्राक्षधारणेस्मृताः ॥ पंचामृतंपंचगव्यंस्नानकालेनियोजयेत् ॥ रुद्राक्ष
स्यप्रतिष्ठायांमंत्रंपंचाक्षरंतथा ॥ त्र्यंबकादिमंत्रंचयथातत्रप्रयोजयेत् ॥ ॐत्र्यंबकंय
जामहेसुगंधिंपुष्टिवर्द्धनं ॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॥ तथाॐह्रीं
अघोरेह्रींघोरह्रौंघोरतरेॐह्रिंह्रौं सर्वतःसर्वेभ्योनमस्तेरुद्ररूपेभ्यः ॥ अनेनापिचमंत्रे
णरुद्राक्षस्यापिद्विजोत्तमः ॥ प्रतिष्ठांविधिवत्कुर्यात्ततोधिकफलंलभेत् ॥ ततोयथा
स्वमंत्रेणधारयेद्भक्तिसंयुक्तः ॥ ततःक्रमेणमंत्राः ॥ ॐह्रांनमः ॥ ॐह्रींनमः ॥ ॐह्रूंनमः ॥

ॐ ह्रीं नमः॥ ॐ हूं नमः॥ ॐ नमः॥ ॐ ॐ ह्रूं हूं नमः॥ ॐ सः हूं नमः॥ ॐ हं नमः॥ ॐ ह्रीं नमः॥ ॐ श्रीं नमः॥ ॐ
ह्रूं हं नमः॥ ॐ ह्रौं ह्रौं नमः॥ ॐ नमो नमः॥ १४॥ रुद्राक्षे देहसंस्थे तु कुक्कुरो म्रियते यदि॥ सोपि रुद्रप
दं याति किं पुनर्मानवा गुह॥ सप्तविंशतिरुद्राक्षमालया देहसंस्थया॥ यः करोति नरः पुण्यं
सर्वं कोटिगुणं भवेत्॥ यो ददाति द्विजातिभ्यो रुद्राक्षं भुवि षण्मुख॥ तस्य प्रीतो भवेद्रुद्रः स्वप
दं च प्रयच्छति॥ विना मंत्रेण यो धत्ते रुद्राक्षं भुवि मानवः॥ स याति नरकान् घोरान् यावदिंद्रा
श्चतुर्दश॥ ॥इति श्रीपद्मपुराणे रुद्राक्षमाहात्म्यं॥ ॥तथा च स्कंदपुराणे कार्त्तिकेय
उवाच॥ ॥एकद्वित्रिचतुःपंचषट्सप्ताष्टनवमस्तथा॥ दशैकादशद्वादशत्रयोदशचतुर्द
श॥ एतेषां मुखानां तु देवताः को भवेच्छंकर॥ गुणश्चैकीदशास्तेषां कथयस्व यथार्थतः॥ शंकर
उवाच॥ शृणुष्व षण्मुख तत्त्वेन वक्त्रं वक्त्रं यथाक्रमं॥ त्रिपुरस्य वधे काले रुद्रस्याक्षोपतं स्कये॥
अश्रुणो बिंदवस्तेषु रुद्राक्षा अभवन् भुवि॥ रुद्रयामाहिसंभूतं रुद्राक्षं कामरूपके॥ दाक्षिण्या
त्रिसंभूतं हरिर्लोको विद्वं विदुः॥ हरिर्लोकः श्रीहद्देशः॥ एकवक्त्रः शिवः साक्षाद्ब्रह्महत्यां

अपोहति॥ द्विवक्त्रो देवदेवोऽयं गोवधं नाशयेद्ध्रुवं॥ त्रिवक्त्रो दहनः साक्षात्स्त्रीणहत्यां व्यपो
हति॥ चतुर्वक्त्रः स्वयं ब्रह्मा नरहत्यां व्यपोहति॥ पंचवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः॥ ष
ड्वक्त्रः कार्त्तिकेयस्तु धारणं दक्षिणे भुजे॥ ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः॥ सप्त
वक्त्रो महासेन अनंतो नाम नागराट्॥ गुरुतल्पादिभिः पापैर्मुच्यते नात्र संशयः॥ अष्टव
क्त्रो महासेन साक्षाद्देवो विनायकः॥ अहोदरकरेणापि संस्पर्शो कागुरुत्तियं॥ एवमादि
नि पापानि अतिपापानि सर्वशः॥ विघ्नास्तस्य च नश्यंति मुक्तो याति परां गतिं॥ गुणश्चैतेषु
सर्वेष्वष्टवक्त्रस्य धारणात्॥ नववक्त्रो भैरवः स्याद्धारयेद्वामके भुजे॥ कपिलं मुक्तिदं
प्रोक्तं मम तुल्यबलो भवेत्॥ लक्षकोटिसहस्राणि ब्रह्महत्यां करोति यः॥ तत्सर्वं दहते चाघं
नववक्त्रस्य धारणात्॥ वक्त्रैकादशरुद्राक्षो रुद्र एकादशः स्मृतः॥ शिखायां धारयेन्नित्यं
तस्य पुण्यफलं शृणु॥ अश्वमेधसहस्रस्य वाजपेयशतस्य च॥ हेमशृंगस्य लक्षस्य सम्यक्
दत्तस्य यत्फलं॥ तत्फलं समवाप्नोति रुद्रैकादशधारणात्॥ रुद्राक्षं द्वादशैर्वक्त्रैः कंठदेशे

च धारयेत्॥ आदित्यस्तम्भतेनिसंज्ञा द्वादशार्कस्वयस्थिता:॥ तत्र क्रमेण मंत्रा:॥ ॐ ह्रं १॥ ॐ श्रीं
२ ॐ ज्रुं ३ ॐ श्रीं ४ ॐ ह्रौं ५ ॐ ह्रीं ६ ॐ ह्रां ७ ॐ ह्रीं ८ ॐ कं ९ ॐ ह्रौं १० ॐ श्रीं ११ ॐ ह्रां १२ ॐ सौं ग्लौं १३ ॐ उं मं
ह्रां १४॥ ॥इति कृष्णार्कसंस्कार:॥ ॥अथ नैमित्तिकादिकर्मत्यागे प्रायश्चित्तमाह॥ गौत
मीये॥ यद्यत्कर्मणि वै न्यूनं नित्यनैमित्तिके तथा॥ सहस्रं प्रजपेन्मंत्रं मूलं वायुतमेव वा॥ नि
त्ये सहस्रं प्रजपेन्नैमित्तिके तथायुतं॥ इति विष्णुविषयं॥ अन्यत्र तंत्रराजे॥ नित्यादिक्रमदे
वाणं शांभवि विधाय तं जपेत्॥ नैमित्तिकातिक्रमणे सहस्रं प्रजपेन्मनुं॥ पापशंकरे तु॥ सर्वे
षामेव पापानां शंकरे समुपस्थिते॥ प्रायश्चित्तं तु तत्रोक्तमयुतं मंत्रजापत:॥ अथ विल्वा
राधनमंत्रा:॥ यस्य दर्शनमिच्छंति देवा ब्रह्महरादय:॥ कृपया देवदेवेश मदग्रे सन्निधी
भव॥ तस्य ते परमेशान स्वागतं स्वागतं प्रभो॥ कृतार्थोऽस्म्यनुगृहीतोऽस्मि सफलं जीवितं
तु मे॥ यदागतोऽसि देवेश चिदानंदमदाव्यय:॥ अज्ञानाद्वा प्रमादाद्वा वैकल्यात्साधनस्य
च॥ यदपूर्णं भवेत्कृत्यं तथाप्यभिमुखो भव॥ ॥इत्यावाहनमंत्रा:॥ ॥मद्भक्तेष्वसं

पर्कात्तु परमानंदसंभव॥ तस्य ते परमेशान पाद्यं शुद्धाय कल्पते॥ इति पाद्यं॥ देवानाम
पि देवाय देवानां देवताय च॥ आचामं कल्पयामीश सुधाया: श्रुतिहेतवे॥ इत्याचम
नं॥ तापत्रयहरं दिव्यं परमानंदलक्षणं॥ तापत्रयविनिर्मोक्षाय तवार्घ्यं कल्पयाम्यहं॥ इ
त्यर्घ्यं॥ सर्वकल्मषहीनाय परिपूर्णसुखात्मकं॥ मधुपर्कमिदं देव कल्पयामि प्रसीद मे
इति मधुपर्क:॥ उच्छिष्टोऽप्यशुचिर्वापि यस्य स्मरणमात्रत:॥ शुद्धिमाप्नोति तस्मै ते पुन
राचमनीयकं॥ इति पुनराचमनीयं॥ परमानंदबोधाब्धिनिमग्ननिजमूर्तये॥ सांगोपां
गमिदं स्नानं कल्पयाम्यहमीशते॥ इति स्नानं॥ मायाविनेच तेजस्यानिजगूढोरुतेजसे
निरावरणविज्ञानवासस्ते कल्पयाम्यहं॥ इति वास:॥ यमाश्रित्य महामाया जगत्संमो
हनी सदा॥ तस्मै ते परमेशान कल्पयाम्युत्तरीयकं॥ इति यज्ञोपवीतं॥ स्वच्छांगस्सुंदरांगा
यसस्पसस्पाश्रयायते॥ भूषणानि विचित्राणि कल्पयामि सुरार्चित॥ इति भूषणानि॥
समस्तदेवदेवेश सर्वतृप्तिकरं परं॥ अखंडानंदसंपूर्णं गृहाण जलमुत्तमं॥ इति ज

परमानंदसौरभ्यपरिपूर्णदिगंतरं॥गृहाणपरमंगंधंकृपयापरमेश्वर॥इतिगंधः॥
तुरीयगुणसंपन्नंनानागुणमनोहरं॥आनंदसौरभंपुष्पंगृह्यतामिदमुत्तमं॥इति
पुष्पं॥वनस्पतिरसोत्पन्नोगंधाढ्योगंधउत्तमः॥आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृ
ह्यतां॥इतिधूपः॥स्वप्रकाशोमहातेजाःसर्वत्रतिमिरापहः॥सबाह्याभ्यंतरंज्योतिर्दीपोयं
प्रतिगृह्यतां॥इतिदीपः॥ ॥गौतमीये॥पूजाचपंचधाप्रोक्तातासांभेदान्शृणुष्वमे
अभिगमनमुपादानंयोगःस्वाध्यायएवच॥इतिपंचप्रकाराचाक्रमेणकथयामिते
तत्राभिगमनंनामदेवतास्थानमार्जनं॥उपलेपनंनिर्माल्यदूरीकरणमेवच॥उपा
दानंनामगंधपुष्पादिचयनंतथा॥योगोनामस्वदेवस्यस्वात्मत्वेनैवभावना॥स्वाध्या
योनाममंत्रार्थसंधानपूर्वकोजपः॥शास्त्रस्तोत्रादिपाठश्चहरेःसंकीर्तनंतथा॥तत्वादि
शास्त्राभ्यासश्चस्वाध्यायःपरिकीर्तितः॥इज्यानामस्वेष्टदेवपूजनंचतथार्थतः॥इतिपं
चप्रकाराचाकथितास्तवसुव्रत॥साष्टिसामीप्यसालोक्यसारूप्यसायुज्यदाक्रमात्॥अथ

कादशशुद्धिश्चवैतस्यानामिहोच्यते॥गृहोपसर्पणंचैवतथानुगमनंहरेः॥तस्याप्रदक्षि
णंचैवपादयोःशोधनंपुनः॥पूजार्थंपत्रपुष्पाणांतस्यैवोत्तोलनंहरेः॥करयोःसर्वशु
द्धिनामियंशुद्धिर्विशिष्यते॥तन्नामकीर्तनंचैवगुणानामपिकीर्तनं॥तस्याश्रीकुलदेव
स्यवचःशुद्धिरिहोच्यते॥तत्कथाश्रवणंचैवतस्योत्सवनिरीक्षणं॥श्रोत्रयोर्नेत्रयोश्चै
वशुद्धिःसम्यगिहोच्यते॥पादोदकंचनिर्माल्यमालानामपिधारणं॥उच्यतेशिरसःशुद्धि
प्रणतस्यहरेःपुनः॥आघ्राणंगंधपुष्पादेर्निर्माल्यस्यतपोधन॥विशुद्धिःस्यादनंतस्य
सर्वस्यापिविधीयते॥पत्रपुष्पादिकंयच्चकृष्णपादयुगार्चितं॥तदेकपावनंलोकेतद्धिस
र्वंविशोधयेत्॥ललाटेचगदाकार्यामूर्ध्निचापंशरांस्तथा॥नंदकंचैवहृन्मध्येशंखचक्रं
भुजद्वये॥शंखचक्रांकितोविप्रःश्मशानेम्रियतेयदि॥प्रयागेयागतिःप्रोक्तासागतिस्त
स्यगौतम॥तंत्रांतरे॥यानैर्वापादुकाभिर्वायानंभगवतोगृहे॥देवोत्सवेष्वसेवाचअप्र
णामस्तदग्रतः॥उच्छिष्टेचैवचाशौचेभगवद्वंदनादिकं॥एकहस्तप्रणामश्चतत्पुरस्ता

स्यदक्षिणं॥पादप्रसारणं चाग्रे तथा पर्यंकबंधनं॥शयनं नर्तनं चापि निष्पान्नावणमेव च॥
उच्चैर्भाषणमिथ्योक्ती रोदनानि च विग्रहः॥निग्रहानुग्रहौ चैव स्त्रीषु च क्रूरभाषणं॥कंबला
वरणं चैव परनिंदा परस्तुतिः॥अश्लीलभाषणं चैव अधोवायुविमोक्षणं॥शक्तौ गौणोप
चारस्य अनिवेदितभक्षणं॥तत्तत्कालोद्भवानां च फलादीनामनर्पणं॥विनियुक्तावशिष्ट
स्य प्रदानं व्यंजनस्य च॥पृष्ठीकृत्यासनं चैव परनिंदा परस्तुतिः॥गुरौ मौनं निजस्तोत्रं देव
तानिंदनं तथा॥अपराधास्तथा विष्णोर्द्वात्रिंशत्परिकीर्तिताः॥केशवाग्रे नृत्यगीतं करोति
न हरेर्दिने॥वह्निना किं न दग्धोसौ गतः किं न रसातलं॥नारदीये॥स्मरणं कीर्तनं विष्णोः
कलौ मंत्रजपादिकं॥दानं तु प्रीतये तस्य नान्यथा गतिरिष्यते॥सुप्तप्रबोधकालोऽथ मंत्रा
णामभिधीयते॥मंत्रविद्याविभागेन त्रिविधा मंत्रजातयः॥मंत्राः पुंदेवता ज्ञेया विद्या
स्त्रीदेवताः स्मृताः॥पुंमंत्राः हुंफडंताः स्युः द्विठांताश्च स्त्रियो मताः॥नपुंसका नमोंताः स्युः इत्युक्ता
मनवस्त्रिधा॥एतच्छक्तिं न वेत्ति यो महाराक्षेति गीयते॥एवं मंत्रेपि॥अग्निसोमात्मका मंत्रा

विज्ञेयाः क्रूरसौम्ययोः॥कर्मबहुलितारांत्यबियत्प्रायाः समीरिताः॥आग्नेया मानवाः सौम्याः
भूमिबिंदुसमन्विताः॥आग्नेयाः संप्रबुध्यंते प्राणे चरति दक्षिणे॥वामे मरुति संस्थिते प्राणे
सौम्या बोधं प्रयांति च॥नाडीद्वयगते प्राणे सर्वे बोधं प्रयांति ते॥प्रयच्छंति फलं सर्वे प्रबुद्धा मं
त्रिणां सदा॥यद्वा॥प्राणापानसमायोगाद्द्विवराश्रयसंभवं॥प्रबोधकालो विज्ञेयः स्वाप
कालस्ततः परः॥तथा वामवहे वायुर्दीर्घानां योजनं तदा॥दक्षिणस्थं यदा वायुः सदा ह्रस्वा
नियोजिताः॥उभयस्थो वायुस्तदा स्यादुभयात्मकः॥संपुटीकृत्य मंत्रेणाद्यंतानाद्यान्सबि
न्दुकान्॥पुनः सविसर्गांस्तान् हकारं केवलं जपेत्॥एवं जपोपदिष्टश्चाप्रबुद्धः शीघ्रसिद्धिदः
॥इति सुप्तप्रबोधकालः॥ ॥अथ योगांगासनानि॥ ॥पद्मासनं स्वस्तिकाख्यं भद्रं वज्रा
सनं तथा॥वीरासनमिति प्रोक्तं क्रमादासनपंचकं॥ऊर्वोरुपरि विन्यस्य सम्यक्पादतले
उभे॥अंगुष्ठौ च निबध्नीयाद्धस्ताभ्यां व्युत्क्रमात्ततः॥पद्मासनमिति प्रोक्तं योगिनां हृदयं
गमं॥जान्वोरंतरे सम्यक्कृत्वा पादतले उभे॥ऋजुकायो विशेद्योगी स्वस्तिकं तत्प्रचक्षते

सीमन्याः पार्श्वयोर्न्यस्येत् गुल्फयुग्मं सुनिश्चलं ॥ वृषणाधः पार्श्वपादौ पाणिभ्यां परिबंधयेत्
भद्रासनं समुद्दिष्टं योगीभिः परिकल्पितं ॥ ऊर्वौ पादौ क्रमान्न्यस्येत् जान्वोः प्रत्यङ्मुखांगुली ॥
करौ निदध्यादाख्यातं वज्रासनमनुत्तमं ॥ एकमधः पादं कृत्वा विन्यस्योरौ तथोत्तरं ॥ ऋजुका
यो विशेद्योगी वीरासनमितीरितं ॥ ॥अथ मुद्राप्रकाराः॥ ॥अथ मुद्राः प्रवक्ष्यामि स
र्वतंत्रेषु गोपिताः ॥ याभिर्विरचिताभिस्तु मोदंते मंत्रदेवताः ॥ अर्चने जपकाले च ध्याने काम्ये
च कर्मणि ॥ स्नाने चावाहने शंखे प्रतिष्ठायां च रक्षणे ॥ नैवेद्ये च तथान्यत्र तत्तत्कल्पप्रकाशि
ते ॥ स्थाने मुद्राः प्रदष्टव्याः स्वस्वलक्षणसंयुताः ॥ आवाहन्यादिका मुद्राः विज्ञेयाः कामनाविनिः
शंखचक्रगदापद्मवेणुश्रीवत्सकौस्तुभाः ॥ वनमाला तथा ज्ञानमुद्रा बिल्वाख्यया तथा ॥ ग
रुडाख्या परा मुद्रा विष्णोः संतोषवर्द्धिनी ॥ नारसिंही च वाराही हयग्रीवी धनुस्तथा ॥ बाणमु
द्रा ततः परशुर्जगन्मोहनिका मता ॥ काममुद्रा पराख्याता शिवस्य दशमुद्रिका ॥ लिंगयोनि
त्रिशूलाख्याक्षमालेष्टाभीमृगाख्यिका ॥ खट्वांगा च कपालाख्या डमरुः शिवतोषिताः ॥ सूर्यस्यैके

कपद्माख्या षण्मुद्रा गणेशितुः ॥ दंतपाशांकुशाविघ्नपरशुलड्डुकसंज्ञिकाः ॥ बीजपूरा
कया मुद्रा विज्ञेया विघ्नपूजने ॥ पाशांकुशावराभीतिखड्गचर्मधनुःशराः ॥ मौशलीमौद्रि
का दौर्गी मुद्राः शक्तेः प्रियंकराः ॥ लक्ष्मीमुद्रार्चने लक्ष्म्याः वाग्वादिन्याः सपूजने ॥ अक्षमाला
तथा वीणा व्याख्या पुस्तकमुद्रिका ॥ सप्तजिह्वाकया मुद्रा विज्ञेया वह्निपूजने ॥ दशमामुद्रिका
ज्ञेया त्रिपुरायाः प्रपूजने ॥ संक्षोभद्रावणाकर्षवशोन्मादमहांकुशाः ॥ खेचरी बीजयो
न्याख्या त्रिखंडा परिकीर्तिताः ॥ कुंभमुद्रा निषेके स्यात् पद्ममुद्रासने तथा ॥ कालकर्णी प्रयो
क्तव्या विघ्नप्रसवकर्मणि ॥ गालिनी च प्रयोक्तव्या जलशोधनकर्मणि ॥ श्रीगोपालार्चने वेणु
र्नृहरे नारसिंहिका ॥ वराहस्य च पूजायां वराहाख्यां प्रदर्शयेत् ॥ हयग्रीवार्चने चैव हय
ग्रीवं च दर्शयेत् ॥ रामार्चने धनुर्बाणमुद्रे परशुस्तथार्चने ॥ परशुरामस्य विज्ञेया जगन्मो
हनसंज्ञिका ॥ वासुदेवाख्यया ध्याने कुंभमुद्रा तु रक्षणे ॥ सर्वत्र प्रार्थने चैव प्रार्थनाख्यां प्र
योजयेत् ॥ उद्दिष्टानुक्रमादासामुच्यते लक्षणानि तु ॥ हस्ताभ्यामंजलिं बध्वानामिकामूलप

र्पणि॥ अंगुष्ठौ निक्षिपेत्सोयं मुद्रा त्वावाहनी स्मृता॥१॥ अधोमुखी त्वियं चेत्स्यात्स्थापनी मु
द्रिका स्मृता॥२॥ उच्छ्रितांगुष्ठमुष्ट्योस्तु संयोगात्संनिधापनी॥३॥ अंतःप्रवेशितांगुष्ठा सैव सं
रोधिनी मता॥४॥ उत्तानमुष्टियुगलासन्मुखीकरणी मता॥५॥ देवतांगे षडंगानां न्यासः स्या
त्सकलीकृतिः॥६॥ सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्जनी॥ अवगुंठनमुद्रेयमभितो
भ्रामिता यथा॥७॥ अन्योन्याभिमुखाश्लिष्टकनिष्ठानामिका पुनः॥ तथैव तर्जनीमध्या धेनु
मुद्रा समादिता॥८॥ अमृतीकरणं कुर्यात्तया साधकसत्तमः॥ अन्योन्यग्रथितांगुष्ठा प्र
सारितपरांगुलिः॥९॥ महामुद्रेयमुदिता परमीकरणे बुधैः॥ प्रयोजयेदिमां मुद्रां देव
ताह्वानकर्मणि॥ अंगन्यासस्य या मुद्रास्तासां लक्षणपूर्वकं॥ वैष्णवीनां तु मुद्राणां लक्ष्यंते
लक्षणं यथा॥ वामांगुष्ठं तथाग्रस्य दक्षिणेन तु मुष्टिना॥ कृत्वोत्तानं ततो मुष्टिमंगुष्ठं तु प्रसा
रयेत्॥ वामांगुल्यस्तथाश्लिष्टाः संयुक्ताः सुप्रसारिताः॥ दक्षिणांगुष्ठसंस्पृष्टा मुद्रैषा शंख
संज्ञिका॥ हस्तौ तु संमुखौ कृत्वा संभुग्नौ सुप्रसारितौ॥ कनिष्ठांगुष्ठकौ लग्नौ मुद्रैषा चक्र

संज्ञिका॥ अन्योन्याभिमुखौ हस्तौ कृत्वा तु ग्रथितांगुली॥ अंगुष्ठौ मध्यमे न्यस्य सुलग्ने
सुप्रसारिते॥ गदामुद्रेयमुदिता विष्णोः संतोषकारिणी॥ हस्तौ तु संमुखौ कृत्वा संनत
प्रोन्नतांगुली॥ तथांतर्निहितांगुष्ठौ कृत्वेयं पद्ममुद्रिका॥ अधोहौ वामकरांगुष्ठौ लग्न
स्तस्य कणिष्ठिव॥ दक्षिणांगुष्ठसंसर्गात्तत्कर्मणि प्रसारिता॥ तर्जनीमध्यमानामाः किंचि
त्संकुच्य चांगुलिः॥ ता॥ वेणुमुद्रा नवेदिव्या सुगुप्ता प्रियसि हरेः॥ अन्योन्यस्पृष्टकरयो
र्मध्यमानामिकांगुली॥ अंगुष्ठेन तु बध्नीयात्कनिष्ठामूलसंस्थिते॥ तर्जनीकारयेद्दे
वा मुद्रा श्रीवत्ससंज्ञिता॥ अनामां पृष्ठसंलग्नां दक्षिणस्य कनिष्ठिकां॥ कनिष्ठया वामया बध्वा
तर्जन्या दक्षया तथा॥ वामानामां च बध्नीयाद्दक्षिणांगुष्ठमूलके॥ अंगुष्ठमध्यमे वामे
संयोज्य सबलाः पराः॥ चतस्रोप्यग्रसंलग्ना मुद्रा कौस्तुभसंज्ञिका॥ स्पृष्टार्कं दादिपादांतं
तर्जन्यांगुष्ठयोस्तथा॥ करद्वयेन मालावन्मुद्रेयं वनमालिका॥ तर्जन्यंगुष्ठकौ दक्षौ वय
तो हृदि विन्यसेत्॥ वामहस्तांबुजं वामजानुमूर्द्धनि विन्यसेत्॥ ज्ञानमुद्रा भवेदेषा रामचं

दस्य प्रेयसी॥ अंगुष्ठं वाममुद्दंडितमितकरांगुष्ठकेनाथ बध्वा॥ तस्याग्रं पीडयित्वांगुलीनिर
पिचता वामहस्तांगुलीभिः॥ बध्वा गाढं हृदि स्थापयतु विमलधीर्व्याहरन्मान्तबीजं बिल्वा
ख्या मुद्रिकेयं स्मरमिह कथिता गोपनीया विधिज्ञैः॥ हस्तौ तु विमुखौ कृत्वा पर्यायित्वा
कणिष्ठके॥ मिथस्तर्जनीके श्लिष्टे श्लिष्टावंगुष्ठकौ तथा॥ मध्यमानामिके द्वे तु द्वौ पक्षाविव
चालयेत्॥ एषा गरुडमुद्रा स्याद्विष्णोः संतोषवर्द्धनी॥ ज्ञानुमध्ये करौ कृत्वा चिबुकोष्ठे स
मावृतौ॥ हस्तौ तु कुंभितौ लग्नौ कंपमानौ पुनः पुनः॥ मुखं च विवृतं कुर्यात्लेलिहानं च जि
ह्विकां॥ नारसिंहीन वेद्या मुद्रा नत्प्रीतिवर्द्धनी॥ अंगुष्ठाभ्यां तु करयोरथा कनिष्ठके निक्षि
अधोमुखी निःसर्वाभिः मुद्रेयं नृहरेर्मता॥ देवोपरि करं वामं कृत्वोत्तानमधः सुधीः॥ ना
मादिति संप्रोक्ता मुद्रा वाराहसंज्ञिका॥ दक्षहस्तं चोर्ध्वमुखं वामहस्तमधोमुखं॥ अंगुष्ठयस्त
संलग्नं मुद्रा वाराहसंज्ञिता॥ वामहस्ततले दक्षो अंगुली स्यादधोमुखी॥ संरोप्य मध्यमां
तामामृत्यस्याधो विकुंचयेत्॥ हयग्रीवप्रिया मुद्रा तत्स्फूर्त्तिरनुकारिणी॥ वामस्य मध्यमायां

तु तर्जन्यग्रेण योजयेत्॥ अनामिकां कनिष्ठां च तस्यांगुष्ठेन पीडयेत्॥ दर्शयेद्वामके स्कंधे
धनुर्मुद्रेयमीरिता॥ दक्षमुष्टेस्तु तर्जन्या दीर्घया बाणमुद्रिका॥ यक्षानार्णवे॥ यथा हस्त
ग्रतं चापं तथा हस्तं कुरु प्रिये॥ चापमुद्रेयमाख्याता रिपुवर्गविकृंतनी॥ यथा हस्तगता
बाणा तथा हस्तं कुरु प्रिये॥ बाणमुद्रेयमाख्याता रिपुवर्गविनाशिनी॥ तलेतलं तु करयो
स्तिर्यक्संयोज्य चांगुलीः॥ संहता प्रसृताः कुर्यात्मुद्रेयं परशुसंज्ञिका॥ उर्द्ध्वस्थांगुष्ठमुष्टी
त्वेमुद्रा त्रैलोक्यमोहिनी॥ हस्तौ तु संपुटौ कृत्वा प्रसृतांगुलिकौ तथा॥ तर्जन्यौ मध्यमापृष्ठे
अंगुष्ठौ मध्यमास्थितौ॥ काममुद्रेयमुदिता सर्वदेवप्रियंकरी॥ महादेवप्रिया एषा च कथ्यं
ते लक्षणान्यथा॥ उच्छ्रितं दक्षिणांगुष्ठं वामांगुष्ठेन बंधयेत्॥ वामांगुलीभिर्दक्षिणांगुलीभि
श्च बंधयेत्॥ लिंगमुद्रेयमाख्याता शिवसान्निध्यकारिणी॥ मिथः कनिष्ठके बध्वा तर्जनी
भ्यामनामिके॥ अनामिकोर्ध्वसंश्लिष्टदीर्घमध्यमयोरधः॥ अंगुष्ठाग्रद्वयं न्यस्येद्योनिमु
द्रेयमीरिता॥ अंगुष्ठेन कनिष्ठां स्वां बध्वा श्लिष्टांगुलित्रयं॥ प्रसारयेद्दक्षमाला मुद्रेयं पारि

कीर्त्तिता॥ अधःस्थितो दक्षहस्तः प्रसृतो वरमुद्रिका॥ मिलितानामिकांगुष्ठमध्यमाग्रे नियो
जयेत्॥ शिष्टांगुल्युच्छ्रिते कुर्यान्मृगमुद्रेयमीरिता॥ पंचांगुल्यो दक्षिणस्य मिलिता ह्यर्द्धमु
न्नताः॥ खड्गमुद्रा विज्ञातारिविध्वंसातिप्रियामता॥ पात्रवद्वामहस्तं च कृत्वांगं यामवे तथा
निधायाश्रितवत्कुर्यान्मुद्राकापालिकीमता॥ मुष्टिं च शिथिलां बध्वांगुष्ठं दुच्छ्रितमध्यमां॥
दक्षिणं तद्वदुन्नाम्य कर्णदेशे प्रचालयेत्॥ एषा मुद्रा डमरुका सर्वविघ्नविनाशिनी॥ ततो
गणेशमुद्राणामुच्यते लक्षणं प्रिये॥ उत्तानोर्द्धमुखी मध्यासरलान्यं वद्धमुष्टिका॥ दंतमु
द्राः समाख्याता सर्वागमविशारदे॥ वाममुष्टिस्थतर्जन्या दक्षमुष्टिस्थतर्जनी॥ संयोज्यांगु
ष्ठकाग्राभ्यां तर्जन्यग्रे च संस्पृशेत्॥ एषा पाशाकृया मुद्रा विद्वद्भिः परिकीर्त्तिता॥ ऋज्वीं च म
ध्यमां कृत्वा तर्जनीमध्यपर्वणि॥ संयोज्याकुंचयेत्किंचिन्मुद्रेकांकुशसंज्ञिका॥ तर्जनीमध्य
मानामाकनिष्ठांगुष्ठमुष्टिका॥ अधोमुखी दीर्घरूपा मध्यमा विघ्नमुद्रिका॥ परशुमुद्रा निग
दिता प्रसिद्धा लड्डुमुद्रिका॥ बीजपूराकृया मुद्रा प्रसिद्धत्वादुपेक्षिता॥ शांकेयिनां च मुद्राणां

कष्ठं तेजरूणानितु॥ पाशांकुशवराभीतिधृत्कर्णाः समीरिताः॥ कनिष्ठानामिके बध्वा स्वां
गुष्ठेनैव मध्यतः॥ शिष्टांगुलिद्वयप्रसृते संस्पृशेत् स्वक्रमुद्रिका॥ वामहस्तं तथा तिर्यक्कृत्वा
चैव प्रसार्य च॥ आकुंचितांगुलिं कुर्यात् चर्ममुद्रेयमीरिता॥ मुष्टिं कृत्वा तु हस्ताभ्यां वा
मस्योपरि दक्षिणं॥ कुर्यान्मुशलमुद्रेयं सर्वविघ्नविनाशिनी॥ मुष्टिं कृत्वा कराभ्यां च वामह
स्योपरि दक्षिणं॥ कृत्वा शिरसि संयोज्य दुर्गामुद्रेयमीरिता॥ वक्रमुद्रां तथा बध्वा मध्यमे द्वे
प्रसार्य च॥ कनिष्ठके तथानीय तदग्रेंगुष्ठकौ क्षिपेत्॥ लक्ष्मीमुद्रा परा ह्येषा सर्वसंपत्प्रदा
यिनी॥ वीणावादनवद्धस्तौ कृत्वा संचालयेच्छिरः॥ वीणामुद्रेयमाख्याता सरस्वत्याः प्रियं
करी॥ वाममुष्टिं स्वाभिमुखीं कृत्वा पुस्तकमुद्रिका॥ दक्षिणांगुष्ठतर्जन्यावग्रलग्नपरांगुलिः
प्रसार्य संहितौ ज्ञाना एषाख्याता तु मुद्रिका॥ श्रीरामस्य सरस्वत्या अनंतं प्रियसीमता॥ म
णिबंधस्थितौ कृत्वा प्रसृतांगुलिकौ करौ॥ कनिष्ठांगुष्ठयुगले मिलित्वा ततः प्रसारयेत्॥ स
दाञ्जिकाख्यमुद्रेयं वैश्वानरप्रियंकरी॥ कनिष्ठांगुष्ठकौ शक्तौ करयोरितरेतरं॥ तर्जनीम

ध्यमानामा संहतान्युन्नवर्जिता॥ मुद्रैषा गालिनी प्रोक्ता शंखस्योपरि चालिता॥ दक्षांगुष्ठं पर
गुष्ठे क्षिप्त्वा हस्तद्वयेन तु॥ सावकाशामेकमुष्टिं कुर्यात्सा कुंभमुद्रिका॥ मुष्टी रूर्द्ध्वकृतांगुष्ठ
तर्जन्यग्रे तु विन्यसेत्॥ सर्वरक्षाकरी ह्येषा कुंतमुद्रा समीरिता॥ प्रसृतांगुलिको हस्तौ मिथ
श्लिष्टौ च संमुखौ॥ कुर्याच्च हृदये सेयं मुद्रा प्रार्थनसंज्ञिका॥ अंगुल्यंग्र जिस्तु तास्याद्वास्तुदेव
न्निधा च सा॥ अंगुष्ठावुन्नतौ कृत्वा मुष्टौ संलग्नयोर्द्वयोः॥ तारेयं निमुखौ कुर्यात्मुद्रैषा
कालकर्णिका॥ दक्षिणनिविडा मुष्टिर्नासिकाकर्षि तर्जनी॥ मुद्रा विस्मयसंज्ञा स्याद्विस्मयाव
शाकारिणी॥ मुष्टिमूर्द्धकृतांगुष्ठा दक्षिणा नादमुद्रिका॥ तर्जन्यंगुष्ठसंयोगादग्रतो बिंदुमुद्रिका
अधोमुखे वामहस्ते तूर्द्ध्वास्यं दक्षहस्तकं॥ क्षिप्तांगुलिभिः संग्रथ्य परिवर्तयेत्॥ एषा संहार
मुद्रा स्याद्विसर्जनविधौ स्मृता॥ वामहस्तस्य तर्जन्यां दक्षिणकनिष्ठया तथा॥ दक्षिण तर्जनी
म्यां वामांगुष्ठेन योजयेत्॥ उन्नतं दक्षिणांगुष्ठं वामस्य मध्यमादिकाः॥ अंगुलीर्योजयेत्पृ
ष्ठे संपृष्ठे दक्षिणस्य करस्य च॥ वामस्य पितृतीर्थेन मध्यमानामिके तथा॥ अधोमुखे च ते कु

र्याद्दक्षिणस्य करस्य च॥ कूर्मपृष्ठसमं कुर्याद्दक्षपाणिं च सर्वतः॥ कूर्ममुद्रेयमाख्याता
देवताध्यानकर्मणि॥ पृष्ठे क्रोडे॥ अंतरांगुष्ठमुष्टिं तु कृत्वा वामकरस्य च॥ मध्यमाग्रं तु द
क्षिणस्य तथा लक्ष्य प्रयत्नतः॥ मध्यमेनाथ तर्जन्यामंगुष्ठाग्रेण योजयेत्॥ दक्षिणं योजयेत्
पाणिं वाममुष्टौ तु साधकः॥ दर्शयेद्दक्षिणे भागे मुंडमुद्रेयमुच्यते॥ तर्जनीमध्यमानामा
समं कुर्यादधोमुखं॥ अनामायां क्षिपेद्वृद्धां मृद्वीं कृत्वा कनिष्ठिकां॥ लेलिहाना मुद्रेयं जीव
न्यासे प्रकीर्त्तिता॥ तर्जन्यनामिकामध्ये कनिष्ठादिक्रमयोगतः॥ करयोर्योजयेत्तेन कनिष्ठ
मूलदेशतः॥ अंगुष्ठाग्रे तु निक्षिप्य महायोनिः प्रकीर्त्तिता॥ वामकेश्वरतंत्रोक्ताः प्रकाश्यंते
त्रमुद्रिका॥ एता देवि मया सर्वा मुद्राः सर्वार्थसिद्धिदा॥ यानि विरचितानि सूक्ष्मसानि ध्यत्रे
पुरं नयेत्॥ परिवर्त्य करौ स्पष्टावंगुष्ठौ कारयेत्समौ॥ अनामांतर्गते कृत्वा तर्जन्यौ कुटिला
कृतौ॥ कनिष्ठके नियुंजीत निजस्थाने महेश्वरि॥ त्रिखंडेयं समाख्याता त्रिपुराध्यानकर्म
णि॥ मध्यमामध्यमे कृत्वा कनिष्ठांगुष्ठरोधिते॥ तर्जन्यौ दंडवत्कृत्वा मध्यमोपर्यनामिके॥

एषा च प्रथमा मुद्रा सर्वसंक्षोभकारिणी॥ एतस्या एव मुद्राया मध्यमे सरले यदा॥ त्रिपु
रे परमेशानि सर्वविद्राविणी तदा॥ मध्यमा तर्जनीभ्यां च कनिष्ठानामिके समे॥ अंकुशा
काररूपाभ्यां मध्यमे परमेश्वरि॥ अंगुष्ठं तु कनिष्ठानामिकोपरि॥ इयमाकर्षणी मुद्रा त्रै
लोक्याकर्षणी मता॥ पुटाकारौ करौ कृत्वा तर्जन्यां तं कुशाकृती॥ परिवर्त्तक्रमेणैव मध्य
मे तदधोगते॥ क्रमेण देवी तेनैव कनिष्ठानामिकाद्वयं॥ संयोज्य निखिलाः सर्वाः अंगु
ष्ठावग्रदेशतः॥ मुद्रेयं परमेशानि सर्ववशंकरी मता॥ संमुखौ तु करौ कृत्वा मध्यमामध्य
गेंऽगुष्ठे॥ अनामिके तु सरले तद्बहिस्तर्जनीद्वयं॥ दंडाकारौ ततोंऽगुष्ठौ मध्यमानखदेशगौ॥
मुद्रैषोन्मादिनी नाम्ना क्लेदिनी सर्वयोषितां॥ अस्यास्त्वनामिकायुग्ममधः कृत्वांकुशाकृती॥
तर्जन्यावपि तेनैव क्रमेण विनियोजयेत्॥ इयं कामांकुशा मुद्रा सर्वकामार्थसाधिनी॥ सव्यं
दक्षिणदेशे तु सव्यदेशे तु दक्षिणं॥ बाहुं कृत्वा महादेवि हस्तौ संपरिवर्त्य च॥ कनिष्ठाना
मिके देवि युक्ता तेन क्रमेण च॥ तर्जनीभ्यां समाक्रांते सर्वत्रमपि मध्यमे॥ अंगुष्ठौ च महे

शानि सरलावनामपि कारयेत्॥ इयं सा खेचरी नाम्ना पार्थिवस्थानयोजिता॥ परिवर्त्य करौ स्पृ
ष्टावर्द्धचंद्राकृती प्रिये॥ तर्जन्यंगुष्ठयुगलं युगपत्कारयेत्ततः॥ अधः कनिष्ठावष्टब्धे मध्य
मे विनियोजयेत्॥ तथैव कुटिले योज्य सर्वाधस्तादनामिके॥ बीजमुद्रेयमचिरात्सर्वसि
द्धिप्रवर्द्धनी॥ मध्यमे कुटिले कृत्वा तर्जन्युपरिसंस्थिते॥ अनामिकामध्यगते तथैव हि क
निष्ठके॥ सर्वा एकत्र संयोज्य अंगुष्ठपरिपीडिताः॥ एषा तु प्रथमा मुद्रा योनिमुद्रेति सं
ज्ञिता॥ एता मुद्रा महेशानि त्रिपुराया मयोदिता॥ पूजाकाले प्रयोक्तव्या यथानुक्रमयोगतः
वामहस्तेन मुष्टिं तु बध्वा कर्णप्रदेशके॥ तर्जनीं सरलीकृत्य भ्रामयेन्मंत्रवित्तमः॥ सौभा
ग्यदंडिनी मुद्रा न्यासकाले प्रसूचिता॥ अंतरंगुष्ठमुष्ट्यास्तु निरुद्धा तर्जनीमिमां॥ रिपुजिह्वा
ग्रहा मुद्रा न्यासकाले च सूचिता॥ अधोमुखावूर्ध्वौ हस्तौ स्वस्वोपरि च संस्थितौ॥ पार्श्वद्वय
गतांगुष्ठौ मत्स्यमुद्रेयमीरिता॥ बध्वा तु योनिमुद्रां वै मध्यमे कुटिले कुरु॥ अंगुष्ठेन तद
ग्रे तु मुद्रेयं धृतिनी मता॥ वाममुष्टिं विधायाथ तर्जनीं मध्यमे ततः॥ प्रसार्य तर्जनीं मुद्रानि

दिग्दलवल्लपालिना॥ ॥इति मुद्राप्रकारः॥ ॥अथ भुवनेश्वरीयंत्रं॥ ॥आलिख्याष्ट
दिग्गजाश्रं द्वंद्वगतं पाशादिकं अद्वंद्वं कोणेषु गंगयनं पुरेषु विलिखेत् अष्टार्णमंत्रद्वयं॥
अथ पूर्वापरयोः स्कुरचुक्लयवराम्भोमासनानगर्जिघा लिखेन्द्रज लाधिपारादिगुणशः
पंक्तिद्वयान्तरं॥ कोणेषु द्वयुग्मार्णमालासहितां युग्मस्वरांतर्गतां मायां केशवगांरक्षेषु
विलिखेद् मूलं त्रिपंक्तिक्रमात्॥ त्रिःपाशांकुशावेष्टितं चलिपिनिरंजनेस्थाहां तो ह्यान्तः
सद्विरपरः कीर्तितो मनुः॥ ह्रीं गौरीरुद्रदयिते योगेश्वरीसर्वमर्फट्॥ द्विठांतः सोऽष्टार्णेयं
मंत्रः सद्भिरुदिदितः॥ तारेंद्रं विलिखेत् सरोजकुहरे साध्याभिधानान्वितं मंत्रार्णन्द्रवसु
संख्याकान्वसुदले घालिख्य तद्वाह्यतः॥ शत्याग्निः परिवेष्टितं घटगतं पद्मस्थमञ्जासनं॥
यंत्रं वरपकरं ग्रहादिजयहृल्लक्ष्मीप्रदं कीर्तितं॥ ॥इयं त्वरिता धारणयंत्रं॥ ॥अथ
दुर्गायंत्रं॥ ॥पद्मं चाष्टदलान्वितं प्रविलिखेत् तत्कर्णिकायां पुनस्तारं शक्तिगबीजमीग
साध्यसहितं तत्केसरेषु क्रमात्॥ मदिस्वामनुसंभवान्द्युगलशो वर्णान्गुणाशो विधाय

विलिखेद्दलेत दंत्ये दलेसंत्र स्कउक्ति हपुरुषाक्षिंस्य पिधिज यंमे समुपस्थितं॥ मदिरा त्स
मदा कुंबात मोभगवति विराम यस्वाहा॥ मातृकावर्णसंवीतं भूपुरद्वयमध्यगं॥ यंत्रं विघ्न
निवासिन्याः प्रोक्तं सर्वसमृद्धिदं॥ रक्षाकरं विरोधेशा हृद्भूतादिनाशनं॥ शत्रूणं स्तंभकरा
ज्ञानां वश्यानां वश्यमिच्छतां॥ स्तनाधिनां च सुतदं रोगिणां रोगशांतिदं॥ बहुनात्र किमिहोक्तेन
यंत्रं तत्कामदोमणिः॥ ॥अथ लक्ष्मीयंत्रं॥ ॥वेदादितः साध्यनामयुग शश्रीशक्तिमा
मान्वितं बिंदुलक्षेषु दिनेशपत्रविलसन्मंत्राक्षरं तद्बहिः॥ पद्मं व्यंजनकेसरं स्वरलसद्
पत्राष्टयुग्मं परबिंबमायवइं तया त्वरितथा यंत्रं लिखेद्देहितं॥ सर्वभूपुरद्वयकोणेषु
हृल्लीलेख्यो पुनःपुनः॥ महालक्ष्मीयंत्रमिदं सर्वैश्वर्यफलप्रदं॥ सर्वदुःखप्रशमनं सर्वपा
पनिवारणं॥ बहुनात्र किमिहोक्तेन परमस्मान्नविद्यते॥ ॥अथ भैरवीयंत्रं॥ ॥मध्या
धेनवयोनियुग्मविलिखेत् बीजानि वर्णाक्लिशोगायत्र्या पुनरष्टपत्रविवरे चालिख्य वृत्तं
भुवि॥ भुवि यद्धितयेन मत्स्ययुक्ताकोणेषु संवेष्टितं यंत्रं त्रैपुरभैरवीदितं त्रिभुवनसंक्षोभनं

श्रीप्रदं॥ गायत्री तु भवत्यत्र त्रिपुरादेवी विद्महे परमेश्वरेत्य॥ उक्त्वा कामेश्वरीपदं प्रवदेदथ धीमहि
तदंते प्रवदेद्दू यस्तन्नः क्लिन्ने प्रचोदयात्॥ गायत्र्येषा समाख्याता त्रैपुरी सर्वसिद्धिदा॥ ॥अथ
गणेशयंत्रं॥ ॥बीजं मध्ये गणमध्ये स्फुरदनलपुरे तारगं दिक्षु लक्ष्मीमायाकंदर्पबीजानि
स्वदनुरसपुटेष्वालिखेद्बीजमध्ये॥ तत्संधिषडंगमंत्रान्वसुदलकमले मूलमंत्रस्य वर्णान्
द्वौ द्वौ च पत्रेषु विद्वान्विलिखतु भुवनेशाद्यं समंत्रे पलाशे॥ आवीतं लिपिभिः क्रमात् क्रम
वशात् पाशांकुशाभ्यामपि लसितमिदं हृद्गतं येन येहितमितमिदं यंत्रं गणाधीशितुः॥ लोकं
कुमारी च नाम्ना गमदैर्मृगोदरे हेम्निवासं लिखित्वा निहरन्त्य हितसकलैः संपद्विनायकित्रि
यं॥ उक्तं महागणपतेर्विधानं सूरपूजितं॥ सर्वसिद्धिकरं पुंसां सम्यक् पुरुषार्थदं॥ ॥
अथ रामयंत्रं॥ ॥तारं मध्ये विलिख तु मनुं षट्सु कोणेषु संधिषडंगं मायां स्मरमपि लि
खित्कोणगं ऽष्टपत्र्यां॥ किंजल्केषु स्वरगणमथो पत्रमध्येषु माला मंत्रार्णान् ऽरगहमुख
नितान् षष्टे पंचवर्णान्॥ दशशिरेण संवेष्ट्य कादिवर्णैश्च भूतो दिग्विदिक्षु लिखेद्बीजमरसं

हृवराहयोः॥ नमो भगवते ख्यातं चतुर्थ्यं रघुनंदनं॥ रक्षोघ्नविशदाद्यंते मधुरादिसमीर
येत्॥ प्रसन्नवदनायेति पश्चादमिततेजसे॥ बलाय पश्चाद्रामाय विन्यसेत्तदनंतरं॥ प्रणवा
दिनमोंतोयं मालामनुरुदीरितः॥ ॥अथ नरसिंहयंत्रं॥ ॥बीजं साध्यसमन्वितं प्र
विलिखेन्मध्ये दलपत्रे षष्ठो मंत्रार्णान्विकृतिशो विन्यस्य विलिखेच्छिष्टा बहिः वेष्टयेत्॥ वा
युकोणगबीजं बद्ध्वस्तु भागे हृदयेनावृतं यंत्रं शुद्धं विषमहामयविषध्वंसनं श्रीपदं॥ ॥
अथ गोपालयंत्रं॥ ॥पिंडं मूलेन वीतं कृतपुरयुगे कोणषट्के षडर्णैः कुर्यात्संदशार्णस्तु
स्फुरितदशदलं कामबीजेन वीतं॥ पत्रे किंजल्कसंस्थास्वरविहतिरथ श्रीं ध्यायेत् समोऽष्टार्णं
किंजल्कं यंत्रमाद्यं विहितियुग्दलेषु पिनाकवर्णं॥ पाशांकुशाभ्यामावीतं द्वौ एकपुरयुग
त्रिषु॥ अष्टारे लसितं यंत्रं गोविंददैवतं॥ धर्मार्थकामफलदं सर्वरक्षाकरं स्मृतं॥ पं
चांतको धरासंस्थो मनुबिंदुविभूषितः॥ पिंडबीजमिदं प्रोक्तं सर्वसिद्धिकरं परं॥ स्मरः
गोपीजनांते प्रभवदेव्य वल्लभाय स्वाहा॥ अष्टादशा
र्णोऽयं ठद्वंद्वबद्धो मनुरुदीरितः॥

हरोमंत्रोसर्वदःसुफलप्रदः॥प्रणवंहृदयंक्लीं...तंयुक्तंततःपरं॥ताद्दशंदेवकीपुत्रं
ङंफट्स्वाहासमन्वितं॥षोडशाक्षरमंत्रेणगोविंदस्यसमीरितं॥विंशतिपतेबीजंन
मोभगवतेततः॥नंदपुत्रायबालादिवपुषेश्यामलायच॥गोपीजनपदस्यांतेवल्लभाय
द्विठावधिः॥अनुष्टुप्मंत्रआख्यातोगोपालस्यजगत्पते॥अनंगरूपगोविंदोऽनंता
वहारहरोमनुः॥इतिप्राकृतस्यदक्षिणेदक्षविधिवदभिलिखेत्स्यपरेखाचतुष्कोणे
यस्त्रलयुक्तंवलययुगयुतंमध्यपूर्वंतदंतं॥श्लोकस्यार्णान्परस्मात्वस्तुपदविरलेषुप
वर्णैलिखित्वातद्बहिर्द्वादशार्णैस्तदनुपरिवृतंदेवकीपुत्रयंत्रं॥तंस्वकीदेवदेवेतंतंवे
देवरूतोरुतं॥वेदेतंरूतोरूढतोख्यातंतंख्यातोदेवकीसुतंलिखितं॥भूर्जपत्रादौयंत्र
मेतद्यथाविधि॥विधृतंबाहुनानित्यंसर्वकामफलप्रदं॥पलाशचक्रफलकेलिखितंधातु
साधितं॥गोस्थानेलिखनेदेतत्कुर्वाद्वृद्धिर्नवेत्तदा॥ ॥इतिदेवकीपुत्रयंत्रं॥ ॥अ
पराजितयंत्रं॥ ॥तत्रादौवसुकोणमंडलंलिखित्वातदंतः॥साध्यनामयुक्तंप्रासादबी

जंविलिख्यवसुकोणेषुप्रणवसहितपंचाक्षरवर्णान्कोणविवरेषुषडंगान्वर्णान्तद्बहि
पंचदलानिविरचय्यतद्दलेषुईशानायनमः॥तत्पुरुषायनमः॥अघोरायनमः॥वाम
देवायनमः॥इतिपंचमंत्रान्प्रागादिक्रमेणलिखेत्॥तद्बहिरष्टदलानिरचयित्वातद्दलेषु
मातृकाष्टवर्गान्विलिखेत्॥तद्बहिर्वृत्तंत्र्यंबकेनवेष्टयेत्॥एतद्यंत्रंजपहोमादिनासंपूज्य
धारयेत्॥आयुरारोग्यंऐश्वर्यादिसिद्धिर्भवति॥ ॥अपराजितादौधारणं॥ ॥तद
नंतरं॥स्वर्णपट्टेनभूर्जेवारूप्येवायस्तुधत्ते॥विलिखेद्धेमलेखिन्यागंधाष्टकसमन्वितं॥ह
वकिंडेनवालिख्यकुर्यान्मूलेनवापुनः॥एकवीराकल्पे॥वेष्टितंपीतवस्त्रेणतंतुनापरिवे
ष्टयेत्॥बध्नीयात्पीतवस्त्रेणशिरस्यंगेकंठभूषणं॥स्त्रीणांवामभुजेचैवनराणांदक्षिणेभु
जे॥वंध्यापिलभतेपुत्रंनिर्धनोधनवान्भवेत्॥इयंरक्षापुराब्रह्मणानार्पितागोतमाय॥दि
त्रि॥कीर्तिपापविविध्वान्ते:संग्रामेभयकांतिनि॥अस्यार्थः॥योनित्यमनेवसुकोणेनमध्ये
हिमरालाकयाभूर्जपत्रादौकुंकुमगोरोचनचंदनजटामांसीमसिंविधायपंक्तिक्रमेण

मूलमंत्रं लिखित्वा तस्य हृल्लेखारेफमध्ये अमुकस्य रक्षां कुरु कुरु अमुकीनाम्नत्रं पुत्रमुत्पाद
य इति वा॥ अमुकस्य ज्ञानसिद्धिं कुरु कुरु इत्यादि वा साध्यसहितं विलिख्य बहिः कोणे ऐं क्लीं बहिर्वा
न्दद्दीर्घवर्णान्॥ स्वराणां मध्यमं यत्तु तच्च तुर्थं नपुंसकं॥ दीर्घवर्णान्॥ आ ई ऊ ऐं औं आः इत्येवै
कं लिखेत्॥ अष्टपत्रेष्ट वर्णान् यथा ऐं क्लीं ॐ ऐं क्लीं ॐ ऐं वं ह्रीं फट् स्वाहेति॥ तदुक्तं॥ वाग्भ
वं कुदेवीश्च तारकं वाग्भवं तथा॥ हृल्लेखा चास्त्रमंत्रांते वह्निजाया वधिर्मनुः॥ अयमष्टाक्ष
रः प्रोक्तो मंत्राणां सार ईरितं॥ ॥अथ यंत्रलिखनद्रव्यं॥ ॥काश्मीररोचनालाक्षा
गोजमंदचंदनैः॥ विलिखेल्लेखिनीं मंत्री यंत्रं ज्ञानमधारयेत्॥ सौवर्णे राजते पात्रे भूर्जे वा
सम्यगालिखेत्॥ अथवा ताम्रपट्टे वा गुरुकं रूपधारयेत्॥ श्रावणी वं तु सौवर्णे रूप्ये विंश
तिवार्षिकं॥ भूर्जे द्वादशवर्षाणि तदर्द्धं ताम्रपात्रके॥ ॥अथ प्रयोगानंतरं शांत्युदकस्था
नं॥ ॥तद्यथा॥ सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहेश्वराः॥ वासुदेवो जगन्नाथस्तथा सं
कर्षणो विभुः॥ प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते॥ आखंडलोग्निर्भगवान्यमो वै

नैरृतस्तथा॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः॥ ब्रह्मणा सहिताह्येते दिक्पालाः पां
तु वः सदा॥ कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः॥ बुद्धिर्लज्जा वपुः शांतिर्माया निद्रा
च भावना॥ एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः॥ आदित्यश्चंद्रमा भौमो बुधजीवसि
तार्कजाः॥ एते त्वामभिषिंचंतु राहुः केतुश्च पूजिताः॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः
ऋषयो मुनयो गावो देवमातर एव च॥ देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः॥ अस्त्रा
णि सर्वशस्त्राणि राजानो वाहनानि च॥ औषधानि च सर्वाणि कालस्यावयवाश्च ये॥ सरि
तः सागराः शैलाः तीर्थानि जलदा नदाः॥ एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये॥ ॥
इति वशिष्ठसंहितोक्तानि वैदिकमंत्राः॥ ॥अथ संक्षेपतः सर्वासां देवतानां नित्यपूजावि
धिर्लिख्यते॥ ॥तदुक्तं यामले॥ आदौ ऋष्यादिविन्यासः करन्यासस्ततः परं॥ अंगुली
व्यापकन्यास एतच्च तालत्रयं च दिग्बंधः प्राणायामस्ततः परं॥ ध्यानं पूजां ततः पश्चाति सर्व
तंत्रेषु यंत्रकमः॥ पूजा तु मूलदेवताया एव॥ मातृकान्यासोप्यवश्यकः॥ तथा च॥ तपार्थं सर्वे

मंत्राणां विन्यासं च लिपिवर्त्मना ॥ कृतं तन्निष्फलं विंद्यात्तस्मादादौ लिपिं न्यसेत् ॥ श्रीविद्या
यां तु तंत्रः ॥ तदुक्तं स्वतंत्रे ॥ पूजाविशेषान्देवेशि शृणु नित्यक्रमोदितान् ॥ अशक्तानां तु
विस्तारे तथा चापसुरास्वपि ॥ अनन्यथानर्थकारी स्यात्संक्षेपार्चनमीश्वरि ॥ हितिन्निर्मध्य
मायं स्याद्द्वितीयं नवयोनिषु ॥ चतुर्दशारे वाग्भवं तु चतुर्थं शक्तिरूपतः ॥ पंचमं सर्वदुःखानां
विनाशनं वांछितप्रदं ॥ अस्यार्थः ॥ अशक्तानां हितिन्निर्मध्यमायं स्यात् हितिचतुरस्रसहित
देवताचतुष्टयार्चनं कामेश्वरी वज्रेश्वरी भगमालिनी श्रीमहात्रिपुरसुंदरीरूपमेतदा
द्यार्चनमित्यर्थः ॥ षोडशारदलादिभूम्यंतमिति यावत् ॥ पंचमं तु गुरुहादिभूम्यंतमिति याव
त् ॥ इति पंचप्रकारार्चाशक्तिः सर्वसमृद्धिदा ॥ तत्रादौ भूतशुद्धिप्राणायामपुरःसरं ॥ करशु
द्ध्यासनचक्रचतुरस्रांगवशिन्यादिन्यासचतुष्टयं विधाय वामे यार्घ्यद्वयं शोधयित्वास
नं विधायापीठपूजां विधाय बिंदौ हृल्लेखया परचितिं समावाह्य यथाशक्त्युपचारैरभ्य
संक्षेपार्चा चतुरस्रैकतरानभ्यर्च्य पूर्ववत्सर्वं कृत्वा बलिं दत्वा जपस्तोत्रैः संतोषयेदिति ॥

तदुक्तं नवरत्नेश्वरे ॥ मासत्रयं समासाद्य चक्रपूजासनेन चे ॥ वालयार्घ्यं समापाद्य हृल्लेखा
मनुना शिव ॥ चक्रमध्ये समावाह्य संक्षेपादर्चयेदिति ॥ अथवा तदुक्तं रुद्रेश्वरतंत्रे ॥ पूजासं
क्षेपकं चैव कथयामि सुरेश्वरि ॥ यत्पूजारोधमात्रेण जीवन्मुक्तः प्रजायते ॥ प्रथमाद्ये त्रिपु
राद्वितीये त्रिपुरेश्वरी ॥ तृतीये चक्रराजे तु त्रिपुरादिसमन्विता ॥ देवि पूजाक्रमेणैव सुंद
रीनासिनीति च ॥ पंचमे त्रिपुराश्रीश्च षष्ठे त्रिपुरमालिनी ॥ सप्तमे त्रिपुरासिद्धा चाष्टमे त्रिपु
गंबिका ॥ नवमे शक्तिमहेशानि महात्रिपुरसुंदरी ॥ यद्वा वाराहीतंत्रे ॥ षडंगं विन्यसेद्देवी
मावाह्य बिंदुचक्रेऽनिमां द्वितीयचक्रे कामकलां तृतीये बालां चतुर्थे सुंदरीं पंचमेऽन्ना
कर्वलीवहे ॥ वामेश्वरीं वसुदले मेरुं तं षोडशारे कुलेश्वरीं संपूज्य देव्यै पुष्पांजलिं दत्वा
मंत्रं जपेत् ॥ ॥ इति संक्षेपार्चा ॥ ॥ अथ नैमित्तिकविधिः ॥ ॥ तत्र गोतमीये ॥
नारद उवाच ॥ कर्मांतरमथो वक्ष्ये शृणुष्वावहितो मुने ॥ यत्कृत्वा मंदभाग्योपि लभते मंत्र
फलानि वै ॥ प्रणवद्वयमध्यस्थं जपेद्युनसंरभ्य ॥ त्रिरात्रं जपमात्रेण बृहस्पतिसमो न

येत्॥ आरभ्य तां सर्वशास्त्राणां वेदानामपि ज्ञायते॥ रविवारेऽश्वत्थवृक्षमणि माहीत रं शतं
त्रयो नयेच्छांतिर्जीवेद्दलीनरशनां तस्य शांतिर्जवेन्नूनं यदनिष्टकृता क्रिया॥ अंभ्रकेरचे
येत्स्वर्णं मासत्रयं तु निर्मलैः॥ मुच्यते मलिनैः कृष्णैः पापैर्घोरतरैरपि॥ पद्मवल्लीयर्जो इ
त्यासंपत्तिमतुलां नयेत्॥ विष्णुनैः पूजयन्कृष्णं राज्ञोऽभवति निश्चितं॥ कृत्रिमः सावनी
मः स्यात्साधयेत्सकलां महीं॥ गारुत्मतमयैरत्नैः पूजयन्भगवान्नयेत्॥ अयि हारम
रत्नेन पूजयन्किं न साधयेत्॥ सुवर्णपुष्पैरभ्यर्च्य मासं नक्षिपरायणः॥ कुबेर इव
संपत्तिं प्राप्य ते मोदते चिरं॥ देहांते हरितां प्राप्य निर्वाणपदमृच्छति॥ रविवारे सरसिजैः
कह्लारैः सोमवारके॥ मंगले रक्तपुष्पैश्च बुधे नगरसंभवैः॥ चंपकैर्गुरुवारे च शुक्रे
कुंदसमुद्भवैः॥ शनिवारे शमीपुष्पैः पूजयेद्भक्तितो यति॥ रविवारे घृतान्नं तु पयोज
न्नं निवेदयेत्॥ सोमवारे पिण्याकादि सितया सह योजयेत्॥ मंगले गुडसंमिश्रमन्नं च
कृशरान्वितं॥ बुधवारे पायसैस्तु गुरौ सूपसमुद्भवैः॥ क्षीरान्नं शुक्रवारे तु शनौ सघ

तपायसं॥ वैशाखे मासि विधिवत्तपयिद्भिमवक्कलैः॥ ज्येष्ठे मासि प्रयत्नेन फलैः संपूजये
द्धरिं॥ आषाढे मासि विधिवत्पवित्रैः पूजयेद्धरिं॥ एकैकं स्वर्णसूत्राणि ग्रंथियुक्तानि कार
येत्॥ अथवा पट्टसूत्राणि पद्मसूत्राणि वा पुनः॥ पूजांते देवाय महिषीभ्यो निवेदयेत्॥
मिथुनेभ्यस्ततो दत्वा महांतमुत्सवं चरेत्॥ तोषयेद्दक्षिणाद्येन ब्राह्मणान्संशितव्रतान्॥
एवं संवत्सरं मंत्री कृत्वाभीष्टमवाप्नुयात्॥ न चेद्वर्षकृता पूजा वार्षिकी चेत्सा यकल्पते॥ इदं तु
सर्वविषयं॥ श्रावणे मासि कृष्णं तं पूजयेत्केतकोद्भवैः॥ चंद्रचंदनकस्तूरीकुंकुमादिसु
वासितैः॥ एलालवंगकंकोलफलानि विनिधापयेत्॥ भाद्रे मासि यजेद्दृष्णां तत्रैवान्नैर्मणिः सु
विस्तरैः॥ कर्पासनिर्मितैर्वस्त्रैर्नानावर्णसंयुतैः॥ तुलास्थे भास्करे कृष्णं पूजयेन्मासमा
त्रकं॥ रात्रौ प्रदीपैर्हेमैश्च दुग्धपिष्टादिसंयुतैः॥ घृतदीपमविच्छिन्नं दद्यान्मासं महोत्सवं
एकादश्यां पारणादिनेषु कार्यां विष्णुमभ्यर्च्य वस्त्रालंकरणादिभिः॥ अस्यां तिथौ तु मति
मान्सर्वतोत्सवमाचरेत्॥ गोभूमिवित्तक्षेत्राणि ब्राह्मणेभ्यो निवेदयेत्॥ एवं कृते देव

तास्त्कुलान्वेतं प्रयच्छति॥स तं लोकमवाप्नोति पुनरावर्त्तिवर्जितं॥मार्गशीर्षे यजेद्देवं नव
नीतैर्जुतैः शुभे॥नारिकेरफलैः क्षीरदधिमिश्रितं गुडजीरकैः॥सूपकं देवदेवाय नत्वा
तस्मै निवेदयेत्॥पौषे मासि च मांसं वै घृतैः धूपैः प्रपूजयेत्॥ग्रहदोषं विनिस्तार्य
पतिस्सन्निभः॥माघे मासि यजेत्कृष्णं अर्हतैः कुसुमैः सितैः॥दुग्धान्नं शर्करायुक्तं पिष्ट
न्नं च निवेदयेत्॥अस्मिन्मासे शुभदिने वस्त्रोणाछादयेद्द्विजं॥फाल्गुने देवकीपुत्रं पूजये
त्स्वर्णचंपकैः॥छत्रं सौगंधिकुसुमैः धूपैर्दीपैः सुविस्तरैः॥चैत्रे मासि वासुदेवं सर्वपुष्पैः
समर्चयेत्॥पौर्णमास्यां यजेत्कृष्णं दमनैश्च सगुच्छकैः॥अस्मिन्दिने रतिकामं पूजयेद्भ
क्तितत्परः॥न चेत्सांवत्सरी पूजा निष्फला तस्य जायते॥तस्मीन्तं त्स्मरं दृष्ट्वा कदिता सा रति
सती॥तां दृष्ट्वा करुणया विष्णोः वरं दातुं शिवः स्वयं॥प्रत्युवाच रतिं तियं स्मरोनंगत्वमवाप्नुया
त्॥सुंदरः सर्वलोकेषु कौगर्थं जन सुंदरी॥ततो नयत्कंदनजलात्पुष्पं दमनकं शुभं॥
तेन पूजनमात्रेण सांवत्सरफलं लभेत्॥हीमयेयकृमात्रं यः पिष्टकैर्घृतवर्जितैः॥ताव

९९८

संख्यं नवं तु जन्मकृत्सं पश्यति मंत्रवित्॥इति ते कथितं सम्यक्पूजनं वार्षिकोद्भवं॥कृत्वा तेन
विधानेन किं न सिध्यति भूतले॥ ॥अथ सुंदर्याः॥ ॥श्रीनारायण उवाच॥अथ वक्ष्ये महेशा
नि श्रीविद्यापूजनं महत्॥ब्रह्महत्यादिदोषाणां प्रायश्चित्तमनुत्तमं॥ब्रह्मपत्रैर्महेशानि
पूजयेद्यः क्रमानुत्तमं॥समस्तारश्मिमहतीं नित्याम्नायपुरस्कृतां॥कृत्वाचारक्रमाद्देवीं कपर्
दक्षोदमंडितं॥मासमात्रेण देवेशि महापातककोटयः॥जन्मांतरकृता सर्वा नाशयेन्ना
त्र संशयः॥लक्ष्मीस्तस्य गृहे वत्सा सुस्थिरा सुरवंदिते॥जयापुष्पैर्महेशानि पूर्ववत्पूजये
च्छिवां॥मासमात्रक्रमेणैव तेनैव परमेश्वरि॥ब्रह्महत्यादिपापानि नाशयेन्नात्र संशयः
नाशयेन्नात्र संदेहो धनवान्जायते ध्रुवः॥केतक्याः स्वरूपैः पत्रैः पूजयेत्पूर्ववत्प्रिये॥
उपपातकसंघांश्च मासमात्रेण नाशयेत्॥सौभाग्यमतुलं तस्य जायते नात्र संशयः॥रा
तपत्रैर्मनोरम्यैः पूजयेन्मासमात्रकं॥पूर्ववत्परमेशानि सर्वपापं विनाशयेत्॥चंपकैः
सुमनोरम्यैः पूर्ववत्पूजयेच्छिवां॥मासमात्रेण छं त्वेव पातकं शतजन्मजं॥सौभाग्या

९९९

यजनेन मंत्री त्रिपुरायाः प्रसादतः॥ श्वेतपद्मैर्महादेवि चिह्नद्भिः पूजयेच्छिवां॥ नाशयेत्परम
शानि मासमात्रप्रसन्नधीः॥ समृद्धिमान्भवेत्सोपि सर्वपापहरः सदा॥ मल्लीकामालतीजा
तीकुंदेश्वरातपत्रकैः॥ श्वेतोत्पलसमुच्छैस्तु पूजयेन्मासमात्रकं॥ कुलाचारक्रमेणैव पात
कंराजतन्मजं॥ ब्रह्महत्यादिनियतं नाशयेन्मात्रसंशयः॥ मुक्तिस्तस्य करे देवि वाचाली
समो भवेत्॥ अगस्त्यबाणसंभूतं जपाकरं कोमलैः प्रिये॥ पूर्वक्रमेण संपूज्य मासमेकं प्र
सन्नधीः॥ पातकं नाशयेन्मंत्री साहाय्यामसमो भवेत्॥ चंपकैः पाटलैर्देवी बकुलैर्नाग
केसरैः॥ कल्हारैः सिंधुरारैश्च पूजयेत्पूर्ववत्क्रमात्॥ सो नाप्यमतुलं तस्य मासमात्रेण जा
यते॥ पापं विनाशयेद्देवी साहाय्यामसमो भवेत्॥ चंपकैः पाटलैर्नागकेसरैः कुसुमैः
नैः॥ कल्हारैः सिंधुरारैश्च पूर्ववत्पूजयेत्क्रमात्॥ सो नाप्यमतुलं तस्य मासमात्रेण जायते
पापं विनाशयेद्देवि यदि जन्मसहस्रकं॥ रविवारे रुणांभोजैः कुमुदैः सोमवारके॥ नीले
रक्तोत्पलैः सौम्यवारे तगरसन्निभैः॥ गुरुवारे तु कल्हारैः शुक्रवारे सितांबुजैः॥ उत्पलैः

रात्रिवादेतु पूजयेदस्मादरात्॥ निवेदयेत्क्रमोक्तेषु रविवारादिसप्तसु॥ पायसं दुग्धशर
लीनवनीतं शिवाघृतं॥ एवमहं समाराध्य देवीं गंधादिभिः क्रमात्॥ महापापं विजित्याशु
समुखानि समश्नुते॥ ॥ अथ ताराकल्पः॥ ॥ मत्स्यसूक्ते॥ अष्टम्यां च चतुर्दश्यां पूज
येच्च प्रयत्नतः॥ यद्यत्प्रार्थयते मंत्री तत्तदाप्नोति निश्चयः॥ लभते मंत्रुलां वाणीं कृत्वा ह
म्यां सदा यजेत्॥ अत्र नित्यार्चनानंतरं नैमित्तिकं कार्यं॥ यत्र कालनियमो न दृश्यते तत्र मा
संध्यामंडलं व्यापिनी नैमित्तिकानुष्ठाने मननीयमिति॥ अष्टम्यां पूजनं देव्याः सर्वकामफलप्र
दं॥ रंभापुष्पं बीजपूरं स्वगंधिपरिमिश्रितं॥ मिश्रितं तस्य बलिं दद्यादष्टम्यां च विशेषतः॥
फलं क्षीरं तथा दद्याद्दधिकं शर्करान्वितं॥ तस्मात्सर्वप्रयत्नेन संपत्से पूजयेच्छिवां॥ दानं
वा रूप्यसिद्ध्यर्थं दद्याद्देव्यै प्रयत्नतः॥ तथा नीलतंत्रे॥ अष्टम्यां च चतुर्दश्यां पूजयेच्च यथा
विधि॥ आशापुष्पमवाप्नोति जपापुष्पं तु उत्तमं॥ चंदनं नार्क कुसुमं दद्याच्छेतापराजितां
यस्त्वसंपूजयेद्दुर्गां महाष्टम्यां विशेषतः॥ जन्मांतरार्जितं पापं तत्क्षणादेव नाशयेत्॥ दु

गंतादिणीमिति प्रकरणमनुकुर्यात्॥ ॥अथ प्रयोगविधिर्लिख्यते॥ ॥सर्वत्र प्रयोगे अयुतजपः॥ तथा च शारदायां॥ अयुतं होमसंख्या सा जपस्तावान् प्रकीर्तितः॥ तत्रादौ भुवनेश्वरीप्रयोगः॥ तद्यथा॥ मंत्री त्रिमधुरोपेतैः कृत्वा स्वेतसमिद्वरैः॥ ब्राह्मणान् वशाययेच्छीघ्रं पार्थिवान् पद्महोमतः॥ पलाशपुष्पैः स्वल्पज्ञो मंत्रिणः कुमुदैरपि॥ पंचविंशतिसंजप्तैः जलैः स्नानं दिने दिने॥ स्नात्वा न मंत्रितं चैव युः सर्वलोकान्वशं नयेत्॥ पंचविंशतिसंजप्तं जलं प्रातः पिबेन्नरः॥ अवाप्य महतीं प्रज्ञां कवीनामग्रणीर्भवेत्॥ तथा कृत्वा पलाशस्य कुसुमैर्वा कुश्रियं लभते ध्रुवं॥ आलीढं तं पिबेद्यस्तु मूलमंत्राभिमंत्रितं॥ कवित्वं लभते मंत्री वत्सरान्नात्र संशयः॥ सिद्धार्थालवणोपेतान् कृत्वा नारी वशं नयेत्॥ नरनारीन्नरपतीन् नात्र कार्या विचारणा॥ ॥अथ त्वरिता॥ ॥यथा॥ योनिकुंडं प्रकल्प्याथ कुर्याद्धोमं यथेच्छया॥ मल्लिकाकुसुमैः कृत्वा वशायेदखिलं जनं॥ कृत्वा शीहादिशमनं पलाशकुसुमैः कृतं॥ दूरुरंडैः भुजैः कृत्वा महतीमृद्धिमाप्नुयात्॥ दीर्घमायुरवाप्नोति

कृत्वा होमेन साधकः॥ धान्यैः प्रक्षालितैः कृत्वा श्रियमिष्टामवाप्नुयात्॥ अशोकैः पुत्रमाप्नोति मधूकैरिष्टमाप्नुयात्॥ फलैर्गंधुकवैः कृत्वा लभते धनमीप्सितं॥ पुष्पैर्बकुलसंभूतैः कीर्तिस्यादनपायिनी॥ दीर्घमायुर्भवेदाम्रैश्चंपकैः कांचनं लभेत्॥ कुर्वीत सर्षपैर्होमं शत्रुनाशकरं सुधीः॥ पत्रैर्बकुलजैः कृत्वा शीघ्रं चोत्सारयेदरीन्॥ शाल्मलीपत्रहोमेन सपत्नीं नाशयेद्ध्रुवं॥ माषहोमेन मूकः स्यादुन्मत्तोऽत्तैर्न वदेदपि॥ ॥अथ दुर्गा॥ ॥यथा॥ वशायेन्निंबहोमेन नरान्नरपतीनपि॥ सिद्धार्थैर्जुहुयान्मंत्री रोगान्मुच्येत तत्क्षणात्॥ पद्मैः कृत्वा जयेच्छत्रून् दूर्वाभिः शांतिमाप्नुयात्॥ पलाशकुसुमैः पुष्टिः धान्यैर्धान्यश्रियं व्रजेत्॥ काकपक्षैः कृतो होमोद्विषं वितनुते नृणां॥ मरीचहोमान्मरणं रिपुराप्नोति सर्वथा॥ ॥अथ सरस्वती॥ ॥यथा॥ पीत्वा तन्मंत्रितं तोयं सहस्रं प्रत्यहं जपेत्॥ महाकविर्भवेन्मंत्री वत्सरेण न संशयः॥ कंठमात्रोदके स्थित्वा ध्यायेन्मार्तंडमंडले॥ स्थितां देवीं प्रतिदिनं त्रिसहस्रं जपेन्मनुं॥ लभते मंडलाखिलविद्यानां प्रतिमामपि॥ पलाशबिल्वकुसुमैर्जुहुयान्मधुराप्लुतैः॥ समिद्भिर्वा

तदुत्तान्निर्यशः प्राप्नोति वाञ्छते ॥ पलाशकुसुमैः कृत्वा परां वाक्सिद्धिमाप्नुयात् ॥ कदंब
कुसुमैस्तद्वत् फलैः श्रीयत्तसंभवैः ॥ अचिरात् श्रियमाप्नोति याचां कुंदसमुद्भवैः ॥ नंद्याव
र्तप्रसूनैर्वा कृत्वा वाग्वश्यमीनवेत् ॥ ॥ अथ लक्ष्मी ॥ ॥ यथा ॥ बद्धः पद्मासनो सलिले
स्थित्वा मंत्रं निमं जपेत् ॥ त्रिलक्षं संयतो मंत्री देवीं ध्यात्वार्कमंडले ॥ सत्त्ववेदस्यकालेन रमा
या वसतिः स्थिरा ॥ आराध्योत्तरदनद्रुत्रेर्देवीं रक्तचंदनादिभिः ॥ नंद्यावर्त्तभवैः पुष्पैः स
हस्रं जुहुयात्ततः ॥ बोलमास्यां फलैर्बिल्वैः जुहुयान्मधुराप्लुतैः ॥ पंचम्यां वंशदांमोजैः
कृकवारैः सुगंधिभिः ॥ अन्यैर्वा विविधैः पुष्पैः प्रतिमासं विशालधीः ॥ सत्त्ववेदहमात्रेण
सर्वदा संपदां निधिः ॥ राजिनिर्जुह्वतो नित्यं अष्टोत्तरसहस्रकं ॥ अचिरादेव महती लक्ष्मीः सं
जायते ध्रुवं ॥ तथा पुष्पाणि जुहुयादष्टोत्तरसहस्रकं ॥ गृहीत्वा प्रजपेद्भस्म नागवल्लीरसा
न्वितं ॥ तिलकं तन्नयात्तेन सर्वं वश्यकरं भवेत् ॥ नागवल्ली वर्णं ॥ ॥ अथ गणेश ॥ ॥
यथा ॥ तर्पयेत् सर्वतिलैः शुद्धैः दिनेशो गणनायकं ॥ चतुश्चत्वारिंशदादौ पंचचत्वारिंशतमतं

दितः ॥ प्राप्नुयान्मंडलादर्वाक् अनिष्टमधिकं नरः ॥ नारिकेरैः कृतो होमश्चातुर्थ्यां श्रीप्र
दो भवेत् ॥ शुक्लपक्षे प्रतिपदमारभ्य दिनशः शुभः ॥ चतुर्थ्यंतं नारिकेरश्च लाजानि तेन कु
र्यात् ॥ यंत्रशतं प्रजुहुयात् वश्याः स्युः सर्वजंतवः ॥ सतिलैस्तंडुलैर्होमश्चातुर्थ्यां श्रीप्रदो भवे
त् ॥ पद्महोमेन भूपानां सात्पत्नी रक्तकैः शुभैः ॥ मंत्रिणः कुमुदैः पुष्पैर्विप्रान् पिप्पलसंभ
वैः ॥ समिद्भिर्नरपतीनुदुंबरसमुद्भवैः ॥ लक्ष्मीं वैश्यान् बटोद्भूतैः शूद्रान् त्रिवशान्नयेत् ॥ म
धुनास्वर्णलाभः स्याद्गोदुग्धेन जनितगाः ॥ आज्यहोमेन महतीं श्रियमाप्नोति मानवः
दध्ना सर्वसमृद्धिः स्यादन्नेनान्नपतिर्भवेत् ॥ ॥ अथ सूर्यस्य ॥ ॥ यथा ॥ एवं संपूज्य वि
घ्नेशं भास्करं भक्तवत्सलं ॥ दद्यादर्घ्यं प्रतिदिनं वारे वा तस्य चोदिते ॥ प्रभाते मंडलं कृत्वा
पूर्ववत् पीठमर्चयेत् ॥ पात्रं ताम्रमयं प्रस्थतोयग्राहि मनोहरं ॥ निधाय तत्र मनुना पू
रयेत् शुद्धोदकैः ॥ कुंकुमं रोचनाराजीरक्तचंदनबैनराद् ॥ करवीरजवाशालिकुशास्था
निकं तंदुलान् ॥ निक्षिपेत् सजिले तस्मिन् एकं संभाव्यमानुना ॥ सांगमभ्यर्चयेत्तस्मिन्

न्नास्करं भोकलहृणं॥ गंधपुष्पादिनैवेद्यैर्यथाविधिविधानवित्॥ अपि ध्यायन् जपेन्मंत्रं
सम्यग् होत्तरं शतं॥ पुनः संपूज्य गंधाद्यैर्जानुभ्यामवनीं गतः॥ आनम्य कंतमुध्दृत्यो
क्षित्वा वरणीरवौ॥ हृदि निधाय स्वे कोनमूलमंत्रधियाजपन्॥ दद्याद्दर्घ्यं दिनेशाय प्रस
न्नेनांतरात्मना॥ दत्वा पुष्पांजलिं भूयो जपेदष्टोत्तरं शतं॥ यावदब्दामृतं नानुः समाहितो
निजैः कृतैः॥ तेन स्कुलो दिनमणिर्दद्यात्तस्मै मनोरथान्॥ अर्घ्यदानमिदं पुंसां सौभाग्यारो
ग्यवर्द्धनं॥ धनधान्यपशुक्षेत्रमित्रदं तेजोवीर्यपुनःकांतिविद्याभिजवबाग्यदं॥ ॥रा
मविषये॥ ॥जातिप्रसूनैर्जुहुयाच्छंदनांभः समुक्षितैः॥ राज्यवश्याय कमलैर्धनधान्या
दिसंपदे॥ नीलोत्पलानां होमेन वशयेदखिलं जगत्॥ बिल्वप्रसूनैर्जुहुयात् इंदिराव
श्यैनरः॥ दूर्वाहोमेन दीर्घायुर्भवेन्मंत्री निरामयः॥ रक्तोत्पलकृतान्मंत्री धनमाप्नोति वां
छितं॥ मेधाकामेन होतव्यं पलाशकुसुमैर्नरः॥ तत्क्षणमंत्रः प्रपिबेत् ककविर्भवति वत्सरा
त्॥ तन्मंत्रितान्नं भुंजीत महारोग्यमवाप्नुयात्॥ ॥विष्णुविषये॥ ॥अथप्रयोगान्

वक्ष्यामि मंत्रयोरुक्तयोः समात्॥ ध्यान्दरूत्वा साधकवरो लोकद्वयसुपूजितः॥ तं देवं देवकीपु
त्रं सच्चोज्ञाताद्भुदप्रभं॥ शंखचक्रगदापद्मधारिणं वनमालिनं॥ एवं ध्यात्वा मनुवरं ल
क्षं तंत्रास्तमूर्तके॥ तस्य मेधां परां प्राप्य कवीनामग्रणीर्भवेत्॥ अथवा॥ स्फटिकाभं द्विभुजं
लेखपुस्तकधारिणं॥ तं विचिंत्याथलक्षं वै जपेत्वमाश्रमुकूर्तके॥ जस्यामंत्री त्रिकालज्ञो व
हस्पतिसमो भवेत्॥ चलक्षोच्चारणं बालं ध्यायन्नाश्रमुकूर्तके॥ तस्यामनुवरे विद्वान्
सर्वशास्त्रार्थविद्भवेत्॥ सर्वशास्त्रार्थकुशलो ज्ञानवान्भवति ध्रुवं॥ नंदगोपर्यंतं तं
जितनिचयधूसरं॥ प्रदीप्तमणिगणादीप्तं यशोदालोचनोत्सुकं॥ एवं ध्यात्वा मनुवरं जपे
न्नियममास्थितः॥ लक्षैकजपनादस्य किं न सिध्यति भूतले॥ प्रातःप्रातः पिबेत्तोयमष्टोत्त
रशतं जपन्॥ अनेन मूको दुष्टात्मा जडः पाषाणवत्तथा॥ अनेन जलपानेन स्याद्वाक्पति
सन्निभः॥ जायते नात्र संदेहः सत्यं सत्यं न चान्यथा॥ पञ्चाशांविक्षिप्यदाकटंकदं तं प्राकृतं
यथा॥ जदुं जपादिति ध्यात्वा आपद्भ्यो मुच्यते ध्रुवं॥ शत्रुतो नचयं तस्य राजतो दस्युतोपि

या॥ न तस्य विद्यते भीतिः कदाचिदपि सुव्रत॥ नित्यकर्मरवं पुष्पं वन्यपुष्पैः समर्चयेत्॥ वश्या
न्भवति सर्वे च ब्राह्मणा नात्र संशयः॥ गोजपुष्पैः मनसा जातिपुष्पैः समर्चयेत्॥ वश्यान्भ
वंति राजानो नात्र कार्या विचारणा॥ तमालोद्भवपुष्पैस्तु वैश्या वश्या भवंति हि॥ मौलेसजे
श्च शूद्राश्च मासं रूपं समर्चयेत्॥ उडुकयाद्रूकुसुमैर्मिश्रितैस्तिलतंदुलैः॥ मंत्रेण हस
हस्रं तु जुहुयान्नस्माधरेद्यतिः॥ जलाटे विधृते तस्य सर्वे वश्या भवंति हि॥ अनेनैव दारीर
णराजानो वशतां निद्युः॥ स्त्रियो वश्या भवंत्यत्र पुत्रा मात्याश्च सर्वथा॥ विवाहार्थी जपेन्मंत्रं
मासमात्रं सहस्रकं॥ रासमंडलमध्यस्थं रूपं ध्यात्वा व्रजे स्थितं॥ विनाहयेद्वत्तमांगी कन्यां
सर्वकुलोज्वलां॥ पुत्रं मेर हरहरेति द्विजैन प्राप्यते हरिः॥ हतं पुत्रं समालभ्य रदीयसां वि
चिंतयेत्॥ पुत्रकामो जनेत् पुत्रं मासेनैकेन सुंदरं॥ दीर्घायुमप्रतिहतबलवीर्यसमान्वि
तं॥ कुंदपुष्पैः समाराध्य रूपं ध्यायेच्च कन्यका॥ मासद्वयं तथा मंत्रं जपेद्दशसहस्रकं॥ मनो
रथपतिं लब्ध्वा दीर्घकालं च क्रीडति॥ अंजनं कुसुमं वस्त्रं तांबूलं चंदनं तथा॥ अस्मात्पुष्पको

ण्यानि स्वच्छामंत्रं शतं जपेत्॥ दीयते यस्य यस्येति सोचिराद्दासवद्दशी॥ स्त्रियो वश्या अनेनै
व जायंते मुनिसत्तमाः॥ पुरुषं वशयेन्नारी अनेनैव विधानतः॥ अपत्यकामः श्रीपुष्पै
तिलतंदुलमिश्रितैः॥ अष्टोत्तरसहस्रं तु जुहुयादन्नवान्भवेत्॥ विश्वरूपपरं ध्यात्वा स्वार
तमहोत्तरं जपेत्॥ एवं समाहितो मंत्री यशःश्रीकीर्तिमान्भवेत्॥ भूतप्रेतपिशाचार्तिस्व
दाधिग्रहपीडितः॥ भूतनाशनपातारं ध्यात्वा मंत्रं शतं जपेत्॥ प्रणश्यंति ग्रहा दुष्टाः पलायंत
इतस्ततः॥ सर्पमंडलदष्टांश्च वृश्चिकाद्यैश्च दंशितान्॥ रूपं कालियदमनं चिंतयित्वा ज
पेन्नरः॥ तत्क्षणं तं विषं घोरं हुंकारेण विनाशयेत्॥ अत्राप्यन्यं मनं वक्ष्ये रुक्मिणीजो धृष्टलतं
त्वतः॥ काशी यस्य फलान्न भेदिमन् स्वं करोति तं॥ नमामि देवकीपुत्रं नलराज्ञा नमस्कृतं
श्वरात्तैर्योर्चयेन्मंत्री जपेद्दशशतं तथा॥ ज्वरेण संस्तुतं रूपं बलप्रद्युम्नसंयुतं॥ दृ
तं बाणनगरीगरुडोपरि संस्थितं॥ निजज्वरेण संदिष्टं ध्यात्वा नाशयते ज्वरान्॥ शीत
लाकामलादीनि तथा वातादिकोद्भवान्॥ आहम्यस्य परस्याथ अपस्मारं तथा तथा॥ नाश

येनात्र संदेहो दृष्टिमात्रेण मांत्रिकः॥ गोपालं यष्टिपाशं च वेणुमादाय संस्थितं॥ ध्यात्वा य
त्नं जपेन्मंत्रं पशुमान्नुसतु मासतः॥ राज्ञः पुरोधानविद्विष्टिति यस्य मतिर्भवेत्॥ मधुसिक्तै
स्तिलैः पुष्पैः कृत्वा तन्मंडलान्नवेत्॥ महैश्वर्यमवाप्य विश्वस्यात्तोन्नवेद्ध्रुवं॥ गोवर्द्धनध
रं कृष्णं ध्यात्वा मंत्रं जपेन्नरः॥ वातवर्षादिभिर्वीरैः नयेसमग्नुपस्थिते॥ नयमाश्रुविन
श्येतनात्र कार्या विचारणा॥ वृंदावनगतं कृष्णं वह्निकामो विचिंतयेत्॥ जपेद्दशसहस्रं तु
वह्निमाशो स्य संशयं॥ एवं चैव मनो ध्यात्वा वह्निं वश्यमाहरेत्॥ एवं जलाशये ध्यात्वा
जपेद्दशसहस्रकं॥ वह्निर्न वस्य कोपि महतीनात्र संशयः॥ गायंतं वेणुनाकृष्णं गानकाम
विचिंतयेत्॥ ध्यात्वा गानं कृत्वा किन्नरैः सह गीयते॥ जयकामो जपेद्यस्तु हरं तं य
स्य पादपं॥ संस्कृतं देवतानिघ्नगरुडारूढमच्युतं॥ ध्यात्वा रक्तकरवीरसमिद्भिर्जुहुया
द्वशी॥ अष्टोत्तरसहस्रं तु पक्षोत्सवाशितो रिपुः॥ रोगादिभियमापन्नो संशये दुर्गसंस्थि
कृत्वा दशसहस्रं तु तत्क्षणान्नाशयेद्ध्रुवं॥ नीलोत्पलादिभिः कृत्वा अष्टोत्तरसहस्र

कं॥ शंखादिनिधिसंयुक्तं द्वारकानिलयं हरिं॥ पूजयित्वा हरिं नत्वा तं ध्यात्वा शांतिमाप्नुयात्
कदंबपुष्पैः संस्पृष्टं चिंतयित्वा जनार्दनं॥ अपामार्गशतैः कृत्वा जपेद्दशसहस्रकं॥ सर्वा
न्लोकान्वशी कुर्यात् मास्तु स्वज्ञैर्न विश्यति॥ राजद्वारे सभायां च व्यवहारे च मंत्रवित्
मंत्रमष्टशतं जप्त्वा प्रथमं वाक्यमुच्चरेत्॥ अनेनैव विधानेन सर्वत्र विजयी भवेत्॥ मोह
कामो जपेद्यस्तु पुंडरीकाक्षमव्ययं॥ सनकादिभिस्स्तुतं कृष्णं शंखचक्रगदाधरं परं॥ शंखच
क्रधरं ध्यात्वा मंत्रं लक्षं जपेन्नरः॥ तारसंपुटितं कृत्वा विधिवत्स्थानमाश्रितः॥ कृत्वा
मंडले कृष्णं पूजयन्भक्तिभावहृत्॥ संसारसागरात्सद्यो मुच्यते नात्र संशयः॥ ॥श्री
पद्धिवामनः॥ ॥पायसान्नेन जुहुयात् सहस्रं श्रियमाप्नुयात्॥ धान्यहोमेन धान्या
॥ वृष्टिः शतपुष्पसमुद्भवे॥ बीजैः सहस्रसंख्यातैः होमो नयविनाशनः॥ दध्योदने नभु
द्धिनकृत्वा मुच्येत दुर्गतिः॥ स्तुत्वा त्रैविक्रमं रूपं जपन्मंत्रमनन्यधीः॥ मुक्तो बंधात्तनवे
सद्यो नात्र कार्या विचारणा॥ ॥अथ हयग्रीवः॥ ॥यथा॥ बिल्वैः फलैः कृतो होमन

श्रीप्रदः परिजायते॥ कुंदपुष्पाणि जुहुयात् इच्छन् वाक्श्रियमव्ययां॥ मन्नुनानेन सं
जप्तं घृतं ब्राह्मीवसेष्टतं॥ कवितामाहरेत्पुंसामनर्गलविनिर्गलं॥ वचामनेन संजप्तां
हृये प्रातरन्वहं॥ सर्वविद्यागमादीनां व्याख्याता जायते चिरात्॥ ॥अथ नृसिंहः॥ ॥
श्रीपुष्पैर्जुहुयान्मंत्री बिल्वकाष्ठेधिते नले॥ सहस्रं श्रियमाप्नोति पत्रैर्वा बिल्वसंभवैः॥
श्रीपुष्पं लवंगपुष्पं॥ प्रसूनैर्वा फलैस्तद्वद् दूर्वाहोमाद निशितं॥ दुःस्वप्नमिति संज्ञातं स्ना
त्वा मंत्रममुं जपेत्॥ अनिष्टो मंत्रवित्स्वप्नात् स्वप्नस्तस्य जायते॥ व्याघ्रचोरमृगादिभ्यो
महारण्ये न याकुलं॥ रक्षेन्मनुवरो जप्तो नयेद्गम्येषु मंत्रिणं॥ अनेन मंत्रितं जस्य विषग्र
हमहोरगान्॥ नाशयेदचिरादेव मंत्रस्यास्य प्रभावतः॥ घोराग्निचारदेस्मादे महोत्पा
तमहाभये॥ जपन्मंत्रं स्मरेदेनं दुःखान्मुक्तो भवेन्नरः॥ सिंहरूपं महाभीमं नखदंष्ट्राति
भीषणं॥ स्मृत्वा ध्यानं विचित्रं पश्चात् ध्यायेन्मृगशिक्षु रिपुं॥ गृहीत्वा गलदेशे तं पुनर्दिक्षु हि
पेत्क्षतं॥ पुत्रमित्रकलत्राद्यैः रुग्णो जायते रिपोः॥ पूर्ववत्स्थापदे साध्यनामकृत्वा स्वयं ह

रिः॥ निशितैर्नखदंष्ट्राद्यैः खाद्यमानं रिपुं स्मरन्॥ नित्यमष्टोत्तरशतं जपेन्मंत्रमतंद्रितः॥
ज्ञायते मंडलादर्वाक् रिपुर्वैवस्वतप्रियः॥ यत्नं कुर्वीत विधिवत् शत्रुसेनानिवारणे॥
विनीतकाहोर्त्वाजितैर्वा चक्रे रिपुमर्दनं॥ विचिंत्य देवं नहरिं संपूज्य कुसुमादिभिः॥ समूल
चूर्णं कुर्यात् शरीरे दशाशान्तं पृथक्॥ रिपुं खादन्निव जपेन्निर्जने वनिवसंस्मरन्॥ कृत्वास
ताद्दिनं मंत्री सेनाधिपं महीपते॥ प्रस्थापयेच्छत्रूंजेतुं परराष्ट्रं जयेद्ध्रुवं॥ तस्यापुरस्तान्नृसिंह
रिं निघ्नंतं रिपुमंडलं॥ स्मृत्वा प्रयोगं कुर्वीत तथातिरसनापुनः॥ चित्रे पटे लिखितान्नृश
त्रून्सह वीरश्रिया सुखं॥ आगमय्य विजयी राजा ग्रामहैमधनादिभिः॥ प्रीणयेन्मंत्रिणं स
म्यक्विनवैः प्रीतमानसः॥ मंत्री यदि न संतुष्येद् अनर्थः स्यान्महीपतेः॥ ॥अथ वराह
यथा॥ रवौ सिंहगते हस्त्यां शुक्लपक्षे सितां शिलां॥ पंचगव्येषु निक्षिप्य संस्नातामयुतं ज
पेत्॥ उत्तराभिमुखो भूत्वा तां शिलां लिखितेन्वि॥ शत्रुचोरमहाव्याघ्रैः कृतां बाधां विना
शयेत्॥ नाशयेन्नेत्रबारे साध्यदेशसमाहरेत्॥ मृत्तिकां मंत्रयेन्मंत्री तां पुनर्बिनजे

त्रिधा॥ चतुर्थ्यामेकां समालिख्य पाकपात्रे तथापरां॥ गोदुग्धे परमान्नं च शोधितांस्तंदुलां
न्क्षिपेत्॥ शोधितेग्नौ पचेत्सम्यक् चरुं मंत्री जपेन्मनुं॥ अवतार्य चरुं पश्चात् अग्नौ देवं य
थाविधि॥ धूपदीपादिके रिष्ट्वा पुनराज्ये प्लुतं चरुं॥ जुहुयाद्दीपिते वह्नौ यावद्दशोत्तरं शतं॥
एवं सप्तावचारेण जुहुयात् दशसिद्धये॥ प्रातःकालेन गोचारिमृदं साध्य महीतलात्
आदाय हविरापाद्य पूर्ववज्जुहुयात् सुधीः॥ विरोधो न स्पतिर्हते तेसह चौराद्युपद्रवैः॥ राज
वृहत्सम्भृतानि समिद्भिर्मनुनानुना॥ त्रिसहस्रं प्रजुहुयात् तस्य स्युः सर्वसंपदः॥ शालि
जुहुयान्मंत्री नित्यमष्टोत्तरं शतं॥ समृद्धे धान्यसंघातैः शोभिते तस्य मंदिरे॥ तावदाज्येन जु
हुयान्मंडलात्स्वर्णमाप्नुयात्॥ आज्येः कन्यामवाप्नोति मध्वक्तैर्निजवांछितं॥ मधुरत्रयसंसि
क्तैर्जुहुयाद्दुत्पलैर्नरः॥ महतीं श्रियमाप्नोति मंडलात्तु न संशयः॥ ॥अथ मृत्युंजयः॥
दुग्धसिक्तैः सुधाखंडैः मंत्री मासं सहस्रकं॥ आराधितेग्नौ जुहुयात् विधिवद्विजितेंद्रियः॥
आयुरारोग्यसंपत्तिर्वराः पुत्रान्विवर्द्धयेत्॥ सुधाय दत्तिजा दुर्वा पयः सर्पिर्यो हविः॥ इत्यु

इत्युक्तैः सप्तमिद्भिः जुहुयात् सप्तवासरं॥ क्रमाद्दशशतं नित्यं महोत्तरमतंद्रितः॥ सप्ता
धिकान् द्विजान्नित्यं भोजयेन्मधुरान्वितं॥ विकारान्मृत्युगं मंत्री वर्द्धयेद्धोमवासरान्॥ मृत्युर
वेदहिलोंदशादरुणगाः पयस्विनी॥ गुरुं संपूजयेत् लक्ष्म्या... नाथैर्वितताधिया॥ अनेन
विधिना साध्यः कृत्वा होहादिनिस्तनः॥ विमुक्तः सुचिरं जीवेच्छरदां शतमंजसा॥ अभिचारे
ज्वरे तीव्रे घोरोन्मादे शिरोगदे॥ असाध्यरोगे त्वेडात्तैमोहे दाहे महाभये॥ मोहे यं शांति
दः प्रोक्तः सर्वसंपत्प्रदायकः॥ द्रव्यैरेतैः प्रजुहुयात् त्रिजन्मसु यथाविधि॥ भोजयेन्मधु
रैन्नैः आलग्नान् वेदपारगान्॥ दीर्घमायुरवाप्नोति त्रिजन्मसु वांछितं विंदते श्रियं॥ ए
कादशाकृतिर्नित्यं दूर्वाभिर्जुहुयात् बुधः॥ अपमृत्युजिदेवस्याद्दायुरारोग्यवर्द्धनः॥ त्रि
जन्मसु सुधावर्द्धिका समीरिव कुलोद्भवैः॥ समिद्वरैः कृतो होमः सर्वमृत्युगदापहः॥ सिद्धा
र्थैर्विहितो होमो महाज्वरविनाशनः॥ अपामार्गसमिद्धोमः सर्वामयनिषूदनः॥ ॥
अथ दहिलामूर्त्तिः॥ ॥निराहारो जपेन्मासं मनुमेनं जितेंद्रियः॥ नित्यं सहस्रमष्ट

ईपरं विंदति वाङ्मयं ॥ त्रिवारं जप्तमेतेन मनुना सलिलं पिबेत् ॥ नित्यशो द्दिशान्मत्रिंशाय
वसाध्यक्ष सत्तमः ॥ शास्त्रव्याख्यानसामर्थ्यं लभते वत्सरांतरे ॥ ब्राह्मीसैंधवसिद्धार्थवचा
कुष्ठवल्कोत्पलैः ॥ सुगंधिसंयुतैः कुंदैः श्रुतं ब्राह्मीरसे घृतं ॥ ब्राह्मीरसे हृघृतं ॥ मनुनानेन
संजप्तमयुतं साधु साधितं ॥ कवितां कांतिदं नित्यं बलायुःश्रीधृतिप्रदं ॥ ॥ अथ वैरवी
ल कुर्यादरुणांभोजैरदोषैर्मधुराप्लुतैः ॥ लक्षसंख्यं तदर्धं वा प्रत्यहं जोजयेद्द्विजः ॥ वनि
तास्यात्पतिरम्याप्राण्यैदेवताधिया ॥ होमांते धनधान्याद्यैस्तोषयेद्गुरुमात्मनः ॥ एवं
न्नवतिजगद्वश्यो रमाया भवनं भवेत् ॥ रक्तोत्पलैस्त्रिमध्वक्तैरणौ वा हयारिजैः ॥ पुष्पै
पयोन्नैः सघृतैः होमाद्विश्वं वशं नयेत् ॥ वाक्सिद्धिं लभते मंत्री पलाशकुसुमैर्हुतैः ॥ के
युरागरुसंयुक्तं गुग्गुलं जुहुयात्सुधीः ॥ ज्ञानं दरिप्रमवाप्नोति तिलैर्नेवसमन्वितैः ॥ हीरा
क्षैरमृताखंडैर्होमैः सर्वापमृत्युजित् ॥ दूर्वाभिरायुषे होमः श्रीराकाश्चादिनत्रयैः ॥ गिरि
कर्णिकाभिः पुष्पैः ब्राह्मणान्वशयेद्ध्रुवं ॥ कर्पूरैः पार्थिवान्पुष्पैः साध्यः कर्णिकारजैः ॥

मालतीकुसुमैर्हुत्वा तत्स्त्रीं वशवर्तां नयेत् ॥ कोरंडकुसुमैर्वैश्यान्वृषलान्पुटलोद्भवैः ॥ ता
म्बूलो मंत्रितः स्त्रीतः साध्याकृष्यान्विता ॥ मंत्रमुच्चार्य कुर्यान्मंत्री मधुररोडितेः ॥ पुष्पैः
सर्षपैः पदुसंमिश्रैर्वशयेत्पार्थिवान्हुतात् ॥ अनेनतस्पदीतत्सुरांतरे ॥ मधुरत्रयसं
युक्तैः पुष्पैर्बिल्वसमुद्भवैः ॥ जुहुयाद्वशयेल्लोकान्प्रियमाप्नोति वांछितं ॥ पाटलैः कु
सुमैः कुंदैः कल्हारैर्नागचंपकैः ॥ नंद्यावर्तैर्विकसितैः कृतमालैर्जुहोति यः ॥ जायते व
सरादव्योकुश्रियाविजितपार्थिवः ॥ साज्यमन्नं प्रजुहुयात्मवेदवसमृद्धिमान् ॥ कस्तूरी
कुंकुमोपेतं कर्पूरं जुहुयाद्वशी ॥ चंदनादिधिकं सद्यः सौंदर्यमधिगच्छति ॥ जात्यन्नं प्रजु
हुयान्मंत्री दधिक्षीरमधुप्लुतान् ॥ विजित्य रोगानखिलान्जीवेच्च शरदां शतं ॥ पादद्वयं प
लयजं पादं कुंकुमकेसरं ॥ पादं गोरोचनायाश्च त्रीणि पिष्ट्वा हि सांभसा ॥ विदध्यात्तिलकं मं
त्रेयान्नृपवंपैर्द्धविलोकते ॥ यावत्स्मरोस्मद्रूपतेये वा वशास्तस्य तेचिरात् ॥ कर्पूरं कुं
कुमं चैव नखमप्यागानिकल्पयेत् ॥ चतुर्थांगाजटामांसी तावती रोचना मता ॥ कुंकुमं स

सत्तागंस्याद्दिक्षागंचंदनंमतं॥ अगरुर्नवभागःस्यादितिभागक्रमेण च॥ हिमाहिडिंक
मकापिहमेतत्सर्वंसुसाधितं॥ आदाय तिलकं भाले कुर्याद्भूमिपतीन्नरान्॥ वनितामद
गर्वाद्यान्मदोन्मत्तान्मत्तगजान्॥ सिंहव्याघ्रवराहादीन्मृतवेतालराक्षसान्॥ दर्शनादे
व वशयेत्तिलकं धारयेन्नरः॥ ॥ अथ सुंदरी॥ ॥ ज्ञानार्णवे॥ मालतीमल्लिका
जातीकुसुमैर्मधुमिश्रितैः॥ घृतपूर्णैर्हुनेद्देवी वागीशत्वं प्रजायते॥ मूकस्यापि हि मूढ
स्य शिलारूपस्य नान्यथा॥ जपापुष्पै राजसिक्तैः करवीरैस्तथाविधैः॥ हवनान्मोहयेन्मं
त्री लोकत्रयनिवासिनः॥ कर्पूरं कुंकुमं देवि मंत्रिणा विजितो भवेत्॥ सौभाग्येन विला
सेन सामर्थ्येनापि सुव्रते॥ चंपकैः पाटलैः कुल्यां प्रियंगोस्त्रसितां वरा॥ प्राप्नोतीमंत्री मह
तीं स्त्रं नयेज्जगतीमिमां॥ खर्जूरखण्डलैश्चंद्रतगरैर्मोहयेन्नरः॥ नागेंद्रसुरदेवानां पुरं
श्रीविराजमानयेत्॥ सर्वलोकवशीस्तस्य नव सेवन संशयः॥ अष्टहोमात्फलैर्राजन्दा
रिद्र्यनवपीडितं॥ दुर्गापद्मानंदेवी लाजात्रिमधुहोमतः॥ मधुरत्रययुक्तैनगरु

णोकविधानतः॥ परराष्ट्रं महादुर्गं समस्तं स्ववशं नयेत्॥ सक्षीरं दधिमध्वाज्यं पयकुं
त्वावरानने॥ आयुर्धनमथारोग्यं समृद्धिर्जायते ध्रुवम्॥ क्रमेण हौत्यते क्षीरं मधु सोमम
त्युनाशनं॥ दधिमाहिके होमेन सौभाग्यं धनमाप्नुयात्॥ सितयाद्वेषलं होमो वैरिस्त
म्भनकारकः॥ होमो दधिमधुक्षीरलाजानिर्वीरवंदिते॥ रोगहंता कालहंता मृत्युहंता
न संशयः॥ कमलैररुणैर्होमः सम्यक् संपत्तिदायकः॥ रक्तोत्पलैर्नगरं वश्यं गतानोव
शगाःस्युणत्॥ नीलोत्पलैर्महादुःखवशमायांति नान्यथा॥ श्वेतोत्पलैः श्रियं चाचंचलां ते
हवनात्प्रिये॥ तथा॥ अष्टमालां प्रपूज्याथ चंदनेन प्रपूजितां॥ समाश्रित्य जपेद्विद्यां लक्षमा
त्रं यदा शुचिः॥ योषितो मामयत्येव मनस्तस्य सुनिश्चलं॥ तदा द्वितयलक्षं तु प्रजपेत्साध
कोत्तमः॥ पातालतलनागेंद्रकन्यकाः क्षोभयंति तं॥ तासां कटाक्षजालैस्तु न मोहयति सा
धकं॥ तदा लक्षत्रयं कुर्यात्साधकः स्थिरमानसः॥ संक्षोभयति स्वर्लोकान्भूलोकतलवा
सिनः॥ पुरुषो योषितो वश्याः श्वराचरमपि प्रिये॥ गोरोचनादिनिर्दिष्टैः राजं समालि

रवेत्॥ अतीवसुंदरं रम्यं तन्मध्ये प्रतिमां वरां॥ ज्वलंती नामसहितां महाबीजविदर्भितां॥
चिंतयेत्तु ततो देवी योजनानां सहस्रतः॥ अदृष्टपूर्वं दिवेशी श्रुतमात्रापि दुर्लभा॥ राज
कन्याथवा नार्यो नियतलज्जा विवर्जिता॥ आयाति साधकं सम्यक् मंत्रमूर्ता सति प्रिये॥ चक्र
मध्यगतो भूत्वा साधकश्चिंतयेत्सदा॥ उधस्तूर्यसहस्रानेमालानमरुणं तथा॥ साध्यमध्य
रुणीभूतं चिंतयेत्परमेश्वरि॥ अनुक्रमनयोगेन स्वयं कंदर्परूपवान्॥ सर्वसौभाग्यसु
भगः सर्वलोकवशंकरः॥ सर्वस्त्रीोपचारैश्च मुक्तो सहितविग्रहः॥ चक्रं संपूजयेद्य
स्तु यस्य नामविदर्भितं॥ स भवेद्दासवद्देवि धनाढ्यो वापि भूपतिः॥ चक्रमध्यगतं कुर्या
त्तु नाम यस्यास्तु योषितः॥ तदा वश्यो महेशानि भृत्याधारो भवेद्ध्रुवं॥ हठादानयते शीघ्रं
योजनानुसुरवंदिते॥ त्रीन् नये स्वर्गभूलोकपातालतलयोषितां॥ रोचनानागमेकं तु भा
गमेकं तु कुंकुमं॥ अष्टनागद्वयं देवि चंदनं मर्दयेत्समं॥ एकत्र तिलकं कुर्यात्त्रैलोक्य
वशकारिणं॥ अष्टोत्तरशतं विद्यां मंत्रयित्वा वरानने॥ राजानं नगरं ग्रामं येन यथा

मद्दर्पते॥ मंत्रिणा परमेशानि तत्सर्वं तस्य वश्यगं॥ तांबूलं धूपमुदकं पत्रं पुष्पं फलं द
धि॥ दुग्धं घृतं चूर्णमात्रं वस्त्रं कर्पूरमेव च॥ कस्तूरीघुसृणं चैलालवंगं जातिपत्रकं॥ ज
लं वा वस्त्रारा कलं यद्यत्तु परमेश्वरि॥ अष्टोत्तरशतं जप्य यस्मै तस्मै प्रयच्छति॥ स व
श्यो जायते देवि नात्र कार्या विचारणा॥ स्त्रियस्तु सकला वश्या दासीभूता भवंति हि॥ ह
डात्कर्षणमेतत्तु कथितं नान्यथा भवेत्॥ अथ वक्ष्ये महेशानि महापातकनाशनं॥ शिवां
संपूजयेद्देवि सुगंधिकुसुमैः प्रिये॥ महापातकमुक्तात्मा तत्क्षणात्साधको भवेत्॥ श
मीदूर्वाकुशाश्वत्थपल्लवैरथवार्कजैः॥ मासेन हंति कल्मषं सप्तजन्मकृतादिनः॥ ॥
मुद्रासनबंधयोगः॥ ॥मुद्रासनबंधयोगः स्वपूर्वोक्तध्यानयोगतः॥ लक्षमात्रं
जपेद्यस्तु महापापैः प्रमुच्यते॥ लक्षद्वयेन पापानि सप्तजन्मार्जितान्यपि॥ महापातकमु
ख्यानि नाशयेन्नात्र संशयः॥ ततो लक्षत्रयं जप्त्वा मंत्रं मंत्रकुलेश्वरि॥ महापातककोटी
रिस्तु नाशयेन्नात्र संशयः॥ चतुर्लक्षं जपेद्देवि महायोगीश्वरो भवेत्॥ कुबेरद्रव्य दे

वेदिपंचलक्षान्नसंशयः॥पंचलक्षजपमात्रेण महाविद्याधरो भवेत्॥सप्तलक्षजपान्
त्रीखेचरीमेलको भवेत्॥अष्टलक्षजपान्मंत्री देवरूपो भवेन्नरः॥अणिमाद्यष्टसि
द्धीनां नायको भवति प्रिये॥वराङ्गनास्तस्य राजानो योषितस्तु विशेषतः॥नवलक्षप्रमाण
जपे त्रिपुरसुंदरी॥कुरुमूर्त्तिः स्वयं कर्त्ता साक्षाच्चैव न संशयः॥सर्वैर्विद्याः सदा मुख्य
सर्वलोकाग्रवान्भवेत्॥ ॥अथ पुष्पिकामुक्त्वा॥ ॥श्रीफलानां पलाशानां तथैवोदुं
बरस्य च॥सर्वसिद्धिप्रदो होमः कर्त्तव्योत्र प्रयत्नतः॥शतमष्टोत्तरं कृत्वा जपं कुर्यात्तत
परं॥मालतीकुसुमैर्होमः कर्त्तव्यो मधुराप्लुतैः॥घृतेन सहितो वापि वागीशत्वप्रदाय
कः॥आम्रयुक्तेन रक्तेन बाजिदः सदा प्रिये॥चम्पकासं दधिसंयुक्तो लक्ष्मीस्तस्य स्थि
रा भवेत्॥छागमांसं सरक्तं च घृतेनाभावितं तथा॥यो जुहोति नरो हंदे विराजा तस्य वश्यो भ
वेत्॥श्वेतेन करवीरेण होमं सम्यक्करोति यः॥लक्षमात्रं विधानेन सजीवेच्छरदां शतं
कृत्यात्रिलपुष्पेण मधुनाक्तेन साधकः॥लक्षसंख्यानियोदेवि सिद्धिस्तस्य न संशयः

कर्णिकारसहस्राणि यो जुहोति घृतैः सह॥सप्राप्नोति परां सिद्धिं ईप्सितां सुरसुंदरी॥पाय
सेन चरे होमं घृतेन सह सुंदरि॥त्रिसंध्यं वा जपेद्देवि वागीशत्वमवाप्नुयात्॥ ॥
अथ रूपामादि॥ ॥तंत्रनीलतंत्रे॥अथ काम्यविधिं वक्ष्ये येन सर्वत्र पारगः॥साधको
साधयेत्सिद्धिं देवानामपि दुर्लभां॥कुलागारं पुष्पितायाः दृष्ट्वा यो जपते नरः॥अयुतै
कप्रमाणेन साधकः स्थिरमानसः॥केवलं तु प्रभावेन सर्वविद्यानिधिर्भवेत्॥संस्कृ
ताः प्राकृताश्चान्याः कोकिला वेदिकास्तथा॥वराभायांति ते सर्वे साधकस्य न चान्यथा॥अ
पद्यामुक्तकेशास्तु हविर्भुक्तास्तु संयतः॥प्रजपेदयुतं प्राज्ञ एतदेव फलं लभेत्॥ननग्नां प
रनतां पश्यन् अयुतं यस्तु साधकः॥प्रजपित्स न येस्स यो विद्याया वक्त्रेन्तः स्वयं॥तस्य दर्शन
मात्रेण वादिनः कुंठतां गताः॥गद्यपद्यमयी वाणी सभायां तस्य जायते॥तन्नाम्नास्तु धि
यः सर्वे प्रणमंति मुदान्विताः॥तस्य वाक्यपरित्यक्ताः कुण्डान्यपि वाग्मिनः॥कुलचक्रगमणे
॥रजो युक्तां समासाद्य तत्रान्नस्वेद देवतां॥पूजयित्वा महारात्रौ त्रिदिनं प्रजपेन्मनुं॥व

हुमीडफलं देवि लभते नात्र संशयः ॥ वेतालपादुकासिद्धिं खड्गसिद्धिं च भैरव ॥ अंजनं
तिलकं गुटीं साधयेत्साधकोत्तमः ॥ जपेत्प्रतिदिनं तत्र मन्त्रेण तु सहस्रकं ॥ तत्र जपे
च होमे च संख्यानो क्रमतो विधिः ॥ तत्रैव गगांतकस्यकं ज्ञेयं ॥ विद्याकामेन होतव्यं पद्मै
र्मधुसमन्वितैः ॥ धनकामेन होतव्यं तिलाज्यमधुसंयुतं ॥ बंधूकपुष्पहोमेन दासं च
कुरुते नृपं ॥ सर्पिर्लवणहोमेन सदा कवितिकामिनीं ॥ बकुलैर्होममात्रेण सौभाग्यं ल
भते नरः ॥ मल्लिकाजातिपुन्नागकदंबैः पुष्टिमाप्नुयात् ॥ हीरामतगरैर्होमान्महत्तीं
कवितां लभेत् ॥ चंदनागरुकर्पूरं काश्मीरहोमतः पुनः ॥ मंत्री नीलसरस्वत्याः सर्वान्
ह्मवाप्नुयात् ॥ नीलसरस्वती परमन्त्रोपजप्तहृतं ॥ कर्पूरहोमतो मंत्री सर्वान्कामानिसा
धयेत् ॥ संपूज्यमहलमंत्रेण बिल्वपत्रैर्घृतान्वितैः ॥ सहस्रसंख्यं हुत्वा प्राप्नोति परमां ग
तिं ॥ प्रतिदिनमितिमंडजपरा ॥ घृताक्तमालतीपुष्पैर्होमात्कुलकवित्वं भवेत् ॥ अत्र यत्र सं
ख्यानोक्ता तत्र तत्रायुतसंख्या बोद्धव्या ॥ तदुक्तं तत्रैव ॥ अत्र सर्वस्य होमस्य नियमो

ऽयुतसंख्यकः ॥ ॥ अत्र तर्पणं वक्ष्यते ॥ ॥ मधुना तर्पणं कुर्यात्सर्वकाम
प्रदायकं ॥ मंत्रसिद्धिकृतं साक्षान्महापातकनाशनं ॥ नीलतंत्रे ॥ कर्पूरमिश्रितैस्तोयै
र्मासमात्रं हि तर्पयेत् ॥ वशीकृत्य नृपान्सर्वान्योगी स्याद्यावदायुषं ॥ घृतैः पूर्णायु
षः सिध्येद्दुग्धैरारोग्यसिद्धये ॥ अगरुमिश्रितैस्तोयैः सर्वकालं सुखी भवेत् ॥ मादि
क्षीरोदकैर्मिश्रितैस्तोयैः सर्वार्थसिद्धये ॥ मरीचामिश्रितैस्तोयैरुष्णैः शत्रून्विनाशयेत्
केवलैरुष्णतोयैश्च शत्रुमुच्चाटयेत्क्षणात् ॥ ज्वरादिहीनवेत्तेन दुग्धसेकात्समं नयेत्
सिद्धसारस्वतं ॥ शतानि जपमात्रेण रोगी चनातिपकं नरः ॥ कृत्वापरपतिर्यं मंत्री तं कथ्य
ह्रासवस्तुधी ॥ कृत्वारिपे ॥ उपचारविशेषेण राजपत्नीं वशं नयेत् ॥ राजानं जपमात्रे
ण बलिना सकलं कं गतः ॥ उपचारविशेषेण तिअधिकारिणे दातव्यं ॥ जपमात्रेति पू
ज्ञादिविहितेन सर्प ॥ बलिकृत्यं तु मस्यमस्यके ॥ रंभाजातिबीजपूरं स्वर्गं घिपारिमिश्रितै
मिश्रितैरूपबलिं दद्याद्दहन्मां च विशेषतः ॥ बलिमंत्रस्य ॥ प्रणवं पूर्वमुच्चार्य उग्रतारिते

तःपरं॥ विकृतदंष्ट्रे परपदं मोहयद्वयमुच्चरेत्॥ मारयखादयपचमथतथा हृदयं हृदयं
वदेत्॥ ये मां हिंसितुमुद्यता योगिनीचक्रे स्नानहारयक्रूंफट्स्वाहा परा विद्या माकर्षय
फट्स्त्रद्वयं कपाले गृह्य स्वाहेति मंत्रं ताराविषये॥ कालिकादौ तु तत्तत्स्वरसो क्लेव लि
मंत्रो बोद्धव्यः॥ ॥अथ निग्रहमुपायाः॥ ॥तदुक्तं वीरतंत्रे॥ श्मशानांगारमादा
यमंगलेवा स्मरेन्निशि॥ कृष्णवस्त्रेण संवेष्ट्य बध्नीयात्कृततंतुना॥ एतानि मंत्रितं तच्च
निक्षिपेद्वैरिवेश्मनि॥ सप्ताहाभ्यंतरे तेषामुच्चाटनमिदं महत्॥ प्रेतकारिये॥ नरास्थि
नि लिखेन्मंत्रं हारयुक्तं हरिद्रया॥ सहस्रं परिसंजप्य निशायां शनिवासरे॥ निक्षिप
ते यस्य गेहे मृत्युस्तस्य त्रिमासतः॥ क्षेत्रे तु सस्यहानिः स्याद्गजवहानिस्तु रंगणे॥ धन
हानिर्धनागारे ग्राममध्ये तु तद्व्यय॥ हारस्वरूपेन विंदुयुक्तो विंदुलवणं॥ हट्टे रखा
भोगंतरे चेन्मध्ये मुक्तामुक्तयोर्महाद्वेषंकुरुरवृत्ति॥ तदुक्तं तंत्रे च॥ द्वेषे तु विलिखेन्मं
त्रे प्रेतकर्पटके सुधीः॥ द्विष्मद्वेष्ययोर्नाम्नां तस्य द्वेषो महान्भवेत्॥ विलिखेन्मंत्रमि

ति मंत्रं लिखित्वा हट्टे खारे स्वमध्ये अमुकं मारय मारयेत्यादि सादिसाध्यसहितमिलि
ख्य॥ अथवा साध्यं लिखित्वा तद्दंते मंत्रं लिखेत्॥ सहस्रं परिजप्येति अमुकं मारयेत्य
ति मंत्रजापाद्दिशो येन अमुकामुकयोर्द्वेषंकुरुद्वस्मात्तेमंत्रमुच्चार्य सहस्रं जपेत्॥
अथ वेतालादिसिद्धिः॥ ॥तदुक्तं कुलचूडामणौ॥ भैरवं प्रत्याच॥ ॥वेताला
दिमहासिद्धिः कथं भवति चंडिके॥ तन्मे कथय देवेशि यदि स्नेहोऽस्ति मां प्रति॥ देव्युवा
च॥ निर्विकल्पो देवेश हृत्श्मशाने साधकोत्तमः॥ भौमवारे मध्यरात्रौ गलाकुलमूर्गा
न्वितः॥ खनित्वा चाहरेत्तं वै जपेन्महिषमर्दिनीं॥ तत्सहस्रं कुर्वन्नेवासनं तत्रैव परिवर्त्त
नले॥ काष्ठमध्यस्य तस्मिन्वै दंडपादुकचिह्नितं॥ कृत्वा दुर्गाष्टमीरात्रौ श्मशाने निक्षिप
त्तनः॥ तस्योपरि शवं कृत्वा पूजयित्वा यथाविधि॥ आवासनगतो वीरो जपेद्दशसहस्रं
न तो मार्द्वबलिं दत्वा काहमामंत्रयेत्ततः॥ स्फें स्फें दंष्ट्रमहाजोगयोगिनीहृदयप्रियो॥ म
महस्राक्षिति नाथममाज्ञां परिपालय॥ एवमामंत्र्य वेतालं यत्र तत्र प्रयुंजते॥ तं तं चूर्ण

विधायाथ पुनरायाति कौलिकः ॥ गछ गछ महानागे पादुके वरवर्णिनि ॥ मलादस्य रमि
त्रेण गछत्वं शतयोजनं ॥ अहल्लोहं समासाद्य पंचाशीदंगुलाकृतिं ॥ खड्गरूत्वा प्रजु
येन्मनुं ॥ तत्सहस्रं ततो कृत्वा महाशवकलेवरे ॥ खनित्वाग्नौ यत्नतश्चैव जाश्रुखं कुलमाव
येत् ॥ कृत्वा छम्मामर्द्धरात्रौ चितामध्ये समाहितः ॥ प्रीतिपूर्वं समाहितः ॥ प्रीतिपूर्वं समाम
अकुनेत्री तवनेततः ॥ मधुरत्रयसंयुक्तं बिल्वपत्रेण संयुतं ॥ पादादि नुरुपर्यंतं ह
मांते बलिमाहरेत् ॥ बस्य दीपुरमामाया देवी महिषमर्दिनी ॥ आयाति बातिपूर्णस्य
वरहस्ता हसन्मुखी ॥ गरलं च सौतिग्राहे नैरखखमुत्रोस्य धारयेत् ॥ घोरदंष्ट्रे महाकालि
विकरालस्वरूपिणी ॥ आं ह्रां ह्रीं ह्रूं ॐ कुरु कुस्माणं विपक्षं छेदविस्तारं ॥ एवमामंत्रस्य
कुं तुयमुद्दिश्य पाहि पिन्नारः ॥ छित्वा छित्वा पुनर्भित्वा गुछस्वाकृष्यते पुनः ॥ अथवा रूप
मार्जारमिषके घातेन घातयेत् ॥ कृष्णे चतुर्दश्यां रात्रौ लिखनेमंत्रितं ततः ॥ तन्त्रमोचा
समारोप्य यावन्मत्रं प्रजायते ॥ तावत्कुहूविमानानि पतितानि न पोद्धिनी ॥ अथोत्तरस

हस्रं तु एकाकी दीपवर्जितः ॥ उत्स्वनं तत्र मार्जारोक्त छित्वा निःछिद्रमानयेत् ॥ तत्रस्थं कौ
हविमानानां तत्र तद्दिने तटे ॥ समानीय सुहृत्संगः कालयेन्मंत्रमुच्चरेत् ॥ ततः श्री तोनि
मुखं वसयदास्थिप्रतिगछति ॥ तदानीयं यजेत् तत्र कालिकां घोरनिस्वनां ॥ कुलाग्निमंत्र
सहस्रं तु कालिमंत्रं प्रयत्नतः ॥ सिद्धांजनो न वैमंत्री नात्र कार्या विचारणा ॥ चंदनागु
रुकस्तूरीमिश्रितं चास्थिघर्षणं ॥ कृत्वा तिलकमादाय सर्वं जयति साधकः ॥ कुलमीनं
कुलान्ते च कुलमघं कुलेश्वर ॥ कुलस्थाने समानीय दत्वा देवी प्रयत्नतः ॥ अथोत्तर
सहस्रं तु जप्त्वा भूमिजलेस्थितः ॥ सूमो फुत्कारमात्रेण विवरं तत्र जायते ॥ शतयोजं
नश्वरे स्वायत्र साधकस्तिष्ठेत् ॥ तत्रैव गमनं तस्य भूतलं तत्समर्पितः ॥ एवं विव
रमध्ये तु गवा दृष्टं कुहरे पिधा ॥ कायसंकोचमासाद्य गछत्य विकलो नरः ॥ दुर्गामंत्रं वि
नायस्व कालीमंत्रं तथैव च ॥ सिद्धयः कुलनाथेश ज्ञायं तेन कृपं च न ॥ ॥ अथवा
तकरं संस्कारो यथा ॥ ॥ मधुलाजा मांसानाडी छिद्रात्मा कस्यचण शलाकया यत्नदारुवि

खड्यास्येत दुर्वयाबालस्यजिह्वां ओं ह्रीं वाद हि एपाणिनात्रिवारंसंमार्ज्यतत्रपितापंचाक्षा
रेणाक्षरसमंत्रंचिलिख्य देवींपूजयेत्॥ तदुक्तंमत्स्यसूक्ते॥ अथवामधुनाजातस्यजिह्वा
यांबालकस्यच॥ नाडीछेदात्पूर्वपूर्वंलिखेत्स्वर्णशलाकया॥ मूलमंत्रंलिखेन्मंत्री यस्मा
द्येस्येत दुर्वया॥ वाक्सोभारततोबालोवाग्मीभूतकविर्भवेत्॥ महोग्रताराकल्पेतु॥ नेमि
त्तिकेसंस्कारानंतरमेवमंत्रलिखनंकार्यं॥ तदुक्तंमहोग्रे॥ जन्मसंस्कारकेनापुत्रजाते
प्रशस्यते॥ जिह्वायांतुलिखेन्मंत्रंयस्तदाकुकुरोनवा॥ यावत्रयंतुसंमार्ज्यदर्हिणेनैव
पाणिना॥ मूलमुच्चार्यमनसैवकिंचित्कुर्मस्मरणेननं॥ आदौसंस्कारकर्तव्यमस्तदंतेवि
लिखेन्मनुं॥ गंधचंदनपुष्पैस्तुपूजयेत्तारिणींशिवां॥ उत्तरात्तिमुखोभूत्वास्थापयेत्सु
ह्मुत्तमं॥ पूजयेत्तारिणींदेवींनानानैवेद्यैः स्मरणेनने॥ कविर्वाग्मीनवेत्पुत्रःसत्यवादी
जितेंद्रियः॥ अत्रतारिणीपदमुपलक्षणं॥ देवीमात्रमेवबोद्धव्यं॥ रहस्ये क्रमादितं
त्रेपुबालसंस्कारदर्शनात्॥ तदुक्तंतंत्रे॥ बालकस्यतुजिह्वायांत्रिदिनांतरेलिखेत्

मधुनास्येतदूर्वाग्निलिखितुस्वर्णशलाकया॥ अमुंवाअनुकूरंतुलिखेद्देयजनांतरमि
ति॥ एतेनाशात्रौत्रिदिनांतरमितिसूधिमंत्रमनुमितिमेरव्यावाभ्यनुकूटमितत्पर्थः॥
अथैकादशाहेदेवतांसंपूज्यसमंत्रंलिखेदितिकश्चित्॥ अथयदिपिताहस्तेनभवति
तदापितृव्योमातुलोवामंत्रंलिखेदिति॥ तदुक्तंमहोग्रे॥ पितुर्भ्राताथवापुनःपितुरे
वालिखेन्मंत्रंनान्यदेवकदाचन॥ मातुःक्रोडेपिसंस्थाप्यदर्भेनास्तीर्यदिनयरासे
हस्तनेनकुर्यादस्यांशांतिंकुर्यात्॥ ॥अथछागादिबलिविधिः॥ ॥तत्रसल
क्षणंपशुंदेव्यग्रेसंस्थाप्यार्घोदकेनसंप्रोक्ष्यखड्गेनसंरक्ष्यकवचेनावगुंठ्यधेनुमुद्र
यामृतीकृत्यगंधपुष्पादिभिःपशुंसंपूज्यकर्णेइमंमंत्रंपठेत्॥ पशुपाशायविद्महे
विश्वकर्मणेधीमहि॥ तन्नोजीवःप्रचोदयात्॥ ततोह्रींक्लींकालिकालिवज्रेश्वरिलौहै
दंडायैनमः इतिमंत्रेणखड्गंपूजयेत्ततः॥ खड्गस्याग्रमध्यमूलक्रमेणपूजयेत्॥ यथा
क्रंवागीश्वरीब्रह्मभ्यांनमः॥ क्रूंलक्ष्मीनारायणाभ्यांनमः॥ क्रूंउमामाहेश्वराभ्यांनमः॥ तत

ब्रह्मविष्णुशिवशक्तियुक्ताय नम इति सर्वत्र पूजयेत्॥ खड्गाय खड्गनाथाय शक्तिकाय
पतित्पर॥ पश्चाच्छेदयस्व मायाबीजं खड्गनाथ नमोस्तु ते॥ ततो महावाक्यं कृत्वा ऽमुकदे
वताप्रीतिकामो ऽमुकदेव्यै इमं पशुं तुभ्यमहं संप्रददे॥ ततो निवेदयेत् यथोक्तेन विधा
नेन तुभ्यमस्तु समर्पितं॥ ततो बलिं दद्यात्॥ ततो रुधिरं समांसं देव्यै दत्वा ऽवशिष्टं ब
टुकादिभ्यो बलिं दद्यात्॥ यथा द्वारे वां वटुकाय नम इति गंधादिभिः संपूज्य एवं च मंत्रेण
बलिं दद्यात्॥ ॥इति बलिविधिः॥ ॥अथ कुलाचारो निरूप्यते॥ तत्र कालिकातं
त्रे॥ अथाचारं प्रवक्ष्यामि यत्कृते मत्तमश्नुते॥ सर्वकृत्यहिते युक्तः समयाचारपालकः
अनित्यकर्मसंत्यागी नित्यानुष्ठानतत्परः॥ मंत्राराधनमात्रेण शिवज्ञानवतत्परः॥
परस्यां देवतायां तु सर्वकर्मनिवेदकः॥ कुलस्त्रीवीरनिंदां च तद्द्रव्यापहारकं॥ स्त्री
षु चैव प्रहारं च वर्जयेन्मतिमान् सदा॥ स्त्रीमयं च जगत्सर्वं स्वयं तादृक् तथा भवेत्॥ पेयं
चर्व्यं तथा चोष्यं नरं लेलिंगं हंसखं॥ सर्वं च युवतीरूपं भावयेन्मतिमान् सदा॥ कुल

जां युवतीं वीक्ष्य नमस्कुर्यात् समाहितः॥ यदि भाग्यवशाद्देवि कुलदृष्टिः प्रजायते॥ तदेव
मानसीं पूजां तत्र तासां प्रकल्पयेत्॥ तासां नगादिदेवीनां तथा चैव नगिनीं नगजिकां च
नगसारिणीं॥ नगदं तालनगाहीं च नगलयां नगनासां नगस्थां नगसर्पिणीं
संपूज्य तान्भोगं धाद्यैर्मानसैरुपमेव च॥ नमस्कृत्य विधानेन स्वयमन्हीनितः सुधीः॥
बालां वा यौवनोन्मत्तां वृद्धां वा सुंदरीं तथा॥ कुत्सितां वा महादुष्टां नमस्कृत्य विभावयेत्॥
तासां प्रहारं निंदां च कौटिल्यमप्रियं तथा॥ सर्वथा च न कर्तव्यमन्यथा सिद्धिरोधकृत्॥
स्त्रियो देवाः स्त्रियः प्राणाः स्त्रिय एव विभूषणं॥ स्त्रीसंगिना सदा भाव्यमन्यथा मा स्त्रिया
मपि॥ उपस्थानं महारावं निर्विरूपोऽर्जनं पं चरेत्॥ स्त्रियं गच्छन् स्पृशन् पश्यन् विशेषात्कुल
जां स्त्रियं॥ न हंतं तांबूलमन्यांश्च न दद्याद्यथारुचि॥ नक्ता घरी यन हाशिरः स्थारोपं
न पंचरेत्॥ वीरतंत्रे॥ दिक्कालनियमो नात्र स्थित्यादि नियममेव च॥ जपेन कालनियमो
नार्चादिषु बलिष्वपि॥ स्वेच्छानियम उक्तश्च महामंत्रस्य साधने॥ वस्त्रासनस्नानदेहगेह

स्वर्गादिवारिणः ॥ अदिन वाचरेदत्र निर्विकल्पं मनश्चरेत् ॥ कुलार्णवे ॥ कुलाचाररग
हं गत्वा अनुल्पापापविकृद्धये ॥ पाचयेदमृतं कौलं तदभावे जलं पिबेत् ॥ कुलाचारेणय
त्कुलादत्तं पात्रं तु भक्षितः ॥ नमस्कृत्य तु गच्छीयाद् अन्यथा नरकं व्रजेत् ॥ अन्यत्रापि ॥ वृथा
न गमयेत्कालं घूतक्रीडादिनाः सुधीः ॥ गमयेद्देवतापूजोजपयागस्तवादिना ॥ वीरा
णां जपयज्ञस्तु सर्वकाले प्रशस्यते ॥ सर्वदेशे सर्वपीठे कर्तव्यो नात्र संशयः ॥ शिवा
गमे ॥ शक्तिः शिवः शिवः शक्तिः शक्तिर्ब्रह्मा जनार्दनः ॥ शक्तिरिंद्रो रविः शक्तिः शक्तिश्चं
द्रो ग्रहा ध्रुवं ॥ शक्तिरूपं जगत्सर्वं यो न जानाति नारकी ॥ वीरतंत्रे ॥ स्नानादिमानसं शौ
चं मानसः प्रवरो जपः ॥ पूजनं मानसं दानं नित्यं मानसं तर्पणादिकं ॥ सर्वत्र एव अधुना कालो
नाकुलो विद्यते क्वचित् ॥ न विशेषो दिवारात्रौ न संध्यायां महानिशि ॥ सर्वदा पूजयेद्दे
वीं स्नातस्नातो जनः ॥ महानिर्वाणे ॥ दिवसे बलिं मंत्रेण दापयेत् ॥ यत्तु ॥ रात्रौ वै मन
हापूजा कर्तव्या वीरवंदिते ॥ न दिने सर्वथा कार्या शासनात् मम सुव्रते ॥ न तु नः कुलपूजा

विषयं ॥ महानिशास्तु तत्रैव ॥ अर्द्धरात्रात्परं यच्च मुहूर्त्तद्वयमेव च ॥ सा महारात्रिरुद्दि
ष्टा तद्दत्तमक्षयं भवेत् ॥ गांधर्वे ॥ पृथ्वीमृतुमतीं वीक्ष्य सहस्रं यदि नित्यशः ॥ तदायादौ
सुसिद्धांतं हतः ॥ हितितलंभजेन्नः ॥ नित्यशइति षोडशदिनं यावत् ॥ पर्वतेषु समारोप्य
निर्णयीयतमानसः ॥ कवितां लभते सोऽपि चापमृत्युं च गच्छति ॥ अत्रापि सहस्रमिति सं
बंधः ॥ पृथ्वीकुलं पर्वतं स्नाने ॥ अन्यच्च नीलतंत्रे ॥ पश्चाद्दह्यखंजनं शिखरं तथा ॥ चामरं
रविबिंबं च तिलपुष्पं सरोरुहं ॥ त्रिशूलं वीक्ष्य व्याचरातरः अश्रुदनावतः ॥ मुखपद्म
दंस्तु मुखं स्वलोचनं सुहास्यकं ॥ सुकेशां सुगतिं गंधं स्वरूपं सुखमेव च ॥ लभते न य
यास्वं रख्यं ष्ट एपावतिसादरं ॥ पश्चान्मुखं खंजनं च ह्नु चामरं केशं चोर विबिंबं सिंदूरं तिल
पुष्पं नासिकां सरोरुहं नाभिं त्रिशूलं त्रिबलिमिति बोद्धव्यं ॥ नावचनामलो ॥ एकाकीनि
र्जनिदेशे श्मशाने विजने वने ॥ श्मशानागारे नदीतीरे निःसंगो विहरेत्सदा ॥ महाचीन
क्रमे देवीं ध्यात्वा तत्र प्रपूजयेत् ॥ तन्मोहं च पुष्पेण पूजयेच्छक्तिमावतः ॥ सन्मयेन्क

लक्षमगतःशुचिःश्लेमतरोर्महापयेद्देवींध्यात्वायथाविधि॥तस्यधारस्यधारेणतर्पयेद्
मारकानने॥महाचीनक्रमलतावेष्टितःसाधकोत्तमः॥रात्रौयदिजपेन्मंत्रंस्तेवकस्य
लतान्नवेत्॥तिथिक्रमेणसंस्था॥निवेष्टितोयदि॥तदामासेनसिद्धिःस्यात्दसहस्त्रजपमा
नमः॥अहम्यांचचतुर्दश्यांद्विगुणंयदिदृश्यते॥तत्रैवमहतीसिद्धिर्देवानामपिदुर्लभा॥
कुलचूडामणौ॥स्थलपुत्ररहस्यंमेसमयाचारसंभवं॥येनहीनानसिध्यंतिकल्पकोटि
सहस्रशः॥मानवाःकुलशास्त्राणांकुलचर्यानुसारिणां॥उदारचित्तःसर्वत्रवैष्णवाचा
रतत्परः॥परनिंदासहिष्णुःस्यादुपकाररतःसदा॥पर्वतेविपिनेवापिनिर्जनेश्मशानमंड
पे॥चतुष्पथेजलस्मेयदिदैवीकृतिर्भवेत्॥तूर्णंध्यात्वामनुंजप्त्वानम्रयष्टेयथासु
खं॥रुद्रभैरवीसमहाकालींनमस्कुर्याद्दिजोहितं॥हेमंकरीसदावीसक्रंबुकीयमहतिकां
करदंष्ट्रेनमस्कारौकौलमार्गमेवच॥कृशोदरीमहाचंडेशिवदूतीतथाप्रिये॥कुला
चारप्रसन्नास्यनमस्तेशंकरप्रिये॥श्मशानंचशवंदृष्ट्वाप्रदक्षिणमनुव्रजेत्॥प्रणम्य

नेनमंत्रेणमंत्रीस्वस्वमवाप्नुयात्॥घोरदंष्ट्रेकरालास्येकिंटिशब्दप्रणोदिनि॥घोरघोर
वरास्फालेनमस्तेचितिवासिनि॥रक्तपुष्पंतथावस्त्रंविलोक्यत्रिपुरांबिकां॥प्रणमेद्दंडवद्
भोइमंमंत्रंपठेद्धरः॥बंधूकपुष्पसंकाशेत्रिपुरेभयनाशिनी॥भाग्योदयसमुत्पन्ने
नमस्तेवरवर्णिनि॥दृष्ट्वाहवेश्यांतथापुष्पंराज्ञोनेराजपुत्रकं॥हस्त्यश्वरथशस्त्राणि
फलकान्वीरपुरुषान्॥महिषंकुलदेवंचदृष्ट्वामहिषमर्दिनीं॥प्रणम्यकुर्याद्दुर्गावास
चविघ्नैर्नलिप्यते॥जयदेविजगद्धात्रीत्रिपुराद्येत्रिदैवते॥भक्तेभ्योवरदेदेविमहिष
घ्निनमोस्तुते॥मधुमांसेसमायोक्तमत्स्यंमांसंवरस्त्रियं॥दृष्ट्वाचभैरवींदेवींप्रणम्यवि
मृवम्भ्रतं॥घोरविघ्नविनाशायकुलाचारसमृद्धये॥नमामिवरदेदेविमुंडमालाविभू
षिते॥रक्तधारासमाकीर्णवदनेत्वांनमाम्यहं॥सर्वविघ्नहरेदेविनमस्तेहरवल्लभे॥
एतेषांदर्शनेनैवयदिनैवंप्रकुर्वते॥शक्तिमंत्रंपुरस्कृत्यतस्यसिद्धिर्नजायते॥तथा
कुलचूडामणौ॥कुलवारेकुलाष्टम्यांविशेषतः॥योगिनीपूजनंतत्रप्रधानंकुलमूलकं

यथा विष्णुतिथौ विष्णुः पूजितो वांछितप्रदः॥ तथा कुलतिथौ दुर्गा पूजिता वरदायिनी॥ कु
लाचारादिनियमस्त्वया मते॥ रविचंद्रौ कुजः सौरिश्चत्वारस्त्वकुला इमे॥ सौमश्चौतु बु
धवारः कुलाकुलः॥ द्वितीया दशमी षष्ठी कुलाकुलमुदाहृतं॥ विषमाश्चाकुलाः सर्वा
शेषाश्च तिथयः कुलाः॥ वारुणार्द्राभिजिन्मूलं कुलाकुलमुदाहृतं॥ कुलानि समयुग्मा
नि शेषभान्यकुलानि च॥ तिथिवारे च नक्षत्रे अकुले स्थायिनो जयः॥ कुलास्त्वजयिनो नि
त्यसाम्ये चैव कुलाकुले॥ एवं कुलवारादिकं ज्ञात्वा साधकः कर्म कुर्वीत॥ ॥अथ
शिवाबलिप्रकारः॥ ॥तदुक्तं कुलचूडामणौ॥ बिल्वमूले प्रांतरे वा श्मशाने वापि सा
धकः॥ मांसप्रधानं नैवेद्यं संध्याकाले निवेदयेत्॥ कालिकालीतिवक्तव्यमेतदुमाशिव
रूपिणि॥ पशुरूपधरा याति पशुरूपमतोः सह॥ हुंकारोति यदि शिवा नामुखमुक्तोस्यमस्व
रं॥ तदैव मंगलं तस्य नान्यथा कुलभूषणे॥ अथवा परमन्नदानेन नित्यमश्रांतं यथा संध्यां
दने पि च तर्पणं॥ तथैव कुलशिवाभ्यर्णं निसृता कुलपूजने॥ पशुरूपां शिवां देवीं याना

र्चयति निर्जने॥ शिवारावेण तस्याशु सर्वं नश्यति निश्चितं॥ जपपूजाविधानानि यत्किं
चित्स्वकृतानि च॥ गृहीत्वा शापमादाय शिवारौद्रीति निर्जने॥ एकया भुंजते यत्र शिवया
देवभैरव॥ तत्रैव सर्वदेवानां प्रीतिः परमदुर्लभा॥ पशुशक्तिः पक्षिशक्तिः नरश्चात्रि
र्यथाक्रमात्॥ पूजनाद्द्विगुणं कर्म सहस्रगुणं साधयेत्तेन॥ तेन सर्वप्रयत्नेन कर्त्तव्यं पूजनं
महत्॥ राजादिभयमापन्नो देशांतरगमादिके॥ अज्ञानिकमालिनि विचिंत्य बलिमाह
रेत्॥ गृहाण देवि महाभागे शिवे कालाग्निरूपिणि॥ शुभाशुभं फलं व्यक्तं ब्रूहि गृह्ण बलिं
तव॥ एवमुक्त्वार्पयेदात्मा बलिं कुलजनप्रिय॥ यदि नो भुंजते वस्तु तदा नैव शुभं भवे
त्॥ अन्नं यदि न वै तस्य भुंजते तद्दुःखं भवतः॥ एवं ज्ञात्वा महादेव शांतिस्वस्त्ययनं चरे
त्॥ कुलवशं सर्वं सर्वत्र गोपनीयं प्रयत्नतः॥ तंत्रे॥ निर्जने चैव कर्त्तव्यं न चैवं जनसन्नि
धौ॥ बिंबापद्दिपतंगादि दृष्टानि नैव कारयेत्॥ पातालमंडले वापि गह्वरे वा नियंत्रिते॥
निष्कमंडपे वापि कर्त्तव्यं न च सन्निधौ॥ कुलपुष्पं कुलद्रव्यं कुलपूजां कुलाकुलं॥ कुल

चक्रं कुलध्यानं सर्वं यान प्रकाशयेत्॥ प्रकुर्यात्कार्यहानिः स्यात् प्रकाशान्निधनादिकं॥ प्र
काशान्मंत्रनाशः स्यात्प्रकाशात्कुलहिंसनं॥ प्रकाशात्स्तु स्वलानः स्यात् तन्न प्रकाशयेत्कदाचन
पूजाकाले च देवेशि यदि स्यात्पत्र गच्छति॥ दर्शयेद्वै स्ववीर्यं मुद्रां चित्त स्वासं तथा स्तवं॥ प्रका
शाद्यदि गुप्तिः स्यात्तत्प्रकाशान्न दूषणं॥ गोपनाद्यदि गुप्तिः स्यान्न गुप्तिः सा विधीयते॥ क
दाचिदिह हानिः स्युः न च शक्तिः कदाचन॥ यरं पूजानं कर्त्तव्या न च शक्तिः कदाचन॥ ॥इ
ति कुलाचारः॥ ॥अथ प्रातः कृत्यं॥ साधकः प्रातरुत्थाय कुलवृक्षं प्रणम्य च॥ मूलादि ब्र
ह्मरंध्रांतं कुलं ध्यात्वा गुरुं स्मरेत्॥ प्रह्लादानंदनाथाख्यं सनकानंदमेव च॥ कुमारानं
दनाथाख्यं वशिष्ठानंदनाथकं॥ क्रोधानंदः सुखानंदो ज्ञानानंदस्ततः परं॥ बोधानंदम
थाख्यं ध्यायेत्कुलगुरूपरि॥ महारससरस्सोल्लासदयाघूर्णितलोचनः॥ कुलालिंगन
संश्लिष्टघूर्णिताशेषितात्मसा॥ कुलद्रोमोपरि दृपाघूर्णितः करलोचनः॥ एवं कुलगु
रुं नत्वा विसृजेत्कुलवायिकं॥ कुलस्थानं समानीय स्नानीयं तीर्थमाश्रयेत्॥ कुलचक्र

मलो॥ आचांतः कुलदर्भेण सदर्भः कुलपुंवृक्ष॥ कुलपात्रे सहृद्यं च सतिलं सजलं ततः
गृहीत्वा कुलरूपाय प्रीतये स्नानमाचरेत्॥ कृतसंकल्प एवासौ कुलचक्रं जले न्यसेत्
कुलस्नानकमानीय कुलमुद्रां करोति च॥ कुलतीर्थानि तत्रैव समावाह्य शिवात्मकं॥ तं
त्तोयं च त्रिधा च प्रोक्षणं तनोः स्वतंत्रेपि मूलं पठन्स्वहृदि तोयं तु कृष्णयाकेन संशयः॥
ह्नित्वा वारत्रयं देवि आचामेत्साधकाग्रणीः॥ आत्मविद्याशिवैस्तत्वैः स्नानं तु समाचरे
कुलार्णवे॥ कुलस्नाय देवाय त्रिरर्घ्यं तु प्रदाय च॥ देवान् ऋषीन् पितॄंश्चैव तर्पयेत्कुल
धारिण्या॥ ॥अथ दूतियोगो निरूप्यते॥ ॥तत्रादौ विजयास्वीकारः॥ तथा च वि
जयाकल्पे॥ संविदासरमोमर्त्ये संविदेव गरीयसी॥ संविन्मयोगस्ते येह पूजादौ साधको
त्तमैः॥ कर्तव्या च महापूजा करणीयास्तु निश्चितं॥ सर्वत्रैव पूजादौ कर्तव्यः अन्यत्रापि आनं
दद्देवताः॥ सा च॥ ब्राह्मणी क्षत्रिया वैश्या शूद्रा कृष्णपीतकपुष्पमन्ने दे॥ तासां मु
ह्रिस्तु विजयाकल्पे॥ संविदे ब्रह्मसंभूते ब्रह्मपूजा सदानघे॥ भैरव्यानां च तत्सर्वपवित्रा क

वस्त्रवर्दा॥ ॐ ब्राह्म्यै नमः॥ स्वाहा इति मंत्रेण शोधयेत्॥ सिद्धिमूलिकरे देवि मूलबोधप्रबोधि
नि॥ राजपुत्रि वशंकरि शत्रुकंठत्रिशूलिनी॥ ऐं इंद्राण्यै नमः॥ स्वाहा शोधयेदपरां ततः॥
अज्ञानेंधनदीप्ताग्निका ज्ञानरूपिणी॥ आनंदाद्याकृतिं मत्वा सम्यक् ज्ञानं प्रयच्छ मे॥ ह्रीं वै
ष्णव्यै नमः॥ स्वाहा वैष्णवीं च शोधयेत् ततः॥ नमस्ते नि नमस्ते नित्यो ग मार्गप्रदर्शिनी॥ त्रैलो
क्यविजये माता समाधिफलदा भव॥ श्रीं स्वक्रायै नमः स्वाहा स्वक्रां च शोधयेत् ततः॥ ॐ अ
मृते अमृतोद्भवे अमृतवर्षिणिपदं ततः॥ अमृतमाकर्षय द्वंद्वं सिद्धिं देहि ततः परं॥ अमृ
तं मे ततो ब्रूयाद्वशमानय ततः परं॥ द्विठं तोयं मनुः प्रोक्तः सर्वासामिह शोधने॥ प्रत्येकं
न तत्तन्मंत्रेण प्रत्येकं शोधयित्वा अनेन समुदायं शोधयेत्॥ उत्तरतंत्रे॥ मूलमंत्रेण सप्तवा
रं तस्योपरि नियोजयेत्॥ आवाहनादिमुद्रां च धेनुं योनिं ततः परं॥ दिव्यं च नेत्रो दिव्या
लिः स्यात्त्रयं पुरःसरं॥ दिव्यदृष्ट्या पालियातेः पूर्वान्वि विघ्नान्निरस्य तत्॥ सप्तधा तप
येद्ब्रह्मरंध्रे मूलमंत्रं जपेन्मनुं॥ गुरुं पद्मे सहस्रारे तर्पयेत् संकेतमुद्रया॥ ततः स्त्री कुर्यात्

तथा च॥ ऐं वरदपदं ब्रूयाद्वाग्वादिनिपदं ततः॥ मम जिह्वाग्रे स्थिरीति भव सर्वपदं ततः
सत्ववशंकरि स्वाहा मंत्रेण कुर्यान्मुखे॥ तंत्रचूडामणौ॥ विनाहेतुकमासाद्य होमयु
क्तो महेश्वर॥ न पूजा मम संकुर्यान्न ध्यानं नापि चिंतनं॥ तस्माद्दत्वा च पीत्वा च पूजये
त्परमेश्वरं॥ पीत्वेति विजयामेव प्रकरणात्॥ ॥ अथ यजनप्रकारः॥ ॥ तत्र रा
त्रौ प्रहरे गते तांबूलपूरितमुखः सन् कुलनायिकां पूजयेत्॥ उत्तरतंत्रे॥ याममात्रे
गते रात्रौ कुलगेहे ततः पुमान्॥ तांबूलपूरितमुखो धूपामोदसुगंधितः॥ रक्तचंदन
लिप्तांगो रक्तमाल्यानुलेपितः॥ रक्तवस्त्रपरिधानो लोलो हारसग्रहं गतः॥ रक्तमाल्ये
न संवीतो रक्तपुष्पविभूषितः॥ पंचीकरणसंकेतैः पूजयेत् कुलनायिका॥ कुलना
यिका यथा॥ तदुक्तं तंत्रे च॥ नटी कापालिनी वेश्या पद्मकुलीना नापितांगना॥ रजकी रंगिनी
चैव स्वैरिणी शीलवासिनी॥ खटिका मदिका चैव तथा गोपालकन्यका॥ विशेषवैद
ग्ध्ययुता सर्वा एव कुलांगना॥ गुरुत्वादेव न का घृणालज्जाविवर्जिता॥ संगोपनर

ताः प्रायस्तरुणाः सर्वसिद्धिदाः॥ अद्भुताचारसंपन्नाः शीलसौभाग्यशालिनी॥ सदानुष्ठा
ननिरताः सात्त्विकीभक्तिसंयुता॥ कौलुष्यरहितां कुर्यात्सन्नयानरूवसत्कां॥ चातुर्यौदार्य
दाक्षिण्यकरुणादिगुणान्विता॥ रूपयौवनसंपन्नां शीलसौभाग्यशालिनीं॥ सदापरगृहीतां
वायद्वारां केनमांगता॥ अथवा तत्कुलभ्रातां मदमानजनापितां॥ विचित्रांबरगंधेन
रक्तांबरविभूषितां॥ सुगंधिरक्तकुसुमां सर्वाभरणभूषितां॥ तन्वीं हृतां सर्वयत्नेन सु
योजयेत्॥ कुमारीतंत्रे॥ नटीकापालिनी वेश्या रजकी नापितांगना॥ ब्राह्मणी शूद्रकन्या च
तथा गोपालकन्यका॥ मालाकारस्य कन्यापि नव कन्याः प्रकीर्तिताः॥ ब्राह्मणीति ब्राह्मणवि
षयं॥ एवंभूतां यजेत्तां तु प्रसन्नां रसिकीं यदि॥ अंगांगीं विरूपांगीं वा सर्वविकल्पितमानसां
वार्धीयां सैा पापरतां कूर्कारामर्थलोलुपां॥ अनर्कामनतादीनावर्जयेत्साधकोत्तमः॥ अ
र्थार्थाकामतो वापि सोऽस्मादपिचमानरः॥ लिंगयोनिरतो मंत्री रौरवं नरकं व्रजेत्॥ उपवि
ष्टा यदा देवि तदा पुत्री तु कन्यका॥ पूजार्हा च यदा देवी तदा माता न संशयः॥ एवंविधं क

लमानीय तद्वर्त्तनादिकं विधाय तत्तूलिकोपरि नियोजयेत्॥ तथोत्तरतंत्रे॥ तदानीय कुलस
न्मकतद्वर्त्तनमतः परं॥ स्नातं शुद्धदुकूलादि अनुलेपनशोभितं॥ स्वलंकृतांगं तस्यांतिस्व
गतं चासनं तथा॥ निवेश्य तूलिकामध्ये नानापुष्पसुगंधिने॥ चंदनागरुकर्पूरकस्तूरीकुं
कुमादिभिः॥ समाकीर्णे निवेश्याथ पूजयेत्कुलनायिकां॥ ततो भूतशुद्ध्यादिकं विधाय
तत्तत्कुलांगे न्यासं कुर्यात्॥ तद्यथा॥ अंगन्यासकरन्यासौ प्राणायाममतः परं॥ विधा
य मातृकान्यासं कुलांगे विप्रविन्यसेत्॥ ततः पंचमकारमानीय शोधयेत्॥ तत्र धान्याः
शोधनं॥ एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवं॥ कचोद्भवां ब्रह्महत्यां तेनैव नाशयाम्यहं॥ स
र्यमंडलसंभूते वरुणालयसंभवे॥ उमाबीजमये देवि ~~ब्रह्महत्यां व्यपोहय~~ शुक्रशापवि
मुक्तां॥ वेदानां प्रणवो बीजं ब्रह्मानंदमयं यदि॥ तेन सत्येन मे देवि ब्रह्महत्यां व्यपो
हतु॥ ततः ॐ रां रीं रूं रैं रौं रः ब्रह्मशापविमोचितायै देव्यै नम इति दशधा जपेत्॥ एवं
ह्रीं श्रीं क्रां क्रूं क्रौं क्रः क्रमशापं विमोचय अमृतं स्रावय स्वाहा इति दशधा जपेत्॥ ततो मूलमंत्रेण

परिस्रुद्धाजस्त्वादेयतामयं विज्ञापयेदिति द्रव्यशुद्धिः॥ एतद्द्रव्यदानं तु शूद्रायासो वा
तथा श्रीक्रमे॥ न दद्यात् ब्राह्मणो मद्यं महादेव्यै कथंचन॥ वामकामो ब्राह्मणोपि मद्यं मां
सं न भक्षयेत्॥ देव्याः स्वपश्चिमे भागे चक्रपार्श्वे निवेदयेत्॥ एतद्द्रव्यं तु शूद्रस्य नास्यैवं
तु कदाचन॥ विप्रस्य माक्षिकं शुद्धं क्षत्रियस्य तु सार्जकं(?)॥ ब्राह्मणश्च गवां क्षीरं ताम्रे वा
विसृजेन्मधु॥ नारिकेलोदकं कांस्ये सर्वेषां द्रव्यशोधनं॥ क्षत्रियवैश्ययोस्तु गौडी माध्वी
च दातव्ये तत्र तयोरधिकारात्॥ तदभावे पिष्टमधुकल्पविधानं॥ तथा च गोक्षीरं ब्राह्म
णो दद्यात् गवामाज्यं च वा कुजः(?)॥ वैश्यश्च माक्षिकं द्रव्यं शूद्रः पैष्ट्यादिकं पुनः॥ तेन शूद्र
स्याप्यनुकल्पः॥ कुलार्णवे॥ जलं क्षीरं घृतं तक्रं मधुमैरेयमेव वा॥ पौष्टं तरूत्थं धा
न्यसंभवं तत्र निर्मितं॥ सहकारजं वदे वित्रिविधं मुक्तं(?) नेदकं॥ मादकं धनसंज्ञे दात्
वर्ज्यं क्षीरं स्वलोचने॥ ज्ञानिनः संस्कृतं तत्तु महापातकनाशनं॥ कामं दद्याद् जजं रम्यं द्रव्यं
सेव्यं द्विजातिभिः॥ सामान्यकृता देवि सर्वदैव सेव्यते बुधैः॥ एतेन क्षत्रियादिभिः श्च

मादकं सेव्यं॥ मादकस्य पापहेतुकत्वमुक्तं॥ भैरवतंत्रे॥ मद्यं मांसं विना वस्तु यत्किंचि
त् कुलसाधनं॥ शक्त्यै दत्वा ततः शेषं गुरवे विनिवेदयेत्॥ तदनुज्ञां द्विजः कृत्वा ह्यात्मनि
नियोजयेत्॥ तेन क्षत्रियादीनां मुख्यस्य दानेऽधिकारः॥ न तु पाने॥ यत्तु पीत्वा पुनः पीत्वा
पुनर्जन्म न विद्यते॥ भैरवे तंत्रे॥ पाने भ्रांतिर्न येषां स्याद् घृणास्पर्के तेजसा(?)॥ भ्रांतिश्चाप्य(?)
द्वतानां तिपापशंका च मैथुने॥ सम्यक् पूजयेद्देवीं चंडी मंत्रं कथं जपेत्॥ तथा च॥ मदि
रायां मैथुने च जातिवृत्तिं न चाचरेत्॥ एतत्तु वत्पश्चिमपरं॥ तद्व्यक्तरणे जातिचिंतां न
कुर्यात्॥ एतेषां शोधनस्यावश्यकत्वं॥ तथा च॥ संशोधनमनात्रयस्तौ(?) पुमसाधकः
आचार्यसिद्धिहा तस्य तत्क्षणान्नवति सुंदरि॥ मद्येन मुख्यानुकल्पेषु तथा कुलपूजाया
तस्यावश्यकत्वं॥ तथा॥ मद्यमांसं विना देवीं कुलपूजां समाचरेत्॥ तस्यांतरस्य हरत्यस्य
सुकृतं तस्य नश्यति॥ ॥ अथ मांसादिशोधनं॥ ॥ मांसं तु त्रिविधं देयं जलजं स्थ
लजं खेचरं॥ त्रिविधं मांससंप्रोक्तं देवताप्रीतिकारकं॥ मत्स्यं तु त्रिविधं देवं उत्तमम

ध्यमाधमं॥उक्तमं त्रिविधं देवि शालपाठीनरोहितं॥प्रवीनं कंटके हीनं तैलाक्तं राजकला
स्वतं॥देव्याः प्रीतिकरं चैव मध्यमं तच्चतुर्विधं॥हस्राणि तानि सर्वाणि अधमानि विदु
र्बुधाः॥मांसान्नावेनु कल्पः समयाचारे॥लवणार्द्रकपिण्याकगोधूमतिलमासकं॥ल
शुनं तु महादेवि मांसप्रतिनिधिः स्मृतः॥मुद्रापि द्विविधा कुलार्णवे॥कृषरं मंडलाका
रं चंद्रबिंबनिभं शुभं॥चारुपं कमनोहारि शर्करा घृतपूरितं॥पूजाकाले देवतायामु
पैषा परिकीर्तिता॥अगृहधान्यादिकं यद्यच्चर्वणीयं प्रकल्पयेत्॥तेषां संज्ञा रुता मुद्रा म
हामोदप्रदायिनी॥एतेषां शोधनं तु स्वतंत्रे॥ॐ प्रतद्विष्णुरित्यादि मांसं ॐ त्र्यंबकमित्या
दि मीनं ॐ तद्विष्णोरित्यादि मुद्रां॥ ॥अथ परशक्तिशोधनं॥ ॥भावचूडामणौ॥अ
दीक्षितकुलासंगात् सिद्धिहानिः प्रजायते॥तत्कृपाश्रवणे चेत्स्यात्तत्तत्संगमनं यदि
सकुलिनः कथं देवपूज्य यत्परमेश्वरी॥श्रीक्रमे शोधनमनाचयेति॥कौलिकतंत्रे॥अ
त्रिविकारे येछुद्धिमंत्रस्योच्चारबिंदुनि॥बलाद्वा यत्नतो वापि अभिषेकं समाचरेत्॥

अभिषेकमंत्रस्य॥आदौ बाजां समुच्चार्य त्रिपुरायै समुच्चरेत्॥नमः शाहं समुच्चार्य म
इमां शक्तिं ततो वदेत्॥पवित्रीकुरु शब्दांते मम शक्तिं कुरु प्रिये॥वह्निजायां समुच्चार्य
शुद्धिमंत्रः कलोत्ते दृष्टा मायाबीजं समुद्धरेत्॥ ॥इति शक्तिशोधनं॥ ॥तत
शोधितद्रव्यं अर्घे निक्षिपेत्॥श्रीक्रमे कुलविधौ॥पूर्वशोधितद्रव्यं तु गुरुणेनैव संक्षि
पेत्॥स्वतंत्रे॥आद्यद्रव्यमर्घपात्रे निक्षिप्य प्रयतः सुधी॥कुंडगोलोद्भवं द्रव्यं स्वयं
भूकुसुमं तथा॥अर्घं दत्वा महेशानि सर्वसिद्धीश्वरो भवेत्॥सुधया चार्घदानेन यो
गिनीनां भवेत्प्रियः॥महादेवि नवे देवि धाइ प्रशाजितेंद्रिये॥भैरवतंत्रे॥पंचमाकु
परं नास्ति ईशानां सुखमोहयोः॥केवलैः पंचमैर्वापि सिद्धो भवति साधकः॥तेन पंच
मकारेण पूजा कर्तव्या॥ततो घंस्थापनानंतरं पर्यंकमध्ये स्थापयेत्॥कुंडकायनमः
ति आदितद्रूपं पूजयेत्॥अथ पर्यंकमध्ये मंत्रुकमग्रतः॥कालाग्निरुद्रमाधारशक्तिं क
र्मम नंतरं॥वाराहं पृथिवीं कंदं तु नालं केसराण्यपि॥पद्मं च कर्णिकां चैव कमंडलं च प

पूजयेत्॥धर्मं वैराग्यमैश्वर्यं ज्ञानाज्ञानमेव च॥अनैश्वर्यमवैराग्यं अधर्ममपि पू
जयेत्॥ज्ञानविद्यात्मनश्चापि पूजयेत्॥ तथा च तस्योपरि कुलं स्थाप्य पूजानुष्ठानमे
व च॥ गंधपुष्पाक्षतादीनि दत्वा तत्रैव पूजयेत्॥ अपुत्रजिको परि संस्थाप्य पूज
येत्॥ पूजयेत्तत्र तस्योपंचकामान् समाहितः॥ ह्रीं चैव कामराजं च क्लीं कंदर्पं
च मन्मथं॥ध्वं मकरध्वजं स्त्रीं चैव हि मनोभवं॥ ॐकारादिनमोंतं च कुसुमैर्गंधसंयु
तैः॥अर्चयित्वा चतुर्दिक्षु पूजयेत्कुलनायकं॥बटुकं भैरवं चैव दुर्गां च क्षेत्रपालकं
पूजावाक्यं तु॥ॐ ह्रीं कामराजाय नमः॥इत्यादि॥ततः ऐं क्लीं स्त्रीं ह्रीं ध्वं आधारशक्तिश्रीपा
दुकां पूजयामि॥इति तस्योपरि लतादेत्रिकोणं लिखेत्॥तथा च तंत्रांतरे॥योन्यत्र वं कामभ
जं च क्लीं बीजं कामराजकं॥ध्वंमात्मकं ततो दत्वा आधारशक्तिमुद्धरेत्॥श्रीपादुकां
ततो दत्वा पूजयामि वदेत्ततः॥अनेन मनुना तस्मात्रिकोणं च यंत्रमालिख्य साधक
महाप्रेतासनं मध्ये बालां च पूजयेत्ततः॥ततः एवं च ह्सौः सदाशिवमहाप्रेतपमा

सनाय नमः इति पूजयेत्॥ततो बालां च कामेशीं च पूजयेत्॥कुलार्णवे॥गणेशं च कु
लाध्यक्षं दुर्गां लक्ष्मीं सरस्वतीं॥त्रिकोणे पुरुषं पूज्य वसंतं मदनप्रिये॥स्तनयोः पूजयेत्
पश्चात्मुखे तस्याः सुधाकरं॥उत्तरातंत्रे॥मौलौ गणेशं केशाग्रे कुलाध्यक्षं ललाट
के॥दुर्गां चक्षुषोर्लक्ष्मीं रसनायां सरस्वतीं॥इति यत्स्थानवैपरीत्यं तद्दैछिकं॥ह
नार्णवे॥दक्षपादादिमूर्धांतं वाममूर्धादि सुंदरि॥पादांतं पूजयेत्सर्वाः कला वै कामस
मयोः॥श्रद्धा प्रीती रतिश्चैव धृतिः कांतिर्मनोरमा॥मनोहरा मामदनोन्मादिनी तथा
मोहनी दीपनी चैव शोषिणी च वशंकरी॥रजनी चैव देवेशी षोडशी प्रियदर्शना
स्वरषोडशसंयुक्ता एताः कामकला यजेत्॥वाक्यं तु॥अं श्रद्धायै नमः॥आं प्रीत्यै नमः
इत्यादि॥ततश्चंद्रकलाः पूज्याः शिरस्यक्षरलाञ्छिताः॥पूषा रसा च सुमना रतिः प्रीतिस
प्यावृतिः॥ऋद्धिः सौम्या मरीचिश्च अंशुमालिनी॥अंगिरा वशिनी चैव छायागार
पूर्णमंडला॥तथा तु धृतिमते चैव कलाः सोमस्य षोडश॥अंगिरास्थानेमदिरावापि

उत्तरातंत्रे॥ स्वरैरेव प्रपन्नाहि सर्वकार्यार्थसिद्धये॥ ललितातंत्रे॥ नगेतरा ये विज्ञेयान
आत्तिस्थः प्रवाहिका:॥ एका तु वाहिका चाद्रि सौरिश्चान्या च वाहिका॥ आग्नेयी चापरा ज्ञेय
पूजयेत्तास्तु साधक॥ मंत्रं बुध्यवह्नी चांडी सा पुष्पं स्रवति मानवी॥ बीजं स्रवति चाग्नेयी
तास्तु नामभिरर्चयेत्॥ बीजवाद्यैर्नमो युक्तैः पूजयेत्सुप्रसन्नधीः॥ तेन ऐं चांड्यै नमः॥ हि
सौर्य्यै नमः॥ ऐं आग्नेय्यै नमः॥ उत्तरातंत्रे॥ पूजयेन्मदनागारे रक्तचंदनचर्चितं॥ नग
मालामनुं प्रोच्य त्रितारानंतरं तथा॥ ऐं ह्रीं श्रीं ऐं गं धं क्लिन्ने ततः परं॥ स्रवणीति नगान
तिं च रामानयमेततः॥ क्लीं ह्रीं क्लीं धं नगमालिन्यै नमः॥ ऐं ह्रीं श्रीं इति मंत्रेण गंधाद्यै
स्तामभ्यर्चयेत्॥ ततस्तत्रैव मूलं पूजयेत्॥ तंत्रांतरे॥ इहाप्यावाहनेनास्ति ज्ञीवमासम
हेश्वरि॥ अथैवं च विधानेन तां षोडशोपचारकैः॥ इह देवी प्रपन्नाप्य सर्वसिद्धीश्वरो
भवेत्॥ ततः स्वलिंगं पूजयेत्॥ तथा च॥ अर्चयेद्गंधपुष्पाद्यैः स्वशिवं तदनंतरं॥
मूलमंत्रं ततः॥ ॐ नमः शिवाय ततः परं यजेत्तत्पुरुषाघोरसद्योजाते ~~[illegible]~~

रास्वंसके॥ श्रीविद्यायां तु॥ तारं च भुवनेशानीं तथा त्रिपुरसुंदरीं॥ नमः शिवाय विद्येयं द
शार्णपरिकीर्त्तिता॥ इति विशेषः॥ सुंदरी सुंदरी सुंदरी त्रिकूटं तत्पुरुषादिमंत्रस्तु पूर्वो
क्तः॥ निवृत्तिं च प्रतिष्ठां च विद्यां च तदनंतरं॥ शांतिं च शांत्यतीतां चैव तदंगे तदनंतरं॥ सम
य विद्यामुखाय त्रिकोणं चैव पूजयेत्॥ उत्तरतंत्रे॥ अवधूतेश्वरी कुर्यात्कामाख्यासमया
मपि॥ वज्रेश्वरीं कालिकां च तथा दिक्करवासिनीं॥ महाचंडेश्वरीं तारां पूजयेदत्र साधकः॥
तदनुज्ञां ततो लब्ध्वा दत्वा तां वस्त्रमेव च॥ शिवं च तत्र निक्षिप्य गाजं तं शारथ्यमुद्रया॥ ध
र्माधर्महविर्दीप्ते आत्माग्नौ मनसा स्रुचा॥ सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं॥ स्वा
हांतो मनुमहामंत्रः आरंभे परिकीर्त्तितः॥ ततो जपेद्धृक्रियं गच्छद्विद्यां त्रिभुवनेश्वरीं॥
जपेदिति अन्यत्र तरस हस्तं शांतं वा अर्द्धलोमं जपेत्॥ ॐ स्वाहांतो यं महामंत्रः ऋक्सागेप्र
कीर्त्तितः॥ x प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनीस्रुचा॥ धर्माधर्मकलास्नेहपूर्णम
ग्नौ जुहोम्यहं॥ x विशेषस्तु ज्ञानार्णवे॥ शिवशक्तिसमायोगो यो योगः एव न संशयः॥

ह्रीत्कारो मंत्ररूपं च वचनं स्तंभनं नयेत्॥ आलिंगनं तु कस्तूरी कर्पूर चंदनं नयेत्॥ नख
दंष्ट्राहतादीनि पुष्पाणि विविधानि च॥ सचनं तर्पणं विद्धि बीजं प्रतो विसर्पणं॥ कुलार्ण
वे॥ आलिंगनं चुंबनं च स्तनयोर्मर्दनं तथा॥ दंशनं स्पर्शनं चैव विकारं लिंगघर्षणं॥
प्रवेशस्थापनं शक्तेर्नव पुष्पाणि साधने॥ यामले॥ संयोगाज्जायते सौख्यं परमानंद
लक्षणं॥ कुलामृतं प्रयत्नेन गृह्णीयाद्दुर्लभं नरः॥ तेनामृतेन दिव्येन सर्वे तुष्टा भवंति
हि॥ यत्कामं कुरुते मंत्री तत्कुलो देव सिध्यति॥ ज्ञानार्णवे॥ कुलद्रव्यं च संशोध्य मंत्री यद्वा
क्तिमयं प्रिये॥ बीजामृतं परं ब्रह्मरूपं निर्वृत्तिप्रसुंदरि॥ अर्घपात्रामृतेर्यद्वा निर्विकल्पः
स्वयं भवेत्॥ श्रीविद्याक्रममाश्रम्य परं ब्रह्ममयो भवेत्॥ श्रीविद्योपलक्षणं॥ इति ते कथि
तं ज्ञानं सारं रम्यं वरानने॥ सविकल्पस्य सततं पापं नो जायते नरः॥ विचिकित्सापरो मं
त्री जायते गुरुतल्पगः॥ अत एव वरारोहे निर्विकल्पः सदा भवेत्॥ समयाचारे॥ कुला
मृतं समादाय तदर्धं निक्षिपेद्बुधः॥ तदर्धेन समाराध्य पूजारीं समापयेत्॥ कुलाम

तं शोधितं॥ शोधनमंत्रस्य क्रमः॥ ॐ अमृते अमृतोद्भवे अमृतवर्षिणि प्रिये देवि परं
कुलपापं प्रमोचय पदद्वयं॥ अमृतं श्रावय द्वंद्वं अमृतं कुरु युग्मकं॥ स्वाहापदं ततो दे
विशुद्धिर्भवेत्प्रिये॥ शुक्लैरक्ततंदुलैः सुगंधिकुसुमैर्युतैः॥ अर्घं कल्पेश्च देवेशि
योनौ देवीं प्रपूजयेत्॥ उत्तरतंत्रे॥ धूपदीपैश्च नैवेद्यैर्विविधैः कुलसाधकः॥ विधाय
वंदितां तां च तदुच्छिष्टं स्वयं चरेत्॥ शिवागमे॥ अविचार्य दशा कोच्छिष्टं पिबेच्चक्रेश्वरो यदि
घोरं च नरकं याति कुलमार्गस्थितेतरः ध्रुवं॥ तस्माद्विचार्य यत्नेन तदुच्छिष्टं भवेत् सुधीः॥
आनंदं कारयेद्वीरस्तत्वं निर्भ्रांतितः पिबेत्॥ ॥इति कुलपूजा॥ ॥यामले॥ नैवेद्यं
त्रिपुरादेव्या वांछंति विविधा बुधाः॥ तस्माद्विस्तरश्रेष्ठं ब्राह्मणो विल्लवोऽपि च॥ महाकृष्ण
यस्त्वर्ध्य गणेशाय यमाय च॥ वह्नये वरुणायैव वायवे धनदाय च॥ ईशानाय महादेवि
साधकाय प्रदापयेत्॥ त्रिपुरे सूपलक्षणं॥ ॥अथ वीराणां पुरश्चरणं निरूप्यते॥
तत्रादौ परकीयनारीं दीक्षितां यथाशक्ति पूजयेत्॥ तथा च कुलचूडामणौ॥ पुरश्चरणका

लेवुपरयोषां प्रपूजयेत्॥ दीक्षितां वस्त्रभूषाद्यैर्भोज्यैः पायससंभवैः॥ आरंभकल्पेतु॥
नियतं स्वयं पक्वान्नं तेन नानाविधं पिष्टकं च नानारससमन्वितं॥ दुग्धं दधि घृतं तक्रं नव
नीतं सशर्करं॥ उपनारखंडमात्रं च नानाविधरसायनं॥ नारिकेवलं कपित्थं च नागरं
गेसुदर्शनं॥ निंबाकं बीजपूरं च दाडिमीफलमुत्तमं॥ नानारसफलं चैव नानागंधविले
पनं॥ चंदनं मृगनाभिं च श्रीखंडं नवपल्लवं॥ टंकनं लोध्रकं चैव वज्रलजं वनजं तथा॥ ना
नारीलसमुद्भूतं नानालंकारभूषितं॥ भूनागेहि समानीय वर्णभेदकविशोधितं॥ भू
मूतीकरणं कृत्वा शक्तौ चाभिमुखी नयेत्॥ ब्राह्मणी क्षत्रिया वैश्या शूद्रा च कुलभूषणा॥
वेश्या नापितकन्या च रजकी च नटी तथा॥ विशेषवेदश्यायुताः सर्वा एव कुलांगनाः॥
दीक्षिता दाराशक्तीः श्रीक्रमेण संस्थापयित्वा ऽर्घोदकेन तां प्रोक्ष्य वमिति धेनुमुद्रयामृतीकृ
त्य अष्टशक्तीरूपभेदं कृत्वा ऽस्माद्य शक्तीनां संज्ञाभिर्नामकरणं कृत्वा क्रमेण आ
सनादिकं दद्यात्॥ तदुक्तं तत्रैव॥ अष्टकन्यारूपभेदं विज्ञोकमवचेहितं॥ ब्राह्मणाद्य

शक्तीनां नाममंत्रैः कृतसंज्ञकाः॥ आसनं प्रथमं दत्वा स्वागतं च पुनः पुनः॥ अर्घ्यं पाद्यं च
पानीयं मधुपर्कं जलं ततः॥ स्नापयेद्गंधपुष्पाद्यैः केशसंस्कारमेव च॥ धूपयित्वा ततः
केशान्कौशेयं च निवेदयेत्॥ ततस्तानांतरे पीठमास्तीर्य पादुकाद्यं॥ दत्वा तत्र समा
सीना नानालंकारभूषणैः॥ भूषयित्वानुलेपं च गंधमाल्यं निवेदयेत्॥ ततः स्मरतोश
क्तिं यथाक्रमेण आह्लत्यादिरूपं समावाह्य जीवन्यासादिकं कृत्वा गंधपुष्पधूपदीपा
न्नव्यंजनादिकं दत्वा तासां सम्यक्कलैः क्रमेण स्तोत्रं पठेत्॥ तदुक्तं तत्रैव॥ तां तां शक्तीस
मावाह्य मूर्ध्नि तासां समानयेत्॥ तोयं मं ऽलमध्ये तु स्वर्णपात्रे स्वरीमने॥ चर्व्यं चोष्यं
लेह्यं पेयं तोयं मंत्रहं निवेदयेत्॥ अदीक्षितानां सम्येघुकर्णैर्घृतनस्तोत्रं समाचरेत्॥
मातर्देवि नमस्तेस्तु ब्रह्मरूपधरेनघे॥ कृपयाहर मे विघ्नं मंत्रसिद्धिं प्रयच्छ मे॥ माहेश्वि
वरदे देवि परमानंदरूपिणि॥ कृपयेत्यादि॥ कौमारी सर्वविद्येशि कुमारक्रीडनेववने॥
कृपयेत्यादि॥ विश्वरूपधरे देवि वनितास्तवयाहिनी॥ कृपयेत्यादि॥ वाराही वरदे दे

विदंष्ट्रोधृतवसुंधरे॥ कृपयेत्यादि॥ शाकंरूपधरे देवि शाकादिसुरपूजिते॥ कृपयेत्या
दि॥ चामुंडे मुंडमालास्त्रक्चर्चिते विघ्ननाशिनी॥ कृपयेत्यादि॥ महालक्ष्मि महोत्साहे दे
त्यसंतापनाशिनी॥ कृपयेत्यादि॥ नितिमात्रं नये देवि नितिमात्र बहिष्कृते॥ एवं बकुवि
धे देवि विश्वरूपे नमोस्तु ते॥ एतत्स्तोत्रं पठेद्यस्तु कुमारिं जे बुसंयुतः॥ विद्याधाँयस
मा जोक्त तस्य विघ्नं न जायते॥ आचम्यमुखवासादि तांबूलं च निवेदयेत्॥ ततो दद्यात्
पुनर्माल्यं गंधचंदनपंकिलं॥ विसृज्य प्रदद्यात् लीकृत्य वरं प्राप्य सुखी भवेत्॥ अमा
दिन गच्छेत्तु निजज्ञानुज्ञा॥ अथ ज्ञात्वा तु ज्ञानी वा माता वा तत्र सपत्नीका॥ पूर्वा नाविपरा
श्रमदंशा योषितो मता॥ सर्वा माता एकेन राज्ञा पूजनीया प्रयत्नतः॥ एकं चेत् कुलरा
त्रकः पूजार्हस्तत्र नैरव॥ सर्व एव सुराः पूज्याः सत्संब्रह्मशिवादयः॥ एका चेद्युवती त
त्र पूजिता चावलोकिता॥ सर्वा एव परा देव्यः पूजिता कुलनैरव॥ आदावंते च मध्ये च
नृत्यत्त्रौविशेषतः॥ न पूजयति चेत्तां तां तदा विघ्नैर्न लिप्यते॥ पूर्वार्जितं फलं नास्ति वा

कृत्वा परजन्मनि॥ तस्मात्सर्वप्रयत्नेन पूजयेत् कुलसुंदरी॥ एवं क्रमेण लक्षणं पारोम
ध्येतेचरात्रिं च पूजयेत्॥ अन्यमिलुपलक्षणं॥ ततो रात्रौ पंचमेन देवीं संपूज्य रहस्यमा
लयाकुलयुक्तो गुरुं शिरसि हृदि देवीं च ध्यात्वा शिवोहमिति तन्मावयन् जपं कुर्यात्॥
मुंडमालायां॥ गते तु प्रथमे यामे तृतीयप्रहरावधि॥ निशायां च प्रदातव्यं रात्रिशेषे
जपेन्नाच॥ स्वतंत्रे॥ रात्रौ मांसाशने देवीं पूजयित्वा विधानतः॥ ततो नग्नां स्त्रियं नग्नो
रमन्नक्षेद्युतोपि वा॥ जपेल्लक्षं ततो देवी होमयेद्कुलदिंधने॥ योनिकुंडे स्थिते सर्पिर्मांस
मत्स्यायुतं मुदं॥ दशांशं तर्पयेद् द्रव्यैर्मांसमिश्रैस्तु साधकः॥ तर्पणस्य दशांशेन अतिथि
न्भोजयेत्सदा॥ दशांशेनाथ योजयेत्साधुसाधकं देवताप्रियं॥ द्रव्यं मांसं च मत्स्यं च चर्वणं तथा
दापयेत्॥ ततस्तु तोषयेत् ज्ञानगुरुं स्वर्णादिभिः प्रिये॥ एतत्कं पात्र महादेवि मंत्रः सिध्यति
निश्चयं॥ ॥इति कुलपुरश्चरणं॥ ॥अथ योगिनीनां [illegible]॥ ॥
तंत्रांतरे॥ स्नायाच्च विमले तीर्थे पुष्करे हृदयाश्रिते॥ बिंदुतीर्थे च यः स्नात्वा पुनर्जन्म न वि

यते॥ इडासुषुम्णोः शिवतीर्थकेस्मिन् ज्ञानांबुपूर्णे वहतः शरीरे॥ ब्रह्मांबुभिः स्नाति तयोः
सदा यः किं तस्य गांगैरपि पुष्करैर्वा॥ इति स्नानं॥ ॥अथ संध्या॥ ॥शिवशक्त्योः समायो
गो यस्मिन् काले प्रजायते॥ सा संध्या कुलनिष्ठानां समाधिस्थैः प्रजायते॥ तर्पणं॥ तर्प
णं तु मूलाधारात् सोमसूर्याग्निरूपिणीं॥ कुंडलिनीं समुत्थाप्य परबिंदुनिर्गलितसुधयामृ
तेन देहदेवतां तर्पयेत्॥ तदुक्तं ज्ञानवचंद्रेश्वरे॥ चंद्रार्कमिलसंघट्टाज्जनितं यत्परामृ
तं॥ तेनामृतेन दिव्येन तर्पयेद्देहदेवतां॥ ब्रह्मरंध्रादधोभागे यच्चांद्रपात्रमुत्तमं॥ कु
लागारेण संपूर्णं तर्पयेत्तेन खेचरीं॥ ॥अथ ध्यानं॥ ॥शिरःपद्मस्थं तदंतःस्थचंद्रमौ
स्करमध्यगं॥ महाहंसमेकं यं कृत्वा पूर्णं तिष्ठति योगिराट्॥ अथवा॥ निरालंबपदे स्वमे
यत्तेजस्तु प्रजायते॥ तज्जन्ममध्ये संनित्यध्यानमेतद्धि योगिनां॥ तज्जन्मपि वितंतः करणस्थं
अभ्यंतरपूजा॥ मूलाधारात् कुंडलिनीमुत्थाप्य हृदयांबुजं मंडलेनीताकर्णिकांतर्गतचंद्र
सुधाधारया मूलमंत्रं स्मरन् संसिंचेदिति॥ अर्च्यते यत्र विषयैः पुष्पैस्तत्कुलं तन्मयो भवेत्

भासस्तन्मयता बुद्धिः सोहंभावेन पूजयेत्॥ तन्मयेतितदेकत्वज्ञानं सोहमिति मंत्राक्षरा
णि चिच्छक्तौ प्रोच्चानि परिभावयेत्॥ नामेव परमव्योम्नि परमामृतवर्षिहिते॥ दर्शयित्वा तस
ज्ञावं पूजा होमादिनिर्विनेति॥ ॥अथ होमः॥ ॥आत्मानमपरिछिन्नं विभाव्यांतरा
त्मांतरापरमात्माज्ञानात्मास्वरूपं चतुरस्रं चित्कुंडमानंदमेखलायतं अर्द्धमात्राकृ
पातिर्योनिर्मूविते नान्नो ध्यात्वा तन्मनस्वज्ञानाग्नौ जुहुयात्॥ यथा मूलांते चैतन्यरूपा
त्मनो हविषा मनसा स्रुचा ज्ञानप्रदीपिते नित्यमक्षयवह्नौ जुहोम्यहं॥ स्वाहानेन प्रथमा
कृतिं मूलांते धर्मं हविर्दीप्यते॥ आत्माग्नौ मनसा स्रुचा॥ सुषुम्नावर्त्मना नित्यमक्षवृत्ति
र्जुहोम्यहं॥ स्वाहा इति द्वितीयाहुतिं॥ मूलांते॥ प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनीस्रु
चा॥ धर्माधर्मकलास्नेहपूर्णमग्नौ जुहोम्यहं स्वाहा॥ अनेन तृतीयाहुतिं दद्यात्॥ ततो मू
लांते अंतर्निरंतरनिबिंधनमेधमाने मायांधकारपरिपंथिनि संविदग्नौ कस्मिंश्चि
दद्भुतमरीचिविकाशेऽस्मिन् जुहोमि वसुधादि शिवावसानं स्वाहा॥ इत्यंतर्यजनं कृत्वा

साक्षाद्ब्रह्ममयो भवेत्॥ न तस्य पापपुण्यानि जीवन्मुक्तो भवेद्ध्रुवं॥ अयं त्वं तत्र योगीन्द्र
निजामेव॥ ॥अथातः पंचमकारपूजनप्रकारः॥ ॥तदुक्तं कुलार्णवे॥ अ
त्र योगी सुरा शक्तिः शिवो मांसं तद्भोक्ता भैरवः स्वयं॥ तयोरैक्यसमुत्पन्न आनंदो मो
क्ष उच्यते॥ आनंदो ब्रह्मणो रूपं तच्च देहे व्यवस्थितं॥ तस्याभिव्यंजकं द्रव्यं योगिभिस्ते
न पीयते॥ लिंगत्रयविशेषज्ञः षड्विधानरसभेदतः॥ पीठस्थानानि चागत्य महापद्म
वनं व्रजेत्॥ आमूलाधारत्याब्रह्मरंध्रं गत्वा पुनः पुनः॥ चिच्चंद्रकुंडलीशक्तिसामर
स्य महोदयः॥ व्योमपंकजनिस्यंदसुधापानरतो नरः॥ मधुपानमिदं देवि चेतनं म
द्यपानकं॥ पुण्यापुण्यपशून् हत्वा ज्ञानखड्गेन योगवित्॥ परे लयं नयेच्चित्तं पलाशीति
निगद्यते॥ मानसादिंद्रियगणं संयम्यात्मनि योजयेत्॥ मांसाशी स भवेद्देवि इतरे
प्राणघातकाः॥ परशक्त्यात्ममिथुनं संयोगानंदनिर्भरा॥ मुक्तास्ते मैथुनं तस्मादितरे स्त्री
निषेवकाः॥ ॥अथ कुमारीपूजा॥ ॥तत्र कुमारीनिर्णयो यामले॥ एकवर्षा भ

वेत्संध्या द्विवर्षा च सरस्वती॥ त्रिवर्षा च त्रिधामूर्तिश्चतुर्वर्षा च कालिका॥ सुभगा पंच
वर्षा तु षड्वर्षा चोमा भवेत्॥ सप्तभिर्मालिनी साक्षादष्टवर्षा तु कुब्जिका॥ नवभिः का
लसंकर्षा दशभिश्चापराजिता॥ एकादशे च रुद्राणी द्वादशाब्दे तु भैरवी॥ त्रयोदशे म
हालक्ष्मी द्विसप्ता पीठनायिका॥ क्षेत्रज्ञा पंचदशभिः षोडशे चांबिका मता॥ एवं क्रमेण सं
पूज्या यावत्पुष्पं न विद्यते॥ प्रतिपदादिपूर्णांतं वृद्धिभेदेन पूजयेत्॥ महापर्वसु सर्वेषु
विशेषाच्च पवित्रके॥ महानवम्यां देवेशि कुमारीश्च प्रपूजयेत्॥ ॥तत्र क्रमः॥ ॥
कुमारीमानीय ऐंकारेण पुष्पाणि हस्ते मंत्रेण धूपदीपादिकं च दद्यात्॥ ततः षडंगेन म
न्त्रयेत्॥ तद्यथा॥ ऐं ह्रीं श्रीं ह्रौं हैं कुलकुमारिके हृदयाय नमः॥ ऐं हैं हैं हैं श्रीं ऐं स्वाहा शिर
से स्वाहा॥ ऐं ह्रीं शिखायै वषट्॥ ऐं कुलवागीश्वरवागीश्वरि कवचाय हुं॥ ऐं कुलेश्वरि
नेत्रत्रयाय वौषट्॥ ह्रीं अस्त्राय फट्॥ ततः ऐं सिद्धिप्रदायाय पूर्ववक्त्राय नमः॥ ऐं न्याय
उत्तरवक्त्राय नमः॥ ऐं ह्रीं श्रीं कुब्जिके पश्चिमवक्त्राय नमः॥ ऐं कालिके दक्षिणवक्त्राय

नमः॥ याज्ञवेन पुनः ह्रीं नं मायाबीजं गुणहकं श्रियोबीजं येयो बाधः॥ ह्रूं बीजे रविसंस्
यः॥ भैरवेन तु बीजे न स्वत्वममरादिभिः॥ कुमारिकाद्यहं नाथ स्वरात्वं हि कुमारिका॥ अ
नेरसात्तं वापि एकां वापि प्रपूजयेत्॥ पूजिताः प्रतिपूजंते निर्दहंत्यवमानिताः॥ कुमार
योगिनी साक्षात् कुमारी परदेवता॥ असुरा क्रूरनागाश्च ये ये दुष्टग्रहा अपि॥ भूतवेता
लगंधर्वा डाकिनी यक्षराक्षसाः॥ याश्चान्या देवताः सर्वाः भूर्भुवः स्वश्च भैरवाः॥ पृथि
वी निसर्वाणि ब्रह्मा विष्णुश्च ईश्वरः॥ संतुष्टा यस्य तुष्टाश्च तुष्टा यस्य प्रपूजयेत्॥ विधि
युक्तं कुमारीं निर्जोक्ष्येच्चैव भैरवीं॥ पाद्यमर्घ्यं तथा धूपं कुंकुमं चंदनं शुभं॥ भक्तिभा
वेन संपूज्य कुमारीभ्यो निवेदयेत्॥ प्रदक्षिणात्रयं कुर्यात् नमो दीप स्थिते तथा ततः॥ पश्चा
द्दक्षिणा देया रत्नं तस्वर्णनीलिकैः॥ कुमारी भोदयात् मात्रं पाविवाहयेत्स्वयं कं
मां ब्रह्महत्यां विनश्यति॥ गोहत्यां स्त्रीहत्यां च सर्वपापं विनश्यति॥ योयश्च पुष्पका शे
चकन्यादानं प्रकल्पयेत्॥ भुक्तिमुक्तिफलं तस्य सौभाग्यं सर्वसंपदः॥ रूपलोकेयसेन्द्र

मंत्रिनेत्रीन गवान्दहर॥ वह्निकोटिसहस्राणि अश्वमेधफलानि च॥ तत्फलं लभते स
योयस्तु कन्यां विवाहयेत्॥ वालुकां सागरे यैर्यं तावद्वर्षसहस्रकं॥ एकैकं कुलमुद्धृत्य रु
द्रलोके महीयते॥ कन्यादानं तु तद्देवताप्रीतये इति संप्रदायः॥ वस्तुतस्तु तत्तद्दिव्याः
कन्यायास्तत्तद्रूपा शिवरूपत्वेन संप्रदानीयेति नाम्न दद्यादिति रहस्यार्थः॥ ॥अथ
योगप्रक्रिया॥ ॥गौतमीये॥ गौतम उवाच॥ देवदेव योगयुक्तो मन्द भोगानुभवदर्श
कं॥ सांख्ययोगविरोधस्तु कर्मयोगनिषेधक॥ विना योगं न सिद्धिः स्यात् कुंडली चक्रमः प्रभो
मूलपद्मे कुंडलिनी ध्यावन्निरूपिता प्रभो॥ तावत्किंचिन्न सिध्येत मंत्रयंत्रार्चनादिकं॥
योगक्रियादिसंस्कारे वकुंभिः पुण्यसंचये॥ तदा प्रसादमायाति मंत्रयंत्रार्चनादयः
शिवविष्णुहरिलोके घहेश्वर्यसमन्वित॥ योगयोगाद्भवेन्मुक्तिर्मंत्रसिद्धिरखंडिता॥ सि
द्धमंत्रो परावासिरिति शास्त्रविनिश्चयः॥ तस्मात्काम्यं परं योगं कथयस्व मुनीश्वर॥
मुक्तालायेन विहरे स्वर्गे मर्त्ये रसातले॥ जीवन्मुक्तोश्च देहांते परं निर्वाणमाप्नुयात्॥ न

रद उवाच॥ कथयामितवस्नेहात् योगं योग्योसि गौतम॥ देहिनि ज्ञित्वा तत्त्वयोगिनो रागेन कथ्यते॥ एकत्वं जीवात्मनो वाक्यं योगं योगविशारदाः॥ तत्समुहासमासेन तां योगवि धुं करा मुने॥ कामक्रोधलोभमोहमदमात्सर्यसंज्ञकाः॥ योगांगैरेतिज्जित्वाता द्योगि नो योगमाप्नुयुः॥ यमनियममासाद्य प्राणायामौ ततः परं॥ प्रत्याहारं धारणाख्यं ध्या नं सार्द्धं समाधिना॥ अष्टांगान्याहुरेतानि योगिनो योगसाधने॥ अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवं॥ क्षमा धृतिर्मिताहारः शौचं चेति मिता दश॥ तपः संतोष आस्तिक्यं दा नं देवस्य पूजनं॥ श्रवणं कीर्तनं केचिज्जुह्वमितिश्च जपो हुतं॥ दशैते नियमाः प्रोक्ताः योग शास्त्रविशारदैः॥ ॥ आसनानि प्रोक्तानि॥ ॥ इडया कर्षयेद्वायुं बाह्यं षोडशमात्र या॥ धारयेत्पूरितं योगी चतुःषष्ट्या तु मात्रया॥ सुषुम्नामध्यगं सम्यक्द्वात्रिंशन्मात्रया शा नैः॥ नाड्या पिंगलया चैनं रेचयेद्योगवित्तमः॥ प्राणायाममिमं सम्यग्॥ स्वयं स्वयं क्रमात्त स्यम्यक्त्वेन समाचरेत्॥ मात्रावृद्धिक्रमेणैव सम्यक्द्वादशषोडश॥ जपध्यानार्चनादि

भिः युक्तं सगर्भं तं विदुर्बुधाः॥ तदपेतं विगर्भं च प्राणायामं परं विदुः॥ क्रमादभ्यासतः पुं सो देहे स्वेदोद्गमोऽधमः॥ मध्यमः कंपसंयुक्तोत्तमि स्थागः परीमतः॥ उत्तमस्य गुणाव्या प्तिर्यावछिन्नमिष्यते॥ इंद्रियाणां विचरतां विषयेषु विनिग्रहं॥ तत्याचदारूणं तेभ्यो प्रत्याहारो विधीयते॥ अंगुष्ठगुल्फजानूरूसीमनीलिंगनाभिषु॥ हृदि ग्रीवा कंठदेशे तु लंबिकायां तथा नसि॥ भ्रूमध्ये मस्तके मूर्ध्नि द्वादशांते यथाविधि॥ धारणं प्राणमरुतो धारणेति निगद्यते॥ समाहितेतिमनसा चेतसांतरवर्तिना॥ आत्मन्यवस्थितदेवानां ध्या नं ध्यानमिहोच्यते॥ समत्वभावना नित्यं जीवात्मपरमात्मनोः॥ समाधिमाहुर्मुनयः प्रो क्तमष्टांगलक्षणं॥ इत्यादिकथितं विप्र कामादिबहुनाशनं॥ इदानीं कथयेते हं मंत्रयोग मनुत्तमं॥ विश्वशरीरमित्युक्तं पंचभूतात्मकं मुने॥ चंद्रसूर्याग्नितेजोभिर्जीवब्रह्मैक्यरूप कं॥ तिस्रः कोट्यस्तदर्द्धेन शरीरे नाड्यो मताः॥ तासु मुख्या दश प्रोक्तास्तासु तिस्रो व्यवस्थि ताः॥ प्रधाना मेरुदंडेयं चंद्रसूर्याग्निरूपिणी॥ इडावामे स्थिता नाडी शुक्ला तु चंद्ररूपिणी॥

शक्तिरूपा च सा नाडी साक्षादमृतविग्रहा ॥ दक्षिणे पिंगलानाम्ना तु पुंरूपा सूर्यविग्रहा ॥ मेरुम
ध्ये स्थिता या तु मूलादारंध्रविग्रहा ॥ सर्वतेजोमयी सा तु सुषुम्णा राकरूपिणी ॥ तस्य मध्ये
विचित्राख्याऽमृतस्राविणी शुभा ॥ सर्वतेजोमयी सा तु योगिनां हृदयंगमा ॥ विसर्गविं
दुपर्यंतं व्याप्य तिष्ठति तत्त्वतः ॥ मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके ॥ मध्ये स्वयंभु
लिंगं तु कोटिसूर्यसमप्रभं ॥ तदूर्ध्वे कामबीजं तु कलाशांतीन्दुनादकं ॥ तदूर्ध्वे तु शिखाकारा
कुंडली ब्रह्मविग्रहा ॥ तद्बाह्येऽग्निसमप्रख्यं षड्दलं हीरकप्रभं ॥ बादिलांतं षड्वर्णेन यु
क्तं स्वाधिष्ठानसंज्ञकं ॥ मूलमाधारषट्कानां मूलाधारं ततो विदुः ॥ स्वशब्देन परं लिंगं स्वाधि
ष्ठानं ततो विदुः ॥ तदूर्ध्वे नाभिदेशे तु मणिपूरं महत्प्रभं ॥ मेघाभं विद्युदाभं च वह्नितेजोम
यं ततः ॥ मणिवद्भिन्नं तत्पद्मं मणिपूरं तथोच्यते ॥ दशभिश्च दलैर्युक्तं डादिफांताक्षरान्वितं ॥
शिवेनाधिष्ठितं पद्मं विश्वालोकनकारकं ॥ तदूर्ध्वेनाहतं पद्ममुद्यदादित्यसन्निभं ॥ कादि
ठांताक्षरैरर्कपत्रैश्च समधिष्ठितं ॥ तन्मध्ये बाणलिंगं तु सूर्यायुतसमप्रभं ॥ शब्दब्रह्म

मयं शब्दं नाहतं तत्र दृश्यते ॥ तेनाहताख्यं पद्मं तन्मुनिभिः परिकीर्त्यते ॥ आनंदसदनं
तत्तु पुरुषेणाधिष्ठितं परं ॥ तदूर्ध्वं तु विशुद्धाख्यं दलषोडशपंकजं ॥ स्वरैः षोडशकैर्युक्तं
धूम्रवर्णं महत्प्रभं ॥ विशुद्धिं तनुते यस्माज्जीवस्य हंसलोकनात् ॥ विशुद्धं पद्ममाख्या
तमाकाशाख्यं महाद्भुतं ॥ आज्ञाचक्रं तदूर्ध्वं तु आत्मनाधिष्ठितं परं ॥ आज्ञासंक्रमणं तत्र
गुरोराज्ञेति कीर्तितं ॥ कैलासाख्यं तदूर्ध्वे तु बोधिनी तु तदूर्ध्वतः ॥ एवं त्वेतानि चक्राणि प्रो
क्तानि तव सुव्रत ॥ सहस्राराम्बुजं बिंदुस्थानं तदूर्ध्वमीरितं ॥ इत्येतत्कथितं सर्वं योगमा
र्गमनुत्तमं ॥ आदौ पूरकयोगेन स्वाधारे योजयेन्मनः ॥ गुदमेढ्रांतरे शक्तिं तामाकुं
च्य प्रबोधयेत् ॥ लिंगभेदक्रमेणैव बिंदुचक्रं च प्रापयेत् ॥ शंभुना तां परां शक्तिमेकीभा
वं विचिंतयेत् ॥ तदुत्थितामृतं यत्तु द्रुतलाक्षारसोपमं ॥ पाययित्वा च तां शक्तिं कुलाख्यां
योगसिद्धिदां ॥ षट्चक्रदेवतास्तत्र संतर्प्यामृतधारया ॥ आनयेत्तेन मार्गेण मूलाधा
रं ततः सुधीः ॥ एवमभ्यस्यमानस्य अहन्यहनि मारुतं ॥ जरामरणदुःखाद्यैर्मुच्यते

चबंधनात्॥ पूर्वोक्ता दूषिता मंत्राः सर्वे सिध्यंति नान्यथा॥ इत्येतत्कथितं विप्रयामो धारण-
मुत्तमं॥ इदानीं धारणारूपां शृणुष्वावहितो मया॥ यदि कालाघनविच्छिन्नेरूपे चेतो नि-
धीयते॥ तन्मयीभवति क्षिप्रं जीवब्रह्मैक्ययोजनात्॥ अथवा समलं चित्तं यदि क्षिप्रं न सि-
ध्यति॥ तदावयववयोगेन योगी योगान्समभ्यसेत्॥ पादांभोजमनोद्यातनखचंद्रिजस्व-
चित्रिते॥ जंघायुग्मेन पारामकदलीकांडशोभिते॥ ऊरुयुग्मे मत्तहस्तिकरदंडसमप्रभे॥
गंगावर्त्तगंभीरे च नाभौ मृद्धिविलेपते॥ उदरे वक्षसि तथा हारश्रीवत्सकौस्तुभे॥ पूर्ण-
चंद्रायुतप्रख्ये लक्ष्याद्येचारुकंतले॥ शंखचक्रगदांभोजदीर्घदंडपरिमंडिते॥ सहस्रा-
दित्यसंकाशे किरीटे कुंडलद्वये॥ इयस्थाने जपेन्मंत्री विशुद्धः शुद्धचेतसा॥ मनो निवे-
श्य रूपे चैतन्मयो भवति ध्रुवं॥ यावन्मनो लयं याति कृष्णे स्वात्मनि चिन्मये॥ रूपे स्तूप-
लक्षणं॥ तावदिमं मनुं मंत्री जपहोमैः समभ्यसेत्॥ अतःपरं नैव किंचित्कृत्यमस्तित-
तो हरे॥ विदिते परतत्वे तु समस्तैर्नियमैरलं॥ तालवृंतेन किं कार्यं लब्धे मलयमारुते॥

मंत्राभ्यासेन योगेन ज्ञेयं ज्ञानाय कल्पते॥ न योगेन विना मंत्रो न मंत्रेण विना हि सः॥ द्वयो-
रभ्यासयोगो हि ब्रह्मसंसिद्धिकारणं॥ तमःपरिवृते गेहे घटो दीपेन दृश्यते॥ एवं मायावृतो
ह्यात्मा मनुना गोचरीकृतः॥ एवं ते कथितं ब्रह्मन्मंत्रयोगमनुत्तमं॥ दुर्लभं विषयासक्तौ
सुलभं त्वादृशामपि॥ ॥अथ प्रकारांतरमाह॥ शारदायां॥ वर्णावलंगुलायामंदारीरमु-
न्मयात्मकं॥ गुदध्वजांतरे कंदमूर्ध्वे द्व्यंगुलं विदुः॥ तस्य हि मुख्य विस्तारं वृत्तरूपेण चो-
त्रितं॥ नाड्यस्तास्समुद्भूता मुख्यास्तिस्रः प्रकीर्तिताः॥ इडायाने स्थिता नाडी चित्राख्या योगि-
वर्त्मना॥ ब्रह्मरंध्रं विदुस्तस्य पद्मसूत्रनिभं परं॥ आधारस्थविंदुस्तत्रमतस्तेदादनेकधा॥ दि-
व्यमार्गमिदं प्राहुरमृतानंदकारणं॥ इडायां संचरेदिंदुः पिंगलायां दिवाकरः॥ ज्ञातो योग-
विदानंदैः सुषुम्नायां तु तावुभौ॥ आधारकंदमध्यस्थं त्रिकोणमतिसुंदरं॥ ज्योतिषां निलयं
दिव्यं प्राहुरागमवेदिनः॥ तत्र विद्युल्लताकारा कुंडली परदेवता॥ परिस्फुरति सर्वाभा सूक्ष्मा
हि सहस्राकृतिः॥ बिभ्रति कुंडलीशक्तिरात्मानं हंससंस्थिता॥ हंसः प्राणाश्रयो नित्यं प्राण-

नाडी यथाश्रया॥ आधाराकुंचनाद्वायुर्यथावत्सर्वदेहिनां॥ देहं प्राप्य स्वनाडीभिः प्रयाणं कुरु
ते बहिः॥ द्वादशांगुलमानेन तस्मात्प्राणइतीरितः॥ रम्येमृद्वासने कृष्णे पद्मासनकृते नरे॥ ब
द्धे कमासनं योगी योगमार्गपरो भवेत्॥ ज्ञात्वा कृतोदयं देहे यथावत्प्राणवायुना॥ ततं दृतं
यत्नेदेहे दृढत्वा बाहयेत्सुधीः॥ आसनं च कृतोदये प्राणगुके॥ अंगुलिभिर्दृढं बध्वा करणानि
समाहितः॥ अंगुष्ठाभ्यामुभे श्रोत्रे तर्जनीभ्यां विलोचने॥ नासारंध्रे च मध्याभ्यामनामाभिर्वद
नं दृढं॥ बध्वाथ प्राणमनसामैकत्वं समनुस्मरन्॥ धारयेन्मारुतं सम्यक् योगी यं योगी
वत्सलः॥ नादः संजायते तस्य क्रमादभ्यसतां शनैः॥ मत्तभृंगावलीगीतसदृशः प्रथमध्वनिः
वंशीकस्यानिलापूर्णविंशाध्वनिनिभोपरः॥ घंटारवसमः पश्चात् घनमेघस्वनोपरः॥ एव
मभ्यसतः योगी संसारध्वांतनाशनः॥ तमुत्पद्यते पूर्वं हंसलक्षणमव्ययं॥ पुंरूपात्मको
प्रोक्तौ बिंदुसर्गौ मनीषिभिः॥ ताभ्यां क्रमात्समुद्भूतौ बिंदुसर्गावसानको॥ हंसो तौ पुंप्रकृत्याख्यौ
हंसः पुमान् प्रकृतिस्तु सः॥ अजपा कथिता ताभ्यां जीवो यामुपतिष्ठते॥ पुरुषं त्वाश्रयं मत्वा

८८२

प्रकृतिर्निर्ममात्मनः॥ तदा तद्भावमाप्नोति तदा सोहमियं भवेत्॥ सकारं च हकारं च लोपयि
त्वा ततः परं॥ संधिं कुर्यात्पूर्वरूपं तदासौ प्रणवो भवेत्॥ परमानंदमयं नित्यं चैतन्यैकगु
णात्मकं॥ आत्मायोगे सततं योगी प्रणवं भावयेत्सदा॥ आत्मायवाचामतिदूरमाद्यं स्वसं
वेद्यगुणेन संततिः॥ आत्मानमानंदरसैकसिंधुं प्रपश्यति तं तारकमात्मनिष्ठाः॥ सत्संहेतु
विवर्जितं प्रकृतिगिरामगम्यं गगनाकारमात्मस्थावरजंगमं निरूपमं चेतनमंतर्गतं॥ आत्मा
नं रविवह्निचंद्रवपुषं तारात्मकं संततं नित्यानंदगुणमयं स्फुरतिनः पश्यंति बद्धेंद्रियाः॥
तारस्य पंचविधवैः परिचीयमानं मनैव गम्यमनिरीक्ष्यतिमौलिमृग्यं॥ स्वं चित्तस्य मस्तग
मनेश्वरमच्युतं तत्तत्तेजः परं भजेत सांद्रसुधांबुराशिं॥ हिरण्मयं दीप्तमनेकवर्णं त्रिमू
र्त्तिमूर्त्तिं निगमादिबीजं॥ अंगुष्ठमात्रं पुरुषं भजंति चेतस्यमात्रे रविमंडलस्थं॥ ध्यायंति
दुग्धाब्धिभुजंगभोगे शयानमाद्यं कमलासहायं॥ प्रफुल्लनेत्रोत्पलमंजनाभं चतुर्मुखे
नाश्रितनाभिपद्मं॥ आम्नायगंधिचरणं घननीलमुद्यच्छ्रीवत्सकौस्तुभगदांबुजशंखच

८८३

कं॥ हृत्पुंडरीकनिलयं जगदेकमूलमालोकयंति कृतिनः पुरुषं पुराणं॥ बिंदोर्नादसमुद्ग
वः समुदितेनादेऽजगत्कारणं तारेतत्वमुखांबुजं परियतं वर्णात्मकाऽभजे॥ आम्नायां प्रि
तृहृयं पुररिपोरानंदमूलं वपुः॥ पायाद्वो मुकुटेंदुखंडविलसद्दिव्यामृतौघाप्लुतं॥ पिं
तयेत्कुंडलिनीशिवात्मपादांतु हंसः सकलांतरात्मा॥ रूपं स्मृतं बिंदुरमंदकांतिरतीत
पंशिरसामवरूपं॥ पिंडादियोगं शिरसामरस्मात्तत्सज्ञीवयोगं प्रवदंति संतः॥ शिवेलय
नित्यगुणानियुक्ते निर्बीजयोगं प्रलकुर्वपद्मं॥ मूलोन्निद्रभुजंगराजसदृशीं यांतीं सुषु
म्नांतरं भित्वाधारसमूहमाशुविलसत्सौदामिनीसन्निभां॥ व्योमांभोजगतेंदुमंडलग
लद्दिव्यामृतौघेगतिं संभाव्य स्वगृहं गतां पुनरिमां संचिंतयेत्कुंडलीं॥ हंसं नित्यमनंत
मव्ययगुणं स्वाधारतो निर्गता शक्तिः कुंडलिनी समस्तजननी हस्ते गृहीत्वा च तं॥ याता
धामनिकेतनं परमुखं तेनानुभूयस्वयं स्वां तास्वाश्रयमर्ककोटिरुचिरा ध्येया जगन्मोहि
नी॥ अव्यक्तं परबिंदुसंचिततनूनीवारिशिवस्यालयं शक्तिः कुंडलिनीगुणत्रयवपुर्वि

द्युदत्तारसन्निभा॥ आनंदामृतमभ्यगं पुरनिदं चंद्रार्ककोटिप्रभं॥ स्वं वीहं स्वपुरं गतानं
तं वतीध्येयानवद्यागुणैः मध्ये रंध्रसमीरणाद्द्यमथः संघट्टसंक्षोभितां॥ ह्राहृस्तोत्तम
तीत्वतेजसि तडित्कोटिप्रभाऽडंबरेऽत्कांतिसमुपास्याये न वतरासिंहूर संध्यारुणां॥ सं
दानंदसुधामयीं परशिवप्राणां परां देवतां॥ गमनागमनेषु जाग्रतीं घकीतनुयाद्योगपृ
ज्ञानिकुंडली॥ मुदिता कुलकामधेनुरेषा भजतां कांक्षितकल्पवल्लरी॥ वेदार्थसाध्य
विपरीतविलोकनेन प्रायो न च यज्ञनलोपमवेत्तमातः॥ तां द्युठकुरविवदीकरणे
नज्ञातान्ददोषान्दमस्वतत्वपारयुगा अथाचे॥ ॥श्रीकृष्णात्रीवागीशीनहाचार्य
यसंग्रहं॥ दक्षानधीतरागस्मालिधीराध्यापयस्सांप्रतं॥ १॥ ॥छ॥ ॥इति
श्रीमहोपाध्यायश्रीकृष्णानंदवागीशभट्टाचार्यकृततंत्रसारः समाप्तः॥ ॥
॥श्रीरस्तु॥ ॥कल्याणमस्तु॥ ॥शुभं भवतु॥ ॥श्री॥ ॥श्री॥ ॥